## KĀTYĀYANĪYAPARIŚIṢṬA–MŪLYĀDHYAYA WITH COMMENTARY.

*By Vaidyanātha.*

This is a commentary on the Mūlyādhyāya Pariśiṣṭa of Kātyāyana, by Vaidyanātha. Mūlyādhyāya deals with the valuation of cows and other things offered as Dakṣiṇā in the Vedic sacrifices. This value as fixed by the author is to be offered in lieu of cows and other valuable presents. The commentary on the Mūlyādhyāya is a scholarly discussion on the exact meaning of the words Paṇa, Niṣka, Kārṣāpaṇa, etc., which were the different kinds of coins current in olden days.

The commentator quotes many authorities in his support and states that his commentary is based on an earlier commentary on the Mūlyādhyāya by Gopāla. Vaidyanātha seems to have written two commentaries on the Mūlyādhyāya of Kātyāyana, one short and the other long. The long version comprises 3200 Granthas and is described under No. 1002 of Hps. II. of the Asiatic Society of Bengal. It is attributed there to Pāyaguṇḍa Vaidyanātha. The commentary under description represents the short version comprising 300 Granthas and is attributed to Vaidyanātha without the epithet of Pāyaguṇḍa.

*Beginning* :—

श्रीगणेशाय नमः ।

व्याख्यातुं वैद्यनाथोऽहं श्लोकान् कात्यायनेरितान् ।
प्रणमामि गणेशानं सापर्णं गिरिशं गुरुम् ॥

तत्र श्रीनारायणप्रीत्यर्थं प्रत्यक्षं गोदानं हि कर्त्तव्यत्वेन श्रुत्यादिष्वात्मानं [ ष्वाम्नातं ] सति सामर्थ्ये । तदभावे तत्प्रतिनिधि[ धीन् ]कात्यायन आह । तथाहि–

द्वात्रिंशत्पणिका गावश्चतुष्कार्षापणो वरः ।
वृषे षट् कार्षापणका अष्टावनडुहः स्मृताः ॥

× × × × ×

अत्र कात्यायनः प्रतिनिधिषु वक्तव्येषु दक्षिणात्वेन सर्वयागप्रदेयत्वात् सकलदेवता-निवासत्वेनाभ्यर्हितत्वाच्च पूर्वं गोमूल्यमाह–द्वात्रिंशत्पणिका गाव इति ।

*End* :—

नित्यस्य यथाशक्त्युपबन्धात् वित्तासम्भवेऽप्यनुष्ठानं भवत्येव । न काम्यस्येति । ‘ वित्ताभावेऽप्यतो न्यूनं न सङ्कोचोऽपि सम्भवेत् । ’ इति वचनात् । अतोऽस्मादधमपक्षा-दपि न्यूनं कल्पनीयम् । द्वितीयोऽपिशब्दः कथञ्चनेत्यर्थः । कथञ्चिदपि सम्भवे न सङ्कोचो न्यूनीकरणं किन्तु मुख्य एवमिति सङ्क्षेपः ।

गोपालेन कृता व्याख्या वैशद्यं प्रापिता मया ।
तुष्टोऽस्तु दक्षिणामूर्तिर्दक्षिणाविवृतेर्मुदा ॥

*Colophon* :—

इति कात्यायनीयमूल्याध्यायस्य वैद्यनाथकृतव्याख्यानं समाप्तम् ।

Following authorities are quoted here:—

बृहस्पतिः, नारदः, ब्रह्मपुराणम्, मदनरत्नकारः, विष्णुः, याज्ञवल्क्यः, लीलावती, हेमाद्रिः, गोपालविवरणम्, भट्टसोमेश्वरः, मनुः, मिताक्षरा, भविष्योत्तरम् ।

---

7

## 46. मूल्याध्यायवृत्तिः ।

### MŪLYĀDHYAYAVṚTTI.

*By Viṭṭhala.*

This is another commentary on Kātyāyana's Mūlyādhyāya by Viṭṭhala, son of Bālakṛṣṇa Vaiṣṇava and the brother of Veṅkaṭādri. This is an exhaustive commentary on the subject and the author quotes many authorities in support of his views. From his work, it appears evident that he was well-versed in ancient works on mathematics and was acquainted with the various weights and measures current in different parts of India. After completing the commentary on the

Mūly.idhyāya, the author writes in lependently on Bhūmāna or land-survey and quotes abundantly from the Lilāvati of Bhāskarācārya and other works on mathematics.

*Beginning* :—

श्रीगणेशाय नमः । निर्विघ्नमस्तु ।

नत्वा श्रीशं मोहिनीरूपदेहं मातापित्रोश्चापि पादौ कराभ्याम् ।
धृत्वा मूलाध्यायवृत्तिं विधत्ते ज्योतिर्विच्छ्रीबालकृष्णार्यसूनुः ॥ १ ॥
यस्याग्रजो याज्ञिककर्मभे(वे)त्ता प्रचण्डयज्ञादिविधौ पृथिव्याम् ।
अभूच्च नाम्ना किल वेङ्कटाद्रिप्रभोश्च पश्चाद्भव एक आसीत् ॥ २ ॥

तत्र कात्यायनाचार्योऽभ्यर्हितत्वात्सर्वत्र प्रदेयत्वाच्च गोमूल्यमेव प्रथमतो वदति-द्वात्रिंशत्पणिका गाव इति ।

× × × × × × ×

अथ प्रसङ्गाद्भूमानमुच्यते । तत्परिभाषां लीलावत्यां भास्कराचार्य आह-

यवोदरैरङ्गुलमष्टसङ्ख्यै-
हस्तोऽङ्गुलैःषड्गुणितैश्चतुर्भिः ।
हस्तैश्चतुर्भिर्भवतीह दण्डः
क्रोशः सहस्रद्वितयेन तेषाम् ॥

× × × × × × ×

गोचर्ममानमनेकप्रकारमुक्तम् । तत्र फलतारतम्यं कल्प्यमित्युद्योतकारः । अन्ये तु दशहस्तपञ्चहस्तादि गोचर्ममानं शान्त्यादिलघुकर्मविषयम् । बृहन्मानं तु मह्यादिमहादानविषयमिति व्यवस्थां जगदुः । युक्ता चैषा व्यवस्था । इति भूमानम् ।

अधुना धान्यमानमुच्यते । तत्र तावद्धस्तमाननिरूपणप्रसङ्गेन मागधीयधान्यमानपरिभाषामप्याह लीलावत्यां भास्कराचार्यः ।

× × × × × × ×

इति प्रकारद्वयेन मागधदेशीयधान्यमानमुक्त्वेदानीं सर्वदेशसाधारणमाह भविष्यपुराणे-

पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतम् ।
चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः ॥

*End* :—

द्रोणाढकयोर्मानान्तरमुक्तमाचारदीपे पराशरेण–' प्रस्था द्वाविंशतिर्द्रोणः स्मृतो द्विप्रस्थ आढकः । ' इति ।

अत्र बहु वक्तव्यमपि ग्रन्थविस्तरभीतेर्ग्राहकाभावाच्च नोच्यत इति दिक् ।

*Colophon* :—

इति श्रीश्रीपुरनगरस्थवैष्णवोपनामकबालकृष्णात्मजविट्ठलेन विरचितायां मूल्याध्यायवृत्तौ द्वितीयस्तरङ्गः ।

## 49. कात्यायनीयपरिशिष्टम्–यज्ञपार्श्वम् ।

### KATYĀYANĪYAPARIŚIṢTA YAJÑAPĀRŚVA.

The Yajñapārśva is the 15th Pariśiṣta of Kātyāyana. It has two recensions, one short and the other long and they are noticed under work Nos. 47 and 48 of this catalogue. The present work, however, represents a third version of the Yajñapārśva which is entirely different from the two versions above referred to.

The longer version noticed under No. 47 is divided into two parts, the first having 98 and the second 225 verses. For a full description of this version *see* IO. II. 4697–4698.

The shorter one noticed under No. 48 has only 176 verses and is similar to the second part of the longer version. For a full description of this version *see* IO. I. 362, IO. II. 4699 and W. I. 261. There are two more MSS. of the Yajñapārśva and these are described under Nos. 992–993 of Hps. II. They contain again different versions and do not agree with any of the known Yajñapārśva MSS.

The present work which is different from all seems to be a later production in the form of a Nibandha work of the Dharmaśāstra literature, because of its large citations from the Smṛti works and authors such as Sāyaṇācārya, Smṛticintāmaṇi, Caturviṁśatimata, Prayogapārijāta etc. Besides dealing with Srauta matter, it is largely devoted to Smārta, Gṛhya and Prāyaścitta subjects. This also includes other small works such as the Darśapūrṇamāsavihāra, Cāturmāsyavihāra, Mūlyādhyāya, etc. at the end. The authorship is nowhere attributed to Kātyāyana, but sometimes even Kātyāyana is cited as an authority.

*Beginning*:—

श्रीमहागणपतये नमः । श्रीलक्ष्मीनृसिंहाभ्यां नमः ।
अग्निहोत्रं मुनिश्रेष्ठ यस्मिन्देशे प्रवर्तते ।
दशयोजनविस्तीर्णं काशीक्षेत्रं तदुच्यते ॥ १ ॥
दशसु प्राप्यते विद्या शतेष्वग्निपरिग्रहः ।
अग्निहोत्रिसहस्रेषु सोमं पिबति मानवः ॥ २ ॥
ऋत्विगात्मा धन जाया शुद्धं यस्य चतुष्टयम् ।
तस्याग्निहोत्रं स्वर्गाय नरकायेतरस्य च ॥ ३ ॥
यस्य न स्युस्त्रयः पुत्रा लक्षं लक्षार्द्धमेव वा ।
स कथं मत्तमातङ्गमग्निहोत्रमुपासते ॥ ४ ॥

पराशरस्मृतौ–

इष्टापूर्तं च कर्त्तव्यं ब्राह्मणैश्च प्रयत्नतः ।
इष्टेन लभते स्वर्गं पूर्ते मोक्षमवाप्नुयात् ॥ ५ ॥

× × × ×

अथेष्टादौ सूत्रनिर्णयः । स्मृतिसङ्ग्रहे-

इष्टापूर्तादिकं कर्म स्वशाखोक्तं न विद्यते ।
तत्र बौधायनं ग्राह्यं बह्वृचादिभिरादरात् ॥ १४ ॥

यज्ञकाण्डे-

यजुषो बहुशाखत्वात्सन्देहे समुपस्थिते ।
कां शाखामवलम्बेरंस्तादर्शी बह्वृचा इति ॥ १५ ॥

× × × ×

अथाग्न्यायतनप्रकार उच्यते ।
उदितं लक्षणं गूढं यज्ञतन्त्रसुधानिधौ ।
यद्यप्यायतनानां तु स्पष्टं तत्कथयाम्यहम् ॥

× × × ×

इति दर्शपूर्णमासयोर्विहारलक्षणम् ।

अथ चातुर्मास्यविहारः । × × ×

अथ पात्राणां लक्षणम्-

श्रौताङ्गभूतपात्राणां लक्षणं तु मयोच्यते ।
हस्त्योष्ठयो हंसमुख्यश्च तथा वायसपुच्छकाः ॥
त्रिप्रकाराः स्रुचो ज्ञेयास्त्रित्वं चासां विकल्पितम् ।

*End:—*

याज्ञवल्क्योऽपि-

जालसूर्यमरीचिस्थं त्रसरेणु रजः स्मृतम् ।
तेऽष्टौ लिक्ष्या तु तास्तिस्रो राजसर्षप उच्यते ॥
गौरस्तु ते त्रयः षट्के यवमध्यस्तु ते रयः ।
कृष्णलः पञ्च ते माषस्ते सुवर्णास्तु षोडश ॥
पलं सुवर्णाश्चत्वारः पञ्च वातं प्रकीर्तितम् ।
द्वे कृष्णले रूप्यमाषो धरणं षोडशैव तु ॥
शतमानं तु दशभिर्धरणैस्तु पलमेव च ।
निष्कः सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः ॥ इति ॥

कृष्णलो गुञ्जेत्यर्थः ।

*Colophon* :—इति श्रीयज्ञपार्श्वमूलाध्यायः ।

*Post-Colophon* :—तपोमासि सिते पक्षे प्रतिपच्छनिवासरे ।
यज्ञपार्श्वाध्यायमिमं देवरामो व्यलीलिखत् ॥

The following authorities are quoted herein.—

पराशरस्मृतिः, यज्ञकाण्डम्, शौनकः, स्मृतिसङ्ग्रहः, चतुर्विंशतिमतम्, स्मृत्यर्थसारः, आश्वलायनः, कारिका, पैठीनसिः, दामोदरनिबन्धः, आधानदीपिका, बृहस्पतिः, वृद्धशौनकः, प्रचेताः, स्मृतिचिन्तामणिः, याज्ञवल्क्यः, सायणाचार्यः, व्यासः, स्मृतिदीपिका, गोपीनाथः, यज्ञतन्त्रसुधानिधिः, शातातपः, गोभिलः, सुमन्तुः, प्रयोगपारिजातः, मदनपारिजातः, षट्त्रिंशन्मतम्, रत्नगुप(?), छन्दोगपरिशिष्टम्, प्रदीपचण्डी, दक्षस्मृतिसङ्ग्रहः, विष्णुः, कात्यायनः, आपस्तम्बः, स्मृतिभास्करः ।

## 54. कात्यायनीयशुल्बसूत्रव्याख्या ।

## KĀTYAYANĪYAŚULBASŪTRAVYĀKHYA.

*By Naimiṣa Rāmacandra.*

This is a shorter recension of the commentary on Kātyāyana's Śulbasūtra by Naimiṣa Rāmacandra. The longer recension which is noticed here under work No. 53 contains 200 Granthas more than the shorter one. The first two chapters of the longer version are printed in the Kāśīvidyāsudhānidhi Series. The author Naimiṣa Rāmacandra composed this commentary in Saṁvat 1510, and he gives full information about himself and his teacher in the beginning and at the end of the longer version of his commentary.

*The beginning of the longer version:*—

विष्णुं यज्ञभुजं नत्वा रामो निमिषमाश्रितः ।
सम्राजोऽग्निचितः सूनुः सूर्यदासस्य धीमतः ॥
स्वयं कृतस्य सिद्धान्तवार्तिकस्य समाश्रयन् ।
करोति शुल्बसूत्राणां वृत्तिं बालावबुद्धये ॥

*The end of the longer version:*—

ज्ञानायानुजशत्रुघ्नस्याशातिथिमिते (1510 Sam.) कृता ।
विक्रमे वत्सरे वृत्ती रामचन्द्रेण नैमिषे ॥
श्रीपर्वतान्तिकचरत्रिपुरारिभट्टैः
सूत्रेऽत्र लम्भितपथाः पितृपूज्यपादाः ।
यावत्तमर्थमवदन् विहितः प्रपञ्च-
स्तस्यैव वार्तिकपदैरनया च वृत्त्या ॥
हीरस्वामिनमीडे काश्मीराचार्यमात्तगणितविधिम् ।
यस्माद्धीमत्प्रवरान्मयेदमुद्घाटितं शास्त्रम् ॥
अर्थे क्वचित्तु न गुरोरुपदेशगामिँ
नो वेदभाष्यविषयेऽपि य ईक्षितार्थः ।
उद्घाटितस्तु यदसौ गुरुचित्तवर्ती
कश्चित्कृपातिशय एव हि तत्र हेतुः ॥
शुल्बे क्रतुकृतां नेत्रे मखदेशप्रकाशके ।
अबोधव्याधिकलिले वृत्तिर्भेषजमस्त्वियम् ॥
छात्रबोधाय कृत्वेमां वृत्तिं यत्पुण्यमर्जितम् ।
तदर्पितं मया यज्ञभोक्त्रे देवाय विष्णवे ॥

*Colophon:—*

इति वैशालाख्येयनैमिषीयसोमसुद्रामचन्द्रकृतायां शुल्बसूत्रवृत्तौ षष्ठी कण्डिका समाप्ता ।
संवत् १६७४ वर्षे × × जयदेवन लिखितम् ।

Two important facts are revealed in the above· firstly, that he composed this work to help his younger brother Śatrughna, and secondly, that his father Sūryadāsa was taught by one Tripurāri Bhaṭṭa. The author further states that he learnt the Śulba and mathematics from one Hīrasvāmin of Kashmir and that he had composed a Vārttika also on Kātyāyana's Śulba. He quotes Karkācārya, an earlier commentator, and he is himself quoted by a later writer Mahīdhara who also composed a commentary on this Śulba in Saṁvat 1646.

The shorter version of this commentary does not, however, contain the verses found in the longer version.

*Beginning:—*

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

रामो नैमिषवास्तव्यः सोमपीथी गुरून् हरिम् ।
प्रणम्य वृत्तिमाधत्ते शुल्बसूत्रेष्वविस्तराम् ॥ १ ॥
उद्धृत्य सारभूतार्थं स्वकृतात् शुल्बवार्त्तिकात् ।
सूत्रार्थविवृतिद्वारा बालेभ्यः प्रददे स्फुटम् ॥ २ ॥

रज्जुसमासं वक्ष्यामः । प्रतिज्ञासूत्रमेतत् । पुरुषार्थार्थप्राप्तिकारणवेदप्रतिपादितानां यज्ञानां देशाधीनसिद्धिकत्वात् कल्पसूत्रशेषभूतः प्रदेशसाधनज्ञानोपायो रज्जुसमासः शुल्बापरपर्यायः कात्यायनाचार्येण वक्तुमारब्धो ज्ञातव्यः ।

*End:—*

भवन्ति चात्र श्लोकाः । रज्जुसमासं वक्ष्याम इत्यारभ्योपदिष्टेऽर्थे श्लोका आचार्यप्रसिद्धा वर्तन्ते । 'संख्याज्ञः परिमाणज्ञः समसूत्रनिरञ्छकः ।' इत्यादयः । ते चास्माभिस्तत्र तत्र विवृता एव ये गूढार्था इति शिवम् ।

शुल्बे ऋतुकृतां नेत्रे मखदेशप्रकाशके ।
अबोधव्याधिकलिले वृत्तिर्भेषजमस्त्वियम् ॥
उच्छेत्तुं जनमोह यातु विरतिं मन्त्रा महीदेवती(?)
देवेन्द्राश्रमरामनाम उद्भूत्तस्यानुकम्पास्पदम् ।
सम्राडन्वयगोपयाज्ञिकसुतः श्रीनैयजइ(?)
त्यास्ते तस्य कृते तनोति विवृतिं शुल्बस्य रामः स्फुटाम्

*Colophon.—*

इति नैमिषीयसोमसुद्रामचन्द्रकृतायां शुल्बवृत्तौ षष्ठी कण्डिका समाप्ता ।

*Post-Colophon.—*

वेददस्रहयभू[सं. १७२४]मितेऽब्दके विक्रमाद्यतिसहस्सिते तिथौ ।
वैष्णवो व्यलिखदुद्धवात्मजः शुल्बसूत्रविवृतिं गुरुप्रियः ॥ विजयन्ते गुरवः ।

रामवाजपेयिकृतशुल्बसूत्रवृत्तिपुस्तकमदः शुक्लीकोपनामोद्भवस्य । पत्र ३७ ।

---

10

## 62. जैमिनिश्रौतसूत्रभाष्यम् ।

## JAIMINIŚRAUTASŪTRABHĀṢYA.

*By Bhavatrāta and Jayanta.*

This is a commentary by Bhavatrāta on the Jaiminīyaśrautasūtra belonging to the Talavakāra Śākhā of the Sāmaveda. The Jaiminīya-śrauta is divided into three parts–Sūtra, Kalpa and Paryadhyāya-pariśiṣṭa. The Sūtra portion treats of the Agniṣṭomaprayoga only and it was printed in the year 1906 at Leiden. The second part of the Jaiminīyaśrauta, namely the Kalpa, is divided into four parts to wit. Stomakalpa, Prakṛtikalpa, Saṁjñākalpa and Vikṛtikalpa. Paryadhyāya-pariśesa–the third part of the Śrauta, consists of 12 chapters and the object of this part is to clear the doubtful points in the Sūtra and Kalpa portions, and to add information on sacrifices.

Bhavatrāta comments upon all the three parts, but the text of the Kalpa and Paryadhyāya is no longer available. At the end of the commentary of the Sūtra portion there is a small but independent work in the form of Kārikās which elucidates doubtful points in the Sūtra portion. Its authorship is attributed to one Mādhava besides Bhavatrāta. It is difficult to understand whether this Mādhava is a collaborator or merely a copyist. In the beginning of the commentary, Bhavatrāta gives his genealogy from which we learn that he was the son of Mātṛdatta, disciple of Brahmadatta, and belonged to the Māṭharakula.

From the last colophon of the work, it appears that Bhavatrāta for some reason or other could not comment upon the last portion of the Paryadhyāyapariśiṣṭa. It was, therefore, necessary for his son-in-law, Jayanta who was also his nephew and disciple to complete the work by commenting on those chapters left out by Bhavatrāta. The MS. under description is incomplete in the middle because a portion of the Parya-dhyāyapariśeṣa extending from the middle of the second Khaṇḍa of the first Adhyāya to the middle of the third Khaṇḍa of the third Adhyāya is missing. This copy evidently has been prepared by two scribes, as the first 46 leaves are in the Grantha script, while the later portion is in the Devanāgarī script.

*Beginning:—*

ॐ हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । जैमिनये नमः ।
नमस्त्रिनेत्राय जितात्मजन्मने विजन्मने जन्मनिवृत्तिहेतवे ।
नभस्वदाकाशकृशानुमेदिनीजलेन्दुभास्वद्यजमानमूर्तये ॥
जिगाय देवानपि यः स्वतेजसा विवेद च व्यास च वेदसागरम् ।
परावरज्ञः स पराशरात्मजो मया महात्मा प्रणिपत्यते मुनिः ॥

वेदार्थतत्त्वामलदर्पणं यश्चकार लोके ततकीर्ति शास्त्रम् ।
ज्ञानैकधाम्ने विदधामि तस्मै कृताञ्जलिर्जैमिनये नमस्याम् ॥
ध्यानेनारमयत्त[त्प]रं त्रिणयनं सोमेन यो वासवं
विप्रान् वेदतदङ्गतत्त्ववचनैर्वित्तेन विद्वज्जनम् ।
वन्दे ब्रह्मविदं द्विजन्मतिलकं तं ब्रह्मदत्ताह्वयं
तत्पादाम्बुजसेवनोपजनितप्रज्ञालवः प्राञ्जलिः ॥

× × × × × × ×

मुनेर्ब्रह्मनिधेस्तस्य काश्यपस्य महात्मनः ।
बहवः प्रथिता वंशा विवस्वत इवांशवः ॥
तेषु यस्याभवद्दाषिर्मठरो मण्डनं परम् ।
मधुः संवत्सरस्येव मणिः फणिपतेरिव ॥
तस्मिन् सञ्जज्ञिरे वंशे सामगा गुणशालिनः ।

× × × × × × ×

तस्य पुत्रो बुधसमः सामर्ग्यजुषु पारगः ।
अवनीन्द्रैरवन्ध्याज्ञैः शिरसा धृतशासनः ॥

× × × × × × ×

आसीदनवमोत्साहः सर्वेषु खलु जन्तुषु ।
मातृतुल्यदयो नाम्ना मातृदत्त इति श्रुतः ॥
परां काष्ठां गतवतः स सुतं बोधकर्मणोः ।
विश्वामित्रजमुख्यस्य ब्रह्मदत्तस्य लब्धवान् ॥
तस्य जन्मनि यस्तेन स भवत्रात इत्यभूत् ।
स स्ववागनुसृत्यैव व्याकरोत्यध्वरागमम् ॥

श्रुतिविहितानां ज्योतिष्टोमादीनां क्रियाविशेषाणां नित्यनैमित्तिककाम्यानां तदधिकृतैः पुरुषैरवश्यानुष्ठेयत्वात् × × × × ×

एतदर्थं सर्वविधिपदार्थोपसंहारेण यज्ञशास्त्राणि प्राणीयन्त। तेष्विदमुद्गातृपदार्थ-प्रकाशनपरमाचार्येण जैमिनिना प्रणीतं शास्त्रम्। तत्र सर्वक्रतुप्रकृतित्वात् ब्राह्मणे च प्रथम-विहितत्वात् ज्योतिष्टोमोऽग्निष्टोमः प्रथमं प्रारभ्यते।

× × × × × × ×

*End of the Sūtra portion:—*

अथवेदं पूर्ववाक्यान्तर्भूतमेव। न तु वाक्यान्तरम्। तथाप्युक्तोऽर्थः सिध्यति। एव-मिदं यत्नतो मङ्गलान्तत्वं सूत्रस्य कृतम्। प्रथत इदं सूत्रं जगति। ये चेदमधीयीरन्नस्य चार्थमवबुध्येरंस्ते विश्वं शिवमश्नुवाना द्वयोर्लोकयोः समवेरन्निति।

इदमल्पतरं सूत्रमर्थतस्तु महत्तरम् ।
कवेर्वेदनिधेर्वक्त्रात्प्रसृतं प्रणवायते ॥

*Colophon:—*

इति जैमिनीयसूत्रवृत्तौ प्रकीर्णकः षड्विंशः खण्डः ।

*Post-Colophon:--*

पद्मनन्तसुखं निगदन्ति यद्गतधियां सुलभं कविपुङ्गवाम् ।
× × भवतु हैमवती पादयोः ॥

*Beginning of the Jaiminīyasūtrakārikā --*

श्रीभवत्रातृरचिता माधवेन मनोरमा ।
जैमिनीयस्य सूत्रस्य वृत्तिरेषा विलिख्यते ॥
विलिख्य वृत्तिं सूत्रस्य जैमिनीयस्य साम्प्रतम् ।
तस्यैव कारिका तेन माधवेन विलिख्यते ॥
वृत्तिं जैमिनिसूत्रस्य कृत्वा श्लोकानिमानपि ।
पठति स्म भवत्रातो भवन्नत्वा भवच्छिदम् ॥
प्रतिमन्त्रं नमादौ स्यात्पृच्छेत् कच्चिदिति त्वथ ।
विना प्रश्नाद्याज्यत्वे ज्ञाते न प्रतिमन्त्रणम् ॥

*End of the Kārikā --*

आप्नोत्युदवसानीयासमाहुतिरपीष्टिवत् ।
पिपालयिषता बालान् प्रमादात्संहृतं मया ॥
श्रुतिन्यायाविसंवादि मतमस्मद्गुरोर्गुरु ।
कारिका संशयच्छेदकारिका सूत्रगामिनी ॥
माधवेन मनस्सङ्गिमाधवेन व्यलिख्यत ॥

*Beginning of the Kalpa portion:--*

गाकोयाद्दीप्यमानं त्रयमतिबडवावह्निवालोचनानां(?)
च ॐ वातान्तमौर्वीभुजगमुखशतोद्भ्रान्तमग्नेशिखानाम् ।
बाणो वा तुल्यवर्णशिखिहरिशशिनां तन्मयो यस्य तिस्रो
भस्मीचक्रे समेतादनतनयपुरीस्तं प्रपन्नोऽस्मि शम्भुम्(?) ॥
आचार्यमार्यमहितं ख्यातं जगति जैमिनिम् ।
वन्दे यत्कृतकल्पार्थव्याख्यानायैवमुद्यमः ॥
पदवाक्यार्थयोरत्र सुवेदप्रायता यतः ।
कल्पवृत्तौ कतिपयप्रदेशान्यस्तता ततः ॥

अस्य खलु यज्ञशास्त्रस्य त्रयोऽवयवाः । सूत्रं कल्पं परिशेष इति । तत्र गते सूत्रे कल्पे वयं प्रवृत्ताः । चतुर्विधोऽयं कल्पः । स्तोमकल्पः प्रकृतिकल्पः संज्ञाकल्पः विकृतिकल्प इति ।

*End of the Kalpa:--*

अस्य लोपस्यापवर्तकमनुमिमीमहे वचनं यथा पवितौ यश उत्सेधयोर्यथा त्रिककुभौ नवमेऽह्नि अर्कपुष्पोत्सेधयोर्यथा च गर्गमध्यमेऽह्नि अहोतृपृष्ठेषु ।

चिन्त्यात्राजामिताचार्यो विध्यन्तरमनाश्रितः ।
लक्ष्मीरिव हरेर्यत्र स्य......हृदये त्रयी ॥

अस्माभिर्विकृतिकल्पस्य व्याख्याकाङ्क्षीणि वाक्यानि व्याख्यातानि । अप्रमादतः प्रदेशो ऽक्रान्तव्यः(?) ।

ब्राह्मणाभरणं ब्रह्म सामरूपं सहस्रधा ।
भिन्नं भूतिमतो वन्दे जैमिनेर्मुखनिःसृतम् ॥
क्वाहं मोहान्धकारस्थगितमतिपथः क्वैष मेधाविगाहै-
राकीर्णो वाक्यदुर्गैरवगमितमतिर्वृत्तिराचार्यकल्पः ।
व्याख्यातोऽभूत्तथापीश्वरगुरुदयया दुर्ग्रहांशोऽत्र यस्मि-
न्नेकाहाहीनसत्रात्मकमखविधयो ब्राह्मणाम्नायसिद्धाः ॥

*Colophon:—*

विकृतिकल्पः समाप्तः ।

*Beginning of the Paryadhyāyapariśeṣa:—*

सरसममृतं प्रश्च्योतन्तस्त्रयीमयमक्षरं
सरसिजभुवश्चत्वारस्ते जयन्ति मुखेन्दवः ।
नयनकमलैर्निद्रामुष्टैर्नयन्ति जगन्ति ये
प्रलयमुदयं निद्रापायप्रकाशितकान्तिभिः ॥

अथ-स्यामः । भगवानाचार्यो जैमिनिः सूत्रं कल्पं च प्रणीय तदर्थसन्देहनिरासाय तदनुक्तार्थवस्तुकृतये च द्वादशाध्यायीमेतां व्यधत्त । सैषा पर्यध्यायाख्यया प्रसिद्धिमेति ।

*End:—*

ऋतेऽपि सङ्ख्यावचनं व्याहृतिसाम्नामियत्तापरिच्छेदस्सुशक इति कृत्वा सङ्ख्या नोक्ता । कथमिति चेत् गायत्रेण परिनिष्ठितो मन्त्रगणः । यानि तत्र रथ्याव्याकराणि (?) गायत्रादर्वाञ्चि सप्तदश सामानि तानि व्याहृतिसामानीति विद्यादिति । ऋषिर्गायत्रस्य प्रजापतिः गायत्रेण परिनिष्ठितो मन्त्रगणः ।

व्याख्यानमिदमाख्यानमार्षेयस्य यथामति ।
ग्रन्थमानमिह प्रोक्तं चत्वारिंशच्छतं मया ॥
अग्निष्टोमाद्यनेकश्रुतिमपि विधिवज्जैमि[ने]र्यज्ञतन्त्रं
व्याचख्यावल्पशेषं मठ(र)कुलपतिः श्रीभवत्रातनामा ।
जामाता भागिनेयः प्र[ति]विततयशसस्तस्य शिष्योऽनुकूलो-
भारद्वाजो जयन्तो व्यरचयमनया व्याख्ययोक्तावशेषम् ॥
सूत्रं गृह्यं वैकृतं स्तोमसंज्ञं पर्यध्यायाद्यानुवाकत्रयं च ।
पश्चादन्यां विष्टुतीनां च कृतिं भावत्राती भूषयामास वृत्तिः ॥

पर्यध्यायावशेषा यदार्षेयं प्रकृतं च यत्परिहारविधिर्यश्च जायन्ती तत्र वर्तिता । यस्य व्याख्याऽवसिता । जैमिनये नमः ॥

## 11

## 76. बोधायनश्रौतसूत्रवृत्तिः ।

BODHĀYANAŚRAUTASŪTRAVṚTTI.

*By Gārgya Nārāyaṇa, son of Narasiṁha.*

This is a commentary on Bodhāyana's Śrautasūtra by Gārgya Nārāyaṇa who is reputed to be the commentator on the Āśvalāyana-śrautasūtra. The author Nārāyaṇa follows the views of Bhavasvāmin while commenting upon this Sūtra. The reason for Nārāyaṇa's taking upon himself the task of commenting on a work of the Bodhāyana School is, as he states, that the Āśvalāyanas have to follow the procedure as laid down in the Bodhāyana School in performing the Vedic sacrifices. The present MS. contains the commentary only on the first Praśna of the Bodhāyanaśrautasūtra.

*Beginning*—

श्रीगणेशाय नमः । श्रीलक्ष्मीनारायणाभ्यां नमः । श्रीयज्ञेश्वरचरणारविन्दाभ्यां नमः । बोधायनाचार्येभ्यो नमः । श्रीभाष्यकाराय भवस्वामिने नमः ।

प्रज्ञानानन्दमूर्तिः सकलदिगतिगः सर्वदा सन्ननन्यः
सर्वस्मात् स्वप्रकाशः स्थिरचरनिलयः प्रत्यगात्मा(स)देवः ।
श्रौतस्मार्तक्रियात्मा श्रुतिमननिदिध्यासवैराग्यलभ्यः
स ब्रह्मा विष्णुरीशः सकलमपि जगत् सर्वदाऽव्यादसौ नः ॥ १ ॥
गुणदोषविनिर्मुक्तं स्वप्रकाशमनाकुलम् ।
गम्भीरबोधमानन्दं नमामि ब्रह्म शाश्वतम् ॥ २ ॥
बोधायनं कल्पमूलं सर्वधर्मप्रवर्तकम् ।
भक्त्या नमामि साष्टाङ्गं भगवन्तं महामुनिम् ॥ ३ ॥
बोधायनीयकल्पस्य भाष्यं भगवता कृतम् ।
भवस्वामिसमाख्येन स्वल्पं चैवार्थविस्तृतम् ॥ ४ ॥
कल्पद्वैधादिसूत्राणां विविधं नयमिश्रितम् ।
तत्प्रसादान्मयेदानीं सुव्यक्ता वृत्तिरीदृशी ॥ ५ ॥
नारायणेन गार्ग्येण नरसिंहस्य सूनुना ।
मुख्यकल्पानुकल्पेषु बोधायनकृतेषु हि ॥ ६ ॥
मुख्यपक्षैकविस्तारा सुबोधैव यथामति ।
बह्वृचाद्यैरनुष्ठेयः कल्पो बोधायनीयकः ॥ ७ ॥
इत्युक्तेर्यज्ञपार्श्वस्य देवस्वामिमतेन च ।
सिद्धान्तिभाष्यकारेण स्पष्टीकृत्वात्प्रदर्श्यते ॥ ८ ॥

गर्भाधानादिसंस्कारसंस्कृतोऽधीतसषडङ्गवेदो न्यायतः कृतदार आहिताग्निरामावास्येन पौर्णमासेन वा हविषा यक्ष्यमाणः ।

*End:*—

यजमान आहवनीयस्य दक्षिणतस्तिष्ठन् दक्षिणपदाऽऽहवनीयं समस्तं त्रिभिः पदैः क्रमते । विष्णोः क्रमोऽसीति त्रिभिः पर्यायैः ।

× × × × × × ×

इष्टिं समाप्य तदानीमेवाग्न्यन्वाधानादि कृत्वाऽमावास्यायां व्रातपत्योर्ध्वं महेन्द्रमेव यजेत् ।

## 12

## 79. बोधायनश्रौतसूत्रव्याख्यासारः सुबोधिनीसारः ।

## BODHĀYANAŚRAUTASŪTRAVYĀKHYĀSĀRA SUBODHĪNĪSĀRA.

*(By Veṅkaṭeśaśrautin, son of Anantanārāyaṇaśrautin.)*

The Subodhinīsāra is a summary of the Subodhinī, a commentary on Bodhāyana's Śrautasūtra. The original Subodhinī is attributed to Mahādeva Vājapeyin by Aufrecht on the authority of a statement made by Dr. Burnell in his Classified Index to Skt. MSS. in the Palace at Tanjore. On page 19a of his catalogue Burnell describes a MS. of the Subodhinī and states that the author Mahādeva was an Adhvaryu of one Tryambakamakhin (of Sāhaji's time 1684–1710 A. D.) under whose orders he composed this commentary. The same MS. at Tanjore is again described in detail by Mr. P.P.S. Śāstri in 1929 under No. 2060 of his catalogue where the following verses occur:-

अस्ति बोधायनं सूत्रमाद्यमाध्वर्यवाश्रयम् ।
अधीतिबोधाचरणप्रचारैस्तत्प्रपञ्चयन् ॥
भारद्वाजान्वयाम्भोधिसुधांशुस्सतसु सम्मतः ।
त्रियम्बकाध्वरी लोके त्रय्यन्तज्ञः समेधते ॥
तदध्वर्युर्महादेववाजपेयी तदाज्ञया ।
बोधायनोक्तकर्मान्तद्वैधकल्पानुसारतः ॥
वैतानिकानां यज्ञानां भवस्वामिमतानुगाम् ।
कर्माध्वगानां सुगमां करोति श्रौतचन्द्रिकाम् ॥

These verses are found in the beginning of the preface or Upodghāta prefixed to the commentary–Subodhinī.

However, the authorship of Mahādeva Vājapeyin to the Subodhinī seems to be doubtful on the following grounds. In the verses quoted above, the work called Śrautacandrikā is ascribed to Mahādeva and not the Subodhinī. The preface in which these verses occur, is also found only in the Tanjore MS. of the Subodhinī. The other copies of MSS. of the Subodhinī preserved in this collection (work No. 77) and in the Asiatic Society of Bengal (Hps. II. 597 and L. I. 152) do not contain the preface or the verses cited above, but they begin only with the following benedictory verse which is not found in the Tanjore MS. of the Subodhinī.

नमस्कृत्य गुरून् सम्यग्भावार्थानवधारयन् ।
बौधायनीयसूत्रस्य कुर्वे वृत्तिं सुबोधिनीम् ॥

Mahādeva Vājapeyin is stated nowhere as the author of the Subodhinī in these MSS either in the beginning or at the end, or in any of the colophons. Even the colophons in the Tanjore MS. do not ascribe the authorship of the Subodhinī to Mahādeva.

On the other hand, there is a work called Śrautacandrikā belonging to the Bodhāyanaśrauta, ascribed to Mahādeva Vājapeyin, a MS. of which is preserved in the Sanskrit College Library, Benares. ( *See* Aufrecht. Cat. Cat. p. 676 and No 503 of the Benares Catalogue published in the year 1911). The same Benares Catalogue under No. 540 notices another MS. of the Subodhinī without the name of the author. Besides, the whole preface found in the Tanjore MS. of the Subodhinī, is also found in the beginning of the work called the Bodhāyanaśrautasūtraprayogavṛtti by Mahādeva Vājapeyin. *See* IO II. 4732.

It may be presumed, therefore, that Mahādeva Vājapeyin is the author of the Śrautacandrikā which may be the name of his Bodhāyanaprayogavṛtti noticed in the IO. Catalogue and not of the Subodhinī. The preface of the Śrautacandrikā or the Bodhāyanaprayogavṛtti by Mahādeva may have been erroneously prefixed by a scribe in the beginning of the MS. of the Subodhinī preserved in the Tanjore Palace Library. Under the circumstances the Subodhinī may at least be attributed to an author whose name is not known.

The manuscript of the Subodhinīsāra, under description, contains only the first and the fifth Adhyāyas of the third Praśna which deal with the Punarādhāna and Āgrayaṇa. The author's name is not found in this MS. since it contains only a fragment of the third Praśna. It may, however, be suggested here that this work is the same as the Subodhinīsāra noticed subsequently under No. 80 and Veṅkaṭeśaśrautin who is mentioned there as the author may be the writer of the present work also.

*Beginning*:—

श्रीगणेशाय नमः। अग्नीन्पुनराधास्यमानो भवति। आधानसंस्कृतानग्नीन् पुनर्निमित्तेनाधास्यमानः पुनराधानशब्दितेन कर्मणा साधयिष्यमाणो भवति। पुनराधाननिमित्तमाह कर्मान्ते। कियन्तु खलु पुनराधेयं भवतीत्यग्नीनाधाय पापीयानभूवम्।

*End of the Punarādheya* :—

पूर्वं कृतसोमयागस्याभावान्न सान्नाय्याकर्तुर्युक्तमिति। यदि पुनः संस्कृतया सोमेन यजेताथ सन्नयेदित्यन्ये अन्यशाखिन आचार्या आहुः। अतः सान्नाय्यविकल्पेन भवति।

पुनराधेये दशाध्याय्यां बोधयनसूत्रवृत्तिसुबोधिनीसारे तृतीयः खण्डः॥ ३॥

*End of the Āgrayaṇa* .—

न श्यामाकाग्रयणं न तन्त्रसमासं श्यामाकेनैव श्यामाकतृणमयेनैव प्रस्तरेणास्य यजमानस्य श्यामाकाग्रयणं कृतं भवतीति त्रीण्येवैतानि हवींषीति श्रुतेरित्याजीगविमतम्।

*Colophon* :—

बौधायनसुबोधिनीसारे आग्रयणे द्वितीयः खण्डः॥ २॥

*Post-Colophon* :—

विक्रमसंवत् १९७९ अधिकज्येष्ठकृष्णप्रतिपदि गुरुवासरे वटपत्तननिवासिना रेवाशङ्करतनूजेन पुरुषोत्तमशास्त्रिणाऽऽदर्शपुस्तकमनुसृत्य लेखनं समाप्तिं नीतं शोधितं च। इति शम्।

## 13

## 80. बोधायनश्रौतसूत्रव्याख्यासारः

## सुबोधिनीसारः ।

BODHĀYANAŚRAUTASŪTRAVYAKHYĀSĀRA
SUBODHINĪSĀRA.

*By Veṅkaṭeśa alias Aṇṇāśrautin, son of Anantanārāyaṇaśrautin.*

This manuscript of the Subodhinīsāra contains the commentary on the 2nd Praśna of the Bodhāyanaśrautasūtra which deals with the Ādhāna. The authorship of this Sāra is ascribed to Veṅkaṭeśaśrautin in the colophon and to Aṇṇāśrautin on the front leaf of the MS. It is possible that the author was known by these two names. The MS. of the Subodhinīsāra described above under No. 12, may possibly be the fragment of the 3rd Praśna of this Subodhinīsāra of Veṅkaṭeśaśrautin, though the author's name is not found there.

*Beginning.*—

अथ अण्णाश्रौतिकृताधानसुबोधिनीसारप्रारम्भः । श्रीगणेशाय नमः । श्रीशं वन्दे । हरिः ॐ । मन्त्रक्रमात्प्रथमं दर्शपूर्णमासौ व्याख्यातौ । सम्प्रत्याधानपूर्वत्वात्सर्वकर्मणां क्रमादाधानं व्याख्यातुमुपक्रमते । तत्रापि सर्वकर्मणामनुष्ठानस्य सङ्कल्पपूर्वकत्वादुपव्याहरणमारभते । सूत्रम् । अथोपव्याहरणं विज्ञायते । क्रत्वादौ क्रतुकामं कामयेत यज्ञाङ्गादौ यज्ञाङ्गकाममिति । प्रारिप्सितस्य तस्य कर्मण आरम्भसमीपे वचनमुपव्याहरणं विज्ञायते । ब्राह्मणं दर्शयत्यस्मिन्नर्थे ।

*End:*—

अन्वाहार्यमासाद्य मिथुनौ गावौ वृषभौ । गतमन्यत् । सन्तिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा । विसृजते व्रतम् । अथ पौर्णमासवैमृधाभ्यां यजते । सन्तिष्ठतेऽग्न्याधेयं सन्तिष्ठतेऽग्न्याधेयम् । आधानसमनन्तरमेवान्वारम्भणीयां पौर्णमास्यामेव कृत्वा ततः पौर्णमासवैमृधाभ्यां समानतन्त्राभ्यां भिन्नतन्त्राभ्यां वा यजेत । अत्र सन्तिष्ठत इति वचनात् पौर्णमासान्तकरणेनैवाधानफलं भवतीति ध्येयम् ।

*Colophon :*—

इति बोधायनसूत्रवृत्तिसुबोधिनीसारे त्रयोविंशतितमः खण्डः ॥ २३ ॥ षष्ठोऽध्यायः ।

इति श्रीअनन्तनारायणश्रौतिदीक्षितात्मजश्रीवेङ्कटेशश्रौतिदीक्षितविरचिते सुबोधिनीसारे द्वितीयः प्रश्नः समाप्तः । श्रीशं वन्दे ।

*Post-Colophon:*—

शाके १८०२ विक्रमे ज्येष्ठवदि चतुर्थ्यां भृगौ वृश्चिकपुरे पटवर्धनोपाह्वसीतारामेण लिखितमिदम् । श्रीः ॥

इत्यग्न्याधानसुबोधिनीसारः समाप्तः ।

**14**

## 81. भारद्वाजपरिशेषसूत्रम् ।

### BHĀRADVĀJAPARIŚEṢASŪTRA.

This is a Pariśeṣasūtra of the Bhāradvājaśrauta noticed under work No. 82. The works belonging to the Bhāradvāja School of the black Yajurveda are very rare. The Bhāradvājaśrautasūtra is available only up to the portion of the Jyotiṣṭoma. The Pitṛmedhasūtra of Bharadvāja which resembles the Pitṛmedhasūtra of Āpastamba and Hiraṇyakeśin is published by Dr. Caland. The Gṛhyasūtra of Bharadvāja described under Hps. II. 497 is also similar to the Gṛhyasūtra of Āpastamba. The Pariśeṣasūtra of Bharadvāja has been noticed by Dr. Buhler in his Gujarat Catalogue I. 186 without any description in detail. Aufrecht, in his Munchen Catalogue published in 1909, describes under No. 118 a MS. of the Bhāradvājaśrautasūtra which contains the same portion ending with the Jyotiṣṭoma and also this Pariśeṣasūtra at the end. The portions of this Pariśesasūtra dealing with the Agnihotra and Pavitreṣṭi are described as separate works under Nos. 498 and 616 of Hps. II. under the titles Paribhāṣāsūtra and Bhāradvāja-pavitreṣṭi respectively. It is probable that many Pariśeṣasūtras of Bharadvāja dealing with several subjects are collected together under one head Pariśeṣasūtra. This is indicated by the following sentences found in the work:-

Leaf. 1b. अथातः सूत्रपरिशेषान् व्याख्यास्यामः ।
" 7a. पवित्रेष्टिं व्याख्यास्यामः ।
" 7b. अतिपवित्रेष्टिं व्याख्यास्यामः । etc.

*Beginning*:—

श्रीकरिवक्त्राय नमः । अथातः सूत्रपरिशेषान् व्याख्यास्यामः । बाहुमात्राः परिधयः स्फ्यः शम्या च प्रादेशमात्राण्यरत्निमात्राणि वेध्मकाष्ठानि शुष्काण्याद्राणि वा सवल्कलानि ।

*End*:—

दशम एकादशे चोपरम्य द्वादशे शुनासीरीयं त्रयोदशे पशुरिति संवत्सरप्रतिमा वै द्वादश रात्रयः । संवत्सरमेव यजत इति विज्ञायते । सर्पिर्वा मध्वलाभ इत्यादि । कुशा बर्हिरर्थ इत्यादि । खादिरबिल्वपालाशानामिध्मदारूणीत्यादि । आज्यालाभे आजमाविकं माहिषं वा घृतमाज्यार्थं इत्यादि ।

*Colophon* :—

इति भारद्वाजीयपरिशेषसूत्रं सम्पूर्णम् । श्रीरामार्पणमस्तु ।

## 15

## 84. मानवश्रौतसूत्रभाष्यम् ।

## MĀNAVAŚRAUTASŪTRABHĀṢYA.

*By Ācārya Jaradgava.*

This is a commentary on the Mānavaśrautasūtra of the Maitrāyaṇīyaśākhā belonging to the black Yajurveda. The Mānavaśrautasūtra is divided into eleven parts: Prāksoma, Agniṣṭoma, Prāyaścitta, etc. The MS. under description contains the commentary only for the Agniṣṭoma and Prāyaścitta portions of it. The commentary on the Agniṣṭoma part is incomplete and the portion available here is up to the middle of the 7th Khaṇḍa of the 3rd Adhyāya. The commentary on the Prāyaścitta portion which starts with a different pagination, is also incomplete since the first six leaves are missing. Ācārya Jaradgava is stated as the author of this commentary in the colophons of the Prāyaścitta portion of this MS. The colophons of the Agniṣṭoma portion, however, do not give the name of the author.

But there is a MS. of the same commentary on the Agniṣṭoma portion, described under IO. I. 282 where the work is ascribed, instead of Jaradgava, to Agnisvāmin on the strength of the following colophon found in fol. 85b. of that MS.–

इति अग्निष्टोमे अग्निस्वामिभाष्ये मैत्रायणीयायां शाखायां चतुर्थोऽध्यायः परिसमाप्तः ।

Aufrecht also ascribes this commentary to Agnisvāmin and quotes, in support, the same IO. MS. reference in his *Catalogus Catalogorum*. Agnisvāmin is the reputed author of the commentary on the Lāṭyāyanaśrautasūtra of the Sāmaveda and it is not known whether he commented on the Mānavaśrauta also. Acārya Jaradgava, on the other hand, is known as one of the commentators of this Sūtra and his commentary is referred to by Kumārilasvāmin in his Bhāṣya on the Mānavakalpasūtra. (*See* p. 56 of the Kumārilabhāṣya edited by Goldstucker). Agnisvāmin cannot also be taken as the author of the commentary on the Agniṣṭoma portion alone on the authority of the IO. MS., because Jaradgava appears to have commented on all the portions of the Sūtra on the strength of the above references of Kumārila to his Bhāṣya. The MS. preserved in the Oriental Institute, its form, method, writing and other details are such as would preclude the possibility of ascribing the different portions to two authors namely Agnisvāmin and Jaradgava.

This discovery of the name of Agnisvāmin as the commentator seems to be based on a comedy of errors. The word *Agnisvāmibhāṣya* in the colophon of the IO. MS. is a simple scribal mistake for Agniṣṭomabhāṣya. The marginal remark अग्नि० भा० found in the MSS. does not indicate the full title as Agnisvāmibhāṣya but it stands for Agniṣṭomabhāṣya. Agnisvāmin, therefore, is a figment of imagination and has no real existence as the commentator of this work who remains one and the same Jaradgava.

*Beginning.*—

ॐ नमो भगवते श्रीयज्ञपुरुषाय ।
यो वेदार्थैर्वेदबुद्ध्या विद्यावेदविदो गुणः ।
पुरुषाय नमस्कृत्य अग्निष्टोमं व्याख्यास्यामः ॥

अग्निष्टोमेन वसन्ते यजेत । एतत् त्रिपदं सूत्रम् । अर्थपदसूचनात्सूत्रम् । पद्यते पादः । पदाकृति पदम् । तानीह त्रीणि । अग्निष्टोमेन । समासो बहुव्रीहिः । तेनेति तृतीयाधिकरणे विभक्तिः । अनुखङ्गेन गत्यर्थकर्मणि त्यन्तस्य अग्निरिति भवति । अग्निरग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयते । अग्निमीले पुरोहितमित्युदाहरणम् ।

× × × × × ×

Leaf 19a. अग्निष्टोमे प्रथमोऽध्यायः । ॐ तानूनप्त्रं गृह्णाति कांस्ये चमसे वा । तानूनप्त्र इति संज्ञा श्रुतिदृष्टस्य शपथस्य भवति ।

× × × × × ×

Leaf 52b. तृतीयेऽध्याये षष्ठः खण्डः ।

अवकाशैर्यजमानो ग्रहानवेक्षते । काश्टृ दीप्तौ । अवकाशा नाम मन्त्राः । तैर्यजमानो ग्रहावेक्षणं करोति ।

*Beginning of the Prāyaścitta portion:*—

Leaf 7a. यद्दुष्टं त्रिविधं वर्णयन्ति मार्त्तिकस्य निष्टपनं संशोधनम् । सौवर्णस्य राजतस्याद्भिरेव संशोधनमिति समुत्सर्गः किमर्थः ।

× × × × × ×

Leaf 40a. इति प्रायश्चित्ते जरद्गवे प्रथमः खण्डः ।

× × × × × ×

Leaf 50a. जरद्गवे प्रायश्चित्ते द्वितीयः खण्डः । यस्याहुतेऽग्निहोत्रे पूर्वोऽग्निरनुगच्छेत् । स्वप्रधानेऽग्निहोत्रेण प्रासङ्गिके । अग्निना च सहाग्निहोत्रेण चोद्द्रवेत् ।

× × × × × ×

Leaf 57b. इति श्रीमैत्रायणीये मानवकल्पे प्रायश्चित्ते जरद्गवे तृतीयः खण्डः ।

ॐ नमो यज्ञपुरुषाय । यद्यर्वाक्शम्या प्रासादपक्षयेत् । × × × ×

Leaf 65b. इति श्रीमाणवके कल्पे आचार्यजरद्गवकृतौ प्रायश्चित्ते चतुर्थः खण्डः । त्वनावृत्तिः । ॐ गुरुभ्यो नमः । यदि पृषदाज्यं स्कन्देत् हिरण्यमन्तर्धाय भूयोऽभ्युन्नीयाश्वेनोपघ्राप्य मनो ज्योतिर्वर्द्धतां भूतिरिताभ्यामाहुतिं जुहुयात् ।

*End.*—

यजेतेत्याज्य ( त्यध्याय ) परिसमाप्तौ द्विर्वचनेत्रानादेशे रथन्तरं पृष्ठमिन्द्रवायवा ग्रहाः साग्रयसर्व इति त्रसार्वशब्दानिर्देशादद्यकांदपरिपतितस्यावग्नित्वं(?) भवति तेनाग्निसम्बन्ध्यामुखं सम्भरणादीनि भवन्ति ।

*Colophon*—

प्रायश्चित्तेऽष्टमः खण्डः समाप्तः । समाप्तानि प्रायश्चित्तभाष्यानि । श्रीरस्तु ।

---

## 16

### 93. शाङ्खायनश्रौतसूत्रव्याख्या ।

SĀṄKHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

This is a running commentary on the Agnihotra portion of the Sāṅkhāyanaśrautasūtra. The commentary begins from the 6th Khaṇḍa of the 2nd Adhyāya of the Sāṅkhāyanaśrautasūtra. It appears to be a manual of the Agnihotra according to the Sāṅkhāyana School. The authorquotes many authorities and among them the Anartīya Bhāṣya on the Sāṅkhāyanaśrauta (*Published in Bibli. Ind.*) is also found.

*Beginning:—*

अथ शाङ्खायनाग्निहोत्रहोमप्रारम्भः । श्रीगणेशाय नमः । अग्निहोत्रं जुहोति । सायं च प्रातश्च । पुरा च्छायानां संसर्गात् गार्हपत्यादाहवनीयमुद्धरति । प्रभान्त्यां रात्र्याम् । प्रादुष्करणं नित्यधृतः । गतश्रियः शुश्रुवान्ब्राह्मणो ग्रामणी राजन्यः । अनित्यधृतः प्रतिकर्मोद्धरणस्यार्थि-कत्वात्कालार्थं वचनम् । गार्हपत्यादिति चाहवनीयदक्षिणाग्न्योर्गार्हपत्ययोनित्वार्थम् । तथा च सूत्रकारप्रस्थातेन वत्सरं च । तत्रोपयोगवशादाहवनीयदक्षिणाग्न्युद्धरणप्राप्तावाहवनीय-ग्रहणमपार्थकं स्यात् । अतोऽस्य मन्त्रोद्धारणसंज्ञानियमार्थताऽवसीयते ।

*End:—*

पर्युक्षणं याजमानमिति-भाष्ये प्रतिभाति । तच्चिन्त्यम् । प्रथमपर्युक्षणस्याव्रतधर्मत्वात् । प्रथमास्तमिते जुहोतीति होमभावनाया व्रतविसर्गान्तत्वाच्च वाग्विसर्गान्ते पर्युक्षणम् । अन्यथा हि हुत्वेत्यस्मिन्नुपचार आपद्येत । इदं च होमकर्तुर्भवति । उत्तरेणान्वाहार्यपचनं निष्क्रामन् इच्छया नडाय नैषिधायान्वाहार्यपचनाय नम इति यजमानः स्मरेत् । तथाऽनशित्वा प्रातर्मुहूर्तं सभासनं सभ्यस्य भस्मोद्धृतमुपेयात् । आहवनीयगार्हपत्यदक्षिणाग्निनमस्करणं सभ्यसभो-पासनभस्मोद्धृतोपायनानि कात्यायनोक्तानीच्छया क्रियन्तेऽविरोधात् ।

*Colophon:—*

इत्यग्निहोत्रहोमः । इति शाङ्खायनाग्निहोत्रहोमः समाप्तः ।

---

## II Śrautaprayogas.

—:o:—

## 17

### 102. अग्निष्टोमप्रयोगः ।

AGNIṢṬOMAPRAYOGA.

This treatise deals with the Agniṣṭomaprayoga according to the rules of Kātyāyana. The MS. is very old and incomplete in the beginning and at the end. Here, a list of the duties of all the Ṛtviks engaged in the Agniṣṭoma sacrifice is given in addition to those of Adhvaryu.

*Beginning.—*

नात्र यजमानस्य नामादेशः। प्रागग्नीषोमीयपश्विडायाश्चरोर्ब्रह्मयजमानषडवत्त-भागाः। इडा। नात्र चतुर्धाकरणम्। आग्नेयविकारत्वात्स्यान्निराकाङ्क्षैकदेवत्यत्वात्। × × प्राशित्रं च हविर्मात्रस्य भवति। न पुरोडाशचतुर्धाकरणम्। × × × × × ×

Leaf 8a.—अथ कृष्णाजिनदीक्षा। तत्राहवनीयं दक्षिणेन मांसभागमिलितयोः पश्चाच्चरणच्छिद्रेषु नियमेन स्यूतयोरन्यत्रानियमेन स्यूतयोरवलम्बनसूत्रवतोः कृष्णाजिनयोः स्थापनम्। एकं चेत्पश्चात्पादौ गृहीत्वा द्विगुणीक्रियते। एवं मांसप्रदेशसहितं स्तरणीयम्। यजमानस्तयोः पश्चाद्दक्षिणं जान्वाच्योपविश्य कृष्णाजिनयोः शुक्लकृष्णसन्धिमालभते।

*End:—*

होता च पुनन्ति धीरा इत्यर्द्धर्चेन युवा सुवासा० देवयंतोमित्येतामुपसतत्य त्रिः परि-दध्यात्। अध्वर्युः परिवीरसि० मनुष्याणामिति त्रिगुणया त्रिव्यामया रशनया यजमान-नाभिमात्रे त्रिवारं वेष्टनग्रन्थिना परिव्ययति। रज्जुमूलाग्रे संसृज्य मूलभागे क्षतपाशेऽग्रं गोपायति। अस्यां यूपबद्धरशनायां यूपशक

---

## 18

### 104. अग्निष्टोमप्रयोगः।

### AGNIṢṬOMAPRAYOGA.

This is a manual of the Agnıṣṭoma accordıng to the Hıraṇyakeśiyaśrautasūtra. The author's name ıs not found ın the MS. The Hıraṇyakeśıyajyotıṣṭomaprayoga descrıbed under No. 129 by Aufrecht ın hıs München Catalogue of 1909, ıs sımılar to thıs work.

*Beginning:—*

अथ हिरण्यकेशीयज्योतिष्टोमसोमप्रारम्भः।

आदौ गजाननं नत्वा तथा योगेश्वरं शिवम्।
कालं कामं पर्शुरामं पश्चाद्ग्रन्थश्च लिख्यते॥

अथाग्निष्टोम उच्यते। पूर्वद्युरात्रावुदकप्रतिसरबन्धं च कृत्वा नवाश्वः करिष्यमाण-सोमाङ्गत्वेन पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धं सोमपूजनं करिष्ये। तदादौ निर्विघ्नता-सिध्यर्थं गणपतिपूजनं करिष्य इति सङ्कल्पं कृत्वा पुण्याह इन्द्रादयः प्रीयन्ताम्। नान्दी-श्राद्धे दक्षक्रतुसंज्ञका० इति विशेषः। अन्यत्समानम्। राजानमाहृत्य सोमाय राज्ञे नम इति पायसौदनेन पूजयेत्। अथ सोमप्रवाकवरणम्। अस्मिन् ज्योतिष्टोमेऽग्निष्टोमे सोमे त्वं सोमप्रवाको भव। बाढमिति सोमप्रवाकः। यजमानस्तं गन्धादिनाऽभ्यर्च्य सोमप्रवाकार्षे-येभ्यो ऋत्विग्भ्यः सामं मे प्रब्रूहि। सम्प्रेष्यति। ज्योतिष्टोमेनाग्निष्टोमेन सप्रवर्ग्येण रथन्तर-साम्ना शतगुदक्षिणेनाहं यक्ष्य इति प्रतिजानीते।

*End:—*

आग्नेयं पञ्चकपालमुद्वसानीयं निर्वपेत् इति पक्षेऽनड्वाननड्वाहो वा दक्षिणा। पूर्णाहुतिपक्षे यथाशक्तिर्दक्षिणा। सेष्टिर्यावद्रात्रे कियद्रात्रे वा सन्तिष्ठते तदेव सायमग्निहोत्रं जुहुयात्काल एव प्रातर्होमः। सन्तिष्ठतेऽग्निष्टोमः। यजमानो यथेतं प्रत्येत्य वृष्टिरसि वृश्च मे पाप्मानमृतात्सत्यमुपागाममप्सु श्रद्धा। अप उपस्पृश्य। यथेतं प्रतिनिष्क्रम्य गार्हपत्यस्य पश्चादुपविश्य सहस्रं ब्राह्मणांस्तर्पयितवा इति सम्प्रेष्यति। अनेन मया कृतेन देशकालाद्यनुसारतो यथाज्ञानेन यथाशक्त्याऽग्निष्टोमाख्येन कर्मणा तेन श्रीपरमेश्वरयज्ञनारायणः प्रीयताम्। तत्सद्ब्रह्मार्पणमस्तु। विष्णवे नमो विष्णवे नमो विष्णवे नमः। श्रीरस्तु।

---

## 19

## 105. अग्निष्टोमप्रयोगः।

## AGNIṢṬOMAPRAYOGA.

*By Rāmakṛṣṇabhaṭṭa.*

This is another manual of the Agniṣṭoma according to the Hiraṇyakeśīyaśrautasūtra, by Rāmakṛṣṇabhaṭṭa. The name of the commentary seems to be Jīvana as stated in the last colophon of this MS. The author appears to have compiled this Prayoga basing on Mātṛdatta's commentary on the Hiraṇyakeśīyaśrauta. (*See* work No. 98). A MS. of this work has been described by Aufrecht under No. 128 in his Munchen Catalogue.

*Beginning.—*

अथ ज्योतिष्टोमस्याग्निष्टोमस्य प्रयोग उच्यते। तत्र व्रात्यतादौर्ब्राह्मण्यपरिहारार्थमासन्ने पर्वणि ऐन्द्रा(ग्ना)श्विनौ पशू कृत्वा निमित्ताभावे तु तावकृत्वा सोमारम्भः। यजमानो दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य सोमेन यक्ष्ये ज्योतिष्टोमेनाग्निष्टोमेन सप्रवर्ग्येण रथन्तरसाम्ना द्वादशशतगवदक्षिणेन यद्यैन्द्राग्नाश्विनौ पर्वणि न कृतौ तदाऽग्नीषोमीयेणैन्द्राग्नाश्विनौ समानतन्त्रौ कुर्वन्सोमेन यक्ष्य इति। पुरस्ताद्दीक्षाभ्यो राजानमाहार्य परिवेवेष्टि पायसेनौदनेन राजानं पूजयत्यहरहर्न दीक्षासु।

*End:—*

इष्टिपक्षेऽनड्वाननड्वाहो वा दक्षिणा। पूर्णाहुतिपक्षे यथाशक्ति दक्षिणा। सेष्टिर्यावद्रात्रे कियद्रात्रे वा सन्तिष्ठते तदेव सायमग्निहोत्रं जुहुयात्। अथोदिते काल एव प्रातर्होमः। जीवने रामकृष्णभट्टविरचिते।

*Colophon:—*

इति श्रीहिरण्यकेशिसूत्रानुगते मातृदत्तीयप्रयोगाग्निष्टोमसंस्थज्योतिष्टोमप्रयोगः समाप्तः।

*Post-Colophon* —

श्रीमद्दक्षिणदेशेऽगस्त्य इवासीत्स भट्टगोविन्दः ।
तत्सूनुः श्रीरामेश्वरभट्टोऽभूत्सर्वविख्यातः ॥
तत्पुत्रः श्रीनारायणभट्टो जयति सूर्यवद्भमौ ।
तत्सूनू रामकृष्णभट्टो रामैकशरणतां यातः ॥
श्रीमद्धिरण्यकेशिसूत्रं प्राप्याथ मातृदत्तीयम् ।
किञ्चिन्निर्णयजालं कृतवांस्तेन प्रयोगसौकर्यम् ॥

आश्विनशुक्लप्रतिपदि लल्लोपनामकसदाशिवेन पुस्तकं लिखितम् । ग्रन्थसंख्या १७६९ ।

---

## 20

## 108. अग्निहोत्रप्रयोगः ।

### AGNIHOTRAPRAYOGA.

This is a manual of the Agnihotrahoma according to the Apastambaśrautasūtra. This manuscript contains two copies of this Prayoga spread over leaves 31–47. The description given below is taken from the 2nd copy which is complete.

*Beginning.*—

अग्निहोत्रं व्याख्यास्यामः । अधिवृक्षसूर्य आविःसूर्ये वा पादौ प्रक्षाल्याचम्य ॐ भूर्भुवः सुवरित्यग्न्यगारं प्रोक्ष्यापरेण गार्हपत्यं प्राङ्मुख उपविश्य त्रिः प्राणानायम्य सङ्कल्पं करोति । परमेश्वरप्रीत्यर्थं सायमग्निहोत्रं होष्यामि । द्विः । इति सायम् । प्रातरग्निहोत्रं होष्यामीति प्रातः । अध्वर्युः । धृष्टिरसि ब्रह्म यच्छ । उपवेषमादाय गार्हपत्यमभिमन्त्रयते । सुगार्हपत्यो विदहन्नराती ।

*End:*—

अग्निहोत्रस्थालीं प्रक्षाल्य । अक्षितमक्षित्यै जुहोमि स्वाहा । अक्षित्या इदम् । उन्नयनदेशे निनयत्यन्तर्वेदि वा । यज । वृष्टिरपागामप्सु श्रद्धा । अप आचामति द्विराचम्य । यजमानोऽन्तर्वेदि मार्जयते । अन्नादास्थामन्नादो भूयासं यशस्थ यशस्वी भूयासं श्रद्धास्थ श्राद्धिषीय । आपो ह श्रेष्ठ प्रथमं संबभूव । येन धृतो वरुणो येन मित्रो येनेन्द्रं देवा अभ्यषिञ्चन्त राज्याय तेनाहं माभिषिञ्चामि वर्चसे । शिरस्यप आनीयते । अग्ने नयेत्यादि । प्रदक्षिणनमस्कारान् कृत्वाऽऽचम्य ब्रह्मार्पणम् । अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् × × × ×

यत्पाकत्रा मनसा दीनदक्षाण यज्ञस्य मन्वते मर्तासः । अग्निष्ठद्धोता क्र द्वि न् । याजिष्ठो देवानृतुशो यजाति ।

---

## 21

### 110. अग्निहोत्रप्रयोगः ।

AGNIHOTRAPRAYOGA.

This is another manual of the Agnihotrahoma belonging to the Āpastambīya School. The MS., however, is much injured.

*Beginning.*—

एवं गुणविशेषणविशिष्टायां शुभतिथौ श्री—थं सायंप्रातरग्निहोत्रं तण्डलैर्होष्यामि । घृष्टिरसि ब्रह्म यच्छ । धृष्टिमादाय । सुगार्हपत्यो विदहन्नराती ।

*End:*—

अग्ने नयेत्यादि । प्रदक्षिणं कुर्यात् । सर्वप्रजां—मान × न्यमाहुः । अनेन सायंप्रातरग्निहोत्राख्येन कर्मणा भगवान् सर्वात्मकः । श्रीयज्ञेश्वरार्पणमस्तु ।

---

## 22

### 112. अग्निहोत्रप्रयोगः ।

AGNIHOTRAPRAYOGA.

This is another Agnihotraprayoga according to the Āpastamba-śrautasūtra. This MS. also is much injured.

*Beginning.*—

अग्निहोत्रं व्याख्यास्यामः । अधिवृक्षसूर्यं आविःसूर्ये वा । धृष्टिरसि ब्रह्म यच्छ । उपवेशमादाय गार्हपत्यमभिमन्त्रयते । सुगार्हपत्यो विदहन्नरातीरुषसश्रेयसी श्रेयसी दधातु× × बोधयति । उद्बध्यस्वाग्ने × × । यजमानः । ॐ उद्धर । अध्वर्युः । वाचा त्वा होत्रा प्राणेनोद्गात्रा ।

*End:*—

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मै जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम । प्रवः शुक्राय भानवे भरध्वम् × × ×

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां श्रीकृष्णानुस्मरणं परम् ॥

---

## 23

### 114. अग्निहोत्रप्रयोगः ।

### AGNIHOTRAPRAYOGA.

*By Tryambaka Molhe, son of Kṛṣṇabhaṭṭa.*

This codex contains a fragment of the Agnihotrahomaprayoga of the Apastamba School by Tryambaka Molhe, son of Kṛṣṇabhaṭṭa. The authorities quoted here are :—

भारद्वाज, रुद्र, कात्यायन, धूर्त्त, धूर्त्तवृत्ति, प्रजापति, स्मृतिभास्कर, स्मृत्यर्थसार ।

This seems to be the last part of the Prayoga and it contains, besides Agnihotra, four small works. They are:—

अरणीनाशकल्प, समस्यहोमविधि, पक्षहोमविधि and पुनराधाननिमित्त ।

The colophon stating the authorship of Tryambaka Molhe is found in the middle of the last work पुनराधाननिमित्त and not as usual at the end. It is, therefore, doubtful as to whether Tryambaka Molhe is quoted as an authority or he is to be taken as the author.

*Beginning*:—

श्रीगणेशाय नमः । प्रसङ्गादरणीनाशो लिख्यते । समारूढेष्वग्निषु यद्युत्तरारणी नश्ये-त्तदाऽधरारणीं छित्वोत्तरारणिं कुर्यात् । अधरारणीनाशे पुनराधानमेव । आहवनीयादेस्तु समारूढस्यारणीनाशे पुनर्योनित उत्पत्तिमिच्छन्तीति भारद्वाजमतं रुद्रेण लिखितम् ।

× × × × × × × × × × ×

एवं समारूढेष्वग्निष्वन्यतरारणिनाशेऽपीति धूर्तः । गार्हपत्ये विद्यमानेऽनुगताहवनीय-भस्मसंसृष्टारणीनाशे पुनराधानं न वा इति पक्षे योनित उत्पत्तिः ।

इत्यरणीनाशकल्पः

अथापत्काले समस्यहोमविधिः । तदाह प्रजापतिः । × ×

इति समस्यहोमः

अथ पक्षहोमः । × × × ×

उत्तमोऽग्निर्धृतः कुण्ड आत्मारोपस्तु मध्यमः ।
समिदारोपणं त्वन्त्यस्तस्मात्कुण्डे विधारयेत् ॥

इति पक्षहोमविधिः

कृतेऽपि पक्षहोमे उदयास्तमये होमकाले वा उभयोः सन्निधानमावश्यकम् । अन्यतर-सन्निधानं वा । असन्निधानेऽग्निर्लौकिकः सम्पद्यते ।

*Colophon*:—

मोल्होपनाम्नः कृष्णभट्टस्य सूनुना त्र्यम्बकेन कृतोऽग्निहोत्रप्रयोगः ।

तस्मादसमारूढमन्थन उदयास्तमययोरस्थापिते प्रतिनिधौ पुनराधेयमग्न्याधानं वेति स्थितिः ।

*End*:—

तत्राग्निहोत्रहोमार्थं एव प्रतिनिधिः । समारूढेऽपि प्रागस्तमयात्प्रतिनिधिः । प्रस्थापने पुनराधानम् ।

---

## 24

## 116. अग्निहोत्रप्रयोगः ।

### AGNIHOTRAPRAYOGA.

*By Tryambaka Molhe.*

This is another manual of the Agnihotra and it follows the Āśvalāyanaśrautasūtra. The author Tryambaka Molhe states general rules for the Agnihotra sacrifice in the beginning, while the actual Prayoga begins from the third leaf of the MS.

*Beginning:*—

श्रीगणेशाय नमः। अथाग्निहोत्रहोमो लिख्यते। तत्रापराह्णे वा। उद्धरणकालोऽह्नश्चतुर्थो भागः। आविःसूर्येऽधिवृक्षसूर्ये वेत्यापस्तम्बः। आविःसूर्येत्यस्तमये। प्रातर्व्युष्टायाम्। उषस्युदितायामादित्योदयात्प्राक्। आदित्यमभिमुख इत्याहवनीयस्य पुरस्तात्प्रत्यङ्मुखः सायम्। पश्चात्प्राङ्मुखः प्रातः। प्रदोषान्तो होमकालः। सङ्गवान्तः प्रातः। प्रदोषो नवनाडिका अस्तमयादारभ्य। उदयादारभ्य सङ्गवान्तः प्रातः।

× × × × × ×

तत्र चतस्रो निनयेदिति वृत्तिकारः। जान्वाच्य ताः प्रतिदिशं निनयेदिति भाष्यकारः।

अथ प्रयोगः। पूर्वोक्तोद्धरणकाले यजमानः पत्नी चाचम्य तीर्थेन प्रपद्यापरेण गार्हपत्यमुपविश्य × × × × ×

उद्धराहवनीयमित्यध्वर्युं संप्रेष्य। ततोऽध्वर्युर्गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरेत्। देवं त्वा देवेभ्यः श्रिया उद्धरामीति।

*End:*—

अनेन सायमग्निहोत्रहोमाख्येन कर्मणा भगवान् परमेश्वरः प्रीयतां न मम। श्रीकृष्णार्पणमस्तु।

*Colophon:*—

इत्यग्निहोत्रहोमप्रयोगो मोल्होपनाम्ना त्र्यम्बकेन कृतः।

*Post-Colophon.*—

शके १७६३ प्लवनामाब्दे पौषकृष्ण १० भृगौ तद्दिने माचेगणोपनामकबालंभट्टात्मजमाधवेन स्वार्थं परोपकारार्थं लिखितम्।

अयाश्चेत्यादिकान्मन्त्रान् जपित्वाऽग्नेनयादिभिः।
अग्नीन्प्रदक्षिणीकृत्य नत्वा होमस्य पूर्तये॥

इति नृसिंहः।

The front leaf of the MS. contains:—

यवाग्वोदनयोः क्वचित् सिद्धयोरुपादानमिच्छन्ति केचित्। अत्रैव श्रपणमिति मञ्चनभट्टीकारः। अग्निहोत्रे पूर्वस्यामाहुतौ हुतायामुपस्थितेन यजमानेन प्रतिदिवसं वत्सरं वाऽनेन तृचेनाग्निरुपस्थेयः। इति संहिताभाष्ये सप्तमाष्टके द्वितीयाध्याये दशमो वर्गः।

## 25

### 122. अग्निहोत्रप्रयोगः ।

### AGNIHOTRAPRAYOGA.

This is a manual of the Agnihotrahoma according to the Kātyāyanīyaśrautasūtra.

*Beginning:*—

अथ वाजसनीयश्रौतहोमप्रारम्भः ।

श्रीगणेशाय नमः । अद्य पूर्वोच्चरित० । ॐ तत्सत्परमेश्वरप्रीत्यर्थं सायंप्रातरग्निहोत्रं होष्यामि । तत्र सायमग्निहोत्रं होष्यामि । अन्तरेणापराग्नी गत्वा प्रदक्षिणमाहवनीयं परीत्योपविशति यजमानः पत्नी च यथादेशम् । अप आचामति । ॐ वृष्टिरसि वृश्चमे पाप्मानं सत्येन व्रतमुपैम्यापः सत्यं मयि व्रतम् । ततो द्विराचमनम् ।

*End:*—

स्वस्थान उपविश्य । आचमनम् । ॐ विद्युदसि विद्य मे पाप्मानं जह्यपोऽवभृथमभ्युपैमि । मयि सत्यं गोषु मे व्रतम् । सकृन्मन्त्रेण द्विस्तूष्णीम् । वाग्विसर्गः । विष्णवे नमः । सचरविमोकः । अत्यतीनिष्क्रमणम् । दक्षिणाग्नेर्मनसा ध्यानम् । ॐ नडाय नैपधायान्वाहार्यपचनाय नमः । अनश्नते साङ्कमनाय सभ्याय नमः । असतेषांसवाय भस्मोद्वापाय नमः ।

नर्यभस्मपरब्रह्मद्विजमुक्तिप्रसाधनम् ।
तयोरेकतरं सेव्यं संसारभयनाशनम् ॥
आयुर्वृद्धिर्यशोवृद्धिर्वृद्धिः प्रज्ञातमःश्रियः ।
धर्मसन्तानवृद्धिश्च सन्तु मे सप्त वृद्धयः ॥

अनेन यथाकाले यथाज्ञानेन कृतेन सायंप्रातर्होमाख्येन कर्मणा श्रीभगवान् यज्ञरूपी परमेश्वरः प्रीयतां न मम । ॐ तत्सद्ब्रह्मार्पणमस्तु ।

*Colophon.*—

इति वाजसनीयश्रौतहोमः समाप्तः ।

---

## 26

### 123. अग्निहोत्रप्रयोगः ।

### AGNIHOTRAPRAYOGA.

This is a manual of the Agnihotrahoma according to the Bodhāyanaśrautasūtra.

*Beginning:*—

अथ बौधायनाग्निहोत्रहोमप्रारम्भः ।

श्रीगणेशाय नमः । अथेदमग्निहोत्रं सायमुपक्रमं प्रातरुपक्रममाचार्या ब्रुवते । तद्व्याख्यास्यामः । पुरादित्यस्यास्तमयादुदयाच्च गार्हपत्यमुपसमाधाय तस्मादन्वाहार्यपचनमुद्धृत्य प्रणीय ज्वलन्तमाहवनीयमुद्धरति । वाचा त्वा होत्रा प्राणेनो० रुद्धरामीति ।

*End:*--

अथ पत्नीयजमानयोर्हस्ते स्रुक्स्थाः परिशिष्टा अपो निनयति तूष्णीम् । अवभृथस्यैव रूपमकरिति ब्राह्मणम् । अग्न्युपस्थानम् । अपि वा भूर्भुवः सुवरिति व्याहृतिभिराहवनीयमुपस्थाय भर्तुं वः शकेयम् । श्रद्धा मे मा व्यगादिति ब्रूयात् । अत्रैक उत्तरपरिषेचनानन्तरमपो निनयतीत्यन्तेऽग्न्युपस्थानं कुर्वते । सन्तिष्ठतेऽग्निहोत्रम् ।

*Colophon.*—

इति बोधायनाग्निहोत्रहोमः ।

---

## 27

## 124. अग्निहोत्रप्रयोगः ।

## AGNIHOTRAPRAYOGA.

This is another Agnihotrahomaprayoga following the Bodhāyanaśrautasūtra.

*Beginning:*—

बोधायनहोमप्रारम्भः ।

श्रीमहागणपतये नमः । तिथ्यादि सङ्कीर्त्य सायमग्निहोत्रं पयसा होष्यामि । गार्हपत्यं प्रज्वाल्य तूष्णीं दक्षिणमानीय उद्धर आहवनीयम् । देवेभ्य० त्वा देवेभ्यः श्रिया उद्धरामि । पात्रान्तरेऽग्निं गृहीत्वा । उद्ध्रियमाण उद्धर पाप्मनो मा यद्विद्वान् यच्च विद्वांश्चकार । अह्ना यदेनः कृतमस्ति किञ्चित् सर्वस्मान्मोद्धृत पाहि तस्मादिति प्रणयेत् ।

*End.*--

अग्रेणाहवनीयं परीत्य समिध आदध्यात् । तिस्रस्तिस्र उदङ्मुखास्तिष्ठन् । प्रथमं समन्त्रम् । आहवनीये दिदिहि स्वाहा । अग्नयेदम् । अमन्त्रके द्वे गार्हपत्ये दिदाय स्वाहा । दक्षिणे दीदिदाय स्वाहा । पूर्ववत् परिसमूहनपर्युक्षणे कृत्वा यस्य स्मृत्येतीश्वरार्पणं कुर्यात् । रात्र्या यदेनः कृतमिति प्रातर्दिवा प्राङ्मुख उदिते सूर्ये । एवमेव प्रातर्होमः । तत्र विशेषः । सत्यऋताभ्यां त्वा पर्युक्षामि । पर्युक्षेत् त्रिः । ॐ उन्नेष्यामि । अतिसर्जने हरिणीं त्वा सूर्यज्योतिषमहरिष्टकाममुपदधे स्वाहा । सूर्याय ज्योतिष इदम् । हरिणीं त्वा सूर्यज्योतिषमहरिष्टकाममुपदधे तेन ऋषिणा० । इति समिदाधाने भूर्भुवःस्वरोम् । सूर्याय ज्योतिः । सूर्यः स्वाहा । सूर्यायेदम् । प्रधानहोम उन्मार्जनं च । अन्यत्समानम् ।

*Colophon:*—

इत्यग्निहोत्रहोमः समाप्तः ।

इति बोधायनहोमः समाप्तः ।

This work is attributed to the Bodhāyana School on the strength of the remarks found on the front and the last pages of the MS. But really this Prayoga appears to follow the Aśvalāyanaśrautasūtra from the description given above.

---

## 28

### 125. अग्निहोत्रप्रयोगः ।

### AGNIHOTRAPRAYOGA.

This is a manual of the Agnihotrahoma according to the Śāṅkhāyanaśrautasūtra.

*Beginning*—

शाङ्खायनाग्निहोत्रहोमः । श्रीगणेशाय नमः । × × होमोऽयम् । स्नात्वाऽऽचम्य । अस्तात्प्राक् गार्हपत्यं प्रज्वाल्य उदयात्प्राक् प्रातः उद्धरणं कुर्यात् । तच्चैवम् । आचम्य तीर्थेन प्रविश्य शरावे गार्हपत्यादेकदेशं गृहीत्वा आहवनीयमुद्धरेत् । उद्ध्रियमाण उद्धर पाप्मनो मा × × × जिगाय इति मन्त्रेण । इति सायम् । प्रातस्तु अह्ना इत्येतस्य स्थाने रात्र्या इति विशेषः । ततो गार्हपत्यादेकदेशं गृहीत्वाऽग्निं दक्षिणाग्न्यायतने निदधाति ।

*End*:—

वाचं विसृजते । ततः पर्युक्षणं पूर्ववत् । प्रातस्तु समिदाधानानन्तरं भूर्भुवः स्वः सुप्रजाः प्रजाभिर्भूयासं सुपोषः पोषैः सुवीरो वीरैरभयं तेऽभयं नोऽस्तु मनसा त्वोपतिष्ठे लोकमुपैमि स्वश्चेति मन्त्रेणाहवनीयमुपस्थायात्रैव तिष्ठन् गार्हपत्यमुपतिष्ठते । अभयं तेऽभयं नोऽस्तु वाचा त्वोपतिष्ठे प्रजामुपैमि पशूंश्चेति । अथ दक्षिणाग्निमुपतिष्ठते । अभयं तेऽभयं नोऽस्तु प्राणेन त्वोपतिष्ठे व्यानमुपैम्यायुश्चेति । ततः सर्वानग्नीनुपतिष्ठते । अभयं वोऽभयं नोऽस्तु कामेन व उपतिष्ठे । वित्तिमुपैमि भूतिं चेति । अथवैतदेव सायंप्रातरुपस्थानं भवति । अथवा प्रातर्न कुर्यात् ।

*Colophon*.—

इति सायंप्रातर्होमः । एवं पयसा सायंप्रातर्विधिः ।

*Post-Colophon*:—

द्रव्यान्तराणि तु सिद्धान्तभाष्ये ।

पयोदधियवागुश्च सर्पिरोदनतण्डुलाः ।
सोमो मांसं तथा तैलमापस्तानि दशैव तु ॥

इत्येषामन्यतमेन जुहुयात् । तत्र विधिः । दध्नो दधिश्रयणं नास्ति । आज्यतैलयोः परिषेचनस्थाने दर्भाग्रद्वयं प्रक्षिपेत् । ओदनपक्षे सिद्धमोदनमानीय जुहुयात् । यवागूंस्तत्रैव श्रपयेत् । यवागुः शिथिलोदनः । तण्डुलानां मांसानां चाधिश्रयणसेचने ।

---

## 29

### 126. अग्निहोत्रप्रयोगः ।

### AGNIHOTRAPRAYOGA.

This is a manual of the Agnihotrahoma according to the Hiraṇyakeśīyaśrautasūtra.

*Beginning:—*

हिरण्यकेशीयश्रौतहोमः। श्रीगणेशाय नमः। अथाग्निहोत्रहोमः। यजमानोऽधिवृक्षसूर्ये गार्हपत्यस्य पश्चाद्दर्भेष्वासीनो दर्भान् धारयमाणः प्राणानायम्य स्वर्गकामः श्रीपरमेश्वरप्रीत्यर्थं सायंप्रातरग्निहोत्रं होष्यामि। तत्रेदानीं सायमग्निहोत्रं पयसा होष्यामीति सायम्। उदित प्रातरग्निहोत्रं पयसा होष्यामीत्येवं प्रातः। द्रव्योद्देशो न वा कर्त्तव्यः। अध्वर्युवरणमुद्धरेति प्रैषः।

*End:—*

यजमानः वृष्टिरसि वृश्चमे पाप्मानमृतात्सत्यमुपागामप्सु श्रद्धा। अप उपस्पृश्य। आहवनीयात्तृणान्यपोह्य। अस्मिन्कर्मणि स्वराक्षरपदवर्णभ्रेषन्यूनातिरिक्तदोषपरिहारार्थमनाज्ञातमिति मन्त्रत्रयजपमहं करिष्ये। अनाज्ञातं यदाज्ञातं यज्ञस्य × ×× ×। अनेन सायप्रातरग्निहोत्रहोमेन भगवान् यज्ञनारायणस्वरूपी यज्ञभोक्ता परमेश्वरः प्रीयताम्।

नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये।  
नम आहवनीयाय महावेद्यै नमो नमः॥  
अनृणा अस्मिन्ननृणाः परस्मिस्तृतीये लोकेऽनृणाः स्याम।  
ये देवयाना उत पितृयाणाः सर्वान्पथोऽनृणा आक्षीयेम॥  
विष्णवे नमो विष्णवे नमो विष्णवे नम.।

*Colophon:—*

इति सायंप्रातरग्निहोत्रहोमविधिप्रयोगः।

*Post-Colophon:—*

शाके १७६३ भाद्रपदशुक्लैकादश्यां गुरुवासरे इदं पुस्तकं समाप्तम्। स्वार्थं परार्थं च।

---

**30**

## 127. अग्निहोत्रप्रयोगः।

### AGNIHOTRAPRAYOGA.

This is another Agnihotrahomaprayoga which is common to all the Agnihotra sacrifices according to the different schools. The MS. is much injured.

*Beginning:—*

अग्निहोत्रप्रयोगः। आधानप्रभृत्येतेऽजस्राःस्युर्वा। अजस्रपक्षे उदयास्तमयात्पूर्वमेव प्रादुष्करणम्। अध्वर्युयजमानयोर्बहिर्बहिः सन्ध्योपासनं नास्ति। सायंप्रातरेवैषा पत्न्यन्वास्ते। सायं सायमित्येके। अत्रैव पात्राणि प्रक्षालितान्युत्तरेण गार्हपत्यमुपसादयति। कूर्चे वा सूनायां वा स्थालीं सस्रुवां स्रुचं × × उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सायमग्निहोत्रं होष्यामीति सायं सङ्कल्प्य प्रातर × × ष्यामीति प्रातः। अप उपस्पृश्य। अध्वर्युः। इडा देवहूर्मनुयज्ञनीर्बृहस्पतिरुक्थामदानि शंसिषद्विश्वे देवाः।

*End:—*

सप्तर्षीन्प्रीणिहि । सप्तर्षीन् जिन्व । सप्तर्षिभ्यः स्वाहा । इति सप्तर्षिभ्यो जघनेन गार्हपत्यमपो निनयति । इदमहमग्नौ वैश्वानरेऽमृतं जुहोमि स्वाहा इत्यग्नये वैश्वानरायेदम् । अक्षितिं जुहोमि स्वाहा इत्यन्तर्वेदि निनयति । अक्षित्या इदम् । शेषं निधाय पूर्ववत्परिषेचनं कृत्वा भूर्भुवः सुवः स्वाहा । प्रजा × × शेषं यजमानपत्न्योरञ्जलौ निनयति । अवभृथस्यैव रूपमकरिति ब्राह्मणम् । हरिः ॐ ।

---

## 31

### 128. अग्निहोत्रमन्त्रप्रकाशः ।

### AGNIHOTRAMANTRAPRAKĀŚA.

*By Kīkādatta, son of Gaṅgādatta.*

This is an exhaustive commentary on the Mantras useful for the Agnihotrahoma. The author Kīkādatta follows generally the Kātyāyanaśrautasūtra. The work is full of polemical discussions and every part of Agnihotra is explained rationally with the help of the Brāhmaṇas, Upaniṣads and other Ākhyāyikās. The author quotes portions referring to the Agnihotra from all the Vedas and comments upon them. He explains the Mantras grammatically and quotes profusely the rules laid down in the Pūrvamīmāṃsā. Among the authorities quoted by him we find the names of Karkācārya and Devayājñika.

*Beginning:—*

अथाग्निहोत्राङ्गभूतमन्त्रार्थश्चिन्त्यते । अग्निहोत्रमिति कर्मनामधेयम् । तच्च यावज्जीवं नियमेन होतव्यम् । तथा च श्रूयते यावज्जीवमग्निहोत्रं जुहुयादिति । ननु चाग्निहोत्रं जुहुयात् स्वर्गकाम इत्यपि श्रूयते । ततश्च फलयुक्तानामारम्भे यथाकामी फलार्थित्वादिति याथाकाम्यं प्राप्तम् । यावज्जीवकता तु प्रकरणादस्यैवैष कर्मणो धर्म इति ग्रहीष्यते । नैतदेवम् । प्रकरणादेष कर्मधर्मः स्याद्यावज्जीवकतेति । तत्रापि लक्षणया कर्माभ्यास उपदिश्यते । × × तत्रायं सौत्रः करणमन्त्रो वृष्टिरसीति । मन्त्रस्यायमर्थः । हे आचम्यमान उदक त्वं वृष्टिरसि । ओ व्रश्चू च्छेदने । स्त्रियां क्तिन् । क्तिन. कित्वात् ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतीत्यादिना संप्रसारणम् । सहजशत्रोः पाप्मनो विच्छेदकं भवसि । शुद्धिहेतुत्वात् ।

*End:—*

एवं जनकेनाग्निहोत्रस्वरूपविशेषे कथिते सति तस्मै जनकाय याज्ञवल्क्यो महर्षिस्तुष्टः सन् वरं ददौ । जनकः स्वाभिमतं वरं प्रार्थयते स होवाचेति । हे याज्ञवल्क्य त्वयि मम कामप्रश्न एव यथाकामं प्रश्न एवासङ्गवतु । प्रष्टव्याप्रष्टव्यविभागो माभूदित्यर्थः । ततो याज्ञवल्क्यवरप्रदानानन्तरं स जनको ब्रह्म ब्रह्मिष्ठ आस बभूवेत्याख्यायिकाशेषोपसंहारः । एतावता शास्त्रोक्तसलक्षणवत्पुत्रफलकमग्निहोत्रमित्युक्तं भवति । स एवार्थो मन्त्रवर्णेभ्योऽप्यवगम्यते । सुप्रजाः प्रजाभिः स्यामिति । निदर्शनानि यथास्थानमवमुदाहर्तव्यानि । सङ्गतत्वात् । इदमेकैकं फलम् । पुत्रेणैवायं लोको जय्य इति श्रुतेः । केवलात्तु पितृलोको देवताज्ञानसमुच्चिताद्धैरण्यगर्भं पदम् । कर्मणा पितृलोको विद्यया देवलोक इति च श्रुतेः ।

*Colophon* :—

इति श्रीगङ्गादत्तात्मजकीकादत्तविरचितोऽग्निहोत्रमन्त्रप्रकाशः समाप्तः ।

*Post-Colophon* :—

आत्मयाज्ञागजीकेन (?) प्रार्थितो गङ्गनन्दनः ।
अग्निहोत्राङ्गमन्त्रार्थप्रकाशं व्यतनोत्स्फुटम् ॥

---

## 32

### 132. अच्छावाकप्रयोगः ।

### ACCHĀVĀKAPRAYOGA.

This codex contains the fragments dealing with the duties of Acchāvāka, one of the priests of the Hotr group, for Agniṣṭoma and Vājapeya sacrifices. The MS. is much injured and moth-eaten.

*Beginning* .—

अच्छावाकप्रातःसवनशस्त्रम् । हिं भूर्भुवः स्वरोम् । × × × मितयाळिष्वयो अचिरावनाविश्य परिष्वजेत् । घृष्णा कृणोतिरुष्वयो त्रिः । य इन्द्र आविवासति × × × ।

वाजपेयस्याच्छावाकप्रयोग उच्यते । मधुपर्कादि । प्रातः सवनशस्त्रमग्निष्टोमवत् ।

*End* :—

बृहस्पते युवमिन्द्रश्च वस्वोदिव्यस्येशाद् उत पार्थिवस्य । धत्तं रूढं स्तुवते × × × ।

---

## 33

### 133. अच्छावाकशस्त्रकॢप्तिः ।

### ACCHĀVĀKAŚASTRAKLṚPTI.

This is a collection of Śastra-hymns recited by Acchāvāka in the Aptoryāma performance.

*Beginning*:—

तानूनप्त्रस्पर्शनम् । अनाधृष्टमस्य + माधाः । अंशुरंशुष्टे + सुत्या मुद्रचमशीय । एष्टा रायः + पृथिव्यै । एतस्मिन्काले प्रपद्याच्छावाक उत्तरेणाग्नीध्रीयं परिव्रज्य पूर्वेण सद आत्मनो धिष्ण्यदेश उपविशेत् । पुरोडाशशकलं इळामिवोद्यम्य अच्छावाक वदस्वेत्युक्त अज्ञावोऽग्निमवसे । देवं गासि स नो वसुः । रासत्पुत्र ऋषाणो मृता वा पर्षति द्विषो त्रिः । × × × प्रतिप्रस्थातरुपह्वयस्वेत्यादि माध्यन्दिनं समाप्तम् । अथ तृतीयं सवनम् । प्रस्थितयाज्या ये हे इन्द्राविष्णू पिबतं मध्वोऽस्य सोमस्य दस्रा जठरं प्रणेथाम् ।

*End* :—

दैव्या होतारा प्रथमा पुरोहिता । ऋतस्य पन्थामन्वेमि साधुयाँ क्षेत्रस्य पतिः । प्रतिवेशमीमहे । विश्वान्देवा अमृतां अप्रयच्छतो त्रिः । उक्थं वाचि + ये-हे परोमात्रया तन्वा प्रधाननते महित्वन्ति । उभे ते विद्मरज + वित्सा भुवौ सो + वौ द्वि-जः । यज्ञपुच्छादि समानम् ।

*Colophon* :—

समाप्तोऽच्छावाकः । अप्तोर्यामस्य शस्त्रकॢप्तिः समाप्ता ।

## 34

### 134. अतिपवित्रेष्टिप्रयोगः ।

### ATIPAVITREṢṬIPRAYOGA.

This is a manual of the Atipavitreṣṭi otherwise known as Mahāpavitreṣṭi according to the Bodhāyanaśrautasūtra. This Iṣṭi is calculated to remove sins.

*Beginning :—*

श्रीगणेशाय नमः । अथ बौधायनतन्त्रानुसारिमहापवित्रेष्टिप्रयोगः । कर्ता पर्वणि देवनक्षत्रे वा शुक्लपक्ष एव कुर्यात् । तत्रोत्तरायणं श्रेयः । केचिदुत्तरारेवतीष्वपि कर्त्तव्या । प्रथमे प्रयोगे सान्वारम्भणम् । नेत्याश्वलायनवृत्तिकृत् । द्व्यहं सद्यो वा । सौकर्यात्सद्यस्कालमवलम्ब्य प्रयोगः । स च यजमानः प्रातरग्निहोत्रं हुत्वा कृतवपनान्ते पूर्वेद्युर्नान्दीमुख रात्रावुदकशान्तिं प्रतिसरबन्धं च । अथापरेद्युः कृतपवनान्वारम्भणीयाचतुर्होतृसारस्वतहोमान्तं सम्पाद्य प्रयोगः । एतत्प्रथमप्रयोगे न द्वितीयादि । अथ यजमानः पवनान्ते प्राणानायम्य तीर्थं प्रविश्य पश्चाद्गार्हपत्यस्य दर्भेष्वासीन इत्यादि निविष्टमित्यन्ते एनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं महापवित्रेष्ट्या यक्ष्ये ।

*End:—*

अनेकयागसाधनद्रव्यस्विष्टकृदवदानं सकृदिति जैमिनिः । अवत्ते स्विष्टकृति न पार्वणः । पवमानः सुवर्जन इत्यनुवाकं प्रत्यृचमाज्यमपूर्वसंज्ञं हुत्वा स्विष्टकृद्यागः । दक्षिणात्वे शतमानं हिरण्यं वासः गाश्च ददाति । यथाद्रव्यं प्रतिग्रहः । नपुंसकत्वे न बहुवचनेनोहः । पत्नीसंयाजेषु गृहपतेः पुरस्ताद्यद्देवा देवहेडनमित्यच्छिद्रकाण्डानुवाकेन प्रत्यृचं गार्हपत्ये हुत्वा गृहपतियागादि । सकृत्प्रयोगे तु पुनरालम्भवर्जं न पुनरावृत्तौ ।

*Colophon:—*

सन्तिष्ठते महापवित्रेष्टिः । इति बौधायनीयेऽतिपवित्रेष्टिः ।

---

## 35

### 135. अतिपवित्रेष्टिप्रयोगः ।

### ATIPAVITREṢṬIPRAYOGA.

This is another Atipavitreṣṭiprayoga which follows mainly the rules laid down by Bharadvāja.

*Beginning:—*

श्रीगणेशाय नमः । अथातिपवित्रेष्टिर्लिख्यते । पौर्णमास्याममावास्यायां वा प्रातरग्निहोत्रं हुत्वा प्राणानायम्य ममोपात्तसमस्तदुरितक्षयद्वारा श्री० थं अँह एनोनिबर्हणार्थं विंशतिहविष्कया महापवित्रेष्ट्या यक्ष्ये शुचिः पूतो मेध्यो विपाप्मा ब्रह्मवर्चस्वी भूयासम् । विद्युत् । विहरणादि । अद्य यज्ञाय । इमामूर्जम् । पञ्चदशीम् । ऐष्टं हविः । पौर्णमासं तन्त्रम् । बर्हिराहरणकाले वैश्वदेवबर्हिराहरणम् । प्रसूनमयं बर्हिः प्रस्तरश्च ।

*End* :—

स्विष्टकृदादि । अग्नीषोमीयव्यतिरिक्तानां नवानां विरुज्य प्राशित्रं तेषामेव चतुर्धाकरणम् । दक्षिणाकाले हिरण्यं वासो दक्षिणा । अग्नये हिरण्यम् । × × हविःशेषोद्वासनादि । आज्यहविषां नोज्झितयः । पत्नीसंयाजेषु गृहपतेः प्राक् यद्देवा देवहेडनमित्यभिप्रपाठेन स्रुवेण प्रत्यृचं गार्हपत्ये जुहोति । अग्नये गृहपत इत्यादि । यज्ञो बभूव यज्ञशास्त्रमवर्जम् ।

*Colophon* :—

सन्तिष्ठतेऽतिपवित्रेष्टिः ।

*Post-Colophon* .—

उम्रजकरोपनाम्ना रामचन्द्रसुनोर्लक्ष्मणस्येदं पुस्तकम् । श्रीरस्तु ।

In different hand-writing

तैलङ्गदेशे रुद्रनुरग्रामे ।

---

## 36

## 136. अतिपवित्रेष्टिप्रयोगः ।

### ATIPAVITREṢṬIPRAYOGA.

This is another manual of the Atipavitreṣṭi according to the Bhāradvājaśrautasūtra. Bharadvāja's Prayoga differs considerably from that of Bodhāyana. These differences are noted down in this work. For Bharadvāja's Atipavitreṣṭisūtra *see* Hps. II. 616.

*Beginning* :—

श्रीगणेशाय नमः । अतिपवित्रेष्टिर्लिख्यते । प्रथमप्रयोगे पूर्वेद्युर्नान्दीमुखं रात्रावुदकशान्तिं प्रतिसरबन्धं च कृत्वा परेद्युः केशादि वापयित्वा स्नानादिपञ्चकं कृत्वा पुण्याहेऽग्न्यादयः प्रीयन्तामिति० । तदानीमेव याः पुरस्तादित्यादि निविष्टमित्यन्ते श्रीपरमेश्वरप्रीत्यर्थमतिपवित्रेष्ट्या यक्ष्य इति । त्रिरुपांशु त्रिरुच्चैः । पापक्षयकामे तु पापक्षयकामोऽतिपवित्रेष्ट्या यक्ष्ये × × वैश्वदेववत् बर्हिराहरेदिति भरद्वाजः । नेति बोधायनः ।

*End* :—

स्विष्टकृतः पुरस्तात्स्रुवाहुतीरुपजुहोति पवमानः सुवर्जन इत्येतेनानुवाकेन । प्रत्यहं हुत्वेति बोधायनः । पवित्रेष्टौ व्याख्यात इति भरद्वाजः । × × × पावमानीः स्वस्त्ययनीरिति तिस्र इत्यष्टौ हुत्वेति भरद्वाजः । नेति बोधायनः । अग्नये स्विष्टकृत इत्यादि । अन्वाहार्यमासाद्य शतमानं हिरण्यं दक्षिणां ददातीति बौधायनः । हिरण्यं वास इति भरद्वाजः × × × पत्नीसंयाजेभ्यः पुरस्तात् गृहपतेः स्रुवाहुतीरुपजुहोति । यद्देवा देवहेडनमित्याद्यच्छिद्रकानुवाकेन प्रत्यृचं हुत्वा गृहपतियागादि पुनरालम्भवर्जं ब्राह्मणतर्पणान्ता सन्तिष्ठते ।

*Colophon* :—

इति भरद्वाजसूत्रोक्ताऽतिपवित्रेष्टिः । इत्यतिपवित्रेष्टिप्रयोगः ।

---

## 37

## 137. अनुद्धरणप्रायश्चित्तप्रयोगः ।

## ANUDDHARAṆAPRĀYAŚCITTAPRAYOGA.

This Prāyaścittaprayoga is based on the five Sūtras (III. XII. 16–20) of the Āśvalāyanaśrautasūtra. This is to be performed by one who fails to begin the Agnihotra before sun-set in the evening and before sun-rise in the morning. This work also contains the Prāyaścittaprayoga to be performed on the same occasion according to the Śrautasūtras of the Yajurveda. One Prāyaścittasāra by Sukla Dīkṣita is quoted here as an authority.

*Beginning* :—

आश्वलायनोक्तमनुद्धरणप्रायश्चित्तम् । यद्याहवनीयमप्रणीतमभ्यस्तमियात् बहुविद्ब्राह्मणोऽग्निं प्रणयेत् । सायङ्काल आहवनीयस्य प्रणयनमकृत्वा सूर्योऽस्तमियात्तदा बहुविदं ब्राह्मणमाहूय तेनोद्धरणादि कुर्यात् । अथ बहुविद्ब्राह्मण आचम्य तीर्थेन प्रविश्य गार्हपत्यं प्रज्वाल्य दक्षिणाग्निं प्रणीय देवं त्वा देवेभ्यः श्रिय उद्धरामीति मन्त्रेण । × × × इति सायमनुद्धरणप्रायश्चित्तम् । अथ प्रातरनुद्धरणप्रायश्चित्तम् । चतुर्गृहीतमाज्यं रजतं च हिरण्यवदग्रतो हरेयुः । × × × समाप्तमनुद्धरणप्रायश्चित्तम् । स्वसूत्रोक्तप्रायश्चित्तं कर्तुमशक्तश्चेद्याजुषोक्तप्रायश्चित्तं कुर्यात् । आउबा शुक्लदीक्षितप्रायश्चित्तसार उक्तत्वात् । अथ याजुषोक्तप्रायश्चित्तम् । नित्यवदग्नीन्प्रणीय । × × × × इति याजुषोक्तं प्रायश्चित्तम् ।

*End* :—

प्रायश्चित्तोपदेशाच्चेत्युक्त्यैवाजस्रधारणं न कृतम् । तद्वत्तत्रापि । पित्रोराब्दिकादिनेऽनुद्धरणं प्राप्तं चेत् तद्दिने याजुषमेव कुर्यादन्यथा श्राद्धलोपप्रसङ्गात् ।

*Colophon* :—

इत्यनुद्धरणप्रायश्चित्तं समाप्तम् ।

*Post-Colophon* .—

शके च चतुरस्त्रप्रवरेद्रिरामऋषिराक्षसभाद्रपदे । कन्यासूर्यस्थितेर्दक्षिणे वर्षे तिथौ दिवाकरपितृदेवता । दैत्यगुरुतद्वारे कृष्णपक्षे माचेगण उपनाम लिगिपम् । आश्वलायनप्रायश्चित्तानुद्धरबालंभट्टतनयनामहम् । शके १७१७ राक्षसाब्दभाद्रपदकृष्णद्वादशी भृगुवार वर्षाऋतौ मघानक्षत्र तद्दिने ।

---

## 38

## 138. अन्तर्क(र्क्यक)ल्पप्रयोगः ।

## ANTARKA(RKYAKA)LPAPRAYOGA.

Antarkyakalpa is one of the Pariśiṣṭas of the Vārāhaśrautasūtra. There are 22 Pariśiṣṭas belonging to the Maitrāyaṇiyasūtra and they are enumerated in the Vārāhagṛhyasūtra (GOS. ed. p. 23) under the heading 'Pariśiṣṭa'. This Antarkyakalpa is one of them, and it is wrongly styled as the "Antaḥkalpa" in the printed edition. Both the Mānava and the Vārāhaśrautasūtras belonging to the Maitrāyaṇiyaśākha contain

at the end, a part called Pariśiṣṭa where several small Pariśiṣṭas are collected together. A MS. of the Pariśiṣṭa of the Mānavaśrautasūtra, described under No. 657 of the B.B.R.A.S. catalogue, contains six Pariśiṣṭas but this Antarkyakalpa is not to be found there. The MS. of the Vārāhaśrautasūtra noticed under work No. 88 of this catalogue contains all the Pariśiṣṭas (leaves 126–312) as enumerated in the Vārāha-gṛhyasūtra and this Antarkyakalpa (leaf 282) is one of them.

It begins—

ॐ अथातोऽन्तकर्यकल्पं व्याख्यास्याम: ।

दर्भमयं वास: परिधायापां नप्त्र इति तारे जपित्वाऽपोऽवगाह्य भूर्भुव:स्वरिति त्रि: सावित्रीमधीते । त्रींश्चादितोऽनुवाकानापोदेवीहविष्मतीरिमानि श्राम्यास्थ ममाग्नेवर्चो × × ×× तच्छंयोरावृणीमह इति मार्जयित । वासांस्युत्सृज्य ।

It ends :—

शालङ्कायनगोत्रायान्तकर्याय साशिष्याय स्वधाय नमस्तर्पयामि । इत्यन्तकर्यकल्प: समाप्त:।

From the above it may be seen that the Prayoga is based on this Pariśiṣṭa and will have to be called as Antarkyakalpa and not as Antaḥkalpa, Antarkalpa or Antarakalpa as spelt in this MS. The MS. under description does not contain the whole Prayoga of the Antarkya-kalpa, but it gives only the text of all the Mantras to be recited in the beginning of the Prayoga. All these Mantras belong to the Maitrāyaṇiyasaṁhitā of the Yajurveda, and they are accented. In the beginning there is a Brāhmaṇa portion which agrees with II. 6. 13 of the Maitrāyaṇiyasaṁhitā.

*Beginning:*—

श्रीगणेशाय नम: । ॐ नमो यजुर्वेदाय । अथातोऽन्तर्कल्पं व्याख्यास्याम: । दर्भमयं वास: परिधाय । आचम्य । अपां नप्त्रे स्वाहोर्जो नप्त्रे स्वाहा अग्नये गृहपतये स्वाहा सावित्रोऽष्टाकपाल: श्येतो दक्षिणा सारस्वतश्चरुर्धेनुर्दक्षिणा × × × × सरस्वत्यै सत्यवाचे चरुर्दण्ड उपानहौ शुष्कादृतिगादक्षिणा । १ ।

अपोऽवगाह्य । ॐ भू: तत्सवितुर्वरेण्यम् । ॐ भुव: भर्गो देवस्य धीमहि । ॐ स्व: धियो यो न: प्रचोदयात् । × × × ॐ इषे त्वा सुभूताय वायवस्थ देवो व: सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ।

*End:*—

तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु न: । स्वस्तिर्मानुषेभ्य: । ऊर्ध्वं जिगातु भेषजम् । शं नोऽस्तु द्विपदे । शं चतुष्पदे । स्वस्ति नो इन्द्रो वृद्धश्रवा: । स्वस्ति न: पूषा विश्ववेद: । स्वस्ति न: तार्क्ष्योऽरिष्टनेमि: । स्वस्ति नो बृहस्पतिर्दधातु । ॐ स्वस्ति ।

*Colophon:*—

इति अन्तर्कल्पस्य प्रपाठक: समाप्त: ।

*Post-Colophon:*—

प्रतिब्रह्मन् प्रतितिष्ठामि क्षत्रे प्रत्यश्वेषु प्रतितिष्ठामि । गोषु प्रतिप्रजायां प्रतितिष्ठामि । पुष्टे प्रतिप्राणेषु प्रतितिष्ठाम्यात्वम् । द्यावापृथिव्यौ प्रतितिष्ठामि यज्ञे उत्तिष्ठन् ब्रह्मणस्पत्ये देवयन्तस्तेमहेलपप्रयन्नुमतस्तदा न वा इद्वप्राशो भवा स चा ।

संवत् १८६७ ना वर्षे आषाढमासे कृष्णपक्षे नवम्यां तिथौ भौमवासरे लिखितम् । शुक्ल ५ मेघजितस्यात्मज नन्दकेशर स्वात्मलिखितं परोपकार द्वे मोनजितस्यात्मजवशराम-पठनार्थम् ॥

---

## 39

## 139. अन्धयष्टिपद्धतिः ।

## ANDHAYAṢṬIPADDHATI.

This is an exhaustive manual of the Vedic sacrifices beginning from the Darśapūrṇamāsa to Nirūḍhapaśubandha according to the Kātyāyanaśrautasūtra and Karka's commentary thereon. Here the duties of all the Ṛtviks in each sacrifice are fully stated unlike the other Prayogas where the duties of the Adhvaryu alone are to be found. A MS. of the Nirūḍhapaśuprayoga, a part of this Paddhati, is described under No. 1067 of Hps. II. with the title 'Nirūḍhapaśuprayoga.' The description of this Paddhati given below is from the two MSS. of the work available here since both of them are incomplete. The MSS. appear to be very old and the leaves are much injured.

*Beginning.*—

श्रीमहागणपतये नमः । श्रीसरस्वत्यै नमः ।

कपोलमद्धारोद्यत्कर्णतालो × जीवनैः ।
नुदन्निव जगत्तापं करी जयति शाम्भवः ॥ १ ॥
यज्ञेशं यज्ञपुरुषं यज्ञविद्भिः सुपूजितम् ।
यज्ञानां फलदातारं नमामि तमहं सदा ॥ २ ॥
मन्त्रब्राह्मणकातीयसूत्रकर्कानुसारिणी ।
सेव्यतां पद्धतिरियं याज्ञिकैर्यज्ञकर्मसु ॥ ३ ॥

यद्यपि कृताधानस्यैव दर्शपूर्णमासयोरधिकारस्तथापि तन्त्रस्य तयोरेवाम्नातत्वात् प्रथमं तावेवोच्येते । × × × यजमानः शुचिराचान्तः सपत्नीको दक्षिणया द्वारा शालां प्रविश्यापरेण गार्हपत्यस्य वोपग्रहः प्राङ्मुख उपविश्य देवताऽभिध्यानं करोति । पौर्णमासेनाहं यक्ष्य इति । × × ×

इत्यन्धयष्टिपद्धतौ पौर्णमासं सिद्धम् । अथ दर्शेष्टिः । × × × ×

इत्यन्धयष्टिप्रयोगपद्धतौ दाक्षायणयज्ञप्रकरणं सम्पूर्णम् ।

अथ भगवता सूत्रकृता आग्नेयं प्रतिकाममाहरेतेति काम्य आग्नेयो विहितः । × × × ×

इत्यन्धयष्टिपद्धतावाधानप्रयोगः ।

*End:—*

ततो यजमानो यथोत्साहमध्वर्यवे ददाति । अरण्योरग्निं समारोप्य निर्मन्थ्य वा वैष्णव्याहुतिः । तस्मिन्पक्षेऽऽहुतिहोमनिषधेनेऽग्नौ शेषप्रतिपत्तिः । समारोपनिर्मन्थनाभावपक्षे मध्यमाहवनीये वैष्णव्याहुतिमात्रमेव । शेषप्रतिपत्तिरग्निहोत्रहोम × × × ब्राह्मणतर्पणान्तम् । ब्राह्मणतर्पणान्ते पशुशेषसमाप्तिः । कर्मापवर्गे × × × ब्राह्मणानामहं शतमेकं भोजयिष्य इति स्मृतिविहित × × ×

*Colophon.—*

इत्यन्धयष्टिपद्धतौ निरूढपशुबन्धप्रकरणं पूर्वार्द्धम् । × × ×

*Post-Colophon.—*

× × × चत्वारिंशत्तमे वर्षे माघमासे शुक्लपक्षे × × × × अद्येह श्रीमहीनर्मदयोर्मध्ये श्रीवटपद्रवास्तव्य आभ्यन्तर श्रीनागरज्ञातीय × × × केन लिखितम् । श्रीमहीसागरोत्तरे श्रीस्तम्भतीर्थवास्तव्य श्री × × × तथा पुत्रपौत्राणां पठनार्थं तथा परोपकाराय ।

इत्यन्धपद्धतिः समाप्ता ।

---

40

## 140. अन्यकर्तृकेष्टिप्रयोगः ।

### ANYAKARTṚKEṢṬIPRAYOGA.

*By Yājñika S'ivadhara.*

This is a manual of the Darśapūrṇamāseṣṭi performed by the Adhvaryu or someone else when the Yajamāna or the sacrificer is away from home. Here the whole Prayoga is not stated, but only the changes that are to be introduced by the substitute are mentioned. It follows the Āpastamba School, and Kapardi, Trikāṇḍamaṇḍana and Ramāṇḍāra are quoted here as authorities.

*Beginning:—*

अथ प्रवसति यजमानगृहेऽन्यकर्तृकेष्टिप्रयोगप्रारम्भः ।

श्रीगणेशाय नमः । यजमाने प्रवसत्यध्वर्य्वादिना कर्त्तव्येष्टिविशेषः । पत्नी विहारा-द्बहिराचम्य दर्शेन वा पौर्णमासेन यक्ष्य इति सङ्कल्प्य ऋत्विग्वरणादि । वृतोऽध्वर्युर्गार्हपत्या-दाहवनीयमुद्धृत्येत्यादि । बाध्यमानमार्त्विज्यं बलीय इति वचनात्पूर्वमाध्वर्यवं पश्चाद्याजमानम् । यत्र कर्मणि सन्निपातस्तत्र यथासामर्थ्यम् ।

*End:—*

तथापि रामाण्डारादिग्रन्थालोकनेन समन्त्रकत्वं सूचितम् । विष्णोः क्रमोत्सर्पणं तु तत्रस्थ एव यजमानः कुर्यात् । न तु त्यागादीनीत्येके । स्वग्रामे पत्न्या ऋत्विग्द्वाराऽग्निहोत्र-पिण्डपितृयज्ञदर्शपूर्णमासाः कर्त्तव्याः ।

*Colophon.—*

इति याज्ञिकशिवधरेण यजमाने प्रवसति गृहेऽन्यकर्तृकेष्टिप्रयोगः ।

*Post-Colophon:—*

इदं पुस्तकं मल्हारात्मजचिन्तामणभट कोराण्येन लिखितम् ।

---

## 41

### 141. अन्वारम्भणीयेष्टिप्रयोगः ।

ANVĀRAMBHAṆĪYEṢṬIPRAYOGA.

This MS. contains the following works besides the Anvārambhaṇīyeṣṭiprayoga:—

1. Sārasvatahoma 2. Caturhotṛhoma 3. Daśahotṛhoma.

*Beginning*:—

श्रीगणेशाय नमः । अथान्वारम्भणीयकालः । पौर्णमास्यां तत्पूर्वदिने वा प्रातरग्निहोत्रं हुत्वा दर्शपूर्णमासावारप्स्ये । ताभ्यां यावज्जीवं यक्ष्य इति सङ्कल्प्य ततो दर्शपूर्णमासावारप्स्यमाणः सारस्वतहोमौ होष्यामि । अस्मिन् सारस्वतहोमेऽध्वर्युं त्वामहं वृणे । × × × अग्निं परित्यज्य प्राणानायम्य दर्शपूर्णमासावारप्स्यमाणोऽन्वारम्भणीयया यक्ष्ये । विद्युदसि । ऋत्विग्वरणम् । विहरणादि । अद्य यज्ञाय । आन्वारम्भणीयं हविः । पौर्णमासं तन्त्रम् ।

*End*:—

इमौ वो गोमिथुनौ गावावहिसन्तौ यथाभागं प्रतिगृह्णीध्वम् । देवि दक्षिणे रुद्राय गां तेनामृतत्त्व० प्रतिगृह्णातु । हविःशेषानुद्वासनादि । अगन्म दर्शपूर्णमासावारप्स्यमाणो दर्शपूर्णमासावारप्स्यमानमगन्म सन्दशास्ते माच्छित्सि० । यज्ञो बभूव यज्ञशाश्रमवर्जम् । सिद्धमिष्टिः सन्तिष्ठते ।

*Colophon*:—

इत्यन्वारम्भणीयेष्टिः ।

One leaf at the end contains Prayogas of the Caturhotṛhoma and Daśahotṛhoma.

---

## 42

### 143. आग्नीध्रप्रयोगः ।

ĀGNĪDHRAPRAYOGA.

The work deals with the duties of Āgnīdhra in the sacrifices of Iṣṭi according to the Bodhāyana School. The Mantras mentioned here are accented.

*Beginning*:—

अथाग्नीध्रप्रयोगप्रारम्भः ।

श्रीशं वन्दे । आग्नीध्रः अमुकेष्ट्यामार्त्विज्याधिकारार्थं स्नानपवनमन्त्राचमनमन्त्रप्रोक्षणानि करिष्ये । स्नानादिचतुष्टयं कृत्वा आचम्य तीर्थेन प्रविश्योत्तरेण गार्हपत्यमुपविश्येडा देवहूरिति जपित्वा शम्यामादाय द्विर्दृषदि सकृदुपलायां समाहन्ति ।

*End*.—

अप उपस्पृश्य । संवदस्व । अगन् । श्रौषट् । अनुप्रहर । पत्नीसंयाजे गार्हपत्यस्योत्तरतः ऊर्ध्वजानुर्दक्षिणामुख उपविश्य प्रत्याश्रावित आह । अस्तु श्रौ० षडवत्तं गृहीत्वा तं प्राश्याचम्य पूर्ववन्मार्जयते । होतृप्रायश्चित्तकाले तस्यान्वारब्धं कुर्यात् । ॐ च मे स्वरश्च मे० । ते नमः ।

*Colophon*:—

इत्याग्नीध्रप्रयोगः ।

## 43

## 146. आग्रयणकालनिर्णयः ।

## ĀGRAYAṆAKĀLANIRṆAYA.

*By Rāmabhaṭṭa Hosinga.*

The author discusses here the exact time for the performance of the Āgrayaneṣṭi of three kinds in accordance with the directions given by the Srautasūtrakāras. He also quotes several authorities and rules laid down in the Pūrvamimāmsā in his support.

*Beginning.*—

श्रीगणेशाय नमः । अथाग्रयणकालो निरूप्यते । तत्कालमाह प्रायश्चित्तप्रदीपे । वर्षासु श्रावणभाद्रपदयोः पौर्णमास्याममावास्यायां शुक्लपक्षयुक्ते कृत्तिकादिविशाखान्तेषु ऋक्षेषु मध्येऽन्यतमदेवनक्षत्रे तद्युक्तमेवेवत्या(?) वा श्यामाकाग्रयणं कार्यम् । शरद्याश्विनकार्त्तिकयोः पूर्वादावुक्तकालानामन्यतमकाले व्रीह्याग्रयणं वसन्ते चैत्रवैशाखयोः × × × दशकाले यवाग्रयणं कार्यमिति ।

*End.*—

तस्माद्व्रीहिभिरेव दर्शपूर्णमासानुष्ठानपक्षे साधारणविकृतिकाल एवाग्रयणं भवतीति सिद्धम् । पूर्वोक्तकालनिर्णयदीपिकाकल्पसारभट्टवार्त्तिकशाङ्खायनब्राह्मणादीनां यवैरिष्ट्वा यवैरेव यजेत । व्रीहिभ्यां दर्शपूर्णमासावित्यादिपूर्वोक्ताऽऽपस्तम्बसूत्रानुसारेण तत्तदाग्रयणोत्तरं तेन तेनैव द्रव्येण दर्शपूर्णमासानुष्ठानविषय इति । यत्तु व्रीहिभिरेव दर्शपूर्णमासानुष्ठातॄणां खण्डपर्वण्यपि पूर्वपर्वणि केषांचिदाग्रयणानुष्ठानमन्येषां शेषपर्वणि प्राकृतपूर्णमासयागात्पूर्वं तदनुष्ठानं तदुभयमप्ययुक्तमिव प्रतिभातीति मीमांसापरिष्कृतमतयः शिष्टाः सुशिक्षितयाज्ञिकाश्च परिभावयन्त्विति दिक् ।

*Colophon:*—

इति श्रीमद्धोसिङ्गोपनामकभट्टरामकृतसर्वाग्रयणकालनिर्णयः समाप्तः ।

Following authorities are quoted here:—

प्रायश्चित्तप्रदीप, शाङ्खायनब्राह्मणभाष्य, कल्पसार, आपस्तम्ब, हरिहरभाष्य, कालनिर्णय, दीपिका, भट्टकमलाकर, हेमाद्रि, आश्वलायनसूत्रवृत्ति, प्रयोगरत्नमाला, आपस्तम्बभाष्य, सत्याषाढ, भारद्वाज.

---

## 44

## 147. आग्रयणप्रयोगः ।

## ĀGRAYAṆAPRAYOGA.

*By Anantadeva.*

This is a manual of the Agrayaneṣṭi, or the ceremony of offering new corn according to the Apastamba School. Out of the three varieties of the Āgrayaṇa the author selects here the Syāmākaprayoga and describes the Hautra also in addition. At the end of the work, there is an appendix dealing with some peculiarities in the Prāśitrabhakṣaṇa and in doing this, he records the views of Devatrāta.

*Beginning:--*

अथाग्रयणप्रयोगः ।

अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा पत्न्या सह प्राणानायम्य आग्रयणेन यक्ष्ये । विद्युत् । अद्य यज्ञाय आग्रयणीयं हविः । आमावास्यं तन्त्रम् । सप्तदश सामिधेन्यः । पात्रप्रयोगकाले एकविंशतिकपालानि स्थाल्यौ शूर्पाणि च द्वन्द्वम् । × × × × अग्निः प्रथमः प्राश्नातु । स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः । इति श्यामाकानाम् । यज्ञो बभूव । यज्ञशाश्वमवर्जं सन्तिष्ठते । × × × × अथ हौत्रम् । नमः प्रवक्त्र इत्यादि । सप्तदश सामिधेन्यः ।

*End:—*

अतो नवीनपुराणयोर्मध्ये आचमनमिति सिद्धान्तः । इडाभक्षणमाश्वलायनभगवतोक्तेन मार्गेण भक्षयन्ति । एतेन भक्षिणो भक्षान् सर्वत्र नवभोजने इत्युक्तत्वादिति केशवः ।

*Colophon:—*

इत्यनन्तदेवकृतापस्तम्बीयाग्रयणप्रयोगः ।

*Beginning of the Appendix —*

देवत्रातः । अथ ब्रह्मणः प्राशित्रभक्षविशेषः । विहाराद्बहिर्निष्क्रम्य । तत्र जीर्णस्य प्राकृतमन्त्रेण प्राशित्रं भक्षयित्वाऽऽचम्य ततो नूतनं गृहीत्वा नित्यं जपमुक्त्वा । नित्यवचनात् यो यत्र नित्यमन्त्रजपस्तं तत्र जपित्वेति भवतीति देवत्रातः ।

*End.—*

ततः काले इडामपि यथेष्टं तूष्णीं भक्षयेत् । ततो मार्जनं कृत्वा दक्षिणाप्रतिग्रहादि समानम् ।

*Post-Colophon.--*

अर्जितं भूरिकष्टेन पुस्तकं लिखितं मया । हर्तुमिच्छति यः पापी तस्य वंशक्षयो भवेत् ॥ शके १७६० विळम्बीनामसंवत्सरे कार्तिकशुद्ध २ मन्दे तद्दिने माचेगणोपनाम्ना बालम्भट्टात्मजमाधवभट्टेन लिखितम् । स्वार्थं परोपकारार्थं च ।

देवाचे आग्रयणप्रयोगः ।

---

45

## 148. आग्रयणप्रयोगः ।

AGRAYAṆAPRAYOGA.

*By Tryambaka Molhe.*

This is another manual of the Āgrayaṇeṣṭi according to the School of Apastamba. The author Tryambaka Molhe describes the special Prayoga when it is performed on the new and full-moon days along with the Darśapūrṇamāsa sacrifice.

*Beginning:—*

श्रीगणेशाय नमः। अमावास्यायां पौर्णमास्यां वा आग्रयणेष्टिमन्वायातयेदिति मूलम्। तत्र प्रयोगः। प्रकृत्या सहाग्रयणप्रयोगो लिख्यते। पौर्णमासेन सह व्रीहिश्यामाकाग्रयणाभ्यां समानतन्त्रेण यक्ष्ये। अमावास्येन सहेत्यादि। अस्यां पौर्णमासेन सह व्रीहिश्यामाकाग्रयणेष्ट्यां ब्रह्माणं त्वामहं वृणे। एवं होतारमध्वर्युमाग्नीध्रं च। अस्यामामावास्येनेत्यादि। विद्युत्। सद्यस्कालपक्षे। अद्य यज्ञाय०। इमामूर्ज प्रथमाम्। पौर्णमासाग्रयणीयं हविः। आमावास्याग्रयणीयं हविः। पौर्णमासेन सह प्रयोगस्तदा पार्णमासं तन्त्रम्। अमावास्येन प्रयोगस्तदा आमावास्यं तन्त्रम्।

*End:—*

अग्निः प्रथमः प्राश्नातु। स हि वेद यथा हविः। शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिरिति मन्त्रेण। आश्वलायनयजमानस्याप्यनेनैव विधानेन यजमानभागस्य प्राशनम्। यदूघर्मे कपालमु०। पूष्णस्तदपि०। यज्ञशश्रमवर्जम्। सिद्धमिष्टिः सन्तिष्ठते। एवं पर्वनक्षत्रेषु वा।

*Colophon:—*

इति मोल्होपनामत्र्यम्बकेन कृतः प्रकृत्या सहाग्रयणप्रयोगः।

*Post-Colophon:—*

शके १६६६ रक्ताक्षीनामसंवत्सरे आषाढशुक्ल ८ वारो भृगुस्तथैव च। इदं पुस्तकं लिखितं उब्रजकरोपनामकरामभट्टस्य सुतलक्ष्मणेन सङ्ग्रहीतम्।

अनेन प्रीयतां देवो भगवान्कमलापतिः। इत्यापस्तम्बप्रकृत्या सहाग्रयणप्रयोगः समाप्तः। ग्रन्थसङ्ख्या ७०।

---

46

## 149. आग्रयणप्रयोगः।

## ĀGRAYAṆAPRAYOGA.

This is an exhaustive manual of the Āgrayaneṣṭi in accordance with the tenets of the Apastamba School. Here the Vrīhiśyāmākaprayoga is described in full.

*Beginning —*

श्रीगणेशाय नमः। अथाग्रयणेष्ट्याः प्रयोगोऽभिधीयते। आग्रयणं धान्यत्रयस्य नवप्राशनाधिकारार्थमदृष्टार्थं च। तथा नानिष्ट्वा नवानामोषधीनां फलान्यश्नातीति वचनाधिकारार्थं प्रतिसंवत्सरं सोम इत्यादिस्मृतेरदृष्टार्थं च। शरदि यस्मिन् कस्मिंश्चित्पर्वणि पूर्वपक्षे देवनक्षत्रे वा व्रीह्याग्रयणं वसन्ते यवाग्रयणं वर्षासु श्यामाकाग्रयणं व्रीह्याग्रयणेन सह वा×× संस्थाजपान्तमन्वारम्भणीयां समाप्य दर्भेष्वासीन इत्यादि०। नवान्नप्राशनाधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं व्रीहिश्यामाकाग्रयणेष्ट्या यक्ष्ये। × × × शूर्पे पवित्रे निधाय पुराणानां निर्वपति। अग्नये जुष्टं निर्वपामि। ततोऽग्निहोत्रहवण्यां पवित्रे प्रक्षाल्य शूर्पैकदेशे नवान्निर्वपति। इन्द्राग्निभ्यां जुष्टम्० अग्नेन्द्राभ्यामिति वा पुरोडाशीयान्। विश्वेभ्यो देवेभ्यो जुष्टं निर्वपामि चर्वर्थान्। पुनः स्रुक्प्रक्षालनम्। शूर्पप्रदेशान्तरे श्यामाकान्निर्वपति सोमाय जुष्टम्।

*End* :—

दक्षिणाकाले प्रथमजं वत्समन्तर्वेदि निधाय ददाति । मात्रा सहितमिति वृत्तिकृत् । क्षौमं वासोऽपीति वैजयन्तीकारः । समानतन्त्रेण क्षौममिति तु युक्तः सूत्रकृदाशयः । मात्रा सह दानेऽपि वत्सस्य प्राधान्यादेकवचनान्त एवोहः । × × × यजमानभागप्राशने संयज्ञपतिरिति पुराणस्य । आचम्य भद्रान्नः श्रेयः० । स्यो नः । नवभागं प्राश्याचम्य । अग्निः प्रथमः प्राश्नातु । × × × श्यामाकानां प्राश्याचम्येत्यादि । सिद्धमिष्टिः सन्तिष्ठते । दश ब्राह्मणान् भोजयेत् ।

*Colophon* :—

सन्तिष्ठत आग्रयणेष्टिः ।

*Post-Colophon* .—

आज्यदधिनी स्थः । सत्ये स्थः × × × सत्यशुष्मे स्थः । सत्येन वामभिघारयामि । तयोर्वां भक्षीय ।

---

## 47

### 150. आग्रयणप्रयोगः ।

### AGRAYAṆAPRAYOGA.

This is another manual of the Āgrayaṇeṣṭi when it is performed along with the Darśapūrnamāseṣṭi in accordance with the Sūtra of Āpastamba (VI. 30. 12) quoted in the beginning of this work. The present MS. deals only with the differences to be observed in this special Prayoga of the Āgrayaṇeṣṭi.

*Beginning* :—

अपि वा अमावास्यायां पौर्णमास्यां वाग्रयणेष्टिमन्वायातयेत् । अत्र प्रयोगः । शरदतौ वृष्ट्या सस्यतृप्तावमावास्यायां दर्शसमानतन्त्राग्रयणेन यक्ष्य इति ।

*End* :—

प्राकृते संयाज्ये । प्राकृतमन्त्रैः प्राशित्रादिप्राशनम् । ओदनवत्सवासांसि दक्षिणा । न ब्रह्मन् ब्रह्मासीति मन्त्रः । वचेयं स्थाल्याविति । नापि ब्रह्मणा अयमिति । अग्निरिदं हविरजुषतेत्यादि । आवाहनवत् । संयज्ञपतिरित्येव यजमानभागप्राशनम् । सर्वमन्य( द्य )थापूर्वमिति ।

*Colophon* :—

इति प्रकृत्या सहाग्रयणप्रयोगः ।

*Post-Colophon* :—

शके १७१२ साधारणसंवत् कार्तिकवद्य १३ तद्दिने माधव माचेगणेन लिखितम् ।

48

## 158. आग्रयणप्रयोगः ।

## ĀGRAYAṆAPRAYOGA.

This is a manual of the Āgrayaṇeṣṭi where the two Prayogas –Vrīhi and Śyāmāka–are joined together for the convenience of the performers. This follows mainly the Bodhāyanaśrautasūtra.

*Beginning* :—

अथ तन्त्रेणाग्रयणप्रयोगप्रारम्भः ।

श्रीगणेशाय नमः । हरिः ॐ । अथाग्रयणप्रयोगः । तत्राग्रयणं त्रिविधम् । श्यामाकाग्रयणं व्रीह्याग्रयणं यवाग्रयणं चेति । तत्र यवाग्रयणस्य 'अपि वा क्रिया यवेषु' इत्याश्वलायनोक्तेर्वैकल्पिकत्वेनोपेक्ष्य द्वयोरेव प्रयोगः । स च तन्त्रेण । पृथक् पृथक् करणपक्षे वर्षासु पर्वणि शुक्लपक्षस्थदेवनक्षत्रे वा × × × × । तत्र तन्त्रपक्षस्य बहुयाज्ञिकादृतत्वात् प्रथमस्तत्प्रयोग उच्यते । प्रथमाग्रयणप्रयोगे पूर्वेद्युर्नान्दीश्राद्धाङ्गपुण्याहवाचनम् । तत्र नान्दीमुखदेवताः प्रीयन्तां विशेषः । ततो मातृकापूजनपूर्वकं नान्दीश्राद्धम् । तत उदकशान्तिं कृत्वा रात्रौ प्रतिसरबन्धं च कृत्वा श्वो भूते कूष्माण्डहोमः । × × × × × श्रीपरमेश्वरप्रीत्यर्थं स्वर्गकामो व्रीह्याग्रयणश्यामाकाग्रयणाभ्यां तन्त्रेण यक्ष्ये ।

*End* :—

यजमानभागप्राशने प्रजापतेर्विभागामेति मन्त्रस्थाने द्वौ मन्त्रौ । भद्रान्नः श्रेयः समº पितो आविशस्व शं तोकाय तनुवे स्योनः । अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः । सन्तिष्ठत आग्रयणम् । ब्राह्मणतर्पणान्तम् । आभ्यां तन्त्रेण कृताभ्यां व्रीह्याग्रयणश्यामाकाग्रयणाभ्यां श्रीपरमेश्वरः प्रीयताम् ।

*Colophon* .—

इति तन्त्रेणाग्रयणप्रयोगः ।

---

49

## 159. आग्रयणप्रयोगः ।

## ĀGRAYAṆAPRAYOGA.

This is a manual of the Āgrayaṇeṣṭi with Vrīhi and Yava according to the Kātyāyanaśrautasūtra.

*Beginning* :—

अथ कात्यायनीययजुःशाखीयानामाग्रयणप्रयोगप्रारम्भः ।

श्रीगणेशाय नमः । अथाग्रयणेष्टिः । तिथ्यादि सङ्कीर्त्य व्रीह्याग्रयणेष्ट्याऽहं यक्ष्ये । यवाग्रयणेष्ट्याऽहं यक्ष्ये । अग्न्यन्वाधाने । इन्द्राग्नी द्वादशकपालेन पुरोडाशेन । विश्वान्देवान् चरुणा । उपांशु । द्यावापृथिवी आज्येन । उपांशु । सद्योऽहं यक्ष्ये । सप्तदशो वज्रः । व्रीहिभि-गः । ममाग्ने पक्षः । प्रथमजो गौर्दक्षिणा । उत्तमे कालेº । ब्रह्मवरणम् । व्रीह्याग्रयणेष्ट्याहं यक्ष्ये । ग्रहणे । इन्द्राग्निभ्यां जुष्टं गृह्णामि ।

*End*:—

सूक्तवाके अग्निरिदं० । सोम० इन्द्राग्नी इदं हविरजुषेतामवीवृधेतां महोज्यायोऽक्रातां विश्वे देवा उच्चैरिदं हविरुच्चैरजुषन्तावीवृधन्त उ० महोज्याय: उच्चै: आक्रातां उ० द्यावा-पृथिवी उ० इदं-वि: उच्चैः अजुषेतामवीवृधेतां उ० महो ज्याय: उच्चै: आक्रातां उ० देवा इत्यादि शेषं प्राकृतम् ।

*Colophon* :—

इति आग्रयणप्रयोग: समात: ।

---

## 50

### 161. आधानपदार्थदीपिका ।

### ĀDHĀNAPADĀRTHADĪPIKA.

*By Gaṅgādhara Bhaṭṭa.*

This treatise in 169 verses deals with the Ādhānaprayoga and follows the Kātyāyanaśrautasūtra. The author Gaṅgādharabhaṭṭa is reputed to be the author of the Prayogas on Ādhāna, Anvārambhaṇīyā, Agrayana and Vaiśvānareṣṭi in prose also and these works are noticed under No. 170. The author belonged to a family famous for scholarship in Vedas and Mīmāṁsā, and he was the son of Aniruddhabhaṭṭa and grandson of Puruṣottamabhaṭṭa, son of Atribhaṭṭa. Besides the Ādhānaprayoga, the present work deals with some Prāyaścittas and Pitṛmedha.

*Beginning*:—

श्रीभवानीशङ्कराभ्यां नमः । ॐ विघ्नहर्त्रे नमः ।

प्रणम्य विघ्नेशमुमां सरस्वतीं
गुरुं च कात्यायनगर्ग [ कर्क ] मुख्यान् ।
सुखावबोधाय जडैकचेतसां
कुर्वेऽहमाधानपदार्थदीपिकाम् ॥ १ ॥
अधीतवेदोऽपि कृतावसथ्यः
पित्रादिकैरस्खलिताधिकारः ।
पत्नीसहायो द्विज आदधीत
स्वग्नीन् स्वकर्माणि करिष्यमाणः ॥ २ ॥
कृतावसथ्यस्य गतेऽथ वत्सरे
केनापि कार्येण तदाधिकारिणः ।
श्रौतं तदाधानमकुर्वतः सतः
कृच्छ्रत्रयं चात्मविशुद्धये स्मृतम् ॥ ३ ॥

× × × × ×

प्रणम्य विघ्नेश्वरमिष्टदेवतां
द्विजाङ्घ्रिपद्मप्रणतो यतात्मवान् ।
यज्ञोपवीती कृतपादशौचः
शिखां च बध्वा शुचिदर्भपाणिः ॥ १५ ॥
बद्धत्रिकच्छः सह धर्मपत्न्या
सुस्नातयाऽग्नेऽभ्युपविश्य तेषाम् ।
प्राणांस्त्रिरायम्य ततश्च कालं
स्मरेदसौ स्वास्थितिकं स्वदेशम् ॥ १६ ॥
ततस्तु सङ्कल्पमिमं वदेद्वा-
ऽग्न्याधेयकर्मेदमहं करिष्ये ।
श्रौताख्यकर्माखिलसिद्धयेऽग्नी-
नाधास्य इत्यन्त्वहमागुरेच्च.॥ १७ ॥

*End* :—

होमस्रुवं वै वदने निदध्या-
द्रुत्रं च हस्तेऽप्यथ दक्षिणेऽस्य ।
पत्नी च देयाहुतिरेव मन्त्रे-
णाहं विना याज्ञिकसन्ततिः स्यात् ॥ १६५ ॥
नखानि केशांश्च वपेत तस्याः
समानमन्यत्पतिना सहात्र.।
ततोऽभिषिञ्चेदुदकस्य धारां
प्रदीप्य चाग्नीननवेक्ष्यमाणः ॥ १६६ ॥
गच्छन्ति पुत्रो(?)प्रविशेत्पुरे ते
ह्याम्नानकालं च गुणान् गृणन्तः ।
सर्वेषु कालेषु समस्तदेशे-
ष्वशेषकार्येषु तथेश्वरेश्वरः ॥ १६७ ॥
सर्वैरुपायैर्भगवाननादिमान्
ममास्तु माङ्गल्यविवृद्धये हरिः ।
मीमांसको वेदविदत्रिभट्टः
तत्सूनुभट्टः पुरुषोत्तमाख्यः ॥ १६८ ॥
भट्टोऽनिरुद्धस्तनयश्च तस्य
साग्निः सदाचारनिविष्टचित्तः ।
तत्सूनुगङ्गाधरभट्टनिर्मिता
स्वाधानतः स्वाङ्गपदार्थदीपिका ॥ १६९ ॥

*Colophon* :—

शुभं भवतु । इति श्रीगङ्गाधरभट्टविरचिता श्रौताधानपदार्थदीपिका समाप्ता ।

## 51

## 169. आधानप्रयोगः ।

### ĀDHĀNAPRAYOGA.

This is a manual of the Ādhāna in accordance with the tenets of the Āpastambaśrautasūtra. It also contains, at the end, the Hautraprayoga for Ādhāna and the Prayoga of the Āgnivāruṇeṣṭi which is incomplete. Some leaves in the beginning of the MS. are missing.

*Beginning.*—

इत्यङ्गिरसाम् । आदित्यानां त्वा देवानां० धामि । इति भृग्वङ्गिरसोरतिरिक्तानां सर्वेषाम् । भूर्भुवः । भूमिर्भूम्ना । द्यौर्वरिणाऽन्तरिक्षं महित्वा × × × × इति चतसृभिः सार्पराज्ञीभिः सम्भारेषु निदधाति । ता अपि यजमानोऽनुवर्तयते । असम्भारपक्षे तु भूमिर्भूम्नेति चतसृभिरेव गार्हपत्याधानम् । अन्यमन्त्राणां निवृत्तिः । × × × × ×

इति गार्हपत्यमुपतिष्ठते । इति गार्हपत्याधानम् । एतदन्तं कृत्वा विरमत्यामध्याह्नकालात् ।

*End*:—

अशक्तौ तूभयीनां स्थानेऽनड्वाहमेव वा दद्यात् । तत्र प्रयोगः । ब्राह्मणा अयं वोऽनड्वान् यथाभागं प्रतिगृह्णीध्वम् । तेन सर्वदक्षिणानां निवृत्तिः । प्रकृतमनुसरामः । प्रतिगृह्णामीति प्रतिग्रहमन्त्रः । सप्तदशकृत्वोपान्येत्यादीनां मन्त्राणां निवृत्तिः । ततोऽध्वर्यवे यजमानपत्न्योः परिहितवस्त्रदानम् । तत उपद्रष्ट्रे दक्षिणां ददाति । ब्रह्मन् प्रस्थास्याम इत्यादि । अगन्मर्द्धिं भृद्धिमगन्म० । अगन्म प्रजां प्रजामगन्मेत्येवं कामानुसार्यूहः । अगन्म पुत्राहानिं पुत्राहानिमगन्म० । अगन्म पश्वहानिं पश्वहानिमगन्मेत्येवं निमित्तानु० । यज्ञो बभूव० यज्ञशाञ्च मवर्जम् ।

*Colophon*:—

ब्राह्मणतर्पणान्ते इष्टिः सन्तिष्ठते ।

*Hautra begins.*—

अथ हौत्रम् । नमः प्रवक्त्र इत्यादि । पञ्चदश सामिधेन्यः । आवाहनेऽग्निं बुद्धिमन्तमग्न आवह । अग्निमिन्दुमन्तमावह । अग्निमावह । देवाँ आज्यपाँ इत्यादि × × × × ।

अथाऽनुब्राह्मणिमतेन प्रथमपक्ष इत्थमावाहनादिप्रयोगः । अग्निमग्न आवह । अग्निं पवमानमावह । अग्निमावह । देवानामित्यादि ।

*It ends*:—

सुक्तवाके । अग्निरिदं० । अग्निरिदं० । अग्निरिदं० । शेषं पूर्ववत् ।

*Colophon*:—

इति हौत्रम् ।

अथ तेष्वग्निष्वाग्निवारुणमेकादशकपालमनुनिर्वपति । × × × × पञ्चदश सामिधेन्यः । अलङ्कृत्य परिस्तरणम् । देवा देवेषु कर्मणे वाम् । पात्रप्रयोगकाले एका ।

**52**

## 170. आधानप्रयोगः ।

## ADHĀNAPRAYOGA.

*By Gaṅgādharabhaṭṭa.*

This is another manual of the Ādhāna according to the school of Kātyāyana. In this collection, there are two MSS. of this work. Gaṅgādharabhaṭṭa is mentioned as the author only in the second MS. which also contains at the end Prayogas for Anvārambhaṇiyā, Agrayana, Vaiśvānareṣṭi and Punarādhāna. Though the work in the second MS. slightly differs from the first, still both the works may be considered as same because they agree in the beginning and at the end. A versified version of this Prayoga by the same author is already described under No. 161. The description given below is taken from the second MS. since it contains the author's name and also some other Prayogas.

*Beginning*:—

श्रीगणेशाय नमः ।

विघ्नेश्वरं नमस्कृत्य पितरौ गुरुमच्युतम् ।
गिरं सीतापतिं विप्रान्वक्ष्याम्याधानपद्धतिम् ॥ १ ॥

तत्र प्राप्ताधिकारोऽधीतवेदो ब्राह्मणोऽग्नी(न्) आदधीत । यस्य विद्यमानाः पितृज्येष्ठ-भ्रात्रादय आहिताग्नयस्तेभ्यो गृहीतदायः कृतदारः कृतावसथ्य इति प्राप्ताधिकार उच्यते । तस्य तादृशस्याधिकारिणः केनचिद्विघ्नादिनाऽसम्भवेन श्रौताधानमकुर्वतः संवत्सरे व्यतीत आत्मशुध्यर्थं कृच्छ्रत्रयप्रत्याम्नायभूतं प्रायश्चित्तं वेदितव्यम् । × × ×

एतदाधानं त्रिविधमुक्तम् । एकं पूर्णाहुत्यन्तं द्वितीयमग्निहोत्रहोमान्तं तृतीयमिष्ट्यन्तम् । मुख्यपक्ष इष्ट्यन्तम् ।

*End*:—

अथ युगपदग्नित्रये शान्ते तर्हि अनादिष्टम् । तदा भूसंस्कारमग्नित्रये कृत्वा निर्मथ्य गार्हपत्यं स्थापयति । क्रमेणोद्धरति । पूर्ववदाज्यं संस्कृत्य चतुर्गृहीत्वा समित्पूर्वकं दक्षिणाग्नौ भुवःस्वाहेति जुहोति पञ्चवारुणकं च । एवमग्नित्रये शान्तेऽप्येकमेवानादिष्टं होतव्यमिति ।

*Colophon*:—

इति श्रीगङ्गाधरविरचिताधानपद्धतिः ।

अथान्वारम्भणीया । कृताधानस्य पौर्णमास्यामन्वारम्भणीया । पौर्णमास्यामन्वारभेतेति श्रुतिः । आधानानन्तरमन्वारम्भणीयेष्टिमाज्यस्थालीपाकं च मलमासे न कुर्यात् ।

× × × × × × ×

इत्यन्वारम्भणीया ।

अथाग्रयणेष्टिः । आग्रयणमैन्द्राग्नमग्रपाकस्य व्रीहियवानां च × × × शेषं पौर्णमासवत् । दक्षिणा गौरसीति विशेषः । इत्याग्रयणेष्टिः ।

अथ वैश्वानरीयेष्टिनिमित्तान्युच्यन्ते । तत्र मनुः ।

इष्टिं वैश्वानरीं कुर्यान्निर्वपेदब्दपर्यये ।
कृतानां पशुसोमानां निष्कृत्यर्थमसम्भवे ॥

अब्दविपर्यये पूर्वाब्दे गते × × × × × × ×

अथ पुनराधानम् । प्राणायामत्रयम् । कालज्ञानं कृत्वा श्रीपरमेश्वरप्रीतय अमुकनिमित्तं पुनराधानमहं करिष्ये । × × × × × × × ×

ततो यजमानः पुनराधानाख्यकर्मणः न्यूनातिरिक्तजनितप्रत्यवायपरिहारार्थं यथाशक्ति ब्राह्मणान् भोजयेत् । इति पुनराधानाख्यं कर्म समाप्तम् । इत्याधानपद्धतिः ।

---

## 53

## 171. आधानप्रयोगः ।

## ĀDHĀNAPRAYOGA.

This is another short manual of the Ādhāna according to the Kātyāyanīya School. Besides the Adhāna, there are Prayogas for Prāyaścitta, Punarādhāna and Agrayana which is incomplete. Here, only a list of all the activities during the Adhāna is stated without the necessary Mantras.

*Beginning* :—

श्रीयज्ञपुरुषाय नमः । अथाग्न्याधेयपद्धतिर्लिख्यते । तत्र प्रथमप्रयोगे मातृपूजनपूर्वकं श्राद्धम् । ततश्चतुर्णां ब्राह्मणानां पादप्रक्षालनम् । प्राङ्मुखमुपवेशनम् । इष्टदेवतास्मरणम् । प्राणायामः । कालस्मरणम् । सङ्कल्पः । श्रौतकर्मसिध्यर्थमग्न्याधेयमहं करिष्ये । तत्र ऋत्विग्वरणम् ।

*End* :—

द्वावष्टाकपालौ पुरोडाशौ । उपांशु । तत्राप्यग्न्यन्वाधानादौ विशेषः । ब्रह्मवरणाभावः । दक्षिणा गावः । तत्र गौरसीति विशेषः । तृतीया अदित्यै चरुः । उपांशु । होतुः प्रत्ययात् । कपालोपवेषोद्धरणपात्रीवर्जं पात्रासादनम् । दक्षिणा धेनुः । आग्नेयो वा प्रायात् । अभ्य अदित्यै चरुरुपांशु । अभ्य वो वा विशेत् । ब्रह्मचर्यादयो नियमाः ।

*Colophon* :—

इत्यग्न्याधेयपद्धतिः ।

*Then Prāyaścitta begins*:—

कर्मनाशे प्रायश्चित्तम् । तत्रानादिष्टं ब्रह्मणा होतव्यम् । तत्र ब्रह्मा विद्यते ।

× × × × × × ×

अथ पुनराधेयाख्यकर्मोच्यते । तत्र सूत्रोक्तपुनराधानमध्य एकपुनराधाननिमित्तोत्पत्तौ पुनराधानं कर्त्तव्यम् ।

× × × × × × ×

नवयवद्रव्यकेन विश्वान्देवान् चरुणोपांशु व्रीहिचरुणा वा । द्यावापृथिवी आज्येनोपांशु । आग्रयणेनाहं यक्ष्ये ।

× × × × × × ×

द्यावापृथिवी वरुणस्य धर्मणा विष्कभित अजरे भूरिरेतसा । उपांशु । उच्चैः । वौ ३ षट् ।

---

## 54

### 174. आधानप्रयोगः ।

### ADHĀNAPRAYOGA.

This is a manual of the Ādhāna according to the Mānavaśrautasūtra belonging to the Maitrāyaṇiyaśākhā of the black Yajurveda. This treatise deals with two kinds of Ādhāna viz. Pūrṇāhutyanta and Iṣṭyanta and also contains Anvārambhaṇiyāprayoga as treated in the 5th Adhyāya of the Prāksoma portion of the Mānavaśrautasūtra. It also contains at the end two more Pariśiṣṭas dealing with the Vaiśvadeva and the measurement of the materials required for the Adhāna.

*Beginning* :—

अथ मानवसूत्रानुसार्यग्न्याधानप्रयोगप्रारम्भः ।

नत्वा गणपतिं देवं शारदां गुरुमात्मनः ।
सूत्रकारं भाष्यकारं लिखाम्याधानपद्धतिम् ॥ १ ॥

आधानकालमाह । आधानमृतुषु नक्षत्रेषु पर्वणि चोक्तम् । तथा च सूत्रम् । अग्नीनादधीत वसन्ते ब्राह्मणो ग्रीष्मे राजन्यः शरदि वैश्यः शिशिरः सर्वेषाम् । सर्वे वा सर्वेष्विति कैश्चित्सूत्रकारैरुक्तम् । नक्षत्राण्यपि सूत्रकारेणोक्तानि ।

× × × × × ×

अथाधानप्रयोगः । यजमानो नियमिताधानदिनात्पूर्वदिने प्रातरौपासनं हुत्वा नित्यं विधाय शुभासने प्राङ्मुखः पत्न्या सहोपविश्य प्राणानायम्य देशकालौ सङ्कीर्त्याग्नीनाधास्यमानो निर्विघ्नतासिध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं च करिष्य इति सङ्कल्प्य

× × × × ×

वरशब्देनाभिलषितं स्वयं दातुं शक्यं यत्तदुच्यते । यत्किञ्चिद्यथाशक्ति हिरण्यादीत्यर्थः । कठलौगाक्षिसूत्रे तु

वरं गां तु विजानीयाच्चतुर्वर्षामिति श्रुतिः ।
दक्षिणानां विशिष्टं तु वरं तमपरेऽब्रुवन् ॥
पूर्णाहुत्यन्ते यजमानोऽश्वं वरं च दद्यादिति वृत्तिकारः ।

इति मानवसूत्रोक्ताग्न्याधानपद्धतौ पूर्णाहुत्यन्तमग्न्याधानं समाप्तम् ।

अथ तनुहविरिष्टय उच्यन्ते । दार्शपौर्णमासिकं विधानमिष्टीनाम् । विकाराननुक्रमिष्यामः ।

*End* :—

हुते समिष्टयजुषि ब्रह्मणे परिहृतमादित्यं चरुं चत्वार ऋत्विजः प्राश्नन्ति ।

तेभ्यो मुष्करं साण्डं वत्सतरं ददाति । ततः शेषं सर्वं प्रकृतिवत्समाप्येष्टौ समाप्तायां यजमानः पत्नी च परिहिते वासस्यध्वर्यवे दत्तः ।

*Colophon* :—

इति चतुर्थेष्टिः समाप्ता । इति चतस्रस्तनुहविरिष्टयः समाप्ताः ।
इति मानवसूत्रे इष्ट्यन्तमाधानं समाप्तम् ।

अथान्वारम्भणीयेष्टिः । दर्शपूर्णमासावारप्स्यमान आरम्भणीयामिष्टिं निर्वपतीत्या-
दिसूत्रम् । × × × × × ×

इत्यन्वारम्भणीयेष्टिः समाप्ता ।

*Then Vaiśvadevaprakaraṇa begins:*—

अर्धाधानी वैश्वदेवं कुर्याद्दैपासनेऽन्वहम् ।
सर्वाधानी लौकिकेऽग्नावितीयं मानवी स्मृतिः ॥
× × × × × ×

इति वैश्वदेवप्रकरणम् ।

अथात इध्मकाष्ठानां शुल्बारणीनां परिधीनां शाखापवित्रस्फ्यकपालानां वेदस्य पुरोडाशस्य च यदनुक्तं तदनुव्याख्यास्यामः । द्विप्रदेशानीध्मशुल्बानि तथारणी षडङ्गुलविस्तारा चतुरङ्गुलोच्छ्राया ।

---

## 55

### 176. आधानप्रयोगः ।

### ĀDHANAPRAYOGA.

This is the Ādhānaprayoga according to the Hiraṇyakeśīyaśrautasūtra.

*Beginning* :—

अथ सत्याषाढाधानप्रयोगप्रारम्भः ।

श्रीगणेशाय नमः । अथाधानप्रयोगः । श्रुतिस्मृतिपुराणोक्तप्रकारेण पत्न्या सहात्मानं पावयित्वा प्राप्तकालानि ऋणानि संशोध्य पूर्वेद्युर्नान्दीश्राद्धं कृत्वा वसन्तरोहिण्यादौ होमपूर्वानिष्टिपूर्वान् सोमपूर्वान्वाऽग्नीनाधास्ये येरस्म्यधिकृतो यांश्च शक्ष्यामि प्रयोक्तुमिति सङ्कल्प्याध्वर्य्वादीन् वृत्वार्हयेत् । अथाध्वर्युः शमीगर्भस्याश्वत्थस्याशमीगर्भस्य वा श्वेताङ्कुरादिलक्षणयुक्तस्य समीपं गत्वा वैश्वानरो न ऊत्येत्यनुवाकेन प्रदक्षिणं कृत्वा तेनैव सूक्तेन नमस्कृत्य प्राचीमुदीचीं वा शाखां छेदयित्वा प्रागग्रमुदगग्रं वा निपात्योत्तरमधरं मूलमग्रं चाङ्कयित्वा तान् द्विधा भेदयित्वा × × × × × ×

ततो यजमानो वपनाद्यहतपरिधानान्तं कृत्वा पत्न्या यथासम्भवमहतपरिधानान्तं कारयेत् । अत्र सूत्रान्तरानुसारेण यजमानस्य भोजनमिति केचित् ।

*End* .—

प्रकृतौ सर्वेषां कपालानां सकृन्मन्त्रपक्षेऽत्रापि सर्वेषामूहेन सकृदेवेति मातृदत्तः । यानि घर्मे स्थालीकपालान्युपचिन्वन्ति वे० । शेषं प्रकृतिवत् । इष्टिः सन्तिष्ठते । आधानप्रभृति यावज्जीवं गार्हपत्यदक्षिणाग्न्योः सभ्यावसथ्ययोश्चाजस्रधारणम् । सर्वेषामजस्रपक्ष आहवनीयस्याप्यजस्रता । यावज्जीवान्तस्योद्धरणपक्षेऽपि द्वादशरात्रमजस्रता । त्रयोदशदिने सायमग्निहोत्रमारभ्यार्थायार्थायाहवनीयं गार्हपत्यादुद्धरति । सोऽपवृत्ते कर्मणि लौकिको भवति । अग्न्याधानाङ्गत्वेन शताधिकान् ब्राह्मणान् भोजयेत् । अग्न्याधाने शतात्परमिति वचनात् ।

*Colophon* :—

इति श्रीसत्याषाढाधानप्रयोगः ।

---

## 56

## 177. आधानप्रयोगः ।

### ĀDHĀNAPRAYOGA.

This is another manual of the Ādhāna according to the Hiraṇya-keśiyaśrautasūtra.

*Beginning* :—

श्रीगणेशाय नमः । अथ हिरण्यकेश्याधानप्रयोगः । कृतनित्यक्रियो युग्मान् ब्राह्मणानाहूय ब्राह्मणानुज्ञां लब्ध्वा तैः सह सपत्नीकः प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ सङ्कीर्त्याग्नीनाधास्यमानः कर्मसाफल्यार्थं बौधायनोक्तप्रकारेण पुण्याहवाचनपूर्वकमङ्कुरार्पणं विधाय रात्रावुदकशान्तिं प्रतिसरबन्धं च कुर्यात् । ततः ब्रह्मौदनिकेऽहनि प्रातः कृतनित्यक्रियोऽग्न्याधानागारं गोमयेन लेपयित्वा

× × × × ×

अधिवृक्षसूर्ये गार्हपत्यायतनस्य पश्चात् स्थण्डिलं तूष्णीमुद्धृत्योल्लिख्यावोक्ष्य औपासनाग्नेरर्धं पात्रान्तरे ब्रह्मौदनार्थमुद्धृत्योपकृते स्थण्डिले तूष्णीं निदधाति ।

*End* :—

सूक्तवाके यथादेवतमुद्देशत्यागा उज्झितयश्च । चत्वारः पत्नीसंयाजाः । वेदस्तरणानुमन्त्रणे त्वया वेदिवि० होता सन्तनोति । न पार्वणः । प्रकृतिवदप्रणीताविमोकः । आज्यप्रणीताविमोकमन्त्रेषु विशेषः । पोषयित्वा यस्त्वा योक्षीत्सत्वा वि० समुद्रं त्वा प्र० तं स्वां यो० गच्छ । अच्छिद्र० प्र० सेचिमदाज्यं यदाज्ये ते स्र० कपालविमोके प्रकृतिवत्कपालानि । स्थाल्योर्विमोके यां घर्मे स्थालीमु० न्वन्ति वेधसः । पूषणस्ता० ताम् । एवं द्वितीयाम् । पुनरालम्भवर्जं सन्तिष्ठते । शेषं प्रकृतिवत् । शतब्राह्मणभोजनम् ।

*Colophon* :—

इत्याधानम् । इति हिरण्यकेशीयाधानप्रयोगः समाप्तः ।

*Post-Colophon* :—

श्रीशिवार्पणमस्तु । शके १७६७ विश्वावसुनामसंवत् आषाढशुक्ल १५ भृगुवासरे इदं पुस्तकं लेले इत्युपनामकगोविन्दभट्टात्मजसदाशिवेन लिखितम् ।

---

## 57

## 178. आधानमन्त्रमाला ।

### ĀDHĀNAMANTRAMALĀ.

This is a collection of Mantras to be recited by the priests engaged in the Adhāna ceremony while performing their duties from the beginning to the end. All Mantras are accented and they are selected according to the Bodhāyanaśrautasūtra. The Mantras of the Anvārambhaṇiyeṣṭi also are added at the end.

*Beginning* —

श्रीगणेशाय नमः ।

गणेशं च नमस्कृत्य गुरुं केशवसंज्ञितम् ।

आधानमन्त्रमाला च क्रियते दीक्षिताज्ञया ॥ १ ॥

याः पुरस्तात्प्रस्रवंत्युपरिष्टात्सर्वतश्च याः । ताभिरस्मि पवित्राभिः श्रद्धां यज्ञमारभे ॥

देवा गातुविदो गातुं यज्ञाय विन्दत । मनसस्पतिना देवेन वाताद्यज्ञः प्रयुज्यताम् ॥ २ ॥

श्रद्ध ए ३ हि । सत्येन त्वाह्वयामि । आकूत्यै त्वा कामाय त्वा समृधे त्वा पुरोदधे । अमृतत्वाय जीवसे । आकूतिमस्यावसे काममस्य समृध्यै । इन्द्रस्य युञ्जते धियः । आकूतिं देवीं मनसः पुरोदधे यज्ञस्य माता सुहवा मेऽस्तु । यदिच्छामि मनसा सकामो विदेयमेनद्धृदये निविष्टम् ॥ ३ ॥

*End* :—

देवस्य त्वा० देवि दक्षिणेनास्त्वा कृतं तपसस्त्वा तन्वतवरुत्रयस्त्वा वयं सोमाय वासः तेनामृतत्वमश्याम् ॥ १ ॥

देवस्य त्वेत्यादि ब्रह्मण ओदनम् । ब्रह्मण उपबर्हणम् । ब्रह्मणे मिथुनौ गावौ । सोमाय वासः । रुद्राय गाम् । तैरमृतत्वमश्याम् । ब्रह्मणोऽनड्वाहम् ॥ १ ॥

अथान्वारम्भणीयेष्टिमन्त्राः । इन्द्रस्य वां बाहुभ्यामुद्यच्छे । उर्वन्तरिक्षमन्वितम् । देवं गमे स्थः । × × × × ×

सूक्तवाकः । ब्राह्मणतर्पणान्तं समानम् । व्रतविसर्गं न कुर्यात् । पौर्णमासीयागपर्यन्तं त एवाग्नयः । पौर्णमासीयागान्वाधानस्य कृतत्वात् ।

*Colophon* :—

इत्यन्वारम्भणीयामन्त्राः । इत्याधानमन्त्रमाला समाप्ता ।

*Post-Colophon* :—

संवत् १८९६ विरोधिकृन्नामसंवत्सर आषाढकृष्णपञ्चम्यां तद्दिने समाप्तम् ।

---

## 58

## 180. आधानाग्निष्टोमसामानि ।

## ĀDHĀNĀGNIṢṬOMASĀMĀNI.

Here is a collection of Sāmans required to be chanted during the performance of the sacrifices Adhāna and Agniṣtoma. The Sāmans and hymns are recorded here with their Ṛsis, Chandas, Devata and the method in which they are to be sung. The works called 'Adhānagniṣtomasāmānı' and described under Nos. 1254–1256, 1258 of the Hps. II and No. 419 of the IO. I contain lists of Sāmans different from ours. It is, therefore, likely that this list is prepared according to the Jaiminiyaśrautasūtra.

*Beginning* :—

दीक्षायै वर्णेन तपसो महिम्नवाचो विभूत्य प्रजापतिस्त्वा युनक्तु प्रजाभ्योऽपानाय । आज्यानां प्रथमसाम्नः पुष्कल ऋषिः गायत्री छन्दः । अग्निर्देवता । इमे वै लोका गायत्रमिति गायत्रस्य विधायकं ब्राह्मणम् । प्रजापतिर्देवेभ्य आत्मानमित्याज्यस्य विधायकब्राह्मणम् । मनो हिंकार इत्युद्गीथोपासनम् । पञ्चभ्यो हिंकरोति । × × × ×

Leaf 11a इति प्रवर्ग्यम् । ५७ । अग्नेर्व्रतस्य । अग्निः ऋषिः । गायत्री छन्दः । अग्निर्देवता । म्राजा उवो वा । त्रिः । अग्निर्मूर्धा दीवाः काकुत् पतिः पृथिव्या आयाम् । × × ×
Leaf 11b इत्युपसत् । ६१ । सुब्रह्मण्याह्वानस्य ब्रह्मा ऋषिः । × × ×
„ 12a इति सुब्रह्मण्याह्वानम् ।
„ 12b इति प्रवर्ग्योद्वासनम् ।
„ 15a. अथ बहिष्पवमानम् ।
„ 16a. इत्याज्यस्तोत्रम् । अथ माध्यन्दिनपवमानम् ।
„ 17b. इति माध्यन्दिनपवमानम् । अथ पृष्ठ्यस्तोत्रम् । रथन्तरस्य वसिष्ठ ऋषिः । बृहती छन्दः । इन्द्रो देवता । प्रस्ता । ओभित्वा शूरनो नुमो वा ।
„ 18b. इति माध्यन्दिनं सवनम् ।
„ 20a. इत्यार्भवपवमानम् ।
„ 20b. इति यज्ञायज्ञीयम् ।

*End.*—

भार्गव ऋषिः । जगती छन्दः । सोमो देवता अचोदासोनोधानुवात्र इन्दवाः । प्रस्वानासो बृहद्दाइवेषू हरयाः । वीचीदाशनाना इषयो आरातयाः । अर्यो नासाजुसाना इशा जुनोधियांवु । वा । म । ३ । पयसः । ब्रह्मा ऋषिः । गायत्री छन्दः । अग्निर्देवता । इयो इया इति पूर्वोक्तं साम । उद्वंशीयस्य उद्वंशीय ऋषिः । अनुष्टुप् च्छन्दः । इन्द्रो देवता । गायन्ति त्वा गायत्रिणया । अर्चन्त्यर्कमर्का इणाः ब्रह्माणस्वाहो इ । शातक्राता बु । उद्वंशमीवया इमीरे । उद्वशामी वाया उवा उवा इरो हाइ । म । ४ । १६० ।

*Colophon* :—

इत्याधानाग्निष्टोमसामानि

---

**59**

## 182. ( आधानोत्तरविकृतीष्टिविचारः । )

## ( ĀDHĀNOTTARAVIKṚTĪṢṬIVICARA. )

*By Vāsudeva Bhrātvañkar.*

In this short treatise, the author discusses whether the performance of the Vikṛtiṣṭis before the Darśapūrṇamāsa is permitted by the Śāstras or not and decides subsequently in favour of performing the Darśapūrṇamāsa first and the Vikṛtiṣṭis afterwards.

*Beginning* —

अथाधानानन्तरं दर्शपूर्णमासानामनारम्भे चातुर्मास्यप्रभृतीनां विकृतीनामनुष्ठानं कर्तव्यं न कर्तव्यं वेति विचार्यते । तच्चाधानं त्रिविधम् । होमपूर्वाधानमिष्टिपूर्वाधानं सोमपूर्वाधानं चेति । तत्राद्ये पावमानेष्ट्यनन्तरं सायङ्काले होमारम्भः । द्वितीये पावमानेष्ट्यन्तेऽन्वारम्भणीयां कृत्वा दर्शपूर्णमासारम्भः कार्यः ।

*End.*—

स्वामिप्रायकृतं कर्म यत्किञ्चित् ज्ञानवर्जितम् ।
क्रीडाकर्मेव बालानां तत्सर्वं निष्प्रयोजकम् ॥

इति वचनात् आधानोत्तरमागामिपर्वणि प्राकृतारम्भोऽकृतश्चेत् तदा कालान्तरे पर्वणि विघ्नेष्टिपूर्वकप्राकृतारम्भः कर्तव्य इति स्थितमलमतिप्रसङ्गेन ।

*Colophon.*—

इति भ्रात्वजीकरोपनाम्ना वासुदेवेन निर्णीतोऽयं शास्त्रार्थः ।

*Post-Colophon* :—

शके १६९७ पौषकृष्ण ८ रवौ लेखः । शुभमस्तु ।

---

## 60

## 184. आपस्तम्बश्रौतसूत्रप्रयोगवृत्तिः–प्रयोगदीपिका

## ĀPASTAMBAŚRAUTASŪTRAPRAYOGAVṚTTI–PRAYOGADĪPIKA.

*By Tālavṛntanivāsin alias Āṇḍapillai.*

This is a manual of the Agnicayana or the construction the sacrificial alters based on the two chapters-16th and 17th the Apastambaśrautasūtra, by Tālavṛntanivāsin otherwise known Andapillai. This work is attributed to Tālavṛntanivāsin on the streng of the colophon of the 16th chapter and the marginal remark found this MS. as 'Aṇḍavilā'. But the Prayogas of Tālavṛntanivāsin the Agnicayana described under Nos. 2588–2590 of TSL. and No. 1 of this catalogue differs considerably from this Prayoga.

*Beginning*:—

अग्निचयनम् । अग्निचयनस्य प्रयोगो वक्ष्यते । पश्वेकाष्टकायां वा प्रातरग्निहोत्रं हु प्राणानायम्य सोमेन यक्ष्ये त्रिवृताऽग्निष्टुताऽग्निष्टोमेन साग्निचित्येन रथन्तरसाम्नाऽजा रण्यदक्षिणेन पूतो भूयासमिति सङ्कल्पः । विग्रत् । सोमप्रवाकवरणादि सक्षेदा(?)न्तं कृ नान्दीश्राद्धम् । अथवा चातुर्मास्याङ्गभूतेन सोमेन यक्ष्ये ज्योतिष्टोमेनाग्निष्टोमेन साग्निचि रथन्तरसाम्ना सदक्षिणेन । एवं साग्निचित्येषु सर्वत्र । ततोऽग्नीन् विहृत्य चतुर्गृहीतं गृही बृहस्पतिपुरोहितमिति जुहोति ।

*Colophon of the 16th chapter.*—

अग्निप्रयोगवृत्त्यां तालवृन्तनिवासिकृतायां प्रथमः प्रश्नः ।

*Beginning of the 17th chapter*:—

श्वोभूते द्वितीयेऽहनि पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्याम् ।

*End:—*

अध्वर्युर्जुह्वा यदाकूतादिति दशाहुतीर्जुहोत्याज्येन । सर्वेषामग्निर्देवता । तृतीयस्य देवाः । अध्वर्युस्तूष्णीमवरुह्य पुनर्मन इति चित्यमुपस्थाय नमस्कृत्वा निवर्तते । अध्वर्योराग्निकं समाप्तम् ।

ततो यजमानस्यायं नो नभसा इत्यादीष्ट्यन्ते येऽग्नयः पुरीष्या इत्यादि चित्यमुपस्थाय समारोप्य गच्छति । आतिरिति मन्त्रा नामस्वाहाकारेणेत्यन्तो मन्त्रः । आप्त्युपस्थानोत्तरकालश्चित्याग्निस्पर्शने सचेलस्नानम् । मार्गे अन्येषाश्चयनं दृष्ट्वा उपत्वाऽग्ने दिवे दिव इति तिसृभिरन्यचितीरुपतिष्ठते यजमानः । चयनबहुत्वे मन्त्रावृत्तिर्वर्तत इदमूनश्रेय इति देवयजनमध्यवसाय निर्मन्थ्योदवसानीयेष्टिः । ततो वास्तोष्पतीयं हुत्वा गृहं गत्वाऽवसितहोमोऽनन्तरे पर्वणि सौत्रामणी मैत्रावरुणी च कर्तव्या ।

*Colophon:—*

समाप्तोऽग्निः । आपस्तम्बाय भगवते नमः ॥

From the above, it will be evident that this work differs from the other Tālavṛntanivāsin's Agnicayanaprayogas, and therefore, the colophon of the 16th chapter ascribing this work to Tālavṛntanivāsin may be considered to be the scribe's addition.

## 61

## 187. आपस्तम्बश्रौतसूत्रप्रयोगवृत्तिः ।

APASTAMBAŚRAUTASŪTRAPRAYOGAVṚTTI.

This MS. contains manuals of the Adhāna, Paśu, Āgrayana, Agnihotra and Soma based on the respective chapters of the Apastambaśrautasūtra dealing with the above mentioned sacrifices. There are two paginations in this codex, one running from the Ādhāna to Agnihotra and another for the portion dealing with the Soma. The first leaf of the MS. is missing.

*Beginning:—*

सभ्यतः पूर्वेणावसथ आवसथ्यम् । शौल्बमानेन वेदीं कृत्वा ततश्च वपते । नखानि निकृन्तते । स्नात्येवं × × × × । औपासनाग्निमाहृत्यापरेण गार्हपत्यायतनं ब्राह्मौदनिकमादधाति । औपासनं वा सर्वं निर्मन्थ्यं वा । यदि सर्वमुपास × × × × । अत्र जायापत्योर्भोजनम् । अस्तमिते सायमौपासनहोमं हुत्वाऽपरेण ब्राह्मौदनिकं लोहिते चर्मण्यानडुहे प्राचीनग्रीवमुत्तरलोम्नि × × × निशायाम् । ब्रह्मौदनं चतुःशरावं निर्वपति । देवस्य त्वेत्यनुद्रुत्य ।

*Beginning of the Paśuprayoga:—*

सर्वान् लोकान् पशुबन्धयाज्यभिजयति । तेन यक्ष्यमाणोऽमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा यजमानोऽपरेण गार्हपत्यमुपविश्य दर्भं+ करोति । निरूढपशुबन्धमारप्स्ये । तेन संवत्सरे संवत्सरे यक्ष्य इत्युक्त्वा ऐन्द्राग्नेन निरूढपशुबन्धेन यक्ष्ये । दर्भं निरस्य तूष्णीमप उपस्पृश्य ततः समारोपणम् ।

*Beginning of the Āgrayaṇaprayoga:—*

आग्रयणमारप्स्ये । तेन संवत्सरे संवत्सरे शरदि यक्ष्ये । वसन्ते यवैर्यजेत् । वर्षासु श्यामाकैः । शरदि व्रीहिभिः । पत्न्या+स्य । आग्रयणेन यक्ष्ये । विद्यु+म् । अध्वर्युवरणम् । तूष्णीमग्निं प्रणीय देवा गातुविद इत्यादि ।

*Beginnıng of the Agnihotraprayoga:—*

ॐ अग्निहोत्रं व्याख्यास्यामः । अधिवृक्षसूर्ये आविस्सूर्ये वा । ममोपात्त + थं सायमग्निहोत्रं होष्यामि । प्रात + म् । धृष्टिरसि + च्छ । उपवेषमादाय गार्हपत्यमभिमन्त्रयते ।

*Beginning of the Somaprayoga:—*

ॐ सोमेन यक्ष्यमाणो ब्राह्मणानार्षेयानृत्विजो वृणीते । वसन्ते पौर्णमास्याममावास्यायां वा सुत्या यथा स्यात्तथोपक्रमः कर्त्तव्यः । एकादीक्षापक्ष एकादश्यामुपक्रमः । यस्य पित्रादयोऽनिष्टप्रथमयज्ञाः स ऐन्द्राग्नेनेष्ट्वा आश्विनेनेष्ट्वाऽथ सोमेन यजेत । अपि वाऽग्नीषोमीयस्य सहोपालम्भं कुर्यात् ।

*End.—*

वैष्णवीं पूर्णाहुतिमुदवसानीयास्थाने वाजसनेयिनः समामनन्ति । तस्मिन् पक्ष उदवसानीयायाः स्थाने वैष्णवीं पूर्णाहुतिं होष्यामीति सङ्कल्प्याहवनीयं विहृत्य द्वादशगृहीतेन स्रुच पूरयित्वा इदं वि + रे स्वाहा । अन्तर्वेद्यूर्ध्वस्तिष्ठन् जुहोति । विष्णव इदम् । रात्रिमतीत्य चेत् सर्वप्रायश्चित्तं कृत्वा पूर्णाहुतिः । अजस्रपक्षे तस्मिन्नग्नावेव स—मथित्वा पूर्णाहुतिः । तस्मिन्नेवाग्नौ दशहोता अग्निहोत्रहोमश्च । सायावित्रात्रेष्टिः (?) सन्तिष्ठते । अथ सायमग्निहोत्रं जुहोति । अग्निहोत्रमारप्स्ये । तेन यावज्जीवं होष्यामि । अग्निहोत्रमारप्स्यमाणो दशहोतारं होष्यामि चित्तिस्रुक् + नृम्णं धात् स्वाहा । वाचस्पतये ब्रह्मण इदम् । अग्निं परित्यज्य सङ्कल्पं करोति । परमे + थं सायमग्निहोत्रं होष्यामि । धृष्ट्यादानं मार्जनान्तं काले प्रातर्होमः ।

*Colophon·—*

सन्तिष्ठतेऽग्निष्टोमोऽग्निष्टोमः ।

---

## 62

## 188. आपस्तम्बश्रौतसूत्रप्रयोगवृत्तिः ।

### ĀPASTAMBAŚRAUTASŪTRAPRAYOGAVṚTTI.

*By Keśava Svāmin.*

This treatise deals with the Prayogas of the four Saṁsthās–Ukthya and others of the Jyotıṣṭoma sacrıfice and also gıves dırectıons for the expıatory rıtes ın connectıon wıth the accıdental vıolatıons of the rules enjoıned for the Soma sacrıfice. Thıs work closely follows the 14th Praśna of the Āpastambaśrautasūtra and serves the purpose of a commentary. The authoı Keśavasvāmın descrıbes ındependently at the end some more Prāyaścittas also for the Soma prescrıbed by Bodhāyana ın hıs Srautasūtra.

*Beginning.*—

केशवस्वामीयम् । हरिः ॐ । प्रकृतिभूतो ज्योतिष्टोमोऽग्निष्टोमः । स एव कैश्चिद्गुणैर्विकृत उक्थ्यादिसंज्ञः कामविशेषेषूपदिश्यत उक्थ्येन पशुकामो यजेतेत्यादिना । एवं विकृतस्य गुण-विकृतत्वं यथा देवदत्त एक एव सन् कैश्चिद्गुणैर्विकृतो गृहस्थो वानप्रस्थः सन्न्यासीति संज्ञान्तरैर्व्यपदिश्यते । यथा वा दण्डी शिखी मुण्डीति । एवं तृतीयसवने उक्थ्यग्रहणादिभि-र्विकृतोऽग्निष्टोम एवोक्थ्यादिसंज्ञां लभते । तस्मादुक्थ्यः षोडश्यतिरात्रोऽप्तोर्याम इति । एतेष्वग्निचित्यादिविकृतधर्मा न भवेयुः । × × × × × × ×

अथ षोडशिनः कर्म । सोमेन यक्ष्ये ज्योतिष्टोमेन रथन्तरसाम्ना द्वादशशतदक्षिणेन वीर्यमवाप्नवानीति सङ्कल्पः । विद्युदसीत्यादि सर्वमुक्थ्यवत् । × × × ×

अथातिरात्रस्य कर्म । × × × × × × × × ×

अप्तोर्यामस्य कर्म । सोमेन यक्ष्ये ज्योतिष्टोमेनाप्तोर्यामेण रथन्तरसाम्ना द्वादशशतदक्षि-णेन सर्वान्कामानवाप्नवानीति सङ्कल्पः × × × × × × ×

Leaf 6 a. इति प्रथमः पटलः ।

अथ सर्वपशुगणानां प्रकृतिभूता पश्वैकादशिनी व्याख्यायते ।

*End.*—

एतेषामेकस्मिन्नपि कर्मण्यक्रियमाणे नमो ब्रह्मणे बृहते करोमि स्वाहेत्याहुतिं हुत्वा सर्वप्रायश्चित्तं जुहुयात् । एकस्मिन्नप्यक्रियमाण इत्यपिशब्देन किमुत सर्वेष्वक्रियमाणेष्वि-त्युक्तं भवति । तस्मात्सर्वेष्वक्रियमाणेष्वपीदमाहुतिद्वयं कर्त्तव्यम् । द्विरुक्तिः पूर्तिसूचिका ।

*Colophon:*—

इति दशमः पटलः । हरिः ॐ । आपस्तम्बाय भगवते नमः । आपस्तम्बोक्तप्रायश्चित्तं समाप्तम् ।

*Then begin Prāyaścittas for the Jyotiṣṭoma prescribed by Bodhāyana.* –

अथान्यान्यपि कानिचित्प्रायश्चित्तानि सोमविषयाणि बोधायनोक्तानि लिख्यन्ते । आप-स्तम्बेनानिबन्धनादनुक्तमन्यतो ग्राह्यमिति न्यायेन तेषामनुष्ठेयत्वात् । यथाह बोधायनः । अथ यदि प्रातरनुवाकमनुपाकृतमादित्योऽभ्युदियात् कथं तत्र प्रायश्चित्त भवतीति ।

*End:*—

भूर्भुवः सुव इत्यनुवाकोऽध्वर्युणा पुरुषसाम गायेत्युक्ते यद्युद्गाता न गायेत् तदाऽ-ध्वर्युः सामगाने विनियुक्तः । अवान्तरदीक्षां व्याख्यास्याम इत्यादिखण्डद्वयेन मन्त्रब्राह्मण-प्रश्नयोरध्ययनर्थं व्रतान्यध्ययनधर्माश्च व्याख्यातानि ।

*Colophon:*—

केशवस्वामिनोक्तानि प्रायश्चित्तानि समाप्तानि ।

63

## 189. आपस्तम्बसूत्रध्वनितार्थकारिका ।

## ĀPASTAMBASŪTRADHVANITARTHAKĀRIKA.

*By Trikāṇḍamaṇḍana Bhāskara Somayājin.*

This codex contains in two parts the memorial verses designated as the Apastambasūtradhvanitārthakārikā. The first part consisting of 17 leaves contains the same four Kāndas as are available in print. It deals with the Soma sacrifice according to the Āpastambaśrautasūtra. The second part which begins with a separate pagination treats of the Adhāna portion of the Apastambaśrautasūtra and this part is not so far printed. The MS. described under No. Hps. II. 629 also seems to contain the same Adhāna portion of the Trikāṇḍamaṇḍana's work. It is probable, therefore, to think that the author would have composed similar verses for all the Praśnas of the Apastambaśrautasūtra because, besides Soma and Ādhāna, there are fragments of his verses for Paśubandha and Vājapeya also. See Hps. II. 629–630.

*Beginning of the second part:—*

श्रीहनुमते नमः ।

पूर्वमाधानमुद्दिष्टं लग्नस्थे वै दिवाकरे ।
लग्ने लग्नात्तृतीये वा चतुर्थे पञ्चमेऽपि वा ॥
षष्ठे च सप्तमे राशौ नवमे दशमेऽपि वा ।
एकादशे वा तिष्ठत्सु भौमचन्द्रेन्द्रमन्त्रिषु ॥
तृतीयषष्ठदशमैकादशस्थे शनैश्चरे ।
एतच्चतुष्टयं श्रेष्ठं बुधशुक्रेऽपि तिष्ठति ॥
जलराशौ तथा कुम्भे तेषां चापि नवांशके ।
आहितः पावको नश्येत् शनौ वापि हिमद्युतौ ॥
चन्द्रेऽष्टमगते पत्नी भूसुते म्रियते पतिः ।
शनिशुक्रबुधादित्यगुरुषु व्याधिभाग्भवेत् ॥
असद्गृहे द्वितीयस्थे स्वामी स्याद्धनवर्जितः ।
भूसुते धनवान् भूयादन्नदः शनिना भवेत् ॥

Leaf 3 b. इति प्राकृतविहारः ।
„ 8 a. इति त्रिकाण्डमण्डनभास्करसूरिकृताऽन्वारम्भणीया ।
„ 9 a. इति वादिमुद्गरकुठारश्रीमत्कुमारस्वामिपुनराधेयम् ।

श्रियमुरसि दधानं कुक्षिकोटौ त्रिलोकीं हृदि धृतपरतत्त्वं स्वस्तिके स्वं शरीरम् ।
मनसि करणसङ्घं नासिकाग्रे स्वदृष्टिं प्रणवमपि मुखे स्वे योगमूर्तिं नमामि ॥
गणपतिमपि मूर्ध्ना वाग्वधूं सम्प्रणम्य प्रवरगणविवेकं प्रस्फुटं संविधास्ये ।
गुरुगणपदसेवा धृष्टविस्पष्टमार्गो परिणयनविधीनामप्रयासप्रवृत्त्यै ॥

प्राग्वीतहव्या न मिथो विवाह इत्याद्यपर्यन्तमतः प्रवक्ष्ये ।
बोधायनारण्यनिवासिमत्स्यलौगाक्षिकात्यायनमिश्रमार्गम् ॥

× × × × ×

Leaf 10 a. विद्वज्जनौघाङ्घ्रिसरोजभृङ्गो विद्योतिताम्नायगभीरमार्गः ।
विक्रीडभूषः प्रवरं समग्रं संक्षेपतो भास्करसूरिराह ॥

इति त्रिकाण्डमण्डनभास्करसूरिविरचितः प्रवरनिर्णयः समाप्तः ।

Leaf 11 b. इति प्रवत्स्यद्विधिः ।

„ 12 b. आगतस्य विधिः ।

„ 13 a. इति पत्नीप्रवासविधिः ।

„ 13 b. इति प्रोषिताधिकारः ।

„ 14 b. इति वादिघटमुद्गरकुठारश्रीमत्कुमारस्वामिसूरिसूनुत्रिकाण्डमण्डनभास्कर-मिश्रसोमयाजिकृतापस्तम्बसूत्रध्वनितार्थकारिकागृहप्रयाणविधिः ।

*End.*—

नवव्रीह्यादिपक्षिण्यां दीक्षितो व्रतयेत् पयः ।
उपसत्सु नवैः कुर्यात् पुरोडाशौ हि रौहिणौ ॥
सुत्यानां सवनीयानां नवैर्व्रीह्यादिभिः क्रिया ।
आग्रयणेन लभ्यन्ते श्यामाकाश्च कथंचन ॥
श्यामाकः प्रस्तरस्तत्र कार्यो बोधायनाशयात् ।
तेन श्यामाकयागस्य कार्यसिद्धिर्न संशयः ॥
गृह्ये बोधायनेनोक्तनवेष्टिश्चेन्न सम्भवेत् ।
ब्राह्मणो भोजनं दद्यात् कुर्याद्वा वैश्वदेविकम् ॥
इष्टीनां पशुबन्धानामलाभे चरुभिः पृथक् ।
यजेत तत्तद्देवस्य स्मृतिदीपनिरूपणात् ॥ (?)

*Colophon*:—

इति त्रिकाण्डमण्डनमू० । आग्रयणम् ।

*Post-Colophon*:—

इदं पुस्तकं लिखितं गदाधरात्मजवेदव्यासेन परोपकारार्थम् । श्रीमध्वेशार्पणमस्तु । लिखितमिन्द्रप्रस्थक्षेत्रे संवत् १८६ (?) प्रमाथीनामसंवत्सरे श्रावण वदि १० तद्दिने इदं पुस्तकं समाप्तम् ।

अनेन प्रीयतां देवो भगवान् कमलापतिः ।
श्रीमदनन्तः पूर्वेषामस्माकं कुलदैवतम् ॥
उप्रजकरोपनामक रामसूनुरङ्गनाथस्य ॥

64

## 189. आपस्तम्बसूत्रध्वनितार्थकारिका ।

## ĀPASTAMBASŪTRADHVANITARTHAKĀRIKĀ.

*By Trikāṇḍamaṇḍana Bhāskara Somayājin.*

This codex contains the work of Trikāṇḍamaṇḍana up to the verse 211 of the 2nd Kāṇḍa, in the same order as it is published by the Asiatic Society of Bengal. The portion falling after the verse 211 of the 2nd Kāṇḍa in the MS. entirely differs from the printed edition but it is also ascribed to Trikāṇḍamaṇḍana in the colophons. There are only 7 verses to complete the 2nd Kāṇḍa after the 211th verse in the printed edition. But this MS contains, instead, several chapters of Trikāṇḍamaṇḍana's work dealing with the following subjects--अब्दप्रवृत्ति, चान्द्रर्तुप्रवृत्ति, सौरर्तुप्रवृत्ति, पर्वनिर्णय, वसन्तनिर्णय, विकृतिकालनिर्णय, आधानपर्व । At the end, there is a colophon of the 2nd Kāṇḍa stating the subject matter as सोमयागोपोद्घातिके पर्वनिर्णयः । Then follows a work called यज्ञकालनिर्णय ascribed to one Nārāyaṇa. This is again followed by Trikāṇḍamaṇḍana's verses on the Ādhānapraśna, a MS of which has already been described above under No. 63. This portion of the Adhānakārikas is incomplete. It will be evident from the above that the printed edition of this work is not complete.

*Beginning:*--

श्रियं वागीश्वरीं देवीं संप्रणम्य विनायकम् ।
गुरूंश्च सोमयागस्य प्रयोगः प्रतिपाद्यते ॥
तत्राधिकारकालादि प्रथमं प्रतिपाद्यते ।
सूत्रान्तरमतं वक्ष्ये सोपयोगं क्वचित्क्वचित् ॥

× × × × ×

इति त्रिकाण्डमण्डनभास्करमिश्रसोमयाजिकृतापस्तम्बसूत्रध्वनितार्थकारिकासु सोमयागोपोद्घाताधिकारनिरूपणम् ।

शिष्टस्याभावतस्तुल्यद्रव्यं प्रतिनिधीयते ।
यावद्यावत्तुसदृशं तत्तदेव हि गृह्यते ॥

*End of the 2nd Kāṇḍa where the MS. differs from the printed edition.*

Leaf 13b. अब्दप्रवृत्तिः ।

मुखं वा एतदब्दस्य फाल्गुनीपूर्णमासकः ।
द्वे वत्सरमुखे चैवं पूर्णमास्योर्निरूप्यते ॥
तस्माद्विकल्पो मीनादिर्मेषादिर्वा वसन्तकः ।
मुखं वा एतदृतूनां यद्वसन्त इति श्रुतः ॥

अब्दस्यैव मुखे नूनमृतूनां युज्यते मुखम् ।
फाल्गुन्यां पौर्णमास्यां वा चैत्रीयायां वसन्तके ॥
वैश्वदेवेन यष्टव्यं चातुर्मास्येष्विति ब्रुवन् ।
विद्यावासः स्फुटं प्राह मीनमेषवसन्तता ॥

Leaf 15 b चान्द्रर्तुप्रवृत्तिः ।

" 16 a सौरर्तुप्रवृत्तिः ।

" 17 b इति त्रिकाण्डमण्डनभास्करसोमयाजिनः कृतौ वसन्तनिर्णयः ।

" 19 b इति त्रिकाण्डमण्डनभास्करमिश्रसोमयाजिनः कृतौ दार्शपूर्णमासिकः पर्वनिर्णयः ।

" 20 a इतीष्टिविकारपर्व ।

" 20 b आधानपर्व ।

" 21 a यद्वा वसन्तकालेऽसौ भरद्वाजीयसूत्रतः ।
आषाढ्यां पौर्णमास्यां वा दृष्टे बोधायनाशयात् ॥
छन्दोगब्राह्मणेऽप्येष कालः सत्यं निरूपितः ।
बृहस्पतिसवः कैश्चिद्वसन्ते चोदितोऽपरैः ॥
अनादृत्य वसन्ताख्यं प्रोक्तोऽनन्तरपर्वणि ।

*Colophon:*—

इति त्रिका + कृतावापस्तम्बसूत्रध्वनितार्थकारिकासु सोमयागोपोद्घातिके पर्वनिर्णयः ।

*Then begins Nārāyaṇa's Yajñakāla:*—

मेषादिस्थे सवितरि यो यो दर्शः प्रवर्तते ।
चान्द्रा मासास्तदन्ताश्चैत्राद्या द्वादश स्मृताः ॥
तेषु या या पौर्णमासी सा सा चैत्रादिका स्मृता ।
कादाचित्केन योगेन नक्षत्रस्येति निर्णयः ॥
अथातः संप्रवक्ष्यामि यज्ञकालं शुभप्रदम् ।
यज्ञो नामामरेन्द्रादिदेवतार्चनमुच्यते ॥

Leaf 22 a इति नारायणीये यज्ञकालः ।

*Then begin Trikāṇḍamaṇḍana's Kārikās on the Ādhānapraśna of the Āpastambaśrautasūtra.*

शुभमाधानमुद्दिष्टं लग्नस्थे तु दिवाकरे ।
लग्ने लग्नतृतीये वा चतुर्थे पञ्चमेऽपि वा ॥
षष्ठे वा सप्तमे राशौ नवमे दशमेऽपि वा ।
[एकादशे वा] तिष्ठत्सु भौमचन्द्रेन्द्रमन्त्रिषु ॥

*End* —

सोमाधानेऽथ तेष्वेव सोमोऽजस्रेषु वर्तते ।
तत्र सोमं समाप्यैव सम्पूर्णा चेदजस्रता ॥
होतृकूष्माण्डहोमाग्निहोत्रं त्यक्त्वाऽग्निमाचरेत् ।
अथ सोमे समाप्तेऽपि न पूर्णा चेदजस्रता ॥
तेष्वग्निहोत्रमारभ्याजस्रशेषं समापयेत् ।
सोमादूर्ध्वमजस्रत्वं द्वादशाहं भवेदिति ॥
सोमाधानस्य विषये प्रोक्तं केशवसूरिणा ।
पौर्णमासिकसुत्ये तु सोमाधाने हुताशनम् ॥
त्यक्त्वाऽपि भृतसोमः स्यात्तत्समाप्तौ......... ।

65

## 192. आयुष्मतीष्टिप्रयोगः ।

## AYUṢMATĪṢṬIPRAYOGA.

This is a manual of the Ayusmatisti otherwise known as Kundalesti which is prescribed in the 19th Praśna of the Apastambaśrautasūtra. One who desires to have a long life has to perform this sacrifice. It is called Kundalesti because the performer has to wear a special kind of ear-ring made of gold at the end of the ceremony as a token of his having performed this Isti. This work is composed according to the Andavila's Prayoga on this sacrifice.

*Beginning*:—

श्रीगणेशाय नमः । अथायुष्मतीष्टिप्रयोगः । अमावास्यायां पौर्णमास्यां वा आपूर्यमाणपक्ष उदगयने देवनक्षत्रे रेवत्यां वा शतायुष्यकामी यजेत । उक्तकाले स्वस्तिवाचनादिनान्दीश्राद्धान्तं कृत्वाऽग्न्यादयः प्रीयन्तामिति विशेषः । ऋत्विग्वरणमर्हणं च कृत्वा प्रातरग्निहोत्रं हुत्वेत्यादि देशकालौ सङ्कीर्त्य श्रीपरमेश्वरप्रीत्यर्थमायुष्मतीष्ट्या यक्ष्य आयुष्यमाप्नवानीति लेफ(?)निर्देशः । विद्युत् । अस्यामायुष्मतीष्ट्यामध्वर्युं त्वामहं वृणे । एवं ब्रह्माणं होतारमाग्नीध्रं च । अध्वर्युः । विहारस्योत्तरत उपविश्य । देवा गातुविद इत्यादि ।

*End.*—

अथ यजमानः । आचम्य तूष्णीं कुण्डले प्रतिगृह्य आयुरसि विश्वायुरसि सर्वायुरसि सर्वमायुरसि । सर्वं म आयुर्भूयात् । सर्वमायुर्गेषम् । इति मन्त्रेण प्रदक्षिणं दक्षिणकर्णे आबध्नाति । तूष्णीं सव्यकर्णे । अध्वर्युः । अग्निरायुष्मान्त्स वनस्पतिभिरायुष्मान् तेन त्वाऽऽयुषायुष्मन्तं करोमि । सोम आयुष्मान्त्स ओषधीभिरायुष्मान् तेन० । यज्ञ आयुष्मान्त्स दक्षिणाभिरायुष्मान्० ब्रह्मायुष्मंस्तं ब्राह्मणैरायुष्मत्तेन त्वा० । देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन त्वा० । पितर आयुष्मन्तस्ते स्वधयाऽऽयुष्मन्त स्ते० इति षड्भिर्मन्त्रैर्यजमानस्य हस्तं गृहीत्वाऽऽसन उपवेशयेत् । ततो जुहूमुपस्तीर्य स्विष्टकृतेन प्रचर्य वैश्वानरे हविरि० । विहव्यकाल आग्नेयं वारुणं सारस्वतं च विरुज्य तेषामेव चतुर्द्धाकरणम् । अन्वाहार्यमेव

दक्षिणा । सूक्तवाके । अग्निः सोमः । अग्नेरहं० । सोमस्याहं० । वरुणस्याहं० । सरस्वत्या अहं० । अग्नाविष्णुभ्यामहं० । देवा आज्यपा इत्यादि । अगन्म आयुष्मानायुष्मानगन्म० । यज्ञो बभूव यज्ञशंचमवर्जं सिद्धमिष्टिः सन्तिष्ठते ।

*Colophon:—*

इति आण्डविलानुसारि-आयुष्मतीष्टिः समाप्ता । श्रीलक्ष्मीनृसिंहार्पणम् ।

*Post-Colophon·—*

ददादेयादश ३ ह्यस्मन् प्राणाः प्राणानस्मिन् दधात्यश्वो देयो वासो देयो हिरण्यं देयं गौर्देयो वरो देयो बहु देयमिति मैत्रायणीयश्रुतिः ।

शके १७८० कालयुक्तनामसंवत्सरे चैत्रे मासे शुक्लपक्षे ७ म्यां तिथौ भानुवासरे तद्दिने लिखितं खेडकरइत्युपनामकगणेशभट्टात्मजकाशीनाथेन लिखितम् ।

---

## 66

### 193. आरुणकेतुकचयनप्रदीपिका ।

### ĀRUṆAKETUKACAYANAPRADĪPIKĀ.

*By Upendra, son of Rāmabhaṭṭa.*

This is a manual of the Āruṇaketukacayana, the last of the five Kāṭhakacayanas according to the Āpastambaśrautasūtra. The Prayoga of this Cayana is not fully described by Āpastamba and Satyāṣādha in their Śrautasūtras. The author Upendra, therefore has prepared this manual based upon the Anuvākas 22–32 of the 1st Prapāṭhaka of the Taittiriya Āraṇyaka. Here, the author discusses fully the nature and relation of this Cayana with other Kāṭhakas and also describes two kinds of Prayoga of this Cayana according to Sandila and Ārunasvāyambhuva. This work is divided into four Prakāśas and more or less forms as a commentary on the portion of the Taittiriya Āraṇyaka dealing with this Cayana.

*Beginning:—*

श्रीगुरुचरणावाद्यां विद्यां गणपं स्वकल्पसूत्रकृतम् ।
आपस्तम्बाचार्यमरुणान् केतूनृषीन्नमस्कृत्य ॥
भारद्वाजसगोत्रः काशीस्थ उपेन्द्रनामकस्तनुते ।
आरुणकेतुकचयनप्रदीपिकां साधवोऽनुगृह्णन्तु ॥

तत्र सूत्रम् । 'आरुणकेतुको ब्राह्मणे व्याख्यातः ।' इति । हिरण्यकेशिनाऽप्येवमेव सूत्रितम् । एताभ्यां सूत्रकृद्भ्यां ब्राह्मणोक्तानुष्ठानस्याङ्गीकृतत्वात्तदेतद्ब्राह्मणोक्तेन यावान् प्रयोगे

भविष्यति तावान् प्रयोजक इति प्रतिज्ञा दर्शिता । वस्तुतोऽस्मिन्नारुणकेतुकप्रपाठके कृत्स्नो विधिरपि दृष्टोऽस्ति । कुत्रचित् विप्रकीर्णपाठ इवास्ति । तमिदानीं व्याचक्ष्महे । योऽपां पुष्पं वेदेत्यादिभिः पञ्चभिरनुवाकैरारुणकेतुकप्रयोजकं ब्राह्मणमुक्तं भवति । अस्याग्नेरपां प्रशंसया सर्वदैवत्यमग्न्यन्तरेभ्यो वैलक्षण्यमुत्पत्तिश्चास्योपधानमन्त्राणामियत्वञ्चोपधानीयानामपां स्वरूपञ्चापामुपधाने दिङ्नियमश्च कामनाश्च व्रतानि चोपधानक्रमोऽपि कृत्स्न उक्तः । तत्रापि 'एतद्ध स्म वा आहुः शाण्डिलाः अथ ह स्माहारुणः स्वायम्भुव' इति वाक्याभ्यां मतद्वयमपि सूचितं भवति ।

× × × × ×

इत्यारुणकेतुकचयनप्रदीपिकायामुपेन्द्रविरचितायां द्वितीयः प्रकाशः ।

अथ शाण्डिलोक्तं व्याख्यास्यामः । तस्य पूर्ववत्कल्पः । ऋत्वाहरणादि वेद्यासम्पूरणान्तं समानमारुणस्वायम्भुवकल्पवत् । शाण्डिलमते प्रयोगशरीरमाह ।

*End:—*

स्वाध्याये कर्मणि च प्रभृतौ समाप्तौ च शान्तिं कुर्वीत शान्तिं कुर्वीत ॥ ६ ॥ स्वाध्यायविधौ चयनकर्मप्रयोगे चारम्भे समाप्तौ च शान्तिं कुर्यादित्यर्थः । पूर्वं चयनविधौ शान्तिर्नोक्ता तदर्थं पुनः पाठः । अध्ययनविधावुक्ता शान्तिः । पुनः स्वाध्यायग्रहणं किमर्थमिति चेत् नित्याध्ययने शान्तिग्रहणार्थम् । इयं शान्तिः कदाचिन्मध्येऽवस्येच्चेत् शान्तिं कृत्वाऽवस्येत् । पुनः शान्तिं कृत्वोपक्रमेत् । द्विरुक्तिः समाप्तिद्योतनार्था ।

सूत्रोक्तियुक्तां श्रुतिसम्मतोक्तां
लिङ्गप्रयुक्तां विधिमुक्तियुक्ताम् ।
आर्याः सुचित्ताः परिशोधयन्तु
प्रदीपिकामारुणकेतुकस्य ॥ १ ॥

श्रीवेङ्कुशास्त्रिशिष्येण रामभट्टसुतेन हि ।
श्रीमातृभजनप्राप्तमतिना भाष्यदर्शिना ॥ २ ॥
वह्नेरारुणकेतोस्तु विधिसूत्रप्रदीपिका ।
कृतोपेन्द्रेण बोधाय सतां तुष्ट्यै भवत्वियम् ॥ ३ ॥
याज्ञिको वेदपाठी चार्थविज्ञानसूचकः ।
एतद्ग्रन्थगुणग्राही नेतरो गुणविद्भवेत् ॥ ४ ॥

*Colophon :—*

इति श्रीमदारुणकेतुकप्रदीपिकायामुपेन्द्रविरचितायां वैश्रवणबलिस्वाध्यायविधिनिरूपणं चतुर्थः प्रकाशः ।

*Post-Colophon :—*

शके १७१९ प्रमादीसंवत्सरे मार्गशीर्षकृष्णसप्तमीदिने पुण्यग्रामे समाप्तिमगात् ।

## 67

### 199. ( उक्थ्यादिसंस्थाप्रयोगः । )

### (UKTHYĀDISAMSTHĀPRAYOGA.)

This is a manual of the four Samsthās. Ukthya, Ṣoḍaśī, Atirātra and Aptoryāma of the Jyotiṣṭoma sacrifice according to the Apastamba School. This work serves the purpose of a commentary on the 14th Praśna of the Āpastambaśrautasūtra, and this codex contains only the first Patala of that Praśna. The second Patala is incomplete and there is a leaf at the end containing a fragment of the 8th Paṭala of the same Praśna. This work seems to be a part of a big Prayoga work based on the Āpastambaśrautasūtra and there is no colophon showing the title of the work.

*Beginning:*—

उक्थ्यः षोडश्यतिरात्रोऽप्तोर्यामश्चाग्निष्टोमस्य गुणविकाराः । यथा सदः क्रतुकरणं क्रतुपशव उक्थ्यग्रहस्तृतीयसवने गृह्यत इत्यर्थः । उक्थ्यकर्मोच्यते । सोमेन यक्ष्ये । ज्योतिष्टोमेनोक्थ्येन बृहत्साम्ना द्वादशशतदक्षिणेन पशुमान् भूयासमिति सङ्कल्पः । नित्य इति केचित् । तदा न फलनिर्देशः । विद्युदादि सर्वमग्निष्टोमवत् ।

× × × × ×

समाप्तोक्थ्यसंस्था । तत्र श्लोकः

उक्थ्ये प्रव्राजनं नास्ति अतिग्राह्या न चात्र तु ।
दधिघर्मस्य लोपः स्यात् पशुरैन्द्राग्न एव च ॥

अथ षोडशिनः कर्म ।

× × × × ×

समाप्तोऽप्तोर्यामः ।

एताः संस्था अग्निष्टोमस्य गुणविकाराः । ज्योतिष्टोमस्य गुणविकारा इत्यर्थः । एतासु नाग्निचयनमित्यापस्तम्बमतम् । यथाऽप्तोर्यामः सर्वपृष्ठः सर्वस्तोमः स्यात् तस्य त्वन्तरत्वाद्विकृतित्वाच्च तत्राग्निचयनम् ।

× × × × ×

समाप्ते आगामिपर्वणि त्रैधातवीया सहस्रदक्षिणे यजेतेति । यज्ञो बभूव । साग्निचित्यश्चेत् सौत्रामणी पयस्या च । नाचिकेतपक्षेऽन्यतरा ।

तत्र श्लोकः

उक्थ्यादयश्च काम्याः स्युः साग्निचित्ये च केचन ।
नाचिकेतासु संस्थासु कैश्चित्तास्वपि चेष्यते ॥

इति प्रथमः पटलः ।

क्रतुपशव एकादशिनाश्च विकल्पन्ते ।

*End :*—

मार्जनान्ते पशुपुरोडाशेन प्रचर्य श्रृतं हविः शमितरित्यादीडामार्जनान्तं प्रयाजादीनामप्रवृत्तिः । समुद्रं गच्छतमिति । जाघनीद्वयेन पत्नीसंयाजाः । येषां दीक्षितानामाहवनीय उद्वायेदिति पूर्वमुक्तं हविर्यज्ञप्रायश्चित्तेषु । अत्र किञ्चिदुच्यते । दीक्षितानामाहवनीय × × ×

## 68

## 200. उत्सर्गेष्टिविधिः ।

### UTSARGEṢṬIVIDHI.

This is a manual of the Utsargeṣṭi which is to be performed by the Āhitāgni or one who preserves the three sacrificial fires when he wants to renounce the world for the Sannyāsāśrama.

*Beginning*:—

अथोत्सर्गेष्टिः । तत्र जाबालश्रुतिः । तद्धैके प्राजापत्यामेवेष्टिं कुर्यादिति । अत्र वाक्यशेषेऽग्निरिति [ ग्नीनिति ] बहुवचनश्रवणादाहिताग्निविषयमेवैतदित्युक्तं विश्वेश्वरीये । अथ वा वैश्वानरेष्टिं कुर्यात् । अग्नये वैश्वानराय द्वादशकपालं पुरोडाशं निर्वपति प्राजापत्यं चरुं वैष्णवं नवकपालं चेति ।

*End*.—

अथाग्निद्रव्यमग्नौ प्रक्षिप्यात्मन्यग्नीन् समारोपयेत् । या ते अग्ने यज्ञिया तनुरिति । पात्रप्रतिपत्तिमाह दत्तात्रेयः । मृण्मयान्यश्ममयानि वाऽग्नौ जुहोति । गुरवे तैजसादि दद्यादिति । काष्ठपात्राण्याहवनीये प्रक्षिप्यारणिर्गार्हपत्ये प्रक्षेप्या । उलूखलमुसले दक्षिणाग्नौ निक्षिपेदित्युक्तं यमस्मृताविति ।

*Colophon*:—

इति उत्सर्गेष्टिविधिः ।

*Post-Colophon*.—

संवत् १८८२ हेमलम्बनामसंवत्सरे माहे आषाढशुक्लषष्ठी इन्दुवासरे तस्येदं पुस्तकं गुर्जरदेशबडोदेमध्ये समाप्तमित्युपनामकभीकंभटभाउ[ऊ] त्र्यबकर [त्र्यम्बककर] दशपुत्रदीक्षित अग्निहोत्रि याचे पुस्त[क] असे लिखिते कृष्णाजी यादव कोटले जोशि पीपळवंडीकर प्रांत जुन्नर । इति श्रीवीधुरपुस्त[कं] सम्पूर्णमस्तु । श्रीगजानन । श्रीसाम्बसदाशिवार्पणमस्तु । श्रीलक्ष्मीनृसिंहार्पणमस्तु ।

---

## 69

## 201. उन्नेतृत्वप्रयोगः ।

### UNNETṚTVAPRAYOGA.

This work deals with the duties of the Unnetṛ priest of the Adhvaryu group in the Agniṣṭoma sacrifice.

*Beginning* :—

श्रीगणेशाय नमः। उन्नेतृत्वप्रयोगो लिख्यते। सोमप्रवाकोक्त्यनन्तरं को यज्ञः क ऋत्विजः का दक्षिणेत्यादि पृष्ट्वा महन्मे वोचो भर्गो मे वोचो भगो मे वोचो यशो मे वोचः स्तोमं मे वोचः क्लृप्तिं मे वोचो भुक्तिं मे वोचस्तृप्तिं मे वोचः सर्वं मे वोचस्तन्मामवतु तन्मा विशतु तेन भुक्षिषीय। आपस्ते होत्रा शंसिन्यस्तास्ते होत्रा शंसिन्य उन्नेताऽहं ते मानुषः। यजमाने मधुपर्को निवेदितस्तं प्रतिगृह्णीयात्। अनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपा अनभिशस्तेऽन्यम्। तानूनप्त्रमभिमृशति। उन्नेता यजमानं वाचयति।

*End*:—

एधोस्येधिषीमहि। द्वितीयम्। एधोस्येधिषीमहि। तृतीयम्। आहवनीये गृहीतक्रमेण जुहोति। समिदसि स्वाहा। अग्नयमिति सर्वत्र। इति प्रथमम्। तेजोऽसि स्वाहा। इति द्वितीयम्। तेजो मयि धेहि स्वाहा। इति तृतीयम्। आहवनीयमुपतिष्ठते। अपोऽन्वचारिषं रसेन समसृक्ष्महि। पयस्वां अग्न आगमन्तं मा संसृज वर्चसा। ततः संस्थाजपः। तीर्थेन निष्क्रम्य भोजनार्थं गच्छति।

*Colophon* :—

सन्तिष्ठतेऽग्निष्टोम उन्नेतृत्वप्रयोगः समाप्तः।

*Post-Colophon*:—

शके १७३५ श्रीमुखनामसंवत्सरे वैशाखशुद्ध १० रविवासरे तद्दिने माचेगणोपनामकबाळंभट्टात्मजमाधवेन लिखितम्।

---

## 70

## 202. उपधानोज्ज्वली।

UPADHANOJJVALĪ.

*By Sarvakratuvipaścit.*

This treatise deals with the construction of the alters in Vedic sacrifices. These alters are constructed by arranging the sacrificial bricks in a special order with Mantras in the forms of Syena and other birds. The author, Sarvakratuvipaścit describes here the method of arranging the bricks in the second Syenaciti. There are two MSS. of this work in this collection and both of them contain portions of the same work. The leaves are moth-eaten.

*Beginning*:—

ॐ सुमुखाय नमः। ॐ द्वितीयश्येनचिति प्रथम ऊनपक्षोपधानोज्ज्वली।
मन्त्रैर्या उपधेयास्तु द्वितीयश्येनपावके।
ता इष्टकाः प्रदर्श्यन्ते सर्वक्रतुविपश्चिता॥

अस्ति द्वितीयश्येनाकृतिरग्निः । स च द्विविधः । ऊनाधिकप्रस्तारः पूर्णप्रस्तारश्च । तत्र ऊनाधिकद्विशतप्रस्तारको द्विविधः । षट्षोडशीघटितात्मको द्वादशषोडशीघटितात्मकश्च । तत्र चरमस्य सर्वयाज्ञिकप्रसिद्धत्वात् तमालभ्योपधेयानां मन्त्रैरिष्टकानां नामरूपस्थानानि कथ्यन्ते ।

Leaf 12 a. इति सर्वक्रतुविरचितायां द्वितीयश्येनचितौ प्रथम ऊनाधिकप्रस्तार उपधानोज्ज्वली समाप्ता ।

*End:*—

एवं कृते शिरःपक्षपुच्छसहितात्मवान् पूर्णश्येननामकस्याग्नेराकारो निष्पद्यते । श्रीसुमुखाय नमः ।

---

## 71

## 202. उपधानोज्ज्वली ।

## UPADHĀNOJJVALĪ.

*By Sarvakratuvipaścit.*

This is the second MS. of the work Upadhānojjvalī. This contains larger portion of the work in three paginations each consisting of 22, 10 and 17 leaves respectively. There are 9 leaves at the end of this codex which contain a duplicate copy of the portion contained in the last 17 leaves. This seems to have been copied by a later hand since the previous portion is moth-eaten and disfigured. The author Sarvakratuvipaścit describes in these portions the Śulbopadhāna and Mantropadhāna of the sacrificial bricks in the Dviṣāhasricayana and the Śulbopadhāna in the Dvitīyaśyenaciti. The work does not seem to be complete even in this MS.

*Beginning:*—

देवौ सनन्दनौ नत्वा सर्वक्रतुविपश्चिता ।
इष्टकानां द्विषाहस्र्यां मन्त्रोपहितिरुच्यते ॥

शुल्बोपधानं विना मन्त्रोपधानायोगादादौ शुल्बोपधानमुच्यते । द्विषाहस्रे तावदेकैका चितिर्द्विप्रस्तारा । एकैकप्रस्तारो द्विशतेष्टकः । तत्र प्रथमप्रस्तारे दक्षिणोदगायताः षोडश रीतयः । शिरस्येकपादाऽतिरिक्ता च । पुच्छादिशिरःपर्यन्तं रीतिगणना । दक्षिणाद्युदगन्तमिष्टकागणना च ज्ञेया ।

*End:*—

शेषा लोकम्पृणाः । चतुर्दश्यां रीतौ प्रथमापादा दक्षिणपक्षे चतुर्थरीतौ त्रयोदशीपक्षाग्रिया । सप्तम्यां रीतौ षष्ठीपादा उत्तरपक्षे षोडशपक्षेष्टकाः । द्वे पक्षाग्रीये चिती मिलित्वा एकविंशतिर्लोकम्पृणाः ।

*Colophon:*—

इति सर्वक्रतुविरचिता द्वितीयश्येनचितौ निरणुकद्विशतप्रस्तारप्रथमप्रकारस्योपधानोज्ज्वली समाप्ता ।

---

## 72

### 203. ऐकाह्निकचातुर्मास्यप्रयोगः ।

AIKĀHIKACĀTURMĀSYAPRAYOGA.

This is a manual of the Aikāhikacāturmāsya according to the school of Āpastamba. In this Prayoga all the four Parvans, Vaiśvadeva etc. are to be performed simultaneously.

*Beginning:—*

श्रीगणेशाय नमः । ऐकाहिकचातुर्मास्यप्रयोगो लिख्यते । देशकालौ सङ्कीर्त्य ऐष्टिकै- रैकाहिकैश्चातुर्मास्यैरेकतन्त्रेण यक्ष्ये इति सङ्कल्प्य समारोप्य प्ररूढकक्षदेशं गत्वा सर्वं विहारदेशमुद्धत्यावोक्ष्य शम्यामात्रं गार्हपत्यायतनं कृत्वा मथित्वोपावरोह्यायतने निधाय । विद्युत् । पञ्चर्त्विग्वरणम् । सम्भवे मधुपर्कं कुर्यात् । शौल्बमानेन वेदिद्वयं कृत्वोभौ वेदकरणादि । त्वया वेदिमिति वेदौ कुरुत । स्फ्यादानादि । प्रस्थाताऽपरेणोत्तरान् वेदिमध्वर्युं चोत्तरेण दक्षिणस्तम्बयजुर्हरन्नुत्करे निवपति ।

*End:—*

स प्राणस्य प्राणः । समे० । प्राणस्य च मे प्राणो भूयात् । द्यौरष्टहोता । सोऽनाधृष्यः । स मे० । अनाधृष्यश्च भूयासम् । आदित्यो नवहोता । स तेजस्वी । स मे० । तेजस्वी च भूयासम् । प्रजापतिर्दशहोता । स इदं सर्वम् । स मे० । सर्वं च मे भूयात् । इति वपिष्यञ्ज- पति । अपि वाऽस्मारवोद्नादि । अग्नीन् समारोप्योद्वसायोपावरोह्य निर्मथ्य पौर्णमासेन यजेत । इत्यैकाहिकप्रयोगः ।

उदगयनपूर्वपक्षपुण्याहसन्निपाते यज्ञकालानादेश इति छन्दोगसूत्रम् । सन्निपात इति यथासम्भवमित्यग्निभाष्ये व्याख्यातम् । चत्वारि शतान्ब्राह्मणान् भोजयेत् । असम्भवे यथाशक्त्या कुर्यात् ।

*Colophon:—*

इत्यैकाहिकचातुर्मास्यप्रयोगः समाप्तः ।

---

## 73

### 206. ऐकाह्निकचातुर्मास्यप्रयोगः ।

AIKĀHIKACĀTURMĀSYAPRAYOGA.

This is another manual of the Aikāhikaiṣṭikacāturmāsya according to the Schools of Bodhāyana and Śāṅkhāyana.

*Beginning—*

श्रीगणेशाय नमः । ऐकाहिकानामैष्टिकानां ;चातुर्मास्यानां प्रयोगो बौधायनानां लि- ख्यते । सांवत्सरिकप्रयोगाद्यसम्भवेऽनुकल्पोऽयम् । अत्र विशेषा लिख्यन्ते । फाल्गुनी चैत्री वैशाखी आषाढी श्रावणी कार्त्तिकी मार्गशीर्षी पौषी वा पौर्णमासी तेषां कालः । साङ्खा- यनादिसूत्रात् । सङ्कल्पपर्यन्तं चातुर्मास्यप्रयोगान्तरवत् । महत्वाद्वारुणप्राघासिकं तन्त्रं वारुणप्राघासिको विहारः । उद्वसायानुष्ठानम् । सङ्कल्पे विशेषः । देशकालौ सङ्कीर्त्य पर- मेश्वरप्रीतिकाम ऐष्टिकैरैकाहिकैश्चातुर्मास्यैरेकतन्त्रेण यक्ष्ये ।

*End.*—

स्नात्वा स्वायतन उपविश्य संवत्सरीणां स्वस्तिमाशास्ते । परिवत्सरीणां स्वस्तिमाशास्ते । इदावत्सरीणां स्वस्तिमाशास्ते । अनुवत्सरीणां स्वस्तिमाशास्ते । इति मन्त्रचतुष्टयं ब्रूयात् । ब्राह्मणभोजनसङ्कल्पो विष्णुस्मरणं ब्रह्मार्पणं च ।

*Colophon*:—

ऐकाहिकचातुर्मास्यप्रयोगः ।

*Post-Colophon.*—

हौत्रमपि ऐकाहिकेषु चातुर्मास्येषु वरुणप्रघासवत् । आवाहनादिनिगमेषु सर्वासां देवतानां निगमनं गृहमेधीयदेवतावर्जम् । अन्यत्सुधीभिरूह्यम् । अविकृता पित्र्या ।

इदं पुस्तकं फणसळकरोपनामकहरिहरेण लिखितम् । लघाख्ये नारायणभट्टेषु दत्तम् । श्रीविश्वेश्वरक्षेत्रे । शुभम् ।

---

## 74

### 207. ऐकाहिकचातुर्मास्यप्रयोगः ।

### AIKĀHIKACĀTURMĀSYAPRAYOGA.

*By Bhairavatilaka.*

This is a manual of the Aikāhikaiṣṭikacāturmāsya which is to be performed simultaneously with the Nirūḍhapaśubandha. This kind of Prayoga has been prescribed in the Sāṅkhāyanaśrautasūtra (14-10-19). The author Bhairava Tilaka writes this manual according to the School of Bodhāyana.

*Beginning*—

श्रीगणेशाय नमः ।

विमृश्य दक्षिणामूर्त्ति शाङ्खायनमताशयात् ।
पशुबन्धेनैकाहिकैश्चातुर्मास्यस्य पद्धतिम् ॥ १ ॥
समानतन्त्रां प्रयोक्तुं बौधायनमतानुगाम् ।
सनाचिकेतां तनुते भैरवस्तिलकाभिधः ॥ २ ॥ ॥ युग्मम् ॥

तत्र शाङ्खायनसूत्रम् । पशुमत्सु चातुर्मास्येष्वित्युपक्रम्य-अथवाऽप्येकपर्वण्येकपशौ चैन्द्राग्ने पराञ्चि हवींषि । उपहूयेळां पित्र्या । त्र्यम्बकादूर्ध्वमनूयाजप्रभृति । मनोतादिपशुना वेति । अथशब्दः सांवत्सरिककथनानन्तर्यार्थः । अपि शब्दाद्यदि कथञ्चित्सांवत्सरिकाणि कर्तुं न शक्नुयात् तदैकस्मिन्पर्वण्येकेनाऽप्यह्ना समापयेदित्यर्थः । एकपर्वणीति पर्वचतुष्टयाङ्गत्वेन विहितपौर्णमासीनां मध्य एकस्यामपि पौर्णमास्यामित्यर्थः । देवयाज्ञिकास्तु फाल्गुन्यां चैत्र्यां वा पौर्णमास्यां प्रतिपदि वा । आषाढ्यादौ तु प्रतिपदि वेत्याहुः । तत्र ।

× × × × ×

अथ प्रयोगः । सांवत्सरिकप्रयोगासम्भवे प्रथमप्रयोगेऽप्ययं भवति । अविशेषात् । व्रीहिश्यामाकाग्रयणवत् । निरूढपशुबन्धेनैकाहिकैरैष्टिकैश्चातुर्मास्यैश्च तन्त्रेण यक्ष्यमाणः पूर्वेद्युर्वृद्धिशान्तिप्रतिसरबन्धान्विधाय श्वः स्नानादिपञ्चकान्ते दर्भेष्वासीन इत्यादि श्रीपरमेश्वरप्रीत्यर्थं स्वर्गकामो निरूढपशुबन्धेनैकाहिकैरैष्टिकैश्चातुर्मास्यैश्च तन्त्रेण यक्ष्ये ।

*End.*—

नित्योऽवभृथः । औत्तरवेदिकसमारोपो वरदानान्तः । ततो व्रतविसर्गौ । यद्धर्म इति प्रधावन्निवर्तनान्ते संवत्सरीणां परि० इदु० अनु० परिसमूहनादि । यस्य स्मृत्येति समाप्ये-श्वरार्पणं कृत्वा पञ्चशतं शतं वा ब्राह्मणान् भोजयेत् ।

*Colophon*:—

इति बौधायनैकाहिकसपशुचातुर्मास्यप्रयोगः समाप्तः ।

---

## 75

## 208. ऐकाहिकचातुर्मास्यप्रयोगः ।

## AIKĀHIKACĀTURMĀSYAPRAYOGA.

*By Āyubā S'ukla.*

This is another manual of the Aikāhikacāturmāsya according to the Śāṅkhāyanaśrautasūtra. In the beginning of the work, the aphorisms of Śāṅkhāyana which indicate this Prayoga to be performed simultaneously with Paśubandha, are quoted as the basis of this Prayoga. But, the Prayoga of Paśubandha is omitted in this work. The name of the author is nowhere stated in the work but one Śiva Kaviśvara Āyubā Sukla is stated as the author on the front page of the MS. by a different hand.

*Beginning*—

शिवकवीश्वर आयुबाशुक्लकृतैकाहिकचातुर्मास्यस्य ।

श्रीगणेशाय नमः । अथैकाहिकचातुर्मास्यप्रयोगः । अत्र शाङ्खायनसूत्रम् । अथवाऽप्येक-पर्वण्येकपशौ चैन्द्राग्ने पराञ्चि हवींषि । उपहूयेळां पित्र्या । त्र्यम्बकादूर्ध्वमनूयाजप्रभृति । मनोतादिपशुना वेत्यादि । देशकालौ सङ्कीर्त्य ऐकाहिकचातुर्मास्यैर्यक्ष्य इति सङ्कल्प्य । वारुण-प्रघासिकं तन्त्रम् । समारोप्य देवयजनं गत्वा ऋत्विग्वरणादि कुर्यात् । शौल्बेन मानेन वेदि-द्वयं कृत्वाऽध्वर्युः प्रतिप्रस्थाता वेदौ कृत्वा वेदी कुरुतः ।

*End*—

एकस्मिन्नुत्कर उभयोरुपवेषयोः क्रमेणोपगूहनम् । कपालोद्वासनम् । यद्धर्मं कपाल-मित्येककपालानाम् । ब्रह्मा स्वं भागं प्राश्याचम्योपस्थाय निष्क्रामति । उत्तरे विहारे विष्णु-क्रमादि । उभयत्र समिन्धनं सहोपस्थानमुभयोराहवनीययोः शेषमुत्तरे विहारे । एकस्यैव वेदस्योपस्थायाधानम् । यज्ञशाश्वमवर्जं ब्राह्मणभोजनान्तम् । ततोऽध्वर्युः प्रसूतो देवेन स-वित्रा त्रीण्या च शलल्येक्षुकाण्डेनेक्षुशलाकया लोहेन क्षुरेणौदुम्बरेण उपोह्य । यद्धर्मः पर्यवर्त्तयेदन्तान्० अग्निस्तिग्मेनेत्यादि० केशान्निवर्त्तयते वापयते श्मश्रूणि । यजमानस्तद्दतं तत्सत्यमित्यादि सर्वं च मे भूयादित्यन्तं जपति ।

*Colophon*:—

इत्यैकाहिकचातुर्मास्यप्रयोगः ।

## 76

### 210. ऐकाह्निकचातुर्मास्यप्रयोगः ।

AIKĀHIKACĀTURMĀSYAPRAYOGA.

This is an exhaustive Prayoga of the Aikāhikacāturmāsya based on the Sūtra 14-10-19. of the Śāṅkhāyanaśrauta. No author's name is stated in the MS.

*Beginning:—*

अथैष्टिकान्यैकाहिकानि । ऐकाहिकचातुर्मास्यपद्धतिर्लिख्यते । तत्र शाङ्खायनसूत्रम् । अथवाऽप्येकपर्वण्येकपशौ चैन्द्राग्ने पराञ्चि हवींषि । उपहूयेळां पित्र्या । त्र्यम्बकादूर्ध्वमनुयाज-प्रभृति । मनोतादिपशुना वा सौमिकैः समानदक्षिणानि सर्वपशूनि चातुर्मास्यपशुदक्षिणैः पाशुकानीति सूत्रम् । अथशब्दः सांवत्सरिकचातुर्मास्योपसङ्ग्रहार्थं आनन्तर्यार्थो वा शब्दो विकल्पार्थः । अपिशब्देन प्रारब्धान्येव चातुर्मास्यानि प्रतिपर्वणि कर्तुमसमर्थः ऐकाहिका-न्यपि कुर्यात् । यदा सांवत्सरिकाणि कर्तुं न शक्यन्ते तदा नित्यकर्मलोपो मा भूदित्यैकाहि-कानुष्ठानम् । तच्च चतुर्णां पर्वणां मध्ये कस्मिंश्चित्काले कर्तव्यम् ।

*End:—*

पूर्णपात्रद्वयनिनयनम् । युगपद्ग्रहणं यजमानस्य मुखमार्जनं विष्णुक्रमादि । भाग-प्राशनान्ते विशेषः । वेदिद्वयावेक्षणम् । आहवनीयद्वयावेक्षणम् । ब्राह्मणांस्तर्पयत वै इति प्रैषोऽध्वर्योः । द्वयोस्तर्पणम् । ब्रह्मण उभयत्र × × पवर्गाधानं पाक्षिकपरम् । पूर्ववत्स-मारोपः । गृहप्रवेशः । निर्मन्थ्यस्थापनम् ।

*Colophon :—*

इत्यैकाहिकैष्टिकचातुर्मास्यपद्धतिः समाप्ता ।

*Post-Colophon.—*

शुक्लकाकापद्माकराणां पद्धतिरियम् ।

---

## 77

### 211. ऐकाह्निकचातुर्मास्यप्रयोगः ।

AIKĀHIKACĀTURMASYAPRAYOGA.

This is another exhaustive manual of the Aikāhikaiṣṭikacāturmāsya which is based on the Śāṅkhāyanaśrautasūtra 14-10-19.

*Beginning:—*

श्रीगणेशाय नमः ।

एकाहचातुर्मास्याह्वयज्ञोत्पाद्यशरीरिणे ।
विघ्नेभत्रासिसिंहाय तस्मै यज्ञात्मने नमः ॥

अथैष्टिकैकाहिकचातुर्मास्यपद्धतिर्लिख्यते । प्रारब्धप्रतिपर्वचातुर्मास्यानि देशकालाद्यनुरोधेन कर्तुमशक्तो विकल्पादैकाहिकान्यपि कुर्यात्। उक्तं च शाङ्खायनेन। अथवाऽप्येकपर्वण्येकपशौ चैन्द्राग्ने पराञ्चि हवींषि । उपहूयेलां पिब्या । त्र्यम्बकादूर्ध्वमनूयाजप्रभृति । मनोतादिपशुना वेति । अस्यार्थः । अथशब्दः सांवत्सरिकचातुर्मास्योपसङ्ग्रहार्थः । वा शब्दो विकल्पार्थः । अपिशब्दाद्यदि कथञ्चित्सांवत्सरिकाणि कर्तुं न शक्नुयात्तदा चतुर्णां पर्वणां मध्य एकस्मिन्पर्वण्येकेनाह्ना तन्त्राधिकेऽनावृत्तानि सर्वाणि हवींषि समानतन्त्रतया कुर्यात् । ऐन्द्राग्ने वा पशावेकस्मिन्पशुपुरोडाशमनु सर्वाणि चातुर्मास्यहवींषि कुर्यात् ।

× × × × ×

तत्र पूर्वमैष्टिकान्युच्यन्ते । तत्र प्रथमप्रयोगे मातृपूजापूर्वमाभ्युदयं च वा । ततोऽन्वारम्भणीया ।

*End*·—

इति षडाहुतिपक्षेऽवभृथेष्टिः । ततो बर्हिर्होमादिकमापवर्गान्तम् । बर्हिर्होम उभयोः । प्रणीताविमोकस्त्वध्वर्योरेव स्ववेद्याम् । करम्भपात्रकणसहितानां कणानामपासनमध्वर्योः प्रस्थातुश्च स्वीयानाम् । स्वीयस्वीयपूर्णपात्रनिनयनम् । प्रतिग्रहो युगपत् । वेदी अन्तरा विष्णुक्रमा इत्याथर्वण इति सम्प्रदायः । मन्त्रावृत्त्या वेदिद्वयस्यावेक्षणमाहवनीययोश्च । ब्राह्मणांस्तर्पयत वेति प्रैषः । ब्रह्मण उभयत्र कर्मापवर्गाधानम् । ततो वैकल्पिकं वपनं मन्त्रवत् । अस्यैष्टिकैकाहिकचातुर्मास्यकर्मणः समृध्यर्थं यथासम्पन्नेन तृप्तिपर्यन्तभोजनपर्याप्तेनान्नेन शतं ब्राह्मणानहं तर्पयामीति सङ्कल्पः । ततः समारोप्य गृहानागत्य निर्मन्थ्य गार्हपत्यं खर आधाय पौर्णमासोपक्रमादि । नित्यं कर्म कुर्यात् ।

*Colophon*:—

इत्येकाहचातुर्मास्यानुष्ठानं समाप्तम् ।

---

## 78

## 212. ऐकाहिकचातुर्मास्यप्रयोगः ।

### AIKĀHIKACATURMASYAPRAYOGA.

*By Nīlakaṇṭha Satya.*

This is a manual of the Aikāhikacāturmāsya based on the Śrautasūtras of Hiranyakeśin and Kaṭha. The author seems to be well-versed in the Bodhāyana School also.

*Beginning*:—

श्रीगणेशाय नमः ।

नत्वा श्रीगणपं हरिं गुरुपदं श्रीनीलकण्ठः कृती
चातुर्मास्यविधौ तनोति रसलामैकाहिकां पद्धतिम् ।
सत्याषाढमतानुगां कठमतं बौधायनाद्याश्रितं
संज्ञात्वा मखतन्त्रकोविदमुदे सत्योपनामा द्विजः ॥ १ ॥

अथ कठसूत्रोक्तहिरण्यकेशिसूत्रानुयायी ऐकाह्निकचातुर्मास्यप्रयोगः । अस्यानुकल्पत्वा-द्याद्ये प्रयोगे न भवति । आषाढ्यां श्रावण्यां वा पौर्णमास्यां बौधायनोक्ते वा उदगयनादिकाले यजेत । कर्ता देशकालौ सङ्कीर्त्य श्रीपरमेश्वरप्रीत्यर्थमैकाह्निकैष्टिकचातुर्मास्यैर्यक्ष्य इति सङ्कल्प्यादौ निर्विघ्नतासिध्यर्थं गणेशं सम्पूज्य ऋत्विजो वृणुयात् । आर्हयेच्च । उदवसायेत्यादि । अध्वर्युप्रतिप्रस्थातारौ आज्यसंस्कारादि पूर्णाहुतिहोमान्तं वरुणप्रघासवत्कुरुतः । ततोऽन्वाधानम् । ममाग्ने० श्वो यज्ञाय० यथातिथि० चातुर्मासीयँ हविः ।

*End:—*

कपालविमोचनं तूपवेषोदसनं कर्मनिवेदनं च क्रियते । ततो यथाप्रयोगवत् त्र्यम्बकैः प्रचरति । उपसमिन्धनान्ते उल्मुकेऽपिसृज्य ब्रह्मन्प्रस्थास्याम इत्यादि प्राकृततन्त्रप्रक्रमः । नवानूयाजा इत्यादि वैश्वदेवीयवाजिनेन प्रचर्यान्याभ्यां सह प्रचरतः । भक्षस्तेन तेन मन्त्रेण० वे.........मा.........वा संस्थितायामवभृथेष्टिः । प्रसूतेत्यादि सर्वान्वपनमन्त्रान् जपेत् ।

ऐकाह्निका सुरचिता श्रीचातुर्मास्यपद्धतिः ।
नीलकण्ठेन विदुषा यज्ञेशस्तेन तुष्यतु ॥ १ ॥

*Colophon:—*

इत्यैकाह्निकचातुर्मास्यप्रयोगः समाप्तः ।

---

## 79

### 213. ऐन्द्रवारुणेष्टिप्रयोगः ।

### AINDRAVARUṆEṢṬIPRAYOGA.

*By Bālakṛṣṇa.*

This is a manual of the Aindravāruṇeṣṭi prescribed by Āpastamba in his Śrautasūtra (19. 25. 1–8). At the end of this work, there is the Hautraprayoga of this Iṣṭi where the work is ascribed to Bālakṛṣṇa. Leaves 15–18 contain the Jayābhyātanādiprayoga required to be performed in this sacrifice.

*Beginning:—*

श्रीगणेशाय नमः । अथैन्द्रवारुणेष्टिः । सा च पर्वणि कार्या । खण्डपर्वणि तु प्रकृत्यनन्तरं सद्य एव । खण्डपर्वणि पूर्वेद्युरेव विकृतिं कृत्वा प्रकृत्यन्वाधानं कार्यमित्युक्तं तन्त्ररत्ने । उदगयन आपूर्यपक्षे कृत्तिकादिविशाखान्तेषु देवनक्षत्रेषु रेवत्यां वा कार्या । रेवतीपर्वणोः समुच्चय इति भाष्यकारः । उपक्रमेऽन्वारम्भणीया कार्या । आश्वलायनवृत्तिकारस्तु विकृतिषु नासौ कार्येत्याह । अत्रामिक्षोद्धरणमेकस्मिन्पात्रे कार्यमित्युक्तं भाष्ये । युक्तं चैतत् द्वय(ह)कालत्वं सद्यो वा । सौकर्यात्सद्यस्कालत्वपक्षमवलम्ब्य प्रयोगो लिख्यते । प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ स्मृत्वा ऐन्द्रवारुणेष्टिमारप्स्यमानो निर्विघ्नतासिध्यर्थं गणपतिपूर्वकं स्वस्तिवाचनं करिष्य इति सङ्कल्प्य ।

*End:—*

यजमानः ऋत्विजश्च हस्तेषु समिधः कृत्वा वाग्यता अवभृथोदकमनवेक्षमाणा विहार-देशं प्राप्य एधोस्यैधिषीमहीत्याहवनीये समिध आधाय अपोऽन्वचारिषमित्युपतिष्ठन्ते। ततोऽयं देवा इत्यादि यज्ञो बभूव यज्ञशाश्वमवर्जं वृष्टिरसि। दशब्राह्मणाँस्तर्पयेत वै। अग्ने नयेत्यादि। यस्य स्मृत्येत्युक्त्वा। अनेन ऐन्द्रवारुणेष्ट्याख्येन कर्मणा श्रीपरमेश्वरः प्रीय-ताम्। ततोऽग्नीन् समारोप्य गच्छतीति शिवम्।

*Colophon:—*

इत्यापस्तम्बानुयायिनामैन्द्रावरुणेष्टिप्रयोगः।

*Then begins Hautra:—*

अथ हौत्रम्। अग्निप्रणयनं मन्थनं च चातुर्मास्यवत्। नमः प्रवक्त्र इत्यादि। सप्तदश सामिधेन्यः। शोचिष्केशस्तमीमहो ३ पृथुपाजा०।

*End:—*

वागोजः। यद्यनुयाजौ देवो नराशंसो० देवोऽग्नि० संस्थितायां पादानुकान्ते वदध्यु-रित्यादि संस्थाजपान्तं वरुणप्रघासवत्।

*Colophon:—*

ऐन्द्रवारुणेष्टिहौत्रप्रयोगः।

बालकृष्णेन रचितः प्रयोगोऽयम्।

× × × × ×

इयं सा शुक्रामधुवाजिनीवती ययोपरिष्टा दध्निनोन्महेन्द्रमामिक्षा मां धिनोतु। ऐन्द्र-वारुणेष्ट्यध्वर्युप्रयोगः समाप्तः।

*Post-Colophon:—*

शके १७०६ क्रोधीनामसंवत्सरे श्रावणवद्यत्रयोदश्यां भृगुवासरे तद्दिन इदं पुस्तकं उम्रजकर इत्युपनामक रङ्गनाथसूनु रामचन्द्रेण लिखितं समाप्तम्।

---

## 80

## 215. औद्गात्रप्रयोगः।

## AUDGĀTRAPRAYOGA.

It is a manual for the guidance of the duties of the Udgātṛ priest belonging to the Sāmaveda in the sacrifice of the Agniṣṭoma. The MS. is incomplete at the end of the 3rd Savana of the sacrifice.

*Beginning :—*

नत्वा वारणदन्तस्य पदपङ्कजमादरात्।
अग्निष्टोमादियागस्य प्रयोगो वक्ष्यतेऽधुना ॥ १ ॥

यज्ञेश्वरशर्मणः सोमो भविष्यति। तत्र भवता औद्गात्रं कर्त्तव्यमिति सोमप्रवाकेन वृत उद्गाता सोमप्रवाकं प्रति के ऋत्विज इति पृच्छेत्। तेनाधानादिषु कृष्णशर्मादय इति प्रति-वचने कृते पुनरुद्गाता के याजयन्तीति प्रश्नं कुर्यात्। × × ×

महन्मे वोचो भर्गो मे वोचो + तेन भुक्षिषीयेति मन्त्रेण प्रतिमन्त्रणं कृत्वोत्थाय कतिचित्पदानि गत्वा देवो देवमेतु + सोमङ्गमेयमिति जपित्वा दक्षिणामुखः प्राचीनावीती भूत्वा पितरो भूः पितरो भूः पितरो भूरिति जपेत् । अथ मधुपर्कः ।

× × × × ×

माध्यन्दिनसवनं समाप्तम् ।

अथ तृतीयसवनस्योपाकरणात्पूर्वमेव उत्तरवेद्यग्नेः पश्चादुदङ्मुखो यजमान उपविश्य लोकद्वारस्य तृतीयचतुर्थसामानि यथाक्रमं गायेत् । लोकद्वारस्य तृतीयचतुर्थसाम्नोः पुष्कलऋषिः । द्विपदा गायत्री छन्दः । आदित्याश्च विश्वदेवाश्च देवताः ।

*End*:—

एवं प्रस्तोता च कुर्यात् । ततः प्रतिहर्ता च । प्रतिहर्त्तारमुत्तरेणाहृतं सौम्यं चरुं द्रष्टव्येत्स........रोगार्तो वाऽहतेन वाससा प्रच्छाद्य दक्षिणेन सदसो गत्वा भुञ्जीत । अथाग्निष्टोमसामस्य (?) यज्ञायज्ञीयस्य ऋचः यज्ञायज्ञा वोऽग्नय इति प्रगाथऋग्जपः कार्यः । ततः कर्णाभ्यां सह शिरसः प्रावरणं कुर्यात् ।

---

## 81

### 220. औद्गात्रप्रयोगः ।

### AUDGĀTRAPRAYOGA.

It is another manual for the guidance of the duties of the Udgātṛ priest in the ceremonies of Bṛhaspatisava and Agniṣṭoma. The MS. is much injured and many leaves are moth-eaten at the end. The leaves also are not arranged in proper order and there are several paginations.

*Beginning*:—

बृहस्पतिसवस्यौद्गात्रम् । वरणमधुपर्कादि महारात्रपर्यन्तं सर्वमग्निष्टोमवत् । अत्र विशेषः । विश्वरूपा ज्योतिर्गानानि न सन्ति धूर्गानानि च । बहिष्पवमानप्रभृति यज्ञायज्ञान्तं सर्वाणि स्तोत्राणि त्रिंशत्स्तोमा भवन्ति । माध्यन्दिनपवमानस्य ऋग्जपान्तमग्निष्टोमवत् ।

*End of the Bṛhaspatisava*:—

उद्वसानीयेष्टिपर्यन्तं समानम् । बृहस्पतिसवः समाप्तः ।

Then ten leaves contain the Stotras required for the Bṛhaspatisava.

*Beginning of the Agniṣṭoma*:—

श्रीगुरुभ्यो नमः । यज्ञेश्वरशर्मणः सोमो भविष्यति । तत्र भवतौद्गात्रं कर्तव्यमित्युक्ते के ऋत्विजः के याजयन्ति कश्चिन्न्यस्तमार्त्विज्यं कच्चित्कल्याण्यो दक्षिणा इति पृष्ट्वा महन्मे वोचो भर्गो मे वोचः ।

× × × ×

Leaf 21 b. सन्तिष्ठते प्रातःसवनम् ।

Leaf 22 a. अथ माध्यन्दिनं सवनम् । राजोपहरणात्पूर्वमेव यजमान आग्नीध्रीयं प्रविश्य उदङ्मुख उपविश्य लोकद्वारमिति द्वितीयं रौद्रसाम × × × गायेत् । लोकद्वारस्य द्वितीयसाम्नः पुष्कलऋषिः ।

Leaves at the end of the 3rd Savana are badly damaged.

---

## 82

### 221. औद्गात्रप्रयोगः ।

### AUDGĀTRAPRAYOGA.

Here is a list of Stotras with Ṛks and Sāmans to be recited by the priests of the Udgātṛ group during the performance of the three Savanas of the Aptoryāma which is a variety of the Jyotiṣṭoma. At the end there are some leaves containing directions for the duties of the Udgātṛ priest in Ṣoḍaśī, Sandhi and other Stotras and they have different paginations. No author's name is found here, but this work follows in this MS.-the Sarvapṛṣṭhāptoryāmaprayoga - a part of the Prayogapārijāta by Puruṣottamabhaṭṭa. As the Prayogapārijāta is a voluminous work, it is possible that this also may be a part of the same work. There is no colophon in this MS.

*Beginning:—*

अथाप्तोर्यामस्य प्रयोगः । पवस्व वाचोऽग्र्यौं० त्वं समुद्रिया अपों० तुभ्ये मा भुवना कवौं० दिवि द्युतात्तिया रुचों० × × × इति बहिष्पवमानं त्रिवृत् ।

अथाज्यानि । पञ्चदशस्तोमः । अग्निं दूतं वृणीमहों० अग्निमग्निं हवीमभों० × ×

इति प्रथमाज्यस्य विधिः । × × ×

इति द्वितीयाज्यस्य विधिः । × × ×

इति तृतीयाज्यस्य विधिः । × × ×

इति तुरीयाज्यस्य विधिः ।

अथ माध्यन्दिनं सवनम् । सप्तदशः स्तोमः । × × ×

अथ माध्यन्दिनं सवनमेकविंशः स्तोमः ।

होतुः पृष्ठम् । × × ×

चतुर्विंशः स्तोमः । × × ×

चतुश्चत्वारिंशः स्तोमः । × × ×

अथ षोडशीस्तवनम् ।

एकविंशः स्तोमः । × × ×

अथ रात्रिपर्यायाणां स्तवनम् । × × ×

अथ सन्धिस्तोत्रम् । × × ×

अथ तृतीयसवनम् ।

*End:—*

सन्धिस्तोत्रस्य त्रिवृत् । तिसृभ्यो हिङ्करोतीति कुशाविधिः । अतिरिक्तस्तोत्राणां मध्ये प्रथमस्य तिसृभ्यो हिङ्करोति । द्वितीयस्य पञ्चभ्यो हिङ्करोतीति कुशाविधानम् । तृतीयस्य रथन्तरवत्कुशाविधानम् । चतुर्थस्याग्निष्टोमयज्ञायज्ञीयवत्कुशाविधानम् ।

---

83

## 223. कल्पसारकारिका ।

## KALPASĀRAKĀRIKĀ.

*By Mayūravāha.*

This is a versified liturgy dealing with the Vedic sacrifices from the Darśapūrṇamāsa to the Cāturmāsya basing on the Bodhāyana-kalpasūtra. This work is divided into seven chapters which are named according to the subject dealt with therein. They are:

1. Paribhāṣākāṇḍa 2. Paurodāśakāṇḍa 3. Ādhānakāṇḍa 4. Punarādheyakāṇḍa 5. Paśukāṇḍa 6. Cāturmāsyakāṇḍa 7. Punarādheyakāṇḍa (?).

The MS. is incomplete in the middle since many leaves are missing in the 2nd Kāṇḍa. The third Kāṇḍa begins with a different pagination. The 7th Kāṇḍa deals with Brahmatva or the duties of the Brahman and Iṣṭihautra though it is designated as Punarādheya-kāṇḍa. The scribe adds in his post-colophon remarks the list of 18 Purāṇas and Upapurāṇas.

*Beginning:*—

श्रीगणेशाय नमः । श्रीकरञ्जायै नमः ।
इष्टिं दिशतु शिष्टेभ्यो मुनिर्बौधायनाह्वयः ।
कल्पं कल्पामृतं येन गुप्तं वेदपयोनिधौ ॥ १ ॥
दामोदरभवस्वामिकणकर्मान्तदर्शितम् ।
कारिकादिषु विस्तीर्णं सारं कल्पस्य गृह्यते ॥ २ ॥
तत्र तावदिमे यज्ञा एकविंशतिरीरिताः ।
पाकयज्ञहविर्यज्ञसोमयज्ञप्रभेदतः ॥ ३ ॥
पाकयज्ञा हुताद्यास्तु सप्त गृह्ये प्रकीर्तिताः ।
सप्तकं द्वितयं शिष्टमत्र तेषां क्रमस्त्वयम् ॥ ४ ॥
अग्न्याधेयाग्निहोत्रे च नित्येष्ट्याग्रयणानि च ।
पशुमेके ततश्चातुर्मास्यान्यथ पशुं परे ॥ ५ ॥
अन्येषां न पशुस्त्वेषां षष्ठो दाक्षायणः क्रतुः ।
अन्ये सौत्रामणीकौण्डपायिनामयनं परे ॥ ६ ॥
अग्निष्टोमस्तु पूर्वोंसावुक्थ्यषोडशिनौ ततः ।
वाजपेयातिरात्राप्तोर्यामाः सोमा इमे मताः ॥ ७ ॥
नित्या एते न लोप्तव्या येन केनापि च द्विजैः ।
येषु येषु फलं श्रौतं निमित्तं वा ततोऽपरे ॥ ८ ॥
इष्टीनां प्रकृतिर्दर्शपूर्णमासावुदीरितौ ।
आधानं पुनराधानं प्रकृतिः स्यात्पशुः पशोः ॥ ९ ॥
अग्नीषोमीय एवायं सौकर्यादुदितोऽपरः ।
निरूढः पशुबन्धानामैन्द्राग्नः प्रकृतिः पशुः ॥ १० ॥

× × × × ×

इति बोधायनीयकल्पसारे परिभाषाकाण्डं प्रथमम् ।

× × × × ×

इति श्रीमयूरवाहविरचिते पुनराधेयकाण्डं चतुर्थं समाप्तम् ।

× × × × ×

इति बौधायनीये कल्पसारे चातुर्मास्यादिकाण्डं षष्ठम् ।

*End*:—

उपांशुध्वाननिनदो पटिमन्मन्द्रमध्यमाः ।
तारश्चेति स्वराः सप्त तेषां लक्षणमुच्यते ॥
समानसमशब्दं च ताल्वादिकरणेरितम् ।
उपांशुस्पष्टवर्गं स्यादूध्वानस्तु निनदः स्फुटम् ॥
उपब्दि(?)मत्सशब्दः स्याद्दूरस्थो मन्द्र उच्यते ।
मध्यमः कण्ठगो मूर्ध्नि तारस्ते स्युर्यथोदितम् ॥
अनुवचनमशेषं सामिधेनीवदे च
प्रवदतु बहुळर्चे पाशुकेऽपि द्वितीयम् ।
प्रतिपदमुदितं च त्रिस्त्रिरेव द्वितीय-
प्रभृति यदिह मन्त्राः कल्पकर्मानुरोधात् ॥

*Colophon*:—

इति पुनराधेयकाण्डं सप्तमम् ।
इति कल्पसारकारिका ।

*Post-Colophon*:—

ब्राह्मं पाद्मं वैष्णवं च शैवं लैङ्गं च गारुडम् ।
ततो भागवतं प्रोक्तं भविष्याख्यं सवामनम् ॥
नारदीयं तथाग्नेयं मार्कण्डेयं च कूर्मकम् ।
मात्स्यं च ब्रह्मवैवर्तं तथा वाराहमेव च ॥
स्कान्दं च वायवीयं च पुराणानि च..त्रिषट् ।
उपपुराणानि ।
आद्यं सनत्कुमाराख्यं नारदीयं द्वितीयकम् ।
तृतीयं नारसिंहाख्यं शैवं धर्मं चतुर्थकम् ॥
दौर्वासं पञ्चमं षष्ठं कापिलेयमतः परम् ।
सप्तमं मानवं प्रोक्तं शौक्रमष्टममेव च ॥
वारुणं नवमं त्वाहुर्ब्रह्माण्डं दशमं स्मृतम् ।
कालीपुराणं च तत एकादशमुच्यते ॥
वासिष्ठलैङ्गं द्वादशमं माहेशं तु त्रयोदशम् ।
साम्बं चतुर्दशं प्रोक्तं सौरं पञ्चदशं स्मृतम् ॥
पाराशरं षोडशमं मारीचं तु ततः परम् ।
अष्टादशं भार्गवाख्यं सर्वधर्मप्रवर्तकम् ॥
एतान्युपपुराणानि सर्ववेदमयानि च ।
इत्यष्टादश पुराणानि नामानि ।
सुभान्वब्द इषे मासि दशम्यां भानुवासरे ।
कल्पसारमिदं ग्रन्थं विलिखेच्छिवतुष्टये ॥

## 84

### 224. काठकचयनप्रयोगः ।

### KAṬHAKACAYANAPRAYOGA.

This is a manual of the Kāṭhakacayanas of five kinds to wit: Sāvitra, Nāciketa, Vaiśvasṛja, Cāturhotra and Aruṇaketuka. These Cayanas are prescribed by Āpastamba in 19. 11–15 of his Śrautasūtra and they are to be performed with the Paśubandha sacrifices. The Aruṇaketuka-prayoga which begins with a different pagination in this MS. is similar to the work described under OL. II. 1132. This MS. contains at the end a work dealing with the Āruṇaketukavrataprayoga which is described under TSL. 2564.

*Beginning*:—

सावित्रं स्वर्गकामश्चिन्वीत । अग्निचित्यविशेषस्य वक्ष्यमाणस्य सावित्र इति नामधेयम् । अग्निसूर्यनिवासरूपे द्यावापृथिव्यावन्तरेण वाय्वात्मना प्रपञ्चं सीव्यति धारयतीति निर्वचनात् । तथा च ब्राह्मणम् । स वा एषोऽग्निरपक्षपुच्छो वायुरेव । तस्याग्निर्मुखम् । असावादित्यः शिरः । स यदेते देवतेऽन्तरेण तत्सर्वं सीव्यति तस्मात्सावित्र इति तं सावित्राख्यमग्निचित्यं स्वर्गकामश्चिन्वीत । चयनेन निष्पादयेत् । पशुबन्धे चीयते सावित्र इति विशेषः । × × × × × × ×

एतेन नाचिकेतो व्याख्यातः । नाचिकेत इति वक्ष्यमाणस्याग्निचित्यस्य नामधेयम् । नचिकेतसा दृष्टो नाचिकतः । सकारलोपश्छान्दसः ।

× × × × × ×

उक्ताः काठकाः सावित्रनाचिकेतचतुर्होतृवैश्वसृजाः । अथारुणकेतुकः पञ्चमः काठकः स ब्राह्मणव्याख्यातः प्रायेण । तस्य प्रयोग उच्यते । इह देवाचार्याभिप्रायेणाग्निहोत्रदर्शपूर्णमासाः । एतेनारुणकेतुको व्याख्यातः । यावन्मन्त्रमन्विष्टका लोकम्पृणाश्चतस्रः स्वयमातृण्णाश्चाप एवं पुष्करपर्णं रुक्मं पुरुषं कूर्ममित्यातपति वर्षा इति यथासमाम्नानम् ।

*End*:—

अथ बलिं हृत्वोपतिष्ठेत । क्षत्रं क्षत्रं वैश्रवणम् + प्रविश्यान्नमत्तीति । अग्नौ बलिहरणपक्षे यस्मिन्नग्नौ बलिं हरेत् तमग्निं पूर्वस्थानादुत्तरत्र × × × सर्वेषां लोकानामाधिपत्ये सीदेति । अथ तमग्निं मन्थीत । तिस्रोधा भूः स्वाहा + तिरोधा भूर्भुवः स्वःस्वाहा इति चतस्रः समिध आदध्यात् । यस्ते विद्या + मयि स्वाहा इत्यग्नौ बलिं प्रक्षिपेत् । कुबेरायेदम् । अथोपतिष्ठते । राजाधि + मातेभ्यो मादशीति ।

*Colophon*:—

कुबेरबलिः समाप्तः ।

## 85

### 225. काठकचयनप्रयोगः ।

### KĀṬHAKACAYANAPRAYOGA.

This is another manual of the Kāṭhakacayana according to the Apastambaśrautasūtra. This MS. contains Prayogas for Nāciketa, Cāturhotra and Vaiśvasṛja only.

*Beginning.*—

श्रीगणेशाय नमः। सावित्रेण नाचिकेतो व्याख्यातः। तस्य कर्मोच्यते । चतुर्दश्यां प्रातरग्निहोत्रं हुत्वा पशुबन्धेन यक्ष्ये। समारोप्य देवयजनं गत्वा मथित्वोपावरोह्यायतने निधाय विद्युदसि० नाचिकेतमग्निं चेष्य इति सङ्कल्प्य। अध्वर्युवरणादि शर्कराणामुपकल्पनम्। एकविंशतिहिरण्येष्टकाः। तत्सङ्ख्याकाः शर्करा वाऽभ्यक्ताश्चतस्रः स्वयमातृण्णा लोकम्पृणा दधिमधुघृतोदपात्रसहस्रहिरण्यशकलाश्चोपकल्पन्ते ।

*End:*—

प्राणाय त्वा जुष्टमिति शाखान्तरत्वाद्विकल्पम्।<br>
रात्रिसत्राणि यानि स्युः शतरात्रादिकानि च ।<br>
सत्रेऽव्रते चापि त्रिषु सारस्वतेषु च ॥<br>
न साध्यानां सहस्रे च सत्रे विश्वसृजामपि ।<br>
प्रजापतेः सहस्रेऽपि चाग्निरेष विधीयते ॥<br>
नान्यः काठक एषु स्यात्पश्वादिषु विधीयते ।<br>
व्यस्तं वा तु समस्तं वा पृथक् कृत्वा समस्यते ॥

*Colophon:*—

समाप्तो वैश्वसृजः।

*Post-Colophon:*—

इदं पुस्तकं मेहदळे इत्युपनाम गोविन्दात्मजनारायणेन लिखितम्। संवत् १९३७ शके १८०२ नन्दननामसंवत्सरे उत्तरायणे वसन्ततौ फाल्गुने मासे कृष्णपक्षेऽमावास्यातिथौ भौमवासरे सायङ्काले श्रीगङ्गाकाशीविश्वेश्वरसन्निधौ समाप्तः।

---

## 86

### 226. काठकचयनप्रयोगः।

### KĀṬHAKACAYANAPRAYOGA.

This is another manual of the Kāṭhakacayana consisting of the Sāvitra, Nāciketa, Cāturhotra, Vaiśvasṛja and the Āruṇaketuka. These Prayogas are same as those described under OL. II. 1131 excepting the Āruṇaketukaprayoga which considerably differs from

the OL. MS. This MS. contains, besides, the Sautrāmaṇiprayoga also after the Vaiśvasṛjaprayoga. The Prayogas of the Sautrāmaṇi and the Āruṇaketuka only are described below.

*Beginning of the Sautrāmaṇi:—*

Leaf 12 a. पञ्चदश्यां प्रातरग्निहोत्रं हुत्वा सङ्कल्पं करोति । सौत्रामण्या यक्ष्ये । सुवर्गं लोकमवाप्नवानि । षड्ढोत्रादि चषालकरणान्तम् । वेदितृतीये यजेतेति विज्ञायते । षड्विंशत्यङ्गुलसम्मितेन दण्डेन दशभिः पश्चात् द्वादशभिः पुरस्तात् । वेदकरणादि शम्यामात्र्युत्तरवेदिः । उरु प्रथस्वेति कृते प्रतिप्रस्थाता तूष्णीं चात्वालात्पुरीषमाहृत्य दक्षिणेनोत्तरवेदिं खरं करोति ।

× × × × × ×

पात्रप्रयोगकाले स्फ्यमग्निहोत्रहवणीमपरतः स्रुवस्वधित्योरित्यादि । द्वे यूपरशने तिस्रः पशुरशनाः । तिस्रः कुम्भ्यः । शूलत्रयं वपाश्रपणीत्रयं स्वरुत्रयं शिष्टानि पाशुकानि ।

*Beginning of the Āruṇaketukaprayoga.—*

Leaf 18 a. आरुणकेतुकस्य प्रयोग उच्यते । आरुणकेतुकमग्निं चेष्यमाण उपकल्पते । सम्भारानातपति । वर्ष्याः कूप्याः स्थावरा वहन्ति पल्वजीवन्तं कूर्मं पुष्करपर्णं यावत्यः संवत्सरस्य रात्रयस्तावतीर्मृण्मयीः कुष्ठाः क्षुद्रकुम्भीस्तत्सङ्ख्याकान् हिरण्यशकलान् रुक्मं हिरण्मयं पुरुषमौदुम्बरीसमिधः शकुनवकाजालं दधिमधूनि प्रभूतानि पुष्करपर्णानि पुष्करदण्डानि

× × × × × × ×

तस्याग्नेः पुरस्तान्मासद्वयादौ प्रातरग्निहोत्रं हुत्वा प्राणानायम्यारुणकेतुकमग्निं चेष्यमाणो मासद्वयं व्रतं चरिष्यामीति सङ्कल्प्य स्नात्वौपासनाग्निमुपसमाधाय लौकिकाग्निं वा तत्र पुनर्मा मैत्विन्द्रियमिति तिसृभिस्तिस्र औदुम्बरीः समिध आधाय ।

*End:—*

देवस्य त्वेत्यनुद्रुत्याग्नेस्त्वा साम्राज्येनाभिषिञ्चामीति महाग्निवदभिषिञ्चेत् । तैरुदकसम्पातैः शनैरभिषिच्यमान आपोहिष्ठादिभिः स्नायात् समस्तशरीरमाप्लावयेदिति सन्तरमिति वचनात् योऽसौ तपन्नुदेतीत्ययज्ञसंयुक्तमपि गायेत् । योऽसौ तपन्नुदेति + एतद्वै मिथुनं मा नो मिथुनं रीढ्वं ततोऽध्वर्युरवरोहणं जपतीत्याग्निप्रणयनात्कृत्वा त्रिः संस्थितं वैहायसं मृण्मयं चित्यस्योपरिष्टात्प्रतिष्ठाप्य तस्मिन्नाग्निप्रणयनं कुर्यात् । अप्स्वग्नेः प्रणयनस्यात्यन्तासम्भवात् । सर्वमासमाप्तेः सावित्रवत् । तस्यारुणकेतुकाग्निचितः प्रकरणाद्व्रतनियमो नाप्सु मूत्रपुरीषं कुर्यादिति ब्राह्मणम् ।

*Colophon:—*

आरुणकेतुकप्रयोगः समाप्तः ।

Then two leaves contain the Vaiśravaṇabali which begins thus:—

अथ वैश्रवणबलिं व्याख्यास्यामः । यस्मिन्नस्य काले सर्वा आहुतीर्हुता भवेयुः ।

---

## 87

### 229. कात्यायनविहारकारिका ।

### KĀTYĀYANAVIHĀRAKĀRIKĀ.

*By Balabhadra.*

The author describes here in 16 verses the sacrificial alter for the Agnihotra according to the Kātyāyanaśrautasūtra.

*Beginning:—*

विहारकारिका कात्यायनोपयोगी ।
श्रीशं वन्दे ।
षड्ढस्तप्रमितां रज्जुं पाशान्तां पञ्चलक्षिताम् ।
द्विहस्ते च ततः पादः पादोनेषु त्रिषु क्रमात् ॥ १ ॥
सार्द्धे स्यादुत्तमः पाशो हविर्यज्ञीयकर्मसु ।
न्यस्ये अरत्नीन् विष्कुम्भे शङ्कोः प्राच्यप्रतीच्ययोः ॥ २ ॥

*End:—*

चतुरस्रौ समौ साध्यौ शुल्बसूत्रानुसारतः ।
अथवा वर्तुलावेतावुच्छ्रयेत् द्वादशाङ्गुलौ ॥ १४ ॥
सर्वेषां त्र्यङ्गुला कार्या विस्तारे मेखला शुभा ॥ १५ ॥
रचितं बलभद्रेण शुक्लवृत्त्युपजीविना ।
विमृश्य यज्ञसूत्रं तु सुधियां परितुष्टये ॥ १६ ॥

*Colophon:—*

इत्यग्निहोत्रवेदिः ।

---

## 88

### 235. कात्यायनश्रौतसूत्रप्रयोगः ।

### KATYAYANAŚRAUTASŪTRAPRAYOGA.

This codex contains two Prayoga works according to the Kātyāyana-śrautasūtra. First is Devayājñika's Paddhati on the first five Adhyāyas of Kātyāyana's Śrautasūtra. The second work, which begins with a different pagination is an anonymous Prayoga following the same Śrauta-sūtra. This work begins from the Mitravindeṣṭiprayoga–the last part of the 5th Adhyāya and ends with the Agniṣṭomaprayoga which is treated in the 10th Adhyāya of the Kātyāyanaśrautasūtra. Here is found only a brief list of duties of the priests in each sacrifice and not the whole Prayoga with necessary Mantras and other instructions which are usually found in other Prayoga works. The MS. is much injured.

*Beginning*:—

श्रीयज्ञपुरुषो जयति । मित्रविन्दायां मातृश्राद्धम् । अन्वारम्भणीयाऽग्न्यन्वाधानादौ विशेषः । अर्थवत्कपालानि पात्रीश्च चरवश्च उपकल्पन्ते मेक्षणानि च । कणान्ते चर्चकः

× × × ×

दक्षिणायां गौरसीति । दश वा गावः सहस्रं वा । निरूढपशुबन्धप्रथमप्रयोगे मातृश्राद्धम् । अग्नीषोमीयप्रकृतित्वादन्वारम्भणीया । तत्प्रकृतित्वं च तत्प्रकरणे धर्मविधानात् । इह चानुपदेशात् । सूत्रकारप्रस्थानाच्चाग्नीषोमीयदर्शनादिति । इहाप्युपदेशोऽस्तीति चेत् न तेषां वैशेषिकत्वात् । मन्थनादिवत् । यूपस्य च वक्रत्वं पालाशित्वं चेति ।

× × × × ×

पशुः समाप्तः । ज्योतिष्टोमे प्रथमप्रयोगे मातृश्राद्धम् । द्विपुरुषासोमपीथिनः पूर्वस्मिन्यजनीये प्रणीतादि दण्डकोच्चारितवर्जमैन्द्राग्नः पशुः । अन्वाहार्यदक्षिणा । भागावदाने नियमः । खादिरो यूपः ।

*End*:—

प्राशित्रावदानं भवत्येव । समस्य मार्जनम् । पवित्रप्रतिपत्तिः । अग्निसम्मार्गप्रैषोऽग्निसम्मार्गः । व्यूहनमभ्युक्षजुह्वापरिध्यञ्जनम् । सूक्तवाकप्रैषः । प्रस्तरादानम् । विधृतीप्रक्षेपः । प्रस्तराञ्जनम् । नीचैर्हरणम् । तृणप्रग्रहणम् । प्रस्तरप्रक्षेपः । शाखया सह प्रस्तरानुप्रहरणम् । अनुप्रहरेत्युक्ते तृणप्रक्षेपः । अत्र पक्षे वाजिनयागः । आत्मालम्भनम् । उदकालम्भः । संत्रादशंयोर्वा कयोरभावः । परिधिप्रक्षेपः । संस्रवाहुतिः । देशे विमोकः । व्रतविसर्गश्च ।

*Colophon*:—

इत्यग्निष्टोमिका पयस्या समाप्ता ।

*Post-Colophon*:—

संवत् १७३३ वर्षे पौषमासे कृष्णपक्षे २ सोलि द्विवेदि गोपीनाथसुत जोगेश्वरेण ।

---

89

## 237. काम्येष्टिप्रयोगः ।

## KĀMYEṢṬIPRAYOGA.

*By Mayūreśvaraśarman, son of Kṛṣṇa Dīkṣita.*

This is a manual of certain Vedic sacrifices which are enjoined for obtaining the desired results and are also known as Kāmyeṣṭis. All these Kāmya rites such as Iṣṭis, Paśus, Naimittika, Prāyaścitta and others are prescribed by Satyāṣāḍha in the 22nd Praśna of his Śrautasūtra. In this work, Prayogas for all these rites are described in detail mainly basing on the Satyāṣāḍhaśrautasūtra. In several places, the author refers to the Prayogas according to the other Sūtrakāras such as Āpastamba, Bodhāyana and Kātyāyana. In this MS., Prayogas of many Kāmyeṣṭis, mentioned

in the Saṁhitā portion of the Yajurveda, are found described in 113 leaves. This portion has no colophon ascribing the work to the author Mayūreśvaraśarman. But there is another part of 12 leaves added at the end which begins with a different pagination and is written by a different hand. This part contains the Prayogas of some more Kāmyeṣṭis which are enjoined in the Brāhmaṇa portion of the Yajurveda and not described by Satyāṣāḍha. At the end of this part, the work is ascribed to the author Mayūreśvaraśarman.

*Beginning:*—

श्रीगणेशाय नमः । ॐ नमः सिद्धम् ।

नत्वा गणेश्वरं देवं वागीशां पितरौ गुरुम् ।
सत्याषाढीयकाम्येष्टिप्रयोगः प्रवितन्यते ॥ १ ॥
द्वितीयादिप्रपाठेषु द्वितीये काण्ड ईरिताः ।
सांहितक्रमपाठेन तथा सूत्र उदाहृताः ॥ २ ॥
काम्याश्च पशवः काम्येष्टयो द्वाविंश ईरिताः ।
प्रजाकामादयश्चोक्ताश्चेष्टयः पञ्चधा श्रुताः ॥ ३ ॥
प्रजाकामास्तथेन्द्राग्न्यादयः काम्या उदाहृताः ।
जातेष्टिस्वर्णनाशेष्ट्यादयो नैमित्तिका मताः ॥ ४ ॥
प्रायश्चित्तेष्टयो वैश्वानरीव्रातपतीमुखाः ।
तथैवाध्वरकल्पादिरुद्रेष्ट्याद्याभिचारिकाः ॥ ५ ॥
नित्या नैमित्तिकाः काम्याः पुत्रकामादयोऽखिलाः ।
उक्ताः पञ्चविधा यागाः सर्वास्ताः काम्यसंज्ञकाः ॥ ६ ॥
नक्षत्रस्वर्गसत्राद्याः सर्वाः काम्याः समीरिताः ।
तथा विध्यपराधोक्ताः प्रायश्चित्तेष्टयोऽखिलाः ॥ ७ ॥
तथा पञ्चविधाः काम्याः पशवः समुदीरिताः ।
वायव्यं श्वेतमित्याद्या विविधाः पशवः श्रुताः ॥ ८ ॥
पीवोन्नामिति याज्यानुवाक्यास्तेषां क्रमान्मताः ।
इषे त्वेत्यादिकाण्डान्त्यानुवाकेषूदिता ऋचः ॥ ९ ॥
याज्यानुवाक्याश्चोभाग्रामित्यैन्द्राग्न्यादिषु क्रमात् ।
काम्येष्टिभिरमावास्यां पौर्णमासीमथापि वा ॥ १० ॥

× × × ×

प्रतिलोमेन होतव्याः प्रयोगे त्वाभिचारिके ॥ २९ ॥
गुणानां व्युत्क्रमाद्धोमो मन्त्राणां वेति कल्पना ।
प्रोक्ता च परिभाषेयं सूत्रभाष्यानुसारतः ॥ ३० ॥
बौधायनं भरद्वाजमापस्तम्बाश्वलायनम् ।
कात्यायनं वेदभाष्यं दृष्ट्वा व्याख्यास्त्वनेकधा ॥ ३१ ॥
- व

अथ काम्येष्टिप्रयोगः ।

तत्र सूत्रम् । काम्याभिरिष्टिभिरमावास्यां पौर्णमासीं वा संस्थाप्य यजेत ता ब्राह्मणव्याख्याताः । काम्यशब्देन नित्या नैमित्तिकाः काम्याः प्रायश्चित्तिक्य आभिचारिकाश्चेत्युच्यन्ते । नित्याः पुत्रेष्ट्याद्यः १ । नैमित्तिका जातेष्ट्याद्यः २ । काम्याः प्रजाकाम ऐन्द्राग्न्याद्यः ३ । प्रायश्चित्तेष्टयो व्रातपत्याद्यः ४ । आभिचारिका अध्वरकल्पाद्याः ५ ।

*End*:—

अथ सर्वकामार्थं कामेष्टिः । अग्नये कामायाष्टाकपालः पुरोडाशः कामाय चरुः अनुमत्यै चरुरिति देवताः । केवलः कामाय चरुरिति वा । अग्निर्मूर्धा भुवः कामो भूतस्य कामस्तदग्रेऽनुमोद्यानुमतिरन्विदनुमते त्वमिति याज्यानुवाक्याः । हव्यवाहं स्विष्टमिति संयाज्ये । इति कामेष्टिः ।

Here ends the series of the Kāmyeṣṭis described in the Saṁhitā portion of the Yajurveda. Then begins the Prayogas of the other Kāmyeṣṭis described in the Brāhmaṇa portion.

*Beginning*:—

श्रीगणेशाय नमः । अथ ब्राह्मणोक्ता इष्टयः ।

अनारभ्याधीतपाठा इष्टयो ब्राह्मणोदिताः ।
तासां प्रयोगो याज्यानुवाक्याम्नानात्प्रदर्श्यते ॥ १ ॥
बौधायनभरद्वाजापस्तम्बाद्याश्वलायनैः ।
स्पष्टत्वेन समाम्नानान्नाचार्येण प्रदर्शिताः ॥ २ ॥

तत्रादौ वैमृधेष्टिः । आपस्तम्बः । इन्द्राय वैमृधाय पुरोडाशमेकादशकपालं निर्वपेत् ।

*End*:—

सूक्तवाके । अग्नि० कृत । सोम० त । अग्निस्सोमो वरुणो मित्र इन्द्रो बृहस्पतिः सविता पूषा सरस्वती त्वष्टेदं ह० तत । देवा इत्यादि । प्रतिलोमादेशपक्षे ये ३ त्वष्टारं सरस्वतीं पूषणं सवितारं बृहस्पतिमिन्द्रं मित्रं वरुणमग्निं सोमं त्वष्टा रूपाणिद० अग्नी ३ वौ ३ । अन्यत्समानम् । कपालस्थालीविमोकः क्रमेण पृथक् पृथक् । तदंतान्ता सन्तिष्ठते मित्रविन्देष्टिः ।

लिम्बाख्यग्रामवासिस्थकृष्णदीक्षितसूनुना ।
रुक्मिणीगर्भजेनाथ मयूरेश्वरशर्मणा ॥ १ ॥
सत्याषाढीयकाम्यानामिष्टीनां तु विशेषतः ।
कृतः प्रयोगो यत्नेन कृष्णवेण्याश्च सन्निधौ ॥ २ ॥
बालानां सुखबोधाय श्रीयज्ञेश्वरतुष्टये ।

*Colophon*.—

इति काम्येष्टिप्रयोगः समाप्तः ।

## 90

### 238. कारीरीष्टिप्रयोगः ।

### KARĪRĪṢṬIPRAYOGA.

This is a manual of the Kārīriṣṭi which is calculated to produce rain after its performance. This is according to the Āpastambaśrautasūtra.

*Beginning:—*

श्रीगणेशाय नमः । अथ कारीरीष्टिप्रयोगः । पुष्कलेषु नक्षत्रेषु वृष्टिकामः कारीर्या यक्ष्य इति सङ्कल्प्य । उदवसाय देवयजनं गत्वा मथित्वोपावरोह्यायतने निधाय । विद्युत् । ऋत्विग्वरणम् । अध्वर्युरग्नीन् विहृत्यान्वाधाय । यजमानोऽपरेणाहवनीयं दक्षिणाऽतिक्रम्योपविश्य । मारुतमसि मरुतामोजोऽपां धारान्निधन्ति । कृष्णं वासः कृष्णतुषं परिधाय रमयत मरुतः श्येनमायिनं मनोजवसं वृषणं सुवृक्तिम् ।

*End:—*

ततः स्विष्टकृदादिचतुर्धाकरणान्तं कृत्वा दक्षिणाकाले कृष्णं वासः कृष्णोऽश्वः कृष्णाविः । श्रास्त्वाकृतं नपसस्त्वा तन्वत वरूत्रयस्त्वा वयं वासः । वरुणाश्वयोः पूष्णोऽविम् । प्रतिग्रहमन्त्रे विशेषः । हविःशेषोद्वासनादि ब्राह्मणतर्पणान्तं सन्तिष्ठते । अथ केवलमाग्नेयीष्टिं कुर्यात् । तस्याः प्रयोगः । अन्वाधानादि सर्वं पूर्ववत् । निर्वपणकाले कृष्णाजिनं व्रीहीणामाग्नेयमष्टाकपालं निर्वपति । प्रोक्षणादि हविरासादनान्तं पिण्डीनामासादनं पूर्ववत् । अभिमर्शनादि प्रचारान्तं कृत्वा । उपहोमकाले पिण्डीनां बन्धनं वातनामभिः । तैर्वा होमः । धूमानुमन्त्रणादि सर्वं पूर्ववत् ।

*Colophon:—*

इतीष्टिः सन्तिष्ठते । इति कारीरीष्टिप्रयोगः समाप्तः ।

*Post-Colophon :—*

संवत् १८०४ शके १६६९ प्रभवनामसंवत्सरे दक्षिणायने शरदृतौ कार्तिकमासे कृष्णपक्षे तृतीयायां भानुवासरे तद्दिने पुस्तकं उम्रजकरोपनामकरामभट्टात्मजलक्ष्मणेन लिखितम् ।

---

## 91

### 243. कौकिलसौत्रामणिप्रयोगः ।

### KAUKILASAUTRĀMAṆIPRAYOGA.

This is a manual of the Kaukilasautrāmaṇi according to the Hiraṇyakeśiyaśrautasūtra. There are two kinds of Prayogas of the Sautrāmaṇi viz. Kaukili and Caraka, and the Kaukilīsautrāmaṇi is considered to be an independent sacrifice.

*Beginning:*—

अथ हिरण्यकेशिकौकिल्याः सौत्रामण्याः पयोग्रहपक्षमाश्रित्य प्रयोगः। उदगयन आपूर्यमाणपक्षे पुण्यनक्षत्रे पर्वणोर्वा त्रिपशुप्रयोगो यथा भविष्यति तथा तदनुरोधेन प्रारम्भः कार्यः। प्रातरग्निहोत्रं हुत्वाऽऽचम्य तीर्थेन प्रविश्य गार्हपत्यस्य पश्चाद्दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ सङ्कीर्त्य श्रीप० र्थं स्वर्गकामः कौकिल्या सौत्रामण्या यक्ष्ये तया यज्ञनारायणं प्रीणयानीति सङ्कल्प्य तदङ्गं गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धं च करिष्य इति सङ्कल्पात्पूर्वं तदुत्तरं वा कुर्यात्। ततः ऋत्विग्वरणम्। अस्यां कौकिल्यां सौत्रामण्यामध्वर्युं त्वामहं वृणे।

*End:*—

ततः श्वोभूते तदानीं वा साकमेधवन्महापितृयज्ञः। अन्वाधानादि। कौकिलीयं महापितृयज्ञं हविः। समाप्ते पितृयज्ञे तत आज्यं संस्कृत्य भूः स्वाहा अग्नय इदम्। आहुतिं हुत्वा तत इन्द्राय वेधसे पशुः षड्ढोतृपश्विष्ट्यादि ब्राह्मणतर्पणान्तमृषभो दक्षिणा। समाप्ते पशावादित्येष्टिरन्वाधानादिब्राह्मणतर्पणान्ता। तत्र वत्समाता दक्षिणा। सन्तिष्ठते कौकिली। तया स्वर्गकामो यजेत। छन्दोगमतान्नित्या।

---

## 92

### 245. क्रतुदीपिका।

### KRATUDĪPIKĀ.

*By Kuraṅgarāja, son of Nīlamāṇikka.*

This MS. contains the Prayogas for the sacrifices, Ādhāna, Agnihotra and Jyotiṣṭoma according to the Jaiminīyaśrautasūtra. This serves as a guidance for the duties of the Udgātṛ priest in these sacrifices. The author Kuraṅgarāja was a native of Arjunagrāma and belonged to the Vāsiṣṭha Gotra.

*Beginning:*—

सामाखिलं सकलवेदगुरोर्मुनीन्द्राद्व्यासादवाप्य भुवि येन सहस्रशाखम्।
व्यक्तं समस्तमपि सुन्दरगीतरागं तं जैमिनिं तलवकारगुरुं नमामि॥
वेदोक्तं कर्म येनासीन्मीमांसित्वा सुनिश्चितम्।
व्यासशिष्याय मुनये तस्मै जैमिनये नमः॥
कुरङ्गराजनाम्नेयं क्रियते क्रतुदीपिका।

अथाधानाद्युदवसानान्तं ज्योतिष्टोमक्रियाक्रमं वक्ष्ये। तत्प्रथममाधानस्योद्गातृवरणमुच्यते। यजमानोऽप आचम्यात्मानमभिमुखेनागतमुद्गातारं मम त्वयौद्गात्रं कर्तव्यमिति वृणुयात्। सोऽपि करिष्यामीत्येनं प्रत्युदीरयेत्। पुनर्यजमान उद्गात्रे दर्भमयमासनं प्रदद्यात्।

× × × × × × ×

Leaf 2 a. एवमाधानस्य क्रियाक्रमः । अथाग्निहोत्रक्रमः कथ्यते । सायमारभ्य सायमग्निहोत्रं होष्यामीति च प्रातःकालस्य प्रातरग्निहोत्रं होष्यामीति च सङ्कल्प्य इडा देवहूरिति मन्त्रं जपित्वा × × × × × ×

Leaf 3 b. एवं नित्याग्निहोत्रक्रमः । अयं बोधायनोक्तः । अथ रथन्तरसाम्ना ज्योतिष्टोमे प्रथमं दीक्षणीयोच्यते । अत्रोद्गातृवरणे किञ्चिद्विशेषोऽस्ति । सोमप्रवाक उद्गातुर्निकेतनं गत्वा श्रीकृष्णशर्मणः सोमो भविष्यति । तत्र भवतौद्गात्रं कर्तव्यमित्युद्गातारं वृणुयात् । सोऽपि करिष्यामीत्युक्त्वा महन्मे वोचो भद्रं मे वोचः पुष्टिं मे वोचो यशो मे वोच इति सोमप्रवाकं प्रत्युक्त्वा पुनरपि कच्चिन्नाहीनाः कच्चिन्नानूदेश्याः कच्चिदन्यस्तमार्त्विज्यम् । के याजयन्ति का दक्षिणा इत्ययाज्यहेतुकान् पञ्चार्थान्निगदतोद्गात्रा पृष्टः सोमप्रवाकः नाहीनाः नानानूदेश्याः अन्यस्तमार्त्विज्यम् । यजमानदोषेण नारायणशर्माणो याजयन्ति । एकविंशतिगावो दक्षिणा इति दैव्या वाचा यथाक्रमं प्रतिप्रश्नं प्रतिवदेत् । अत्र त्वहीनानानूदेश्यशब्दयोरन्ततः प्लुतिः कर्तव्या । × × × × ×

Leaf 10 b. एवमग्नीषोमीयाहः समाप्तम् । अथ सवनीयाहरुच्यते । श्वः प्रभातसमये × × × × × ×

Leaf 27 a. तृतीयसवनं समाप्तम् । अथानुयाजा नाम यागविशेषाः । तैरध्वर्यवश्चरन्ति ।

*End:—*

अथवा मधुनि चेन्मधुश्चुन्निधनमिति साम गायेत् । आज्ये चेत् घृतश्चुन्निधनमिति साम गायेत् । अथ यदाध्वर्यव उदवसानीयया चरन्ति तस्यामिष्टौ प्रधानाहुतिकाले प्रस्तोता गायन्ति त्वा गायत्रिणामित्युद्वंशीयं त्रिर्गायेत् । सर्वेषूपसत्सु च सामनिधनान्ते होमं कुर्वित्यध्वर्युमन्वीक्ष्य चोदयेत् ।

*Colophon :—*

इति वासिष्ठगोत्रार्जुनग्रामजन्मा(न्मना) नीलमाणिकात्मभुवा कुरङ्गराजनाम्ना ज्योतिष्टोमस्य बालबोधिका क्रतुदीपिका विरचिता । एवं ज्योतिष्टोमः समाप्तः । जैमिन्याचार्याय नमः । भवत्रात्रे नमः । श्रीसभापतये नमः ।

---

## 93

### 246. क्रतुमाला ।

### KRATUMĀLĀ.

This is a list of Vedic sacrifices with their various forms. They are the Ekāhas, Ahīnas, Satras, Ayanas and the Jyotiṣṭoma. There are three MSS. of this work in this collection, but the author's name is not stated in any of them. The third MS. (Acc. No. 9903), however, contains one Hiṅkāramañjarī ascribed to Vedāraṇyeśasūri and this work follows the Kratumālā in that MS. It is doubtful whether the Kratumālā also may be ascribed to the same author or not.

*Beginning:—*

क्रतुमाला । एकोनषष्टिरेकाहः । अष्टाचत्वारिंशदहीनाः । चतुःषष्टीनि सत्राणि । ऐकाहिकानां प्रकृतिरग्निष्टोमः । अहीनानां द्वादशाहः । सत्राणां गवामयनम् । एकाह एकसुत्यात्मकः । द्विरात्रप्रभृतयश्चाहर्गणाः । अह्नां समूहोऽहीनः । अहीनसत्रयोर्भेदस्त्वन्त्यमहोऽतिरात्रः । उभयतोऽतिरात्रः सत्रः । ज्योतिष्टोमभेदाः अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्राप्तोर्याम इति सप्त संस्थाः । गोष्टोम आयुष्टोमोऽभिजिद्विश्वजिन्महाव्रताः प्रथमसाहस्रो द्वितीयसाहस्रस्तृतीयसाहस्रश्चतुर्थसाहस्रः साद्यस्को द्वितीयसाद्यस्कस्तृतीयसाद्यस्कश्चतुर्थसाद्यस्कः पञ्चमसाद्यस्कः षट्साद्यस्क इति शौचिवृक्षिः । प्रथमव्रात्यस्तोमो द्वितीयव्रात्यस्तोमस्तृतीयव्रात्यस्तोमश्चतुर्थव्रात्यस्तोमः ।

*End :—*

अयनम् । गवामयनमादित्यानामयनमङ्गिरसामयनं दृतिवातवतोरयनं कुण्डपायिनामयनं तापश्चितामयनं नैमिषीयद्वादशसत्रं शाक्यानामयनं त्रिंशत्संवत्सरं साध्यानामयनं शतसंवत्सरं सहस्रसङ्ख्यं सारस्वतसत्राणि त्रीणि मित्रावरुणयोरयनमिन्द्राग्न्योरयनमर्यम्णोरयनमिष्टयायनं दृषद्व्रतं सर्पसत्रं त्रिसंवत्सरं सहस्रसंवत्सरं विश्वसृजां सहस्रसंवत्सरं सत्राणि । समूढाहीनद्वादशाहो व्यूढाहीनद्वादशाहः । समूढसत्रद्वादशाहो व्यूढसत्रद्वादशाहः । एकाहानां प्रकृतिरग्निष्टोमः । अहीनानां प्रकृतिर्द्वादशाहः । सत्राणां प्रकृतिर्गवामयनम् ।

*Colophon :—*

इति क्रतुमाला ।

Then begins the Hiṅkāramañjarī:—

सुब्रह्मण्याह्वाने

न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते ।
जन्मज्यैष्ठ्येन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम् ॥

*It ends :—*

धन्विना च पृथक् स्तोत्रेभ्य इत्यादेर्व्याख्यानमत्रावसरे यत्र सामभेदो देवताभेदो वा तत्रैव हिङ्कारभेद इति प्रतिपादनात्र शिरसि हिङ्कारभेदः ।

*Colophon :—*

सामाब्धिपारगेणेदं वेदारण्येशसूरिणा । हिङ्कारैक्यं तु कुर्वीत प्रत्यपादि यथामति ॥

---

94

## 248. गणेशकारिका ।

## GAṆEŚAKĀRIKĀ.

*By Gaṇeśa (?)*

It is a metrical composition dealing with the Prāyaścittas or the atonements for the flaws in singing the hymns by the priests belonging

to the Udgātṛ group in the performance of the Agniṣṭoma. The MS. i incomplete and although the author's name is not stated, the title o the work suggests Gaṇeśa as the author.

*Beginning:—*

गणेशकारिका ।

गणेशं शारदां नत्वा कल्पकारं तथैव च ।
प्रायश्चित्तानि कल्प्यन्ते क्रतुवैगुण्यशान्तये ॥ १ ॥
शार्ङ्गादिपरिसाम्नां च प्रस्तोता स्खलितो यदि ।
पुनर्गीत्वा तदाज्येन महाव्याहृतिभिर्हुनेत् (?) ॥ २ ॥
इष्ट्यङ्गसाम्नां भ्रेषश्चेद्विशेषोऽत्र प्रकल्प्यते ।
विष्णवर्चमुक्त्वा प्रस्तोता जुहुयात् सर्षपाहुतिम् ॥ ३ ॥
प्रवर्ग्योद्वासनात्पूर्वं प्रायश्चित्तानि यानि च ।
प्राग्वंशे यानि सर्वाणि हूनेदाहवनीयके ॥ ४ ॥
प्रवर्ग्योद्वासनादूर्ध्वं प्रायश्चित्तक्रियां बुधः ।
स्रुवेण सर्पिषा कुर्याद्वह्नौ चोत्तरवेदिके ॥ ५ ॥
यजुर्मन्त्राश्च ये लुप्ताः प्रमादाद्यदि तान् पुनः ।
उद्गातारो जपित्वाऽथ जपेयुर्व्याहृतित्रयम् ॥ ६ ॥

*End:—*

प्रायश्चित्तं तु नास्त्येव विकल्पद्वयसम्भवात् ।
प्रत्यवायो न करणे करणेऽभ्युदयस्तयोः ॥ ७० ॥
सूत्रकारस्थितं प्राह विकल्पद्वयमीदृशम् ।
ब्रह्मास्तुतेति न ब्रूयात् स्तोमयोगात्पुरा यदि ॥ ७१ ॥
पवमाने च वा वृत्तौ पुनः करणं तु सर्वतः ।
ताम्बूलचर्वणादीनि न कुर्यात्सदसस्स्थले ॥ ७२ ॥
कुर्याच्चेत्पाणिपादं च प्रक्षाल्य व्याहृतीर्जपेत् ।
ग्रहावेक्षणमुद्गातुर्यदि चेत् षोडशीक्रतौ ॥ ७३ ॥
न करोति तदा कुर्यात्तृतीये सवनेऽपि वा ।
स्मरीतो (?) देवतासाम्नामुद्गीथो वा नरस्य च ॥ ७४ ॥
व्यत्यये स्तोमयोगस्य विष्णुव्याहृतिहोमकौ ।
प्रष्ठहोमे सति भ्रेषे प्रस्तोता प्रजपेत्तदा ॥ ७५ ॥
तन्मन्त्रं द्विस्ततः सर्वप्रायश्चित्ताहुतिर्हुनेत् ।
ऋक्तोऽपस्वरलोपेन किं वा वृद्धैः पुरोदितम् ॥ ७६ ॥
प्रायश्चित्तगणं तत्र शङ्कापातेतिशङ्किते ।
ततः शङ्कानिवृत्यर्थं सम्यक् प्रत्युत्तरं मया ॥ ७७ ॥
ग्रन्थान्तरेषु यत्प्रोक्तं पुराविद्भिस्तदुच्यते ।

---

## 95

### 249. गरुडचयनगानप्रकारः ।

### GARUḌACAYANAGANAPRAKARA.

This treatise deals with the duties of the Prastotṛ priest in the Garuḍacayana or the construction of the sacrificial alter having the form of the Garuḍa bird. Here is given a list of Sāmans to be chanted by the Prastotā during the formation of this alter in addition to a brief sketch of the Garuḍacayana performance.

*Beginning:—*

प्रथमायां चितौ पुष्करपलाश उपधीयमानेऽध्वर्युणा प्रेषितः प्रस्तोता दक्षिणेऽपि कक्षे प्राङ्मुखस्तिष्ठन् यजमानं सत्यसाम त्रिर्गापयेत् । सत्यसाम्नः सत्यो देवता । छन्दो नास्ति । द्वितीयायां चितौ हिरण्मये पुरुष उपधीयमानेऽध्वर्युणा प्रेषितः प्रस्तोता तत्रैव स्थित्वा यजमानं पुरुषसाम त्रिर्गापयेत् । पुरुषसाम्नः पुरुषो देवता । × × ×

गरुडचयनम् । उक्तानां चतुर्णां पक्षाणां मध्ये धानञ्जयमतमाश्रित्य प्रयोगमाह । एतान्येव प्रदक्षिणं प्रत्यन्ताद्धानञ्जय इति सूत्रम् । अस्यार्थः । एतान्येव गायत्र्यादीनि शिरःप्रभृति यावदुत्तरं पक्षं प्रदक्षिणं गायेत् ।

*End:—*

तस्मादुत्तरामपि कक्षं प्राप्य तत्र प्राङ्मुखस्तिष्ठन् पुनश्च वामदेव्यं तृचे गायेत् । वाम० साम्नः वाम० ऋषिः । गाय० छन्दः । इन्द्रो देवता । तस्मादुत्तरपक्षस्योत्तरतो दक्षिणामुखः स्थित्वा बृहत् तृचे गायेत् । बृहतः साम्नः प्रजापतिः ऋषिः । बृहती छन्दः । इन्द्रो देवता । तत आक्रमणे इष्टकासमीपे स्थित्वा श्यैतं तृचे गायेत् । श्यैतस्य साम्नः प्रजापतिः ऋषिः । बृहती छन्दः । इन्द्रो देवता । एवं प्रस्तोतुः सामगानप्रकार उक्तः ।

---

## 96

### 250. गृहमेधीयकारिका ।

### GṚHAMEDHĪYAKARIKA.

This treatise gives in 22 verses a brief sketch of the Gṛhamedhīyeṣṭi, an auxiliary of the Cāturmāsya sacrifice according to the Bodhāyana School.

*Beginning:—*

श्रीगणेशाय नमः ।
इष्ट्या यक्ष्येऽथ सङ्कल्प्य विद्युद्न्वाहितिस्ततः ।
शाखां हृत्वा व्रतं कृत्वा या जाता वेदिनिर्मितिः ॥ १ ॥

अन्तर्वेदि पलाशानां शाखायाः शातनं ततः ।
उपवेशो वसूनां स्यात् त्रिवृदग्निसमूहनम् ॥ २ ॥
अलङ्कृतिस्तृतीयस्यै न स्यात् कुम्भ्याश्च लेपनम् ।
इध्मो पर्णं च तूष्णीं स्याद्वत्सापाकरणं ततः ॥ ३ ॥

*End* :—

निर्दिशेत् पश्चहोतारमुपस्तीर्यावदाय च ।
मरुद्भ्यो गृहमेधिभ्योऽनुब्रूहीत्यादिकं वदेत् ॥ २० ॥
यज्वा ब्रूयाद्वत्रेहेति न स्युर्नारिष्ठपार्वणाः ।
हुत्वा स्विष्टकृतं वैश्वानरे हविरितीरयेत् ॥ २१ ॥
न यज्वभागः प्राशित्रमिडामादाय सर्वतः ।
प्राश्नीयुर्मार्जयेयुश्च समाप्तेष्टिस्ततो भवेत् २२ ॥

*Colophon* :—

इति गृहमेधीयकारिका समाप्तेयम् ।

---

## 97

## 252. ग्रावस्तुत्प्रयोगः ।

### GRĀVASTUTPRAYOGA.

This is a guidance for the duties of the Grāvastut, a priest of the Hotṛ group in the Agniṣṭoma sacrifice. The MS. is incomplete.

*Beginning*:—

ग्रावस्तुत्प्रयोग उच्यते । आज्यं तानूनप्त्रं करिष्यन्तोऽभिमृशन्तीत्यादि नमो दिवे नमः पृथिव्या इत्यन्तं पूर्ववत् । धिष्ण्योपस्थानम् । आदित्यप्रभृतीन् धिष्ण्यानादित्यमग्रे ।

अश्वनामश्वपते + शीय धूपा + मध्यान् अग्नयः सगराङ्गसिष्ठ । × × × ×

अथ माध्यन्दिनसवनम् । एतस्मिन् काले ग्रावस्तुत्प्रपद्यते । तस्योक्त उपस्थानम् । पूर्वया द्वारा हविर्धाने प्रपाद्य दक्षिणस्य तु हविर्धानस्य प्रागुदगुत्तरस्याक्षशिरसस्तृणं निरस्य राजानमभिमुख उपतिष्ठते ।

*End*:—

उस्राः कर्त्तनभेषजोम् । ग्रावाण उपरेष्वामहीयन्ते सजोषसः । वृष्णे दधतो वृष्ण्योम् । ग्रावाणः सविता नुवो देवः सुवतु धर्मणा । यजमानाय सुन्वतोम् । त्रिः ।

## 98

### 253. ग्रावस्तुत्प्रयोगः ।

### GRAVASTUTPRAYOGA.

This is another manual guiding the duties of the Grāvastut in the Agniṣṭoma sacrifice.

*Beginning* :—

श्रीगणेशं वन्दे । तस्य मध्यमस्वरेण समस्तं भवति । अथास्मिन्काले ग्रावस्तुत्तीर्थेन प्रपद्य अध्वनामध्वपत इत्येतैर्धिष्ण्यानुपस्थायाग्नीध्रीयमुत्तरेण परिव्रज्य अनसो युक्तं तद्धवि-र्द्धानस्य भवति । उर्वन्तरिक्षं वीहीति हविर्धानस्पर्शनम् । देवीद्वारावतिद्वार्ये अग्नय: सगरा इत्यपरानुपस्थाय । उरुं नो लोकमिति हविर्द्धानं प्रविश्य दक्षिणस्य हविर्द्धानस्योत्तरस्याक्ष-शिरस: समीपे तिष्ठेत् । प्रागुदग्देशे निरस्त इति निरसनं करोति नात्रोपवेशनम् । अनुपविष्ट एव यो अद्य सोम्य इति सोमाभिमुखस्तिष्ठति । ततोऽध्वर्युणानीतमुष्णीषमञ्जलिना प्रतिगृह्य दक्षिणं शिरस्त्रि: सम्मुखं वेष्टयित्वा ।

*End*:—

अथ माध्यन्दिने सवने पवमानाय सर्पन्ति । अग्नय: सगरा: सगरा अग्नय: सगरा स्थ सगरेण नाम्ना । पातमाग्नय: पिपृतमाग्नयो नमो वोऽस्तु मा मा हिंसिष्ट: । उरुं नो लोकमनु-नेषि विद्वान् सर्वज्योतिरभयं स्वस्ति । ऋष्वात इन्द्र स्थविरस्य बाहू उपस्थे याम शरणा बृहन्ता ।

*Colophon* :—

इति ग्रावस्तोता समाप्त: ।

---

## 99

### 257. चयनप्रयोगः ।

### CAYANAPRAYOGA.

This is a manual of the Cayana or the construction of special sacrificial alter according to the Hiraṇyakeśiyaśrautasūtra. The MS. is slightly injured. There is another MS. of this work described by Aufrecht in his München catalogue under No. 133, but it contains in the beginning some verses of the Cayanakārikā ( work No. 255 ) which also deals with the same subject.

*Beginning* :—

श्रीगणेशाय नम: । अथाग्निप्रयोग उच्यते ।

सत्याषाढं नमस्कृत्याष्टापदशिरोरुहम् ।
महाग्निचयनं ज्ञातुं पद्धतिं(:) प्रतितन्यते ॥ १ ॥

अग्निं चेष्यमाणोऽमावास्यायां पौर्णमास्यामापूर्यमाणपक्षे वा पुण्ये नक्षत्र उखां सम्भरति । ज्यहादिद्दीक्षापक्ष उखासम्भरणप्रभृत्यामिक्षापर्यन्तं कर्माणि यथा वसन्ते भविष्यन्ति तथोपक्रमः कार्यः पर्वण्युखासम्भरणपक्षे । पर्वणि दीक्षापक्षे तु सोमपूजनादि ऋत्विग्वरणान्तं कृत्वा उखासम्भरणादि सर्वपर्वण्येव कार्यम् । चतुरो मासा इत्येतस्मिन्पक्ष उदगयन आपूर्यमाणपक्षे पुण्ये नक्षत्र उखासम्भरणादि दीक्षान्तं कृत्वा सुत्या तु वसन्ते पर्वण्येव । एवं स्मृत्वारम्भः कार्यः ।

*End:*—

ततः कर्म ईश्वरार्पणं कृत्वा पृथगरणीष्वग्नीन् समारोपयते । येऽग्नयः पुरीष्याः प्रवि० तेषां सुव । यत्र स्वीयमग्निं पश्यति तमुपतिष्ठते । उप त्वाऽग्ने दिवे दिवे० स्वस्तये इति तिसृभिरन्येषां यजमानां (नानां) चित्यग्निं दृष्ट्वोपतिष्ठते । प्राचीनमुदीचीनं वोद्वसायेत्यादि प्रातर्होमान्तं समानम् । सन्तिष्ठतेऽग्निः । अग्निं चित्वाऽनन्तरं पर्वणि सौत्रामण्या यजेत । अपरेद्युर्मैत्रावरुण्या चामिक्षया । संवत्सरं न कञ्चन प्रत्यवरोहेदित्यादीनि व्रतानि कर्त्तव्यानि । तेषामकरणे संवत्सरान्ते व्रातपतीष्टिः कार्या । अत्राङ्गभूता सौत्रामणी चरकः ।

*Colophon:*—

इति हिरण्यकेशिसूत्रानुसारिमहाग्निचयनप्रयोगः समाप्तिमगमत् ।

---

## 100

### 258. चरकसौत्रामणिप्रयोगः ।

### CARAKASAUTRĀMAṆIPRAYOGA.

This is a manual of the Carakasautrāmaṇi which is to be performed after the Agnicayana and it follows the Apastamba School.

*Beginning:*—

अथापस्तम्बोक्तचरकसौत्रामणिप्रयोगप्रारम्भः ।

श्रीगणेशाय नमः ।

अथ सौत्रामण्याः पयोग्रहमाश्रित्य प्रयोग उच्यते । पञ्चदश्यां प्रातरग्निहोत्रं कृत्वा प्राणानायम्य सौत्रामण्या यक्ष्य इति सङ्कल्प्य समारोप्य दवयजनं गत्वा पुण्याहं वाचयित्वा मथित्वोपावरोह्यायतने निधाय । विद्युदसि । ऋत्विजो वृणीते अध्वर्युः । पशुवत् षड्ढोतारं हुत्वा ततः पश्विष्टिः । इष्ट्यन्ते शाखाहरणादि चषालकरणान्तं पशुवत् । वेदं कृत्वा वेदिः । षाड्विंशत्यङ्गुलसम्मितेन दण्डेन वेदिमानम् । दशभिः प्रपश्चाद्द्वादशभिः प्राचीरष्टाभिः पुरस्तात् । पशुवद्दभ्यामात्रिमुत्तरवेदी (?) करोति । अध्वर्युणा उरु प्रथस्वेति कृते ततः प्रतिप्रस्थाता चात्वालात्पुरीषमाहृत्य दक्षिणेनोत्तरवेदिं खरं करोति ।

*End.*—

इदं हविष्यामीति पत्नी योक्त्रं विमुञ्चति । देवीराप: सुमित्रान इत्यादि न यदि दीक्षे नोन्नेतृप्रैष: । वासवाससी उदके प्रक्षिप्याहतवाससा उद्वयन्तमसस्परि । समित्पाणयस्तूष्णीं विहारं गत्वा एधोस्येधिषीमहीत्यादि सर्वं । ब्रह्मा अयादग्निरित्यादि । यजमानेऽग्निना देवेनेत्यादि ब्राह्मणतर्पणान्तं पशुवत् ।

*Colophon* :—

इति चरकसौत्रामण्या: प्रयोग: ।

*Post-Colophon* :—

इदं पुस्तकं मेहदळे इत्युपनाम गोविन्दात्मजनारायणेन लेखनम् । संवत् १९३८ शके १८०३ विजयनामसंवत्सरे उत्तरायणे वसन्ततौं चैत्रे मासे शुक्लपक्षे द्वितीयायां तिथौ गुरुवासरे श्रीगङ्गाकाशीविश्वेश्वरसन्निधौ समाप्त: ।

इत्यापस्तम्बोक्तचरकसौत्रामणिप्रयोग: समाप्त: ।

---

## 101

## 260. चरकसौत्रामणिप्रयोग: ।

### CARAKASAUTRĀMAṆIPRAYOGA.

This is another manual of the Carakasautrāmaṇi according to the Hiraṇyakeśīyaśrautasūtra.

*Beginning*:—

अथ सौत्रामण्या: प्रयोग: । सा सौत्रामणी द्वेधा । अग्निं चित्वा सौत्रामण्या यजेतेत्यत्राङ्गभूता । चत्वारिंशत्संस्काराणां मध्ये गौतमस्मृत्युक्तत्वात्प्रधानभूता नित्या । एतया भूतिकामो यजेतेति काम्या च । प्रधानभूताऽपि द्विविधा । साग्निचित्या केवला च । तत्र सौत्रामण्यां सुराग्रहप्रतिषेधात् पयोग्रहा वा स्यु: इत्यापस्तम्बीये दर्शनाच्च पयोग्रहपक्षमाश्रित्य प्रयोगोऽभिधीयते । नवम्यां सीसेन शष्पक्रय: । द्वादश्यां सुरेष्टि: । चतुर्दश्यामुपक्रम: साग्निका चेत् । केवला चेत्पर्वणि । साग्निकाऽपि सद्यस्कालेति केचित्सूत्रकारा आहु: । चतुर्दश्यां पर्वणि वा नित्येष्ट्यनन्तरं वा श्रीप० सौत्रामण्या यक्ष्ये । तया यज्ञनारायणं प्रीणयानीति सङ्कल्प्य ।

*End*:—

संप्रवेधनकाले यस्ते देव वरुण गायत्रच्छन्दा: पाश इत्यादि हृदयशूलप्रवेधनान्तं कृत्वाऽवभृथानि च कुर्णेत्यवशिष्टा-ति संप्रविध्य देवीराप इत्युपस्थाय सुमित्रान इति मार्जनस्नानं च कृत्वाऽहतवाससावुदित: सम्प्रेषोत्रयवर्जं प्रत्यायनं तूष्णीं क्रियते । प्रतियुत: प्रत्यस्त इति भवत: । पशुवत्समिद्ग्रहणं कृत्वा विहारमेत्येत्यादि विष्णुतर्पणान्तं सर्वं पशुवत् ।

*Colophon*:—

इति हिरण्यकेशीयचरकसौत्रामण्या: प्रयोग: समाप्त: ।

---

**102**

## 261. चातुर्मास्यकारिका ।

## CĀTURMĀSYAKĀRIKĀ.

*By Ayyādhvarin, son of Lakṣmaṇa.*

This is a metrical composition dealing with the Cāturmāsya sacrifice according to the School of Āpastamba. There are two MSS. of this work in this collection and one of them contains a colophon ascribing the work to the author Ayyādhvarin.

*Beginning*:—

गणेशं प्रथमं नत्वा यथामति विलिख्यते ।
सङ्गृह्य चातुर्मास्यानां प्रयोगः कारिकात्मना ॥ १ ॥
यथाप्रयोगमित्यौपमन्यवष्षड्दिनं तथा ।
चातुर्मास्यैर्यक्ष्य आगुः फलनिर्देशनं तथा ॥ २ ॥
यक्ष्यमाणः पञ्चहोता तथाऽन्वारम्भणीयया ।
यक्ष्ये विद्युद्विहत्यादि देवो वैश्वानरोऽत्र तु ॥ ३ ॥
पर्जन्यं च हिरण्यं च धेनुं चाप्यत्र दक्षिणा ।
तदेव वैश्वदेवेन यक्ष्ये विद्युद्धृतिस्ततः ॥ ४ ॥
प्राचीनप्रवणं देशं कृत्वा तूष्णीं प्रणीय च ।
पशुवच्चाग्निमुद्धृत्य दक्षिणाग्निं प्रणीय च ॥ ५ ॥

*End*:—

षट्पूर्ववन्निरूप्याथ वैश्वदेवं तु निर्वपेत् ।
अथेन्द्राय शुनासीराय सूर्यस्य च निर्वपेत् ॥
षष्ठाष्टमोपधाने तु मन्त्रेणाष्टौ ततश्चतुः ।
प्रातर्होमवदत्रापि वायवे हविरिन्द्रियम् ॥
सौर्यस्य चाविःकृत्वाऽथ व्याहृतीभिश्च सादयेत् ।
संसर्पोस्यंहमन्त्रेण सौर्यस्योपरि हूयते ॥
सीरं द्वादशगोयुक्तं श्वेता गौश्चात्र दक्षिणा ।
उत्तानसत्वाङ्गीरसेति सीरं रुद्राय गां ततः ॥
कालेऽनुवत्सरीणां स्याद्धक्षमन्त्र इदं हविः ।
वृष्टयन्ते तु प्रसूतादि चैकं मासमितीरयेत् ॥
आगामिपर्वणि श्वो वा तदा वाऽङ्गपशुर्भवेत् ।
सर्वं निरूढवद्यज्ञो बभूवेति विना भवेत् ॥
अथवा सवनेष्टिं वा बोधायनमतेन तु ।
अग्नीन्द्रविश्वेदेवाश्च तत्पुरोडाशदेवताः ॥

*Colophon*:—

इति चातुर्मास्यकारिकाः समाप्ताः ।
श्रीवत्सगोत्रोद्भवकच्छपेशयज्वात्मभूलक्ष्मणदीक्षितस्य ।
तनूभुवाय्याध्वरिणेति चातुर्मास्यप्रयोगो विदुषा वितेने ॥

**103**

## 262. चातुर्मास्यकॢप्तिः ।

## CĀTURMĀSYAKḶPTI.

*By Tālavṛntanivāsin.*

This is a manual of the Saumikacāturmāsya dealing with the duties of the members of the Udgātṛ group according to the Drāhyāyaṇa-śrautasūtra of the Sāmaveda. The author's name is not found in the MS. The authorship may, however, be attributed to Tālavṛnta-nivāsin on the strength of the post-colophon statement contained in this MS. Moreover, all the other works in this codex are attributed to Tālavṛntanivāsin.

*Beginning*:—

श्रीगुरुभ्यो नमः ।

अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीति फलश्रवणाच्चातुर्मास्यकॢप्तिरुच्यते । त्रिवृदग्निष्टोमो वैश्वदेवस्य लोक आग्नेयी प्रतिपद्वैश्वदेवः पशुर्बार्हस्पत्याऽनूबन्ध्या यूपमिन्वान्ति नोत्तरवेदिन्निवपन्ति । परिधौ पशून्नियुञ्जन्ति । पञ्चाशद्दक्षिणेत्यनुवाकेन सौमिकचातुर्मास्यानि सप्तसुत्यानि विहितानि । तत्र वैश्वदेवस्य फाल्गुन्यां पौर्णमास्यां दीक्षणम् । तस्य यजनीयेऽहनि सुत्या । द्व्यहत्वात्तस्य । तथा च सूत्रम् । फाल्गुन्यां पौर्णमास्यां चातुर्मास्यान्यारभेतेत्यादि यजनीयेऽहनि वैश्वदेवशुनासीर्यें स्यातामित्यन्तम् । तत्र वैश्वदेविकस्थानिकं त्रिवृदग्निष्टोममाह । अथ बहिष्पवमानमग्नेस्तेजसेत्यादि । अग्न आयूंषि पवसे उपास्मै गायता नरः उपोषु जातमप्तुरं पवमानस्य ते वयं पवमानस्य ते कवे इति बहिष्पवमानम् ।

*End*:—

शुनासीर्यमाह । कृतो ज्योतिष्टोमः शुनासीर्यस्य लोक इति ज्योतिष्टोमोऽग्निष्टोमः । धूज्योतिर्विश्वरूपा न सन्ति । शेषं प्रकृतिवत् । यदाऽग्निहोत्रं जुहोतीत्यनुवाकेन चातुर्मास्यानां वैश्वदेवस्य च प्रशंसा कृता ।

*Colophon*:—

इति चातुर्मास्यानि सम्यगुक्तानि । सौमिकचातुर्मास्यानि समाप्तानि ।

*Post-Colophon*:—

प्लवङ्गेऽब्दे मीनमासे द्वादश्यां गुरुवासरे ।
लिखितेयमनन्तेन वरदाचार्यसूनुना ॥

प्लवङ्गनामसंवत्सरे मीनमासे शुक्लद्वादश्यां गुरुवासरे इयमाण्डपिळ्ळैसंज्ञप्रयोगवृत्ति-भरद्वाजकुलजलधिकौस्तुभस्य वण्णकम्पाडि वरदराजमहोपाध्यायस्य सूनुना हरितान्वय-दुग्धसिन्धोः शरद्राकाचन्द्रस्य सर्वतन्त्रस्वतन्त्रस्य वदान्यस्य सकलवावदूकगणश्लाघित-सच्चरित्रस्य ब्रह्मनिष्ठस्य तत्रभवतः श्रीमत्सुब्रह्मण्ययज्वनोऽन्तेवासिनाऽनन्तेन लिखितम् ।

# 104

## 263. चातुर्मास्यपद्धतिः ।

## CĀTURMĀSYAPADDHATI.

*By Vaidyanāthamiśra.*

This is an exhaustive Prayoga work for the Cāturmāsya with its four Parvans; Vaiśvadeva, Varuṇapraghāsa, Sākamedha and Sunāsīriya, and it follows the Kātyāyanaśrautasūtra. At the end of the work, there is a stray leaf containing a fragment in verses dealing with the Varuṇapraghāsa.

*Beginning.*—

श्रीगणेशाय नमः ।

चातुर्मास्यमखं नौमि पर्वबाहुरुभिर्युतम् ।
आग्नेयाद्यङ्गुलीभिश्च वैश्वानरपुरःसरम् ॥ १ ॥

अथ चातुर्मास्यानां पद्धतिर्लिख्यते । तेषामारम्भः फाल्गुन्यां पौर्णमास्यां कार्यः । शाखान्तराच्चैत्र्यां वैशाख्यां वेति देवः । तत्र प्रथमप्रयोगे मातृकापूर्वकमाभ्युदयश्च । ततोऽन्वारम्भणीया वैश्वानरपार्जन्यौ वा । तत्राग्नये वैश्वानराय द्वादशकपालः । पर्जन्याय चरुः । अन्वाहार्य एव दक्षिणा । ऋत्विग्व्यपदेशोऽत्रैव युक्ततरः ।

Leaf 8 b. इति वैश्वदेवपर्वपद्धतिः । इति श्रीवैद्यनाथमिश्रविरचितायां चातुर्मास्यपद्धतौ वैश्वदेवपर्व समाप्तम् ।

आषाढ्यां पौर्णमास्यां वरुणप्रघासाः । तत्र चतुर्दश्यां करम्भपात्राणि करोति । तत्रादौ ऋत्विग्व्यपदेशो देवग्रन्थात् ।

*End:*—

अग्निः सोमः सविता सरस्वती पूषा शुनासीरौ वायुः सूर्यस्तमपनुदन्त्विति पक्षे प्रस्तरेण सह शाखाप्रहरणं परिधिभिः सहोपवेषहोमश्च । एकं समिष्टयजुः । ततः कर्मापवर्गान्तं नात्र वपनम् । शतं ब्राह्मणान् भोजयेत् । अस्य शुनासीरीयपर्वणः समृद्ध्यर्थं यथासम्पन्नेन तृप्तिपर्यन्तेन भोजनेन शतं ब्राह्मणानहं तर्पयामीति सङ्कल्पः । ततो नित्यं कर्म ।

इति श्रीमद्वैद्यनाथमिश्रविरचितचातुर्मास्यपद्धतौ शुनासीरीयं पर्व समाप्तम् ।

चातुर्मास्यानां सकृत्करणपक्षे फाल्गुन्यां पौर्णमास्यां चैत्र्यां वैश्वदेवः । तस्यां वैशाख्यां तत्कृतौ तस्यां वा चातुर्मास्यान्युत्सृजमा(सो)मेनाग्निष्टोमसंस्थेनाग्नीषोमीयेन पशुनाऽऽग्नेय्येष्ट्या वाऽहं यक्ष्य इति सङ्कल्प्य तेषामन्यतमं कुर्यात् । पशुसोमौ यथाक्रममग्नीषोमीयाग्निष्टोमप्रकृती । आग्नेयीष्टिस्तद्धरण्यादिकर्मापवर्गान्तकहविषा पौर्णमासवत् ।

*Colophon*:—

इति श्रीमन्मिश्रवैद्यनाथकृतप्रतिपर्वेष्टिकचातुर्मास्यपद्धतिः समाप्ता ।

*Post-Colophon*:—

खपञ्चसप्तेन्दुमिते (१७५०) च वर्षे तपस्य कृष्णाष्टदिने गुरौ च ।
हरिसुतशङ्करेण पद्धतिर्लिखिता सूर्यपुरेऽधिवासयन् ॥ शुभं भवतु ।

Leaf 43. अथ करम्भपात्रकारिका ।

स्यादृत्विग्व्यपदेशनं गृहपतेर्दक्षे निषद्याग्नितः
पत्नी स्वासनगा भवेत्तडभुवं संस्कृत्य वह्न्युद्धृतिः ।
तूष्णीं ब्रह्मवृतिस्तदासनमथो संस्कृत्य दक्षो नडा-
द्ब्रह्मासीत ततः प्रतीचि सदने स्वामी च चित्तैकदृक् ॥

× × × × ×

इति करम्भपात्रकारिका ।

अथ वरुणप्रघासकारिका ।

वस्रे समारोप उद्वासनं निर्मथ्य भूसंस्कृतिरग्निधानम् ।
कृत्वासनं ब्रह्मवृतिः प्रणीय स्यात्पञ्चकाद्याग्निनिधानमत्र ॥
अथर्त्विमुद्धृत्य परिग्रहोऽग्नेः शाखाच्छिदग्निः स्रुतिपात्रसंस्था: ।

× × × × ×

अथावभृथेष्टिकारिका ।

× × × × ×

अथ गृहमेधीयकारिका ।

शाखादिदोहान्तषडासनानि वृतिः सदुग्धप्रणयश्चतु...
छेद्यक्रियार्थी शकलप्रतिष्ठमन्वाहितिः संस्रुतिसादने च ।

× × × × ×

वेदिमध्यधि निधारयेदथ प्रोक्षणीः स्रुचमितीह मुह्यताम् ।
स्फ्यप्रहारकरशोधने तु नो युक्तिमस्फ्यमनुबर्हिरास्थितिः ॥ ७ ॥
स्रुक्स्रुवौ प्रकृतिवत्तथाऽवदानमपि शीलकमथेडपात्रिकाम् ।
सम्मृजां समुपलम्भयेदथो मार्जनानि च तृणानि निक्षिपेत् ॥ ८ ॥

---

## 105

### 266. चातुर्मास्यप्रयोगः ।

### CĀTURMĀSYAPRAYOGA.

This is another manual of the Cāturmāsya according to the School of Apastamba. The MS. is injured.

*Beginning:—*

चातुर्मास्यानां प्रयोगकालः केशवस्वामिनोक्तः । चातुर्मास्यान्युच्यन्ते । तेषां चत्वारः प्रयोगप्रकाराः केशवस्वामिनोक्ताः । एकस्तावद्यावज्जीवप्रकारः । संवत्सरप्रयोगो द्वितीयः । द्वादशाहप्रयोगस्तृतीयः । यथाप्रयोगश्चतुर्थः । द्वादशाहमिति शालिकिः । यथाप्रयोगमौपमन्यवः । द्वादशाहयथाप्रयोगयोरपरपक्षे यथा समाप्यते तथोपक्रमः कर्त्तव्यः । यावज्जीवसांवत्सरिकयोः फाल्गुन्यां चैत्र्यां वा पौर्णमास्यामुपक्रमः । उत्तरयोरापूर्यमाणपक्षे पुण्यनक्षत्र उपक्रमः ।

अथ भरद्वाजः । चातुर्मास्यानां त्रयः कालाः । × × × × ×

इति भारद्वाजमतिः ।

चातुर्मास्यानां कर्म । चातुर्मास्यानामिति समुदायनाम । यस्मिन्संवत्सरे पर्वचतुष्टयस्यापराह्ने सन्धिस्तस्मिन्नेवेति केचित् । फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा पूर्वस्मिन् पर्वणि चतुर्दश्यामित्यर्थः । प्रातरग्निहोत्रं हुत्वा प्राणानायम्य सङ्कल्पः । चातुर्मास्यैर्यक्ष्ये । अक्षय्यं मे सुकृतं भूयात् ।

*End.—*

यदि चैत्र्यां तदा चैत्र्यां यः पुरः शुक्लपक्षस्तस्मिन्पशुसोमौ चातुर्मास्याङ्गभूतौ । उद्वृते पशुसोमयोरन्यतरेणानिष्ट्वाऽऽग्रामिफाल्गुन्यां चैत्र्यां वाऽर्वाक् दोषो नास्ति । तयोरतिक्रमे सर्वप्रायश्चित्तम् । केचित्पथिकृद्वैश्वानरी चेति । यः सकृदेव चातुर्मास्यं प्रयुङ्क्ते तस्य सोमः पशुः ।

*Colophon:—*

चातुर्मास्यप्रयोगः समाप्तः ।

*Post-Colophon:—*

श्रीमत्काञ्चीनगरस्य पूर्वदिग्भागे नृसिंहपुरस्य दक्षिणदिग्भागे पर्वतसमीपे पेण्णागुर् श्रीरामस्य कुमारेण महादेवेन लिखितम् ।

---

## 106

### 267. चातुर्मास्यप्रयोगः ।

CĀTURMĀSYAPRAYOGA.

This is another manual of the Cāturmāsya according to the Kātyāyanaśrautasūtra. The MS. is very old and the 1st leaf is missing. At the end, there is one Mitravindeṣṭiprayoga which is to follow the Cāturmāsya sacrifice.

*Beginning:—*

रगच्छ होतरेहि । देवताकथनेऽग्निं वैश्वानरं पर्जन्यमुच्चैः शेषम् । आवाहनेऽग्निं वैश्वानरमा ३ वह । पर्जन्यमा ३ वह । पञ्चमे प्रयाजे स्वाहाऽग्निम् । स्वाहा सोमम् । स्वाहाऽग्निं वैश्वानरम् । स्वाहा पर्जन्यम् । स्वाहा देवान् । इदमग्नये सोमायाग्नये वैश्वानराय पर्जन्याय देवेभ्य आज्यपेभ्योऽग्नये स्विष्टकृते च । वार्त्रघ्नावाज्यभागौ ।

Leaf 9 b. इति वैश्वदेवपर्व । इदानीं वैश्वदेवस्य पर्वणः कामविधानमनुकथ्यते । सूत्रोक्तत्वात् × × × × × ×

आषाढ्यां पौर्णमास्यां वरुणप्रघासस्यानुष्ठानम् । तत्र च पूर्ववत् करम्भपात्राणां करणम् । ऋत्विग्व्यपदेशो वैश्वदेव एव । तेनात्र न तद्भवति । एककर्मत्वात् ।

Leaf 22 b. अस्य वरुणप्रघासाख्यस्य कर्मणः समृद्ध्यर्थं भगवतीकर्माङ्गदेवताप्रीत्यर्थं यथासम्पद्यमानं तृप्तिपर्यन्तं शतब्राह्मणान्भोजनेनाऽहं तर्पयिष्ये । भूयसी दक्षिणा । समारोपः । गृहप्रवेशनम् । मथित्वा गार्हपत्यस्थापनम् ।

इति वरुणप्रघासाः । अथ साकमेधाः ।

*End.—*

सह शाखया प्रस्तरानुप्रहरणम् । परिधिभिः सहोपवेषहोमः । जुहोमि त्वा सुभग सौभगाय । पुरुतमं पुरुहूतश्रवस्यमिति । व्यूहने अग्नेः सोमस्य सवितुः सरस्वत्याः पूष्णः शुनासीरयोर्वायोः सूर्यस्योज्झितिमिति । अग्निः सोमः सविता सरस्वती पूषा शुनासीरौ वायुः सूर्यस्तमपनुदन्त्वित्यादि ।

*Colophon:—*

इत्यैष्टिकानि चातुर्मास्यानि । पञ्चाहिकपक्षे चैत्र्यां वसन्ते वा पञ्चवर्गाणि सप्तवर्गाण्यपि एतन्तकसंज्ञानि लिख्यन्ते । तत्र कठसूत्रम् । अथ एतन्तकानि । आर्तिंगतः कालोपरुद्धः क्रतुं वा पुनराजिहीर्षमाण इच्छन्पञ्चापवर्गाणि भवन्ति शाखाभेदेन । मैत्रायणीयानां पञ्चाहिकानि चातुर्मास्यानि । फाल्गुनशुक्लैकादश्यां वैश्वदेवं करम्भपात्राणि च द्वादश्यां वरुणप्रघासाः । त्रयोदश्यामनीकवत्यादीष्टयो दर्विहोमश्च । चतुर्दश्यां क्रीडन्त्यादि त्र्यम्बकान्तम् । पौर्णमास्यां शुनासीरीयम् । मानवसूत्रे प्राचीनप्रवणे वैश्वदेवेन यजेत फाल्गुन्यां चैत्र्यां वसन्ते वा ।

Then begins the Mitravindeṣṭiprayoga.

अथ क्रमप्राप्ता मित्रविन्दा लिख्यते ।

× × × × ×

अग्निरिदं हविरजुषतावीवृधत महो ज्यायोऽकृत । उपांशु । अग्निः सोमो वरुणो मित्र इन्द्रो बृहस्पतिः सविता पूषा सरस्वती त्वष्टा उच्चैः । इदं हविः । उपांशु । जुषतावीवृधत । उच्चैः । महो ज्यायः । उपांशु । अकृत । उच्चैः । एकामेवं संस्तुयादिति सूत्रत्वादेकवचने चायं प्रयोगो भवति । शेषं पौर्णमासवत् ।

*Colophon* :—

इति चातुर्मास्यक्रमप्राप्ता मित्रविन्दा समाप्ता ।

*Post-Colophon*:—

संवत् १६९१ वर्षे मार्गशीर्षवदि ७ बुधे लिखितम् । उपाध्यायविश्वनाथसुतविश्वेश्वरपठनार्थम् ।

---

## 107

### 268. चातुर्मास्यप्रयोगः ।

### CĀTURMĀSYAPRAYOGA.

*By Balabhadra.*

This is another manual of the Cāturmāsya sacrifice in a versified form by Balabhadra. The author Balabhadra seems to have flourished at the end of the 18th century of the Vikrama era as he states the date of composition at the end of this work somewhat ambiguously as 'मुन्यङ्कषड्रुद्रमिते (1797)'. This date may be taken correct because the author's son Devabhadra had composed in Saṁvat 1808 a work called Kātyāyanaśrautaprayogasāra (see work No. 231). The work is also known as the Cāturmāsyakaumudi according to its colophon, and it follows the Kātyāyanīyaśrautasūtra. Balabhadra has also composed another work called Kātyāyanavihārakārikā which is described above under work No. 229. The MS. is much injured and the writing is not clear.

*Beginning*.—

श्रीगणेशाय नमः ।

गणेशं गोपतिं गङ्गां गिरिजेशं गिरां पतिम् ।
नत्वैतात्पद्धतिं कुर्वे चातुर्मास्यप्रकाशिकाम् ॥ १ ॥
इंद्रा द्वादशसत्कपालहविषा ह्याग्निं सुवैश्वानरं
पर्जन्यं च...ण ते च वसने द्वाभ्यां विधेये पृथक् ।
प्राचीनप्रवणे विहृत्य च यजेदग्निं च ..था
सावित्रं च सरस्वतीमथ यजेत्पौष्णं हविर्मिर्बुधः ॥ २ ॥
निर्वाप्यात् मरुत...तः स्वतवतः सप्तोपधेयैः सुरान्
विश्वेषां च पयस्यया प्रचरणं द्यावापृथिव्योस्तथा ।
एकेनैव कपालकेन यजनं शाखाच्छिद्दिव्याकृतौ
विश्वेभ्यस्त्विह...गमूहनमतः पत्राणि संसादयेत् ॥ ३ ॥

Leaf 5 a. इति वरुणप्रघासाः ।

पूर्वाह्ण इंद्राऽग्निमनीकवन्तं पूर्वद्युरष्टप्रमितैः कपालैः ।
मरुद्भ्य आसान्तपनेभ्य एवं मध्यंदिने निर्वपणं चरोश्च ॥ १ ॥

*End*:—

नाधिश्रयेत्क्षालनसेचनं नो प्राणं च दत्त्वा प्रियधाममन्तम् (?) ।
प्रोक्तोऽसमा...दनमाविलम्ब्य यक्षेच्च वायुं हविषा च सूर्यम् ॥ ६॥
स्वष्टे विराक्षौ लभने च गावोऽश्वो स्यूर्जमोष्ट्रश्वमथो विकल्पः(?) ।
आफाल्गुनीं यज्यदिने हि पूर्वे चतुर्दशीं वा प्रतिवासरं चेत् ॥ ७ ॥
शेषं विद्ध्यादिह पौर्णमासवच्चेति मत्वा प्रणिधाय सम्यक् ।
ज्ञात्वा पदार्थान् स्मरणाय चैभिः संक्षिप्तवाक्यैः प्रचरेत्सुधीमान् ॥ ८ ॥
मुन्यङ्कषड्रुद्र [१७९७(?)] मिते समायां सौम्यायनेऽर्के शिशिरेऽत्र पौषे ।
कृष्णेऽथ सप्तम्य...ज्यवारे हस्तेतिगञ्जे युवतिस्थचन्द्रे ॥ ९ ॥
शिष्यः स श्रीगुरुसिन्धुचन्द्रसद्वत्सगोत्रो बलभद्रशुक्लः ।
लक्ष्मीनृसिंहाङ्घ्रियुगं प्रणम्य विरच्य संयच्छति याज्ञिकेभ्यः ॥ १० ॥

*Colophon*:—

इति श्रीबलभद्रविरचिता चातुर्मास्यकौमुदी समाप्ता ।

---

## 108

### 269. चातुर्मास्यप्रयोगः ।

### CĀTURMĀSYAPRAYOGA.

It is an exhaustive manual of the Cāturmāsya dealing with the special form of its Prayoga which is required to be completed within five days according to the Kātyāyanaśrautasūtra. The MS. is incomplete in the middle of the Varuṇapraghāsaparvan.

*Beginning*:—

श्रीगणेशाय नमः । ॐ तत्सत्परमेश्वरप्रीतये करिष्यमाण ऐष्टिकपाश्चाहिकचातुर्मास्याङ्गभूतमायतनानि करिष्ये । तदङ्गपृथ्वीकूर्मानन्तविश्वकर्मपूजनं च करिष्ये । तत्रादौ निर्विघ्नतार्थं गणपतिपूजनमहं करिष्ये । अथ चातुर्मास्यानि । फाल्गुन्यां चैत्र्यां वसन्ते वा । तत्र प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा अद्य पूर्वो० शुभपुण्यतिथौ ॐ तत्सत्परमेश्वरप्रीतये ऐष्टिकपाश्चाहिकचातुर्मास्यैरहं यक्ष्ये । तत्र प्रथमप्रयोगे निर्विघ्नार्थं गणपतिपूजनं स्वस्ति० नान्दीश्राद्धान्तं कृत्वा । ऋत्विग्व्यपदेशः । उदङ्मुखो यजमानः प्राङ्मुखं ब्रह्माणं वृणीते । अमुकगोत्रोत्पन्नोऽहममुकामुकामुकेति त्रिप्रवरान्वितयजुर्वेदान्तर्गतवाजमाध्यन्दिनिशाखाध्यायी अमुकशर्मा यजमानोऽहम् अमुकगोत्रोत्पन्नोऽहममुकामुकामुकेति त्रिप्रवरान्वितयजुर्वेदान्तर्गतवाजमाध्यन्दिनिशाखाध्यायी अमुकशर्मा ब्राह्मणोऽहमैष्टिकपाश्चाहिकचातुर्मास्यैरहं यक्ष्ये । तत्र मे त्वं ब्रह्मा भव । होता भव । अध्वर्युर्भव । अग्नीद्भव । वरुणप्रघासार्थे त्वं प्रतिप्रस्थाता भव ।

Leaf 16 a. इति वैश्वदेवपर्व ।

ॐ तत्सत्परमेश्वरप्रीतये वरुणप्रघासपर्वान्तर्गतकरम्भपात्राणि करिष्ये ।

*End:—*

अध्वर्यो उपह्वयस्व । उपहूतः । ब्रह्मन्नुपह्वयस्व । उपहूतः । प्रतिप्रस्थातरुपह्वयस्व । उपहूतः । अग्नीदुपह्वयस्व । उपहूतः । यजमान उपह्वयस्व । उपहूतः । होतरुपह्वयस्व । उपहूतः । ब्रह्मन् उपह्वयस्व । उपहूतः । यजमान उपह्वयस्व । उपहूतः । होतरुपह्वयस्व । उपहूतः । अग्नीदुपह्वयस्व । उपहूतः ।

---

## 109

### 272. चातुर्मास्यप्रयोगः ।

### CĀTURMĀSYAPRAYOGA.

*By Vāsudevadīkṣita.*

This is an exhaustive manual of the Cāturmāsya according to the Bodhāyanaśrautasūtra. This work deals with four kinds of the Cāturmāsyaprayogas as stated by Bodhāyana, and contains in addition one more Prayoga which is to be performed within five days according to the Kaṭhasūtra. It is ascribed to one Vāsudevadīkṣita who seems to be identical with the Vāsudevadīksita-the reputed author of the Prayogaratna and the Mahāgnisarvasva ( work Nos. 78 and 383 ). This Cāturmāsyaprayoga seems to be a part of his Prayogaratna where he described Prayogas for all the Vedic sacrifices in detail according to the Bodhāyanaśrautasūtra. Vāsudevadīkṣita was the son of Mahādeva Vājapeyin and was patronized by the Marāṭha kings, Shahji and others of Tanjore.

*Beginning:—*

श्रीगणेशाय नमः ।

धर्मायनबोधायनमीड्ध्वे यदि तद्भुवे किमपि ।
बोधायनबोधायनमाचार्यं मुहुर्मुहुर्नमत ॥ १ ॥
बोधायनीयकर्मान्तद्वैधकल्पानुसारतः ।
चातुर्मास्यप्रयोगस्य प्रयोगः प्रवितन्यते ॥ २ ॥

चातुर्मास्यानि चतुर्धा । यावज्जीविकानि सांवत्सरिकाणि द्वादशाहिकानि यथाप्रयोगमिति । तत्र सांवत्सरिकप्रयोगो निरूप्यते । फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैश्वदेवहविर्भिर्यजति । त्रयोदश्यां नान्दीश्राद्धमुदकशान्तिप्रतिसरबन्धं च कृत्वा चतुर्दश्यां च प्रातर्हुतेऽग्निहोत्रे स्नानपवनमन्त्राचमनमन्त्रप्रोक्षणानि कृत्वा पुण्याहं वाचयित्वा याः पुरस्तादित्यादि संवत्सरं चातुर्मास्यैर्यक्ष्ये । तन्मे ऋध्यतामित्यादि ॐ तथेत्यन्तम् । दर्शपूर्णमासवदृत्विग्वरणम् । पुनर्याः पुरस्तादित्यादि । अन्वारम्भणीयेष्ट्या यक्ष्ये । तन्मे ऋध्यतामित्यादि ।

*End:—*

समाप्तः सांवत्सरिकचातुर्मास्यप्रयोगः। बोधायनसम्मतयावज्जीविकत्वे कर्मान्ते वि-शेषः। कथमु खलु यावज्जीवप्रयुक्तानां चातुर्मास्यानामनुक्रमो भवतीति।

× × × × ×

इति बोधायनसम्मतयावज्जीविकचातुर्मास्यप्रयोगः। द्वादशाहेऽपि चातुर्मास्यैर्यजेत। वैश्वदेवेनेष्ट्वा चतुर्थ्यां वरुणप्रघासैरष्टम्यां नवम्यां च साकमेधैर्द्वादश्यां शुनासीर्येणेष्ट्वा यजेत। विज्ञायते च संवत्सरप्रतिमा वै द्वादशरात्रयो भवन्तीति। इति कर्मान्तसूत्रम्।

× × × × ×

इति द्वादशाहपक्षः। यथाप्रयोगमित्यौपमन्यव इति पक्ष उदगयन आपूर्यमाणपक्षे देवनक्षत्रे यावद्भिरहोभिः प्रयोगः समाप्यते तावद्भिः प्रयोगश्चातुर्मास्यानाम्। भारद्वाजमता-द्देवनक्षत्राभावेऽपि न क्षतिः। पञ्चाहान्यपि चातुर्मास्यानि भवन्तीति कठसूत्रम्।

× × × × ×

अवभृथेन प्रचर्य व्रतविसर्गादिब्राह्मणतर्पणान्तम्। अथ पूर्णमासवैमृधाभ्यामिष्ट्वा यद् घर्मं पर्यवर्तयदिति नि च वर्तयते परि च वपते स्नानान्ते संवत्सरीणां स्वस्तिमाशास्ते परिवत्सरीणां स्वस्तिमाशास्ते। इडावत्सरीणां स्वस्तिमाशास्ते। अनुवत्सरीणां स्वस्ति-माशास्त इति चतुष्टयं वदेत्।

*Colophon:—*

इत्यैकाहिकचातुर्मास्यप्रयोगः।

विभवाब्दे चैत्रकृष्णैकादश्यां तद्दिने बोधायनचातुर्मास्यवासुदेवदीक्षितीयप्रयोगः समाप्तः।

*Post-Colophon:—*

संवत् १८७८। ग्रन्थसङ्ख्या ११०७। इदं पुस्तकं गुलवलकरोपाह्वरामचन्द्रभट्टेन लि-खापितम्।

---

## 110

## 274. चातुर्मास्यप्रयोगः।

## CĀTURMĀSYAPRAYOGA.

This is a manual of the Cāturmāsya according to the Bodhāyana-śrautasūtra. The MS. is incomplete and contains a portion up to the middle of the Sākamedhaparvan.

*Beginning:—*

श्रीगणेशाय नमः। अथ चातुर्मास्यप्रयोगो लिख्यते। अथ यजमानः स्नानादिपञ्चकं कृत्वा गार्हपत्यस्य पश्चाद्दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य याः पुरस्ता-दित्यादि श्रीपरमेश्वरप्रीत्यर्थं स्वर्गकामश्चातुर्मास्यैर्यक्ष्ये। त्रिरुपांशु त्रिरुच्चैर्वदेत्। आधानव-दृत्विग्वरणं कार्यम्। प्रतिप्रस्थातुश्च। तत्र सर्वेषां मधुपर्कं कुर्यात्। ततो यजमानः पूर्वव-त्प्राणानायम्य याः पुरस्तादित्यादि वैश्वदेवहविर्भिर्यक्ष्ये। तन्मे ऋध्यतामित्यादि।

Leaf 9 b. इति समाप्ता वरुणप्रघासाः ।

अथ साकमेधप्रयोगो वक्ष्यते ।

तत्राद्या इष्टिरुद्ये प्रधानयागो यथा भवति निर्वापो वा तथा कार्या ।

*End:*—

हविःशेषोद्वासनादियज्ञविमोकान्तं सर्वं वरुणप्रघासवत्कृत्वा न व्रतविसर्गः । अध्वर्युर्वरुणप्रघासवत्पूर्वाग्निं शकले समारोप्य मध्यमेऽग्नावाधाय पूर्णाहुतिं जुहुयात् । यजमानोऽध्वर्यवे वरं दत्वा ब्राह्मणतर्पणान्तम् । सन्तिष्ठते महाहविरिष्टिः । अथापराह्णे महापितृयज्ञप्रारम्भः ।

---

## 111

### 275. चातुर्मास्यप्रयोगः ।

### CĀTURMĀSYAPRAYOGA.

This is another manual of the Cāturmāsya following the Bodhāyana School. In this work all Mantras are stated in full and they are generally accented.

*Beginning:*—

श्रीगणेशाय नमः । अथ चातुर्मास्यस्य मन्त्रमालिकाप्रारम्भः । अथ प्रयोगः । शुभे दिने विहारं सम्पाद्य प्रथमे प्रयोगेऽन्वारम्भणीयायाः पूर्वदिने पूर्वाह्णे नान्दीश्राद्धं कुर्यात् । सपत्नीक उपविश्य देशकालौ सङ्कीर्त्य करिष्यमाणचातुर्मास्याङ्गभूतं नान्दीश्राद्धं करिष्ये । तदादौ पुण्याहवाचनं मातृकापूजनं करिष्ये ।

× × × × ×

स्वर्गकामसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं चातुर्मास्यैर्यक्ष्ये । त्रिरुपांशु त्रिरुच्चैर्वदेत् ।

*End:*—

प्रजामनु प्रजायसे । तदु ते मर्त्यामृतम् । येन मासा अर्द्धमासाः । ऋतवः परिवत्सराः । येन ते ते प्रजायते । ईजानस्य न्यवर्त्तयन् । तेनाहमस्य ब्रह्मणा । निवर्त्तयामि जीवसे । अग्निस्तिग्मेनेत्यादि । वैश्वदेववत् । अनुवत्सरीणां स्वस्तिमाशास्ते । ततोऽग्नीन्प्रदक्षिणीकृत्य नमस्कृत्य विष्णुं स्मृत्वा ईश्वरार्पणं कुर्यात् । इति शुनासीरीयपर्व ।

*Colophon:*—

सन्तिष्ठते चातुर्मास्यानि ।

*Post-Colophon:*—

इदं पुस्तकं पेण्डसेत्युपनाम्ना नारायणेन लिखितम् ।

## 112

## 276. चातुर्मास्यप्रयोगः ।

### CĀTURMĀSYAPRAYOGA.

This is another manual of the Cāturmāsya according to the Bodhāyanaśrautasūtra. This work deals specially with the duties of the four priests Āgnidhra, Adhvaryu, Pratiprasthātā and Yajamāna.

*Beginning*:—

श्रीव्यङ्कटेशो विजयते । अथ प्रयोगपाठसौकर्यार्थं बोधायनीयचातुर्मास्यानामाग्नीध्राध्वर्यवप्रतिप्रस्थातृयजमानप्रयोगा उच्यन्ते । उदगयने शुक्लपक्षे रेवतीनक्षत्रे कृत्तिकादिविशाखान्तेषु देवनक्षत्रेषु च यस्मिन्नक्षत्रे वैश्वदेवहविर्भिर्यक्ष्यमाणो भवति तस्मात्पूर्वेद्युर्नान्दीमुखं कृत्वा स्नानादिपञ्चकं कृत्वा पुण्याहं वाचयेत् ।

× × × × ×

इत्यन्वारम्भणीया । अथ वैश्वदेवपर्व । तदानीमेव स्नानादिपञ्चकं कृत्वा याः पुरस्तादित्यादिनिविष्टमित्यन्तं जपित्वा श्रीप० थं वैश्वदेवहविर्भिर्यक्ष्य इति मनसा त्रिः सङ्कल्पयेत् । त्रिरुच्चैः । तन्मे ऋध्यतामित्यादि तथेत्यन्तमुक्त्वा । वैश्वदेवं हविः । व्रीहिमयः पुरोडाशो द्रव्यम् । व्रीहिमयश्चरुः । आमिक्षा द्रव्यम् । नव प्रयाजाः ।

*End*:—

अमृतं मर्त्येभ्यः । प्रजामनु प्रजायसे । तदुते मर्त्यामृतम् । येन मासा अर्द्धमासाः । ऋतवः परिवत्सराः । येन ते ते प्रजापते । ईजानस्य न्यवर्त्तयन् । तेनाहमस्य ब्रह्मणा । निवर्तयामि जीवसे । अग्निरित्यग्नेनेत्यादि । तेनाहमस्य ब्रह्मणा । निवर्तयामि जीवसे । राध्यासमित्यन्तं वैश्वदेववत् । यज० स्नात्वा स्वायतन उपविश्य । अनुवत्सरीणां स्वस्तिमाशास्त इति वदेत् ।

*Colophon*:—

सन्तिष्ठते शुनासीरपर्व । बोधायनचातुर्मास्याग्नीध्राध्वर्यवप्रस्थातृयजमानप्रयोगः ।

---

## 113

## 277. चातुर्मास्यप्रयोगः ।

### CĀTURMĀSYAPRAYOGA.

This is another manual of the Cāturmāsya according to the Bodhāyana School. The MS. is very old but in good state of preservation.

*Beginning*:—

श्रीगणेशाय नमः । चातुर्मास्यप्रयोग उच्यते । फाल्गुन्यां वैश्वदेवेन यजते । तत्पूर्वस्यां चतुर्दश्यां प्रातरग्निहोत्रं हुत्वा पत्न्या सह प्राणानायम्य देशकालौ सङ्कीर्त्य चातुर्मास्यैर्यक्ष्य इति सङ्कल्प्य अयं ते योनिरिति गार्हपत्येऽरणी समारोप्य देवयजनं गत्वा प्रकृतिवदायतनानि कृत्वा मथित्वोपावरोह्यायतने निधाय विद्युदसि ऐष्टिकचातुर्मास्ययागेऽध्वर्युं त्वामहं वृणे । इत्यध्वर्युं वृणोति । एवं ब्रह्मादीन्वृणीते । अध्वर्युर्वृतोऽस्मि । करिष्यामीत्युक्त्वाऽऽहवनीयं विहृत्य जुह्वां सकृद्गृहीत्वा अग्निर्होता सोमः सोमस्य पुरोगाः ।

*End*:—

सन्तिष्ठते शुनासीरीयम् । अथ पर्वान्तरालव्रतानि । न मांसमश्नीयात् । न स्त्रियमुपेयात् । नानृतं वदेत् । नोपरि शयीत । मधुवर्जमश्नीयात् । न लवणं भुञ्जीत । प्राक् शयीत । चातुर्मास्यैरिष्ट्वा सोमेन पशुना वा यजेत ।

*Colophon*:—

चातुर्मास्यप्रयोगः समाप्तः ।

*Post-Colophon*:—

शके १५३६ आनन्दसंवत्सरे माघशुद्ध १४ झांटे इत्युपनाम्ना रघुनाथसुतविश्वनाथेन लिखितम् ।

---

## 114

### 278. चातुर्मास्यप्रयोगः ।

### CĀTURMĀSYAPRAYOGA.

This is an exhaustive commentary on the 5th Praśna of the Bodhāyanaśrautasūtra which deals with the Cāturmāsya sacrifice. The commentator, who is anonymous discusses several peculiarities connected with the Cāturmāsya. He also quotes abundantly from the Karmānta and the Dvaidha Sūtras of Bodhāyana in support of his views and comments upon these Sūtras. He refers to the other Śrautasūtras of Bharadvāja, Āpastamba etc. and compares their views with those of Bodhāyana. The MS. is incomplete and incorrect. It is also possible that this work may be a part of a voluminous commentary on the Bodhāyana's Śrautasūtra because the work begins abruptly without even a benedictory verse.

*Beginning*:—

श्रीगणेशाय नमः । अथ चातुर्मास्यान्युच्यन्ते । तानि चतसृषु चतसृषु मासेषु सम्पूर्यन्ते । चत्वारि पर्वाणि तानि वैश्वदेवं वरुणप्रघासाः साकमेधाः शुनासीर्यमिति । तेषामेकस्मिन् काले चोदनादैककर्म्यम् । तथा च चतु(र्णा)र्णामपि वर्णानां साधारणमुपव्याहरणं विहितमुपव्याहरणसूत्रे स्वर्गकामश्चातुर्मास्यैर्यक्ष्य इति । चातुर्मास्येष्विति । तेषु प्रथमपर्व वैश्वदेव-

नामकं तद्विधत्ते वैश्वदेवहविर्भिर्यक्ष्यमाणो भवतीति । वैश्वदेवनामकैर्हविःसाध्यैर्यागैः स्वर्गं भावयिष्यमाणो भवेदित्यर्थः । वैश्वदेवनाम च यागनामैव । यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वमिति श्रुतेः । हविःसाध्यत्वं यागस्वरूपं च यागान्तरेऽतिप्रसक्तमित्यसाधारणरूपलाभाय वैश्वदेवेति विशेषणम् । कालं विधत्ते फाल्गुन्यां वा चैत्र्यां वा पौर्णमास्याम् । फाल्गुन्यां फल्गुनीभ्यां युक्ता तिथिः फाल्गुनी तस्याम् । नक्षत्रेण युक्तः काल इति तद्धितः । तिथ्यन्तरवारणाय पौर्णमास्यामिति विशिष्यते ।

*End.*—

अत्रामिक्षाग्रहणं क्रमार्थम् । यथानिरुक्तं देवताक्रम इत्यभिप्रायः । हविष्कृता वाचं विसृजते । समानं कर्माधिवपनादिति । हविष्कृता हविष्कृदुपलक्षिते काले । वाचं विसृजते । प्रागाधिवपनाच्चरुपुरोडाशीयानां विभागः । पौष्णस्य पेषणं च पुरोडाशेन सह...दर्शनम् । तत आधिवपनादधिवपनमभिव्याप्य प्रकृत्या समानं कर्म ।

× × × × ×

पौष्णस्य पेषणपक्षे पुरोडाशीयैः सहाधिवापः । अग्नये जुष्टमधिवपामि । सवित्रे पूष्णे मरुद्भ्यो द्यावापृथिवीभ्यामिति शेषः । पौष्णस्यापिष्टमयत्वपक्षे चत्वारः पुरोडाशीयास्त्रयश्चरव्याः पिष्टमयपक्षे सह पिंषन्तीति वचनात् पञ्च भागाः । पिष्टौ द्वौ चरव्यौ । पेषणानन्तरं पौष्ण ।

## 115

## 279. चातुर्मास्यप्रयोगः ।

## CĀTURMĀSYAPRAYOGA.

*By Gopīnātha Dīkṣita Oak son of Gaṇeśasomayājin (?).*

This is an exhaustive manual of the Cāturmāsya according to the Hiraṇyakeśīyaśrautasūtra. The author's name is not mentioned in this MS., but the work may be ascribed to Gopinātha Dīkṣita Oak who had written voluminous Prayoga works following the Hiraṇyakeśīyaśrautasūtra (see work Nos. 309, 351). The MS.material, hand-writing, the treatment of the subject matter and the identical benedictory verse common in all his other works available in this collection clearly indicate that the work can be attributed to Gopinātha. His treatment of the subject matter is very elaborate and he often refers to the views of the other Sūtrakāras such as Apastamba, Bodhāyana, Bhāradvāja, Aśvalāyana and others in addition to some Bhāṣyakāras such as Mātṛdatta and Gopāla. At the end, he deals with the Prāyaścittas for the Cāturmāsya and the Vidhyaparādha and treats of the Cāturmāsyavihāra also in 78 verses.

*Beginning:*—

श्रीगणेशाय नमः । श्रीसत्याषाढाय महर्षये नमः ।
वात्सल्यात्पितरौ कपोलयुगलं स्वस्यागतौ चुम्बितुं
दृष्ट्वा कुञ्चितमास्यपद्ममलं सेषत्स्मितं सत्वरम् ।
व

अन्योन्यं शिवयोस्ततः सुवदने युक्ते अभूतां तयो-
रित्थं येन विनोदितौ स भगवान्बालो गजास्योऽवतु ॥ १ ॥

अथ हिरण्यकेशिसूत्रानुसारिचातुर्मास्यप्रयोगप्रारम्भः। चतुर्षु चतुर्षु मासेषु भवानि चातुर्मास्यानि। पङ्कजादिपदवद्योगरूढ्या वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयात्मकयागसमुदायनामधेयमिदम्। तैः समुदितैरिष्टवतोऽल्पकालिकेन भोगेनापक्षयितुमशक्यं पुण्यं भवतीति। यद्यपि श्रुतौ राजसूये चातुर्मास्यानि पठ्यन्ते तथापि दर्शपूर्णमासौ चातुर्मास्यानीति सूत्रान्तरे नित्येषु पाठात् ब्राह्मणे चतुर्होत्रादिविधिष्वनेकत्र नित्यैः समभिव्याहारात् सत्यापाढेन भगवताऽऽचार्येणाभ्यासस्य विधास्यमानत्वात् आपस्तम्बेन नित्याधिकारे पठितत्वात् आश्वलायनेन च दर्शपूर्णमासाभ्यामिष्टिपशुचातुर्मास्यैरिति नित्यानुक्रमे पाठात् वैखानसवाधूलाभ्यामपि नित्यत्वेन विहितत्वात् बौधायनेनापि यावज्जीवप्रयुक्तानि चातुर्मास्यानि स्युरिति यावज्जीवाभ्यासस्योक्तत्वात् भारद्वाजेनाप्यादौ फाल्गुनभेदेनामूनि विधाय ततः काम्यानि चातुर्मास्यानि व्याख्यास्याम इति नित्यकाम्यविभागस्य प्रदर्शितत्वात्

'प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा। कर्त्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि ॥'
इति स्मृतेश्च नित्यान्येतानि।

*End*:—

चत्वारः पत्नीसंयाजाः। त्वया वेदिं वि०। त्वया होता सन्तनोति। एतावानेव मन्त्रः। न पार्वणः। यस्य स्मृत्येत्यादि। कर्मेश्वरार्पणं कुर्यात्। सांवत्सरिकपक्षे पौर्णमासेष्ट्योदवसायानुदवसाय वा प्रसूता देवेन सवित्रेत्यादि। यथाप्रयोगद्वादशाहादिपक्षे तु तदानीमेव निवर्तनम्। वापनं वैश्वदेववत्। तत्र निवर्तनमन्त्रे विशेषः। एकं मासमुदसृज० वर्त्तय इति।

समाप्तं शुनासीरीयं पर्व।

श्रीमङ्गलमूर्त्तये नमः। सन्तिष्ठते चातुर्मास्यानि। नैनमनीजानं सोमेन फाल्गुनी प्राप्नुयात्। सोमाभावे पशुना। सन्तिष्ठते चातुर्मास्यानीत्यनेन शुनासीरीयान्तैव संस्था। न तु सोमान्तता वा। एतयोः समापनरूपनिमित्तप्रयुक्ताङ्गत्वात्।

× × × × ×

अथ चातुर्मास्यप्रयोगप्रायश्चित्तानि। तत्र चातुर्मास्येषु यदि रजसा निमित्तान्तरेण वा फाल्गुन्याद्युचितकालानारम्भस्तदापि न विप्रश्रेष्ठिः। चैत्रादिकालान्त[र]स्वीकारेण यथाप्रयोगादिना वाऽऽरम्भसम्भवात्।

× × × × ×

अथ विध्यपराधे प्रायश्चित्तानि। कूष्माण्डहोमार्थं पञ्चहोतृहोमार्थोद्धृताग्न्यनुगमने स्वयोनितः पुनरुद्धृत्य सर्वप्रायश्चित्तं तस्मिन्नग्नौ जुहुयात्। अथान्वाहिताग्न्यनुगमनप्रायश्चित्तम्। यद्यन्वाहिताग्निराहवनीयोऽनुगच्छेदन्वग्निरुषसामग्रमख्यदित्यन्यं प्रणीय योऽग्निं देववीतये हविष्मानाविवासति तस्मै पावकमृडय स्वाहेति स्रुवाहुतिं जुहोति। यः कश्चनानुगच्छेदेतदेव प्रायश्चित्तम्।

Then begins the Cāturmāsyavihārakārikā.

चातुर्मास्यप्रयोगोऽयं यथामति निरूपितः।
चातुर्मास्याग्निधिष्ण्यानां विहारोऽथ निरूप्यते ॥ १ ॥

तिथ्यङ्गुलं पदं ग्राह्यं रव्यङ्गुलमथापि वा ।
चतुर्विंशत्यङ्गुलयोऽरत्निरत्र प्रकीर्तितः ॥ २ ॥

× × × × ×

अथ पितृयज्ञविहारः ।
वेदेस्तु पितृयज्ञस्य विहृतिः प्रोच्यतेऽधुना ॥ ७३ ॥
दक्षाग्निगृहविष्कम्भमध्ये चिह्नं प्रकल्पयेत् ।
दक्षाग्निगृहनिर्माणकाले कल्पितमध्यतः ॥ ७४ ॥
समन्ताच्चतुरश्रन्तु लिखेद्वेदाङ्गुलैर्मितम् ।
अनुरोधात्तदग्नय-सूत्रमाग्नेयकोणगम् ॥ ७५ ॥
यावत्पर्याप्तं दातव्यं तत्र शङ्कुं दृढं खनेत् ।
आग्नेय्यवधिका प्राची तत्र वेदिं प्रकल्पयेत् ॥ ७६ ॥
पञ्चहस्तां वेदहस्तां वा पृथिव्यनुरोधतः ।
किञ्चित्सन्नामयुक्ता स्यादपाशुकतया हि सः ॥ ७७ ॥
प्रकल्प्याग्निगृहं मध्ये विंशत्यङ्गुलमानतः ।
मेखलाद्वययुक्तः स्यादेवं विहृतिरीरिता ॥ ७८ ॥

*Colophon* :—

इति चातुर्मास्यविहारकारिका समाप्ता ।

---

## 116

### 280. चातुर्मास्यमन्त्रप्रयोगविचारः ।

CĀTURMĀSYAMANTRAPRAYOGAVIÇĀRA.

Here is a discussion regarding the recitation of the Mantras related to the sacrificial curd required in the Amikṣāyāga of the Cāturmāsya, in its Vaiśvadevaparvan when the Sadyaskālapakṣa or the form of Prayoga which is completed within a day, is adopted. In this short work, the author quotes several authorities in support of his views and follows generally the Apastamba school.

*Beginning*:—

श्रीगणेशाय नमः । अथ चातुर्मास्येषु सद्यःपक्षे लौकिकदध्नि मन्त्रप्रयोगे विचारः । तत्र चातुर्मास्येषु वैश्वदेवाख्ये प्रथमपर्वणि द्व्यहकालत्वमेव कुतः । प्रकृतित्वात् । वैश्वदेव्यामिक्षाणां प्रकृतिरिति न्यायसूत्राच्च । तथा वैश्वदेवी तु प्रकृतित्वात् द्व्यहकालतोभयदोहविकारता चेत्युपदेश इति । वैश्वदेव्याः सायं दोहं दोहयतीति वचनादुभयविकारता । अत एव द्व्यहकालविधानाच्चेति रामाण्डारः ।

× × × × ×

यदा वैश्वदेवे विकल्पेन बोधायनोक्तं कठसूत्रोक्तं वा सद्यस्कालत्वं गृह्यते तदा लौकिक एव दधनि सर्वे मन्त्रवत्संस्कारा अपि कार्याः। तदुक्तं भाष्ये दुग्धदोहनमन्त्रा इति भारद्वाजमतात्। अतो लौकिक एव दधनि मन्त्रप्रयोगोपपत्तेरमावास्याया अपि सद्यस्कालता लभ्यत इति भाष्योक्तिः।

*End.*—

ततोऽग्नीन् परिस्तीर्येत्यादि दधिप्रक्षेपकाले मन्त्रवत्संस्कृतं पूर्वं निहितं दधि प्रक्षिप्य एककपालमधिश्रयतीत्यादि। यजमानभागभक्षणे दधिक्राव्ण इदं हविरिति मन्त्राभ्यामामिक्षाभक्षणम्। शेषं प्रकृतिवत्।

यज्ञेश्वरजेजूर्करस्येदं पुस्तकं यजनविदुपकारार्थम्। श्रीमार्तण्डप्रसन्न।

---

## 117

### 281. चातुर्मास्यविहारः।

### CĀTURMĀSYAVIHĀRA.

*By Bālakṛṣṇa, son of Āpadeva.*

This short work deals with the Cāturmāsyavihāra or the alter of the Cāturmāsya sacrifice according to the Kātyāyanīyaśrautasūtra.

*Beginning:*—

अथ चातुर्मास्यविहारः संक्षेपेणोच्यते। तत्र प्रकृतिवत्प्राचीसूत्रं दत्त्वा तस्मिन्पश्चिमभागे गार्हपत्यभ्रमणार्थं शङ्कुं निखाय तस्मिन् शङ्कौ सार्धत्रयोदशाङ्गुल १३॥ मितसूत्रेण यवद्वयाधिकैकादशाङ्गुल ११ मितसूत्रेण वा मण्डलं विलिखेत्। तत्प्राकृतगार्हपत्यायतनम्। ततो गार्हपत्यमण्डलात्पूर्वतश्चतुर्हस्तोपरि शङ्कुः।

*End.*—

स पितृयज्ञवेदिदक्षिणांसः। एवमुत्तरत आकृष्य शङ्कुः स उत्तरश्रोणिः। एवं चतुर्दिक्षु सरूपां वेदिं विधाय मध्यशङ्कुं निखाय तस्माच्छङ्कोश्चतुर्दिक्षु सप्तदशाङ्गुल १७ मानेन शङ्कुचतुष्टयं दत्त्वा चतुरस्रं साधयेत्। स पैतृयज्ञाहवनीयायतनं भवतीत्यलम्।

*Colophon* :—

इति श्रौतस्मार्तकर्मानुष्ठानप्रवर्तकाचार्यद्विजवर्यापदेवात्मजबालकृष्णविरचिताः पाश्चाहिकचातुर्मास्यविहाराः समाप्ताः।

*Post-Colophon*:—

शके १७३७ वैव। ९ माधवभटमावेगणेन।

118

## 284. जातेष्टिप्रयोगः ।

## JĀTEṢṬIPRAYOGA.

This is a manual of the Jāteṣṭi or the ceremony which is to be performed in connection with the child-birth according to the Āpastamba-śrautasūtra. At the end, the MS. contains the Hautra also which is according to the Aśvalāyanaśrautasūtrakārikā.

*Beginning*:—

श्रीगणेशाय नमः । वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवति ।

बौधायनः ।

पुत्रे जाते तु जातेष्टिः कार्या सूतकनिर्गमे ।
यक्ष्ये द्वादशकपालमग्निं वैश्वानरं तथा ॥
अग्निर्वैश्वानरस्तस्यां त्वयाज्ञातो यदित्यृचम् ।
याज्या वैश्वानरस्येति दृसनाभ्यपदेत्तरा ॥

× × × × ×

आहिताग्निना पुत्रजननानन्तरं गुरुशुक्राद्यनिषिद्धकालेऽमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा । दर्भेष्वासीनो दर्भान्धारयमाणो जातपुत्रयुक्तः पत्न्या सह प्राणानायम्य देशकालौ सङ्कीर्त्य श्रीपरमेश्वरप्रीत्यर्थं पुत्रजननिमित्तककरिष्यमाणजातेष्ट्याख्यकर्मणोऽङ्गत्वेन विहितं गणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनं मातृकापूजनं हिरण्येन नान्दीश्राद्धं करिष्ये ।

*End*:—

आ संस्रावहोमात् । संस्रावहोमानन्तरं जुहूपभृतामाज्यलेपेन तं कुमारमनुलेपयेत् । ततो जुहूपभृत्प्रक्षालनादिब्राह्मणभोजनान्तं समानम् । ब्राह्मणभोजने शतं तदर्धं तदर्धं दश वा ब्राह्मणान्भोजयेत् । ऋत्विजश्च भूयसीं दद्यात् । सिद्धमिष्टिः सन्तिष्ठते ।

*Colophon*.-

इत्यापस्तम्बानुयायिजातेष्टिप्रयोगः ।

Then begins the Hautra.

अथ जातेष्टिहौत्रम् । आश्वलायनश्रौतसूत्रकारिकोक्तम् । नमः प्रवक्त्र इत्यादि ।

It ends.—

सोम इदं हविरजु० कृत । अग्निं वैश्वानरमिदं हविरजुषतावीवृधत महोज्यायोऽकृत देवा आज्य० पन्तावीवृधन्त० कृत । आसंस्थाजपान्तं सर्वं पौर्णमासवत् ।

*Colophon*:—

इत्याश्वलायनश्रौतसूत्रकारिकोक्तजातेष्टिहौत्रप्रयोगः ।

*Post-Colophon*:—

शके १६३२ विकृतिसंवत्सरे रामचन्द्रेण लिखितम् ।

119

## 285. जातेष्टिप्रयोगः ।

JATESṬIPRAYOGA.

This is another manual of the Jāteṣṭi according to the Bodhāyana-śrautasūtra.

*Beginning*:—

श्रीगणेशाय नमः ।

पुत्रे जाते तु जातेष्टिः कार्या सूतकनिर्गमे ।
यक्ष्ये द्वादशकपालमग्निं वैश्वानरं तथा ॥
अग्निर्वैश्वानरस्तस्यां ब्रूयाज्जातो यदित्यृचा ।
याज्या वैश्वानरस्येति दंसनाभ्यः पदोत्तरा ॥

× × ×

पौर्णमासोदितं तन्त्रमवशिष्टं करोति च ।
इति श्रुतिसमुद्रान्तं दृष्ट्वा बोधायनोऽब्रवीत् ॥
व

जातपुत्र एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवतीति बौधायनः । अथ प्रयोगः ।

आहिताग्निः सूतकान्ते जातेष्टिं कुर्यात् । उक्तकालातिक्रमे गुरुशुक्राद्यनिषिद्धकालेऽमावास्यायां पौर्णमास्यां वा कुर्यात् ।

*End*.—

अन्वाहार्यमासाद्य हिरण्यं दद्यात् । ऋत्विजोऽयं व ओदन इदं वो हिरण्यञ्च यथाभागं प्रतिगृह्णीध्वम् । देवस्य त्वा० भ्यां प्रतिगृह्णामि । राजा त्वा वरुणो नयतु देवि दक्षिणे ब्रह्मण ओदनमग्नये हिरण्यं ताभ्यामिति प्रतिग्रहः । हविरुच्छिष्टोद्वासनादि उज्झितिवाचने । अग्नेवैश्वानरस्याहमुज्झितिमनूज्झेषम् । देवा आज्यपा इत्यादि । संस्रावहोमानन्तरं जुहूपभृद्गतमाज्यलेपेन तं कुमारमनुलेपयेत् । करिष्यमाणं नाम गृहीत्वा तन्तवे ज्योतिष्मतीमिति ब्रूयात् । यज्ञविमोकादिब्राह्मणतर्पणान्तं समानम् ।

*Colophon*:—

इतीष्टिप्रयोगः समाप्तः ।

*Post-Colophon*.—

शाके १६९३ खरसंवत्सर भडकनकर त्र्यम्बकदीक्षितेन लिखितम् ।

## 286. जैमिनिश्रौतप्रयोगः ।

## JAIMINIS'RAUTAPRAYOGA.

*By S'rinivāsādhvarin.*

This is a manual of the Agniṣṭomaprayoga which is performed just after the Ādhāna ceremony, and contains only the duties of the priests of the Udgātṛ group according to the Jaiminiyas'rautasūtra. Besides, the author Srinivāsādhvarin states at the end of the work, the duties of Udgātṛ and others when the Agnicayana or the special alter is prepared for the Agniṣṭoma sacrifice. He also collects the necessary Brāhmaṇa portions of the Sāmaveda to justify the special modes of singing of the Ājya, Pṛṣṭha and the Yajñāyajñiyastotras in the Agniṣṭoma.

*Beginning:—*

ॐ आधानपूर्वाग्निष्टोमप्रयोगोऽभिधीयते । अथोद्गातारं सूत्री प्राह । श्रीनिवासशर्मण आधानपूर्वकः सोमो भविष्यति । तत्रौद्गात्रं भवता कर्त्तव्यमिति । स प्रत्याह । महन्मे वोचो भगं मे वोचः पुष्टिं मे वोचो यशो मे वोचः । कच्चिन्नाहीनः कच्चिन्नानुदेश्यः कच्चिन्न न्यस्तमार्त्विज्यं के याजयन्ति का दक्षिणेति । पुनः सूत्री नाहीनोऽग्निष्टोमो नानुदेश्यो न न्यस्तमार्त्विज्यं यजमानदोषेण पद्मनाभशर्माध्वर्युमुखा याजयन्ति । एकविंशतिर्गावो दक्षिणेति ।

*End:—*

आग्नीध्ये स्रुवाहुतीर्जुहोति । अपां पुष्पमस्योषधीनां रस इन्द्रस्य प्रियतमं हविः स्वाहा । तूष्णीमुत्तराम् । इति तृतीयसवनम् ।

अथ चत्वारो हार्योजनोच्छेषणात्कतिचिद्धाना आदायाहवनीयोपान्त आपूर्यास्थामापूरयत प्रजया च धनेन चेति निवपन्ति । अथ शाकलैरेनांस्येव यजन्ते ।

× × × × ×

इति त्रिर्गायेत् ।

*Colophon:—*

इत्याधानपूर्वाग्निष्टोमप्रयोगः सम्पूर्णः ।

जैमिन्याचार्यसूत्रे समुदितममुकब्राह्मणोक्तं च दृष्ट्वा
शिष्टाचारं च बुद्ध्वा विमलतरमतिः श्रीनिवासाध्वरीन्द्रः ।
अग्निष्टोमप्रयोगं व्यतनुत यदि च स्वेषु नास्त्यस्य कर्त्ता
यज्ञो वै विष्णुरस्माद्धरिपदकमलश्रद्धयैवास्य यत्नः ॥

अत्रेदमुच्यते । आध्वर्यवन्तु जैमिनीयानां बोधायनमतेनैवानुष्ठेयमिति यदुच्यते तज्जैमिनिसूत्रब्राह्मणयोरर्थापर्यालोचनादिति बोध्यम् ।

× × × × ×

अथाग्निष्टोम एव यद्यग्निं चिन्वीत उद्गाता पञ्चस्वपि ज्योतिर्निधनानि सामानि सकृद्गायेत्। कानि तानि सामानीति चेदुच्यन्ते।

× × × × ×

अथात्राग्निष्टोम आज्यपृष्ठयज्ञायज्ञीयाख्येषु त्रिषु स्तोत्रेषु गानप्रकारा ये विशिष्य दृश्यन्ते तदाकरभूतानि ब्राह्मणवाक्यानि लिख्यन्ते। तत्राज्यस्तोत्रेऽशरीरवद्गायत्रगाने चतुर्विंशत्यक्षरं गायत्रम्। अष्टाक्षरप्रस्तावः। षोडशाक्षरं गीतम्।

× × × × ×

अथ यद्दाशेमेत्याह अश्नुत एव उत त्राता बहूनामिति ब्रूयात्। यत्तनूनामिति ब्रूयात् तनुरिव यजमानः स्यात्। अथ यद्बहूनामित्याह बहूनामेवैनमेतत् त्रातारं करोति। यद्यप्यस्मिन् यज्ञे बहु ज्ञातव्यं ब्राह्मणे विद्यते अत्यन्तावश्यकानि तु वाक्यानि ततस्तत उद्धृत्य प्रदर्शितानि।

---

## 121

## 287. ज्योतिरप्तोर्यामप्रयोगः।

### JYOTIRAPTORYĀMAPRAYOGA.

This is a manual of the Jyotiraptoryāma, a special variety of the Jyotiṣṭoma sacrifice and it gives only a list of the Stomas, Stotras, Sāmans and hymns which are to be sung by the priests of the Udgātṛ group.

*Beginning*:—

ज्योतिरप्तोर्यामस्य क्लृप्तिरुच्यते। तत्र सूत्रम्। ज्योतिष्टोमे वाऽतिरात्रेऽतिरिक्तस्तोत्राण्यादध्यात्। षोडशीमतीति। त एव गर्भाः पृष्ठेषु यज्ञायज्ञीयश्च बृहद्गर्भम्। तत्र स्तोमक्लृप्तिमाह। त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि सप्तदश आर्भवः। एकविंशोऽग्निष्टोमः सोक्थ्यः। एकविंशः षोडशी पञ्चदशी] रात्रिः। त्रिवृत्सन्धिस्त्रिवृत्प्रथमातिरिक्तस्तोत्रम्।

*End*:—

रथन्तरस्तवनकाले रथघोषः। श्येन इत्यवेक्ष्य इष्टयजुष इति भक्षयामीत्यन्तेन भक्षणम्। अथ निष्क्रमणादि। अथातिरिक्तस्तोत्राणि दीक्षायै जराबोधियस्य सा ऋक् (?)। अग्निः ऋषिः। गायत्री० छन्दः। इन्द्रो देवता। सत्रासाहीयस्य साम्न इन्द्र ऋषिः। गायत्री छन्दः। इन्द्रो देवता। मार्गीयवस्य साम्नो मृगयु ऋषिः। गायत्री छन्दः। विश्वे देवा देवता रुद्रो वा। वारवन्तीयस्य साम्न इन्द्र ऋषिः भृगुर्वा। गायत्री छन्दः। विष्णुर्देवता। चतुर्षु स्तोत्रादिषु निष्क्रमणादि। प्रथमस्य त्रिवृत्स्तोमः। द्वितीयस्य पञ्चदशः। तृतीयस्य सप्तदशः। चतुर्थस्यैकविंशस्तोमः। गायत्री छन्दः। इत्यतिरिक्तस्तोत्रभक्षणम्।

*Colophon*:—

इति ज्योतिरप्तोर्यामः।

## 122

## 288. दर्शपूर्णमासपद्धतिः ।

## DARŚAPŪRṆAMĀSAPADDHATI.

*By S'aṅkara Sakalakala, son of S'iva.*

This is a metrical treatise dealing with the Darśapūrṇamāseṣṭi in 460 verses and it follows the Āpastambaśrautasūtra. The author, Śaṅkara Sakalakala, seems to be well versed in the art of poetry, Darśanas and the Śrautasūtras. He was the son of Śiva who also was considered to be a great scholar and his mother was called Bhavānī. He refers to the works of Rāmāṇḍār and Āṇvilā.

*Beginning*:—

श्रीमहागणपतये नमः ।

पितरं शिवं भवानीमम्बां मल्लारिमम्बिकासूनुम् ।
नत्वा सकलकलाख्यः पर्वयुगेष्टिप्रयोगमातनुते ॥ १ ॥
अभ्यस्य सूत्रमात्मीयं रामाण्डारं तथाऽन्विलाम् ।
करोमि कारिकाबद्धामापस्तम्बेष्टिपद्धतिम् ॥ २ ॥
अमावास्या पूर्णिमा वा मध्याह्नात्परतो यदा ।
अन्वाधाय दिने तस्मिन् यागं कुर्यात्परेऽहनि ॥ ३ ॥
हुत्वाऽग्निहोत्रमुपसि दर्भासीनः पवित्रधृक् ।
प्राणानायम्य सस्त्रीकः पूर्णमासेन चैव हि ॥ ४ ॥
दर्शेन यक्ष्ये विमुच्च पठित्वाऽपः स्पृशेत्ततः ।
अध्वर्युवरणं सोऽथ पत्यादग्निं समुद्धरेत् ॥ ५ ॥

*End.*—

भागं प्राश्नाति संयज्ञपतिराशीर्मनुं पठेत् ।
यज्ञशाश्रम इत्यादि सन्तिष्ठत्वन्तमुच्चरेत् ॥ ५४ ॥
वृष्टिरसीति मन्त्रान्ते हस्तौ प्रक्षालयेत्पतिः ।
ब्राह्मणांस्तर्पयत वा इति सम्प्रैषमुच्चरेत् ॥ ५५ ॥
अग्ने नयेत्यादिमन्त्रैर्मा मा हिंसीःसमाप्तिकैः ।
अग्नीन्प्रदक्षिणीकृत्य नमस्कृत्य ततः परम् ॥ ५६ ॥
श्रीमद्रामार्पणं यज्ञं यजमानः करोत्विति ।
श्रीरामोऽनेन यज्ञेन कृतेन प्रीयतां प्रभुः ॥ ५७ ॥
क्षुरकर्मेष्टिसङ्कल्पं कृत्वङ्गत्वेऽग्निहोत्रिणाम् ।
अनङ्गमिच्छया वा श्रीरामाण्डारमताद्भवेत् ॥ ५८ ॥
कात्यायनमतेनामावास्यायामपि तद्भवेत् ॥ ५९ ॥
विद्वच्छ्रीशिवनामपण्डितमणिश्रीमद्भवानीसुते-
नेत्थं शङ्करकोविदेन विहिता सत्कारिकाभिः क्षणात् ।
नानाकाव्यकलाकलापकलनापाण्डित्यविद्याजुषा
श्रौते विश्रुतपार्वणेष्टियुगलस्यापद्धतिः पद्धतिः ॥ ६० ॥

*Colophon:*—

इति सकलकलसार्वभौमशिवसुतशङ्करविहितेष्टिपद्धतिः समाप्ता ।

शङ्करसकलकलस्येदं पुस्तकम् ।

---

123

289. दर्शपूर्णमासपद्धतिः ।

DARŚAPŪRṆAMĀSAPADDHATI.

*By Vaidyanāthamiśra, son of Ratneśvara of Kurudeśa.*

This is a manual of the Darśapūrnamāseṣṭi based on the 2nd and 3rd chapters of the Kātyāyanaśrautasūtra. The author seems to have composed a voluminous Prayoga work based on all the chapters of the Kātyāyanaśrauta, and the present work may be a part of the same. He had also composed a commentary on this Prayoga work and the MSS. dealing with the 1st and 2nd chapters of that commentary are described under HPS. II. 1056 and CS. II. 419. The Paddhati or Prayoga contained in the present MS. is only for the 2nd and 3rd chapters of the Kātyāyanaśrauta. The Kātyāyanīya Cāturmāsyapaddhati by Vaidyanātha Miśra described above under work No. 263 may be the other part of this voluminous Prayoga work of our author.

*Beginning:*—

श्रीगणेशाय नमः ।

मङ्गलं तनुतां नित्यं मङ्गला मङ्गलानना ।

लालयन्ती गणेशानं मङ्गलाक्षरगीतिभिः ॥ १ ॥

श्रीरत्नेश्वरपुत्रेण वैद्यनाथेन धीमता ।

दर्शेष्टिपौर्णमासीष्ट्योः पद्धतिर्लिख्यतेतमाम् ॥ २ ॥

तत्रादौ परिभाषा । आदौ स्वामिनः ऋत्विजाश्च स्मृत्युक्तस्नानाचमनादि । शंस्यस्योद्धरणान्ते स्वामी शंस्यस्य दक्षिणतो ब्रह्मस्थानात्पश्चादुपविशति प्राङ्मुख उदङ्मुखो वा । शालाप्रवेशश्च दक्षिणद्वारा सर्वेषाम् ।

× × × × ×

विशेषास्तु परिभाषास्तत्र तत्र वक्ष्यामः । अथेतिकर्त्तव्यता । आधानानन्तरमधिकारे सति यैव पौर्णमास्यायाति तस्यां कृतस्नानादेः सपत्नीकस्य शालायामुपविष्टस्य स्वामिनः कालादिकीर्त्तनानन्तरं प्रारिप्स्यमानदर्शपूर्णमासाङ्गमातृपूजामहं करिष्य इति सङ्कल्पः । ततो मातृपूजा । पुनः पूर्ववदुक्ताभ्युदयिकश्राद्धमहं करिष्य इत्युक्त्वाऽऽभ्युदयिकश्चेति ।

× × × × ×

Leaf 9 a. रत्नेश्वरसुतेनैषा द्वितीयाध्यायपद्धतिः ।

कुरुदेशप्रसूतेन वैद्यनाथेन निर्मिता ॥ १ ॥

नमस्कृत्य गणेशानं तिरस्कृत्यान्तरायकम् ।

पुरस्कृत्याखिलं भाष्यं साक्षात्कृत्यं लिखाम्यहम् ॥ २ ॥

अथ होतरेहीति प्रैषः । तत आसादितं होतुरासनमुत्तरश्रोणेरुत्तर अदूर एव संस्थाप्य इध्मपूलकादेकमिध्मं गृहीत्वा अग्नये समिध्यमानायानुब्रूहीति प्रथमस्वरेणाह ।

*End.*—

ब्राह्मणं तर्पयत वा इति प्रैषः । स्वामिनोर्ब्राह्मणभोजनम् । ततो ब्रह्मा शंस्यं पूर्वेणापरेण वा यथागतो भवति तथैवेत्य नमः कृताय कर्मणेऽकृताय कर्मणे नमः । अयाडग्ने जातवेदा अन्तरः पूर्वोऽस्मिन्निषद्य सन्वंसान्निसुविमुचा विमुञ्च धेह्यस्मभ्यं द्रविणं जातवेदः स्वाहेति प्रादेशमात्रीं समिधमादधाति । स्थाल्याः सकृद्गृहीतं जुह्वा जुहोति वाऽनेनैव मन्त्रेण । उपतिष्ठतेऽनेनैव वाऽनेनैव वा । इति ।

*Colophon:*—

कुरुदेशप्रसूतेन वैद्यनाथेन निर्मिता ।
रत्नेश्वरसुतेनैषा तृतीयाध्यायपद्धतिः ॥

---

## 124

### 293. दर्शपूर्णमासप्रयोगः ।

### DARŚAPŪRṆAMĀSAPRAYOGA.

This is a manual of the Darśapūrnamāsesṭi according to the Āpastambaśrautasūtra.

*Beginning:*—

श्रीगणेशाय नमः । अथातो दर्शपूर्णमासौ व्याख्यास्यामः । प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान्धारयमाणः पवित्रपाणिः पत्न्या सह प्राणानायम्य देशकालौ सङ्कीर्त्य दर्शेन यक्ष्ये पूर्णमासेन यक्ष्य इति सङ्कल्प्य । विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमि । यक्ष्यमाणोऽप उपस्पृशति । एवं पत्नी । तदिदं सर्वयज्ञेषूपस्पर्शनं भवति । अस्यां पूर्णमासेष्ट्यामध्वर्युं त्वामहं वृणे । अध्वर्युं वृणोति । एवं ब्रह्मादीन् वृणीते । अध्वर्युर्वृतोऽस्मि करिष्यामीत्युक्त्वा गार्हपत्यादाहवनीयमुद्धृत्य दक्षिणाग्निं प्रणीयाहवनीयं प्रणयति ।

*End.*—

सं यज्ञपतिराशिषेति यजमानोऽत्र वा स्वभागं प्राश्नाति । यज्ञशंचम उपचम आयुश्च मे बलं च मे यज्ञशिवो मे सन्तिष्ठस्व यज्ञस्विष्टो मे सन्तिष्ठस्व यज्ञारिष्टो मे सन्तिष्ठस्वेति दर्शपूर्णमासाभ्यां सोमेन पशुना वेष्ट्वा जपति । वृष्टिरसि वृश्च मे पाप्मानमृतात्सत्यमुपागामितीष्ट्वाऽप उपस्पृशति । ब्राह्मणांस्तर्पयत वा इति सम्प्रेष्यति । सन्तिष्ठते दर्शपूर्णमासौ । अग्ने नय सुपथा रायेऽस्मान्विश्वानि देव वयुनानि विद्वान् । × × × × ×

यस्य स्मृत्या च ना० मच्युतं ६ मन्त्रहीनं क्रिया० दस्तु मे ७ प्रवसन् यागकाले विहाराभिमुखो याजमानं जपति । प्राचो विष्णुक्रमान्क्रामति । प्राङुदेत्या गोमतीं जपति इति प्रवसतो यजमानविधिः ॥

*Colophon:*—

इति दर्शपूर्णमासप्रयोग आपस्तम्बसूत्रवृत्यनुसारी समाप्त: । श्रीयज्ञेश्वरार्पणमस्तु ।

*Post-Colophon:*—

संवत् १९३६ शके १८०१ विक्रमनामसंवत्सर आषाढशुक्ल ९ नवमी भृगुवासर इदं पुस्तकं दीक्षितकोटेश्वरस्यात्मजभोलाशङ्करपठनार्थं तस्य पुस्तकं समाप्तम् । लि० नागरब्राह्मणवडनगरा गोविन्दराम इजतरामेण श्री अवरङ्गाबादमध्ये । शुभं भवतु ।

---

## 125

### 295. दर्शपूर्णमासप्रयोग: ।

### DARŚAPŪRṆAMĀSAPRAYOGA.

This is a manual of the Darśapūrṇamāseṣṭi. This MS. contains only the Darśeṣṭiprayoga which also is incomplete in the middle.

*Beginning:*—

अथातो दर्शपूर्णमासौ व्याख्यास्याम: । प्रातरग्निहोत्रं हुत्वा दर्भेष्वासी+ ण: पत्न्या + स्य सङ्कल्पं करोति । दर्शेन यक्ष्ये तेन परमेश्वरं प्रीणयानि । विद्यु+मि । आहवनीयमुपसमिन्धे । अग्निं गृह्णामि सुरथं यो मयोभूर्य उद्यन्तमारोहति सूर्यमह्ने । आदित्यं ज्योतिषां ज्योतिरुत्तमं यो यज्ञाय रमतो देवताभ्य: ।

*End:*—

यज्ञशाश्चम उपचम आयुश्चमे बलं च मे यज्ञशिवो मे सन्तिष्ठस्व यज्ञस्विष्टो मे सन्तिष्ठस्व यज्ञारिष्टो मे सन्तिष्ठस्व । वृष्टिरसि वृश्च मे पाप्मानमृतात्सत्यमुपागाम् । ब्राह्मणांस्तर्पयत वै । अग्ने नय सुपथा राये+ यज्ञेशाय नमो नम: । शुभमस्तु । हरि: ॐ । इदमिन्द्रियममृतं वीर्यमनेनेन्द्राय पशवोऽचिकित्सन् तेन देवा अवतोपमामिहेषमूर्जं यश: सह ओज: सनेयं श्रुतं मयि श्रयतां यत्पृथिवीमचरत् तत्प्रविष्टंयेनासिञ्चद्बलमिन्द्रे प्रजापति: । इदं तच्छुक्रं मधुवाजिनीवद्येनोपरिष्टाद्धिनोन्महेन्द्रं दधि मां धिनोतु ।

---

## 126

### 298. दर्शपूर्णमासप्रयोग: ।

### DARŚAPŪRṆAMĀSAPRAYOGA.

This is another manual of the Darśapūrṇamāseṣṭi according to the Kātyāyanīyaśrautasūtra. It is also known as the Pañcapadārthī since it gives directions with regard to the duties of five persons–four priests and one sacrificer–who are engaged in the performance of the Darśapūrṇamāseṣṭi.

*Beginning:*—

श्रीगणेशाय नमः । श्रीविन्ध्यवासिन्यै नमः । श्रीगोविन्दपाठकचरणारविन्दाभ्यां नमः । अर्थप्रसङ्ख्यया द्रव्योपकल्पनम् । तन्त्रकालकर्म प्रत्यहमविधानात् । सङ्कल्पः । एवं० थौ श्रीपर० थं दर्शपूर्णमासाभ्यामहं यक्ष्ये । तत्र पौर्णमासीष्ट्याहं यक्ष्ये । दर्शे दर्शेष्ट्याहं यक्ष्ये । पञ्चभूसंस्कारपूर्वकमुद्धरणम् । अग्न्यन्वाधानमध्वर्युर्यजमानो वा । षट् समिधो गृहीत्वा अग्निमष्टाकपालेन पुरोडाशेन अग्नीपोमावन्तराऽऽज्येन अग्नीपोमावेकादशकपालेन पुरोडाशेन श्वोऽहं यक्ष्ये ।

*End:*—

संयज्ञपतिराशिपा युज्यताम् । ब्राह्मणं तर्पयत वै । अस्याः पौर्णमासीष्टेर्वा दर्शेष्टेः समृद्ध्यर्थं यथाकालं यथासम्पन्नान्नेन श्रुत्युक्तं ब्राह्मणमेकं तर्पयिष्ये । तेन श्रीयज्ञपुरुषः प्रीयताम् । कर्मापवर्गे समिधमादधाति । जुहोत्युपतिष्ठते वा । ॐ नमः कृताय कर्मणे । अकृताय कर्मणे वा । अयाड् यज्ञे जातवेदा अन्तरा × × × तृष्णाया वै बिभेमीति । का ते तृप्तिरिति ब्राह्मणस्यैव तृप्तिमनुतृप्येयमिति । तस्मात्संस्थिते यज्ञे ब्राह्मणं तर्पयत वै ब्रूयाद्यज्ञमेवं तर्पयति ।

*Colophon:*—

इति पञ्चपदार्थी समाप्ता ।

*Post-Colophon:*—

शके १६८८ व्ययनामसं० कार्त्तिकमासे शुक्लपक्षेऽद्य तिथौ सप्तम्यां पुण्यतिथौ भानुवासरे इदं पुस्तकं लिखितम् । × × × परमार्थी पञ्चपदार्थी समाप्ता । × × × येलापुरग्रामे । इदं पुस्तकं नथुभट परमार्थी ।

---

## 127

## 299. दर्शपूर्णमासप्रयोगः ।

### DARŚAPŪRṆAMASAPRAYOGA.

This is another manual of the Darśapūrṇamāsa according to the Kātyāyanaśrautasūtra. Here the Prayoga of the Pūrṇamāseṣṭi only is described in detail and the modifications for the Darśeṣṭi are noted down in brief at the end.

*Beginning :*—

श्रीगणेशाय नमः । अथ पौर्णमासीष्टिः । प्रातरग्निहोत्रं हुत्वेति (?) आहवनीयदक्षिणाग्न्योः पञ्चभूसंस्काराः । कालज्ञा श्रीपरमेश्वरप्रीतये दर्शपूर्णमासाभ्यामहं यक्ष्ये । तत्र पौर्णमासीष्ट्याहं यक्ष्ये । उद्धरणं विहरणम् । अग्निमष्टाकपालेन पुरोडाशेन अग्नीषोमावन्तराज्येनोपांशु अग्नीषोमावेकादशकपालेन पुरोडाशेन सद्योऽहं यक्ष्ये । पञ्चदशो वज्रः ।

ममाग्नेपक्षः । व्रीहिभिर्यागः । अन्वाहार्यो दक्षिणा । उत्तमे काले व्रतोपायनम । ये केचन वैकल्पिकाः पदार्थास्ते ऋत्विक्प्रत्ययेन मयाऽवधारिताः ।

*End:—*

नमस्ते गार्हपत्याय० । प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च ।
स्मरणं देव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥
इति पौर्णमासीष्टिः ।

Leaf 34 a. अथ दर्शेष्टिः । श्रीपरमेश्वरप्रीतये दर्शेष्ट्याऽहं यक्ष्ये । अग्निमष्टाकपालेन विष्णुमन्तराज्येनोपांशु । इन्द्राग्नी द्वादशकपालेन पुरोडाशेन श्वोऽहं यक्ष्ये । अग्न्यन्वाधानम् । वपनम् । अपराह्णे पिण्डपितृयज्ञः ।

× × × × ×

सोमायानुब्रूहि सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः । सुमृडीको न आविशेत्यानिदधे पदम् । समूढमस्य पांसुरे शों ३ ।

---

## 128

## 301. दर्शपूर्णमासप्रयोगः ।

## DARŚAPŪRNAMĀSAPRAYOGA.

This is another manual of the Darśapūrṇamāseṣṭi according to the Kātyāyanīyaśrautasūtra. The MS. is incomplete at the end of the Pūrṇamāseṣṭi.

*Beginning:—*

श्रीगणेशाय नमः ।
प्रणम्य विघ्नहर्तारं गुरूंश्च पितरं तथा ।
कर्मानुगपदार्थानां दीपिका तन्यते मया ॥

कृताग्न्याधेय उदगयने मलमासगुरुशुक्रमौढ्यवार्द्धकशैशवसूतकादिरहितायां प्रथमपूर्णमासारम्भनिमित्तं मातृपूजापूर्वकमाभ्युदयिकं श्राद्धमन्वारम्भणीयां च कृत्वा पौर्णमासारम्भं च कुर्यात् । तत्रादौ यावज्जीवत्रिंशद्वर्षपञ्चदशवर्षसंवत्सराणामन्यतमपक्षस्यावधारणम् । तद्यथा यावज्जीवं त्रिंशद्वर्षाणि वा दर्शपूर्णमासाभ्यामहं यक्ष्ये । दाक्षायणपक्षे तु पञ्चदशवर्षाणि संवत्सरं वा दाक्षायणसंज्ञकदर्शपूर्णमासाभ्यामिति विशेषः ।

*End.—*

ततो गार्हपत्यस्योत्तरत उपविश्य जुहूं स्रुचं प्रगृह्योभाभ्यां संस्रवहोमोऽग्ने दब्धायव इति मन्त्रेण । इदमग्नयेऽदब्धायवेऽशीतमाय न ममेति त्यागः । पाक्षिकः शंयोर्वाकः । ततो वेदस्यैकं तृणमाच्छिद्य तस्याग्रं जुह्वां मध्यं स्रुवे मूलं स्थाल्यां व्यन्तु वय इति मन्त्रेणोल्कातृणप्रहरणप्रैषादि शंयोर्ब्रूहीत्येवमन्तम् ।

## 129

### 302. दर्शपूर्णमासप्रयोगः ।

### DARS'APŪRṆAMĀSAPRAYOGA.

This is another manual of the Darśapūrṇamāsa according to the Kātyāyanaśrautasūtra. Here also the Pūrnamāsaprayoga is described in full and the modifications only are noted down at the end for the Darśeṣṭi.

*Beginning*:—

विघ्नराजं नमस्कृत्य देवीं सरस्वतीं तथा ।
शिष्याणामुपदेशाय लिख्यते श्रौतपद्धतिः ॥

कृताधानस्य प्रथमं पौर्णमास्यां मातृपूजापूर्वकमाभ्युदयिकं श्राद्धम् । ततोऽन्वारम्भणीया । प्रतिपदि पुनः खरस्थाने निर्लेपः । पञ्चभूसंस्काराः । दर्भैः परिसमूह्य गोमयेनोपलिप्य वज्रेणोल्लिख्यानामिकाङ्गुष्ठेनोद्धृत्योदकेनाभ्युक्ष्याग्निमुपसमाधाय षट् समिधो गृहीत्वा अग्न्यन्वाधानमध्वर्युर्यजमानो वा । अग्निमष्टाकपालेन पुरोडाशेन अग्नीषोमावन्तराऽऽज्येनोपांशु । अग्नीषोमावेकादशकपालेन पुरोडाशेन सद्योऽहं यक्ष्ये ।

*End*:—

व्यूहने । अग्नाविष्णोरिन्द्राग्न्योरु० न प्रोहामि । अग्निर्विष्णुरिन्द्राग्नी तमप० नापोहामि । अभ्युक्ष्येत्यादि । सूक्तवाके । अग्निरिदं ह० सोम इदं० अग्निरिदं० उपांशु विष्णुः । उच्चैः । अजुपतावीवृधत । उपांशु । महो ज्यायः । उच्चैः । अक्रत । इन्द्राग्नी इदं हविरजुषेतामवीवृधेतां महो ज्यायोक्राताम् । देवा आज्यपा इत्यादि । पत्नीसंयाजे विशेषाभावः । शेषं प्राकृतम् । इति दर्शेष्टिः समाप्ता । सान्नाय्यपक्षे इन्द्राभरदक्षीणेनावसूनिपतिः सिन्धुनामसिरेवेतीनांवो २ षट्

*Colophon* :—

दर्शपूर्णमासेष्टिः समाप्तिमगमत् ।

---

## 130

### 304. दर्शपूर्णमासप्रयोगः ।

### DARS'APŪRṆAMĀSAPRAYOGA.

*By Dālār Gaṅgādhara S'āstrin.*

This is an exhaustive manual of the Darśapūrnamāsa according to the Bodhāyanaśrautasūtra. It is mentioned here that this Prayoga is meant for those sacrificers who follow the Aśvalāyana School and engage the priests, Adhvaryu and others belonging to the Bodhāyana School. This codex contains two paginations. The first consists of seven leaves dealing with the Prayoga of the first day while the second treats of the Prayoga of the second day of the Darśapūrṇamāsa.

*Beginning*.—

श्रीशं वन्दे । अथाश्वलायनस्य बौधायनीयाध्वर्यवादि परिगृह्णतो दर्शपूर्णमासप्रयोगः । अन्वाधानदिने प्रातरग्निहोत्रहोमात्प्राग्गार्हपत्यादिसमीपे त्रीणि त्रीणि स्थलानि यज्ञिय-काष्ठान्यग्निरक्षणसमर्थानि निधायाग्निहोत्रं हुत्वा ब्राह्मणान् प्रति ब्रूयात् । मह्यं पूर्णमासयागानुज्ञां प्रयच्छत । तैरों तथेत्युक्ते

बैजवापः

विनायकादि सम्पूज्यं कालं वापि विशेषतः ।
कुर्वाते दम्पती आगूष्करणं तत्सहैव तौ ॥

व्रतभोजनार्थमोदनपाकाय समादिश्य वपनयोग्यकेशादिसत्त्वे श्मश्रूपपक्षकेशान् वाप-यित्वा लोमानि संहृत्य नखानि निकृन्त्य तीर्थादौ शुध्यर्थं स्नात्वा सपत्नीक आचम्य शरीर-शुद्धिद्वारा दर्शपूर्णमासयागेऽधिकारार्थं स्नानादि करिष्ये ।

× × ×

इति दिनकृत्यम् । सायं हुतेऽग्निहोत्रे । श्रीशं वन्दे ।

यजनीयाहे प्रातर्हुतेऽग्निहोत्रेऽध्वर्युरुत्तरेणाहवनीयं तिष्ठन् पाणी संमृशेत् । कर्मणे वां० ।

*End*:—

आहवनीये समिध आदधाति । अग्ने व्रतपते व्रतमचारि ४ उपोत्थाय यज्ञस्य पुनरा-लम्भं जपति । यज्ञो बभूव० । प्राङुत्क्रम्य जपति । गोमां अग्ने० । स्वायतन उपविश्य परिक-र्मणे प्रेष्येत् । ब्राह्मणांस्तर्पयत वै । नमस्ते गार्हपत्याय० आभिर्गीर्भिरित्यादि । तीर्थेन निष्क-म्यानियमो भवेत् ।

*Colophon*:—

दातार इत्युपाह्व गङ्गाधरशास्त्रिभिः प्रणीतो दर्शपूर्णमासविचारो बोधायनीयः ।

*Post-Colophon* :—

इदं पुस्तकं भोरसंज्ञकसचिवोपाह्वशङ्करप्रभुनगरे शाके १८१० शुद्धचैत्रशुद्धे १४ लिबीकृतं पटवर्द्धनोपाह्वसीतारामेण ।

---

## 131

### 307. दर्शपूर्णमासप्रयोगः ।

### DARŚAPŪRṆAMĀSAPRAYOGA.

This is an exhaustive manual of the Darśapūrṇamāsa according to the Bodhāyanaśrautasūtra. The Mantras here are accented.

*Beginning*:—

श्रीगणेशाय नमः ।
ॐ । सवनेषु वनेषु गोपिकानां रसवद्भूरिरुतैरुत द्विजानाम् ।
हविरस्ति सगोरसं सगोपः प्रविधत्तान्मयि गोरसं स गोपः ॥ १ ॥

आत्मनः शुद्ध्यर्थं दर्शपूर्णमासाङ्गत्वेन विहितं पवनादि करिष्ये । एकविंशतिदर्भपिञ्जूलै-स्त्रेधा विभज्य सप्तभिः कण्ठादुपर्युन्मृज्य सप्तभिर्नाभेराकण्ठम् । सप्तभिर्नाभेरागुल्फम् । सर्वान्समुच्चित्य । अद्भिरभ्युक्ष्य । उदङ्निरस्य । अप उपस्पृश्य । शुद्ध्यर्थमाचम्य । मन्त्रैराचामेत् । आपो हिष्ठा मयो भुवः । × × × ×

ततः स्वर्गकामः सिद्धिद्वारा श्रीविष्णुप्रीत्यर्थं पौर्णमासेन हविषा यक्ष्ये । आमावास्येन हविषा यक्ष्ये । तन्म ऋध्यताम् । तन्मे समृध्यताम् तन्मे सम्पद्यतां कामः ।

*End :—*

यज्ञो बभूव स आ बभूव । स प्रजज्ञे स वा वृधे । स देवानामधिपतिर्बभूव । सोऽस्मानधिपतीन्करोतु । वयं स्याम पतयो रयीणां गोमाँ अग्ने विमाँ अश्वी यज्ञो नृवत्सखा सदमिद्-प्रमृड्यः । इडा वाँ एषो सुरप्रजावान् दीर्घो रयिः पृथुबुध्नः स भावान् ब्राह्मणांस्तर्पयत वै ।

---

## 132

### 311. दर्शपूर्णमासमतभेदविचारः ।

### DARŚAPŪRṆAMĀSAMATABHEDAVICĀRA.

In this treatise the author records the contradictions found in the Śrautasūtras and the practical difficulties arising therefrom in the performance of the Darśapūrṇamāsa. He also subsequently gives his own decision on these conflicting views. In doing this he quotes from several works belonging to the Bodhāyana School and states the contradictory instructions contained in them. The name of the author is not mentioned in this MS. but it is possible to attribute this work to Dātār Gaṅgādharaśāstrin whose Darśapūrṇamāsaprayoga precedes this work in this codex.

The following authorities are referred to in this work:—

Subodhinī, Karmāntasūtra, Dvaidhasūtra, Āpastamba, Gopāla, Vidyāraṇya, Rudradatta, Māte, Āśvalāyana, Kalpasāra, Keśava, Tryambaka, Saunaka, Bhāradvāja, Satyāṣāḍha.

*Beginning:—*

श्रीशं वन्दे । अथ दर्शपूर्णमासयोर्मतभेदटिप्पणम् । तत्र सुबोधिन्यां यथाश्रुतकर्मान्तसूत्रा द्दम्पत्योर्व्रतभोजनं ततो वपनादीत्युक्तम् । इदं द्वैधतात्पर्यविरुद्धम् । अत ए(व)केनाप्यस्मिन्भोजनं नोक्तम् । वस्तुतस्तु कर्मान्ते क्रमविध्यङ्गीकारे गौरवाद्द्वैधानुसार्येवानुष्ठानं युक्तम् । योऽपि तत्रैवान्वाधानोत्तरयजमानकर्तृकसमिदाधानवेलायां विचारः कृतः सोऽपि बुधैः सम्यग्विचार्य एव । आपस्तम्बाद्यनुसारेण कथञ्चिदङ्गीकारेऽपि शिष्टविगानादनाचरणमेव तत्पक्षस्येति ध्येयम् । वपने विकल्प इति गोपालादयः । विद्यारण्यैस्तु वपनयोग्यकेशासत्त्वेऽपि वपनं नित्यम् । अयोग्यत्वे तु नेति महता विचारेण व्यवस्थापितम् । अल्पशो लोमानि वाप यत इति वाजसनेयकमित्यापस्तम्बसूत्रम् । रुद्रदत्तीया व्याख्या चात्रानुकूला ।

*End:-* –

अध्वर्य्वादयो गार्हपत्यमुत्तरेण परिक्रामेयुरिति शालीकिपक्षेऽपसलैः पर्यावर्तनमकृत्वैव उलूखल इत्यादिहोमाविति कर्मान्ताशयः। केचित् दृषत्कपालपात्रीसंलग्नं पिष्टं फलीकरणेन संमिश्र्य जुह्वति। तत्सूत्रान्तरमूलम्। बह्वृचे यजमाने तत्सूत्रे योक्त्रविमोकस्य समन्त्रस्य विधेरिमं विष्यामीति मन्त्रोऽध्वर्युणा पत्न्या वा न पाठ्य इति त्र्यं०। होत्रे वेददानात् प्राक् पश्चाद्गार्हपत्यस्य वेदं निधाय वेदोऽसीति यजमानं वाचयित्वा होत्रे वेदं प्रदाय होतृप्रयोगसमाप्तेस्तत्रैवास्त इति विद्या०। होत्रा निनीते पूर्णपात्रेऽध्वर्युणा पुनर्न नेतव्यमिति देवप्रयोगे। युक्तं चेदम्। न समुच्चयः। उभयोरेककार्यत्वादिति त्र्यं०। दक्षिणेन गार्हपत्यं गतस्याप्यध्वर्योरुत्तरेणागमनमाप्यायनार्थमिति त्र्यं०। प्रायश्चित्तहोमे बर्हिष्येवाज्यस्थालीनिधानम्। अन्यत्र नयने मानाभावात्। विष्णुक्रमाणामाध्वर्यवे पुनर्विधानं प्रवसति यजमानेऽध्वर्योरमन्त्रकविष्णुक्रमप्राप्त्यर्थमिति सुबोधिन्याशयः। श्रीः।

*Colophon:*--

इति दर्श(पूर्ण)मासयोर्मतभेदविचारः।

*Post-Colophon:*--

भोरग्रामे पटवर्धनसीतारामेण शुद्ध चैत्र १० समापितम्। शाके १८११।

---

## 133

## 312. दर्शपूर्णमासमन्त्रभाष्यम्।

## DARŚAPŪRṆAMĀSAMANTRABHĀṢYA.

*By Nārāyaṇayajvan.*

This is an exhaustive commentary on the Mantras of the Darśapūrṇamāsa according to the Āpastambaśrautasūtra. In the beginning, the author Nārāyaṇayajvan introduces the work laying stress on the necessity of knowing the meaning of the Mantras by those who perform the Vedic sacrifices. Then he narrates in verses the Ṛṣis of the Mantras used in the Darśapūrṇamāsa. The remaining portion of the work is a commentary on the Mantras as found in the Āpastambaśrautasūtra. The MS. has many paginations and is incomplete in the middle and at the end. The first leaf contains a fragment of a work dealing with the Araṇikalpa.

*Beginning.*—

विद्वान् यजेतेति विदुषः कर्मण्यधिकारः। विद्वत्ता द्विविधा। अधीतिरर्थावबोधश्च। तत्राधीतिर्गुरोर्मुखात्स्वशाखाध्ययनम्। अङ्गैरुपाङ्गैर्वेदार्थविचारोऽर्थावबोधनम्। अत्र श्रुतिः। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति। वसिष्ठः–

यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः।
यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति॥

× × × × ×

इत्थं मन्त्रार्थज्ञानस्यावश्यकत्वम् । मन्त्रास्त्रिविधाः । ऋचः सामानि यजूंषि । तत्र पादबद्धा ऋक् । गीतिषु सामाख्या । शेषे यजुःशब्दः ।

× × × × ×

आर्षेयं ऋषिसम्बन्धः । छन्दो गायत्र्यादि । दैवतं प्राजापत्यादि । ब्राह्मणं विनियोजकवाक्यम् । अत्रर्षयो वेदशाखाकाण्डमण्डलसूक्तानां द्रष्टारः प्रजापत्याद्य उत्तरोत्तरे मुख्याः । तदलाभे पूर्वे पूर्वे ज्ञातव्याः । छन्दो गायत्र्यादिरिह दैवासुरप्राजापत्यादिभेदेन प्रत्येकं चतुर्विधमक्षरभेदगणभेदभिन्नम् । तच्चर्क्सामयोरेव । न यजुषामच्छन्दस्कत्वात् । दैवतं तु मन्त्रव्याख्याने देवता प्रतिपाद्यते । इह प्रतिपादयिष्यते । ब्राह्मणं तु प्रत्यक्षं तत्तन्मन्त्रव्याख्यानावसरे प्रदर्शयिष्यते । अप्रत्यक्षं तु कल्पसूत्रकारप्रत्यक्षमिति तद्वाक्यानुरूपमेवोदाहरिष्यते । अत एव कल्पसूत्रब्राह्मणानुसारेण मन्त्रार्थं योजयामः ।

नमस्कृत्य परं ब्रह्म तन्नारायणयज्वना ।
ऋषिरिष्ट्यादिमन्त्राणां यथाशक्त्यभिधीयते ॥ १ ॥
मन्त्रास्तु कर्मकरणाः क्रियमाणानुवादिनः ।
जपाः प्रैषाश्चेति तेषां चातुर्विध्यं प्रचक्षते ॥ २ ॥
प्रवरोक्ता मन्त्रदृश ऋषयः परिकीर्तिताः ।
तत्पुत्रपौत्रनप्तार ऋषिपुत्रा अथर्षिकाः ॥ ३ ॥

× × × ×

अस्मिन् ग्रन्थेऽस्ति चेद्दोषः संक्षिप्य रचिते मया ।
उपकारकबुद्ध्या तं क्षन्तुमर्हन्ति वैदिकाः ॥

इति नारायणयज्वकृतिर्दर्शपूर्णमासमन्त्रर्षिनिर्णयः समाप्तः ।

अथ ब्राह्मणम् । कर्मचोदना ब्राह्मणानि । ब्राह्मणशेषोऽर्थवादः । निन्दा प्रशंसा परकृतिः पुराकल्पश्चेति । तानि तत्र तत्रानुक्रमिष्यामः । एवं च चतुष्टयमिदं परिज्ञाय मन्त्रार्थज्ञाने प्रयतेत । तत्र सर्वमन्त्राणां प्रणवपूर्वकत्वात्प्रणवमेवाग्रे व्याख्यास्यामः ।

× × × ×

इति प्रथमः पटलः ।

उत्तरेण गार्हपत्यं निहितमसिदमश्वपर्शुं वाऽऽदत्ते । देवस्य त्वा० । ऋषिः प्रजापतिः । ब्राह्मणं देवस्य त्वा सवितुः प्रसव इत्यश्वपर्शुमादत्त इत्यादि । असिदस्याश्वपर्शो र्वाऽऽदानमभिधेयम् । देवस्य द्योतनादिगुणस्य सवितुरुदयवर्षादिनानुज्ञातः कर्मप्रवृत्तेर्वाऽऽदित्यस्य प्रसवेऽनुज्ञायामुदिते सवितरीत्यर्थः ।

*End:—*

आज्ञातमनाज्ञातम् । आभिमुख्येन ज्ञातम् । पूर्वमालस्यादिना कृतमनाज्ञातम् । अज्ञानेन प्रमादात्कृतमन्यथा का...दि तथाऽमतमिदमन्यथा कृतमिति पश्चादपि यदज्ञातम् । मतं च यत् । पूर्वमज्ञानादन्यथाकृतमित्येतत्सर्वं हे जातप्राज्ञ ! सन्धेहि समर्थय । यतस्त्वं यथा तथा यद्यथाकर्त्तव्यं प्रायश्चित्तं तद्वेदेत्यर्थः । यदकर्म यदकर्त्तव्यं कर्म कुर्मः । यत् कर्त्तव्यं कर्म नाकर्म न कृतवन्तः ......... .....रेचि यच्चातिरिक्तं कृतं यन्नात्यरेचि नातिरिक्तमित्यर्थः । एतत्सर्वमन्यथा कृतम् ।

134

## 313. दर्शपूर्णमासमन्त्रमालिका ।

## DARŚAPŪRṆAMĀSAMANTRAMĀLIKĀ.

This is a collection of Mantras recited by the priests at the time of every action connected with the Darśapūrṇamāsa performance. The Brāhmaṇas or the injunctions based on these Mantras are omitted here and these Mantras are used in the Prayoga prescribed in the Bodhāyanaśrautasūtra. The object of this treatise seems to be to help the priests who have to perform the Darśapurṇamāsa by refreshing their memory. All these Mantras are accented.

*Beginning*:—

श्रीगणेशाय नमः। सप्तभिर्मुखं संमृजीत । सप्तभिर्गुल्फौ । पिञ्जूलानि प्रोक्ष्योदङ्भिरस्याप उपस्पृश्य मन्त्राचमनं कुर्यात् । आपोहिष्ठामयो० चक्षसे । प्रथमं प्राश्य यो वः शिवत० मातरः । द्वि० तस्मा अरङ्ग० च नः । तृ० व्याहृतिभिस्त्रिर्मुखं संमृजीत । भूः दक्षिणतः भुव उत्तरतः सुवः अलोमकावोष्ठौ । शेषं समाप्य । ततो मार्जनम् । अध्वर्युः पत्नीं मार्जयेत् । दधिक्राव्णो अका० आयूंषि तारिषत् । आपो हिष्ठा० चक्षसे । यो वः ० मातरः तस्मा० च नः । यच्चिद्धि ते० द्यवि यत्किञ्चेदं वरुणदैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि । अचित्ती यत्तव धर्मा-युयोपिम मानस्तस्मादेनसो देव रीरिषः । कितवासो यद्रिरिपुः

× × × ×

श्रीपरमेश्वरप्रीत्यर्थं पौर्णमासेन हविषा यक्ष्ये । आमावास्येन हविषा यक्ष्ये । तन्मे ऋध्य-ताम् । तन्मे समृध्यताम् । तन्मे सम्पद्यतां कामः । तत्ते ऋध्यताम् । तत्ते समृध्यताम् । तत्ते सम्पद्यतां कामः । यजमानः । ॐ तथा । पौर्णमासं हविः । व्रीहिमयः पुरोडाशो द्रव्यमाज्यं च । पञ्च प्रयाजाः । अग्नीषोमावाज्यभागौ । अग्निर्विष्णुरग्नीषोमाविन्द्रो वैमृधश्च प्रधानदेवताः । देवा आज्यपाः । दर्शे आमावास्यं हविः । व्रीहि० आज्यं च । पञ्च० । अग्नी० अग्निर्विष्णुरिन्द्राग्नी० देवा आज्यपा इत्यादि । अग्निः स्विष्टकृत् । त्रयोऽनुयाजाः । सूक्तवाकशंयुवाकौ । अष्टौ पत्नी-संयाजाः इत्यादयोऽङ्गदेवताः । एवमात्मकेन साङ्गोपाङ्गेन कर्मणा सद्यो यक्ष्ये । श्वो यक्ष्ये । अस्मिन्कर्मणि अध्वर्युं त्वामहं वृणे । इडा देव० मदन्तु । देवा गातु० प्रयुज्यताम् । ममाग्ने व० स्वाहा । मम देवा वि० स्वाहा । मयि देवा० स्वाहा । मह्यं यजन्तु० स्वाहा । देवीः ष० स्वाहा । अग्निर्मन्युं० स्वाहा । धाता धातृणां० स्वाहा । उरु व्यचा० स्वाहा × ×

इषे त्वोर्जे त्वा । इमां प्राचीमुदीचीमिषमूर्जमभिसंस्कृतां बहुपर्णामशुष्काग्रां हरामि पशु-पामहम् । वायवस्थोपायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ।

*End*:—

अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मे राधि स्वाहा । अग्नये व्रतपतये इ० । वायो व्रतपते व्रतमचारिषं तदशकं तन्मे राधि स्वाहा । वायवे व्रतपतये इ० । आदित्य व्रतपते व्रतमचारिषं तदशकं तन्मे राधि स्वाहा । आदित्यव्रतपतय इ० । व्रतानां व्रतपते व्रतम-चारिषं तदशकं तन्मे राधि स्वाहा । व्रतानां व्रतपतय इ० । यज्ञो बभूव सप्रजज्ञे स वावृधे ।

स देवानामधिपतिर्बभूव । सोऽस्मानधिपतीन् करोतु । वयं स्याम पतयो रयीणाम् । गोमाँ अग्ने विमाँ अश्वि यज्ञो नृवत्सखा सदमिदप्रमृष्यः । इडा वाँ एषोऽसुरप्रजा वां दीर्घो रयिः पृथुबुध्नः सभावान् । ब्राह्मणांस्तर्पयत वै ।

*Colophon:—*

इति दर्शपूर्णमासबौधायनमन्त्रमालिका समाप्ता ।

---

## 135

## 314. दर्शपूर्णमासमन्त्रार्थचन्द्रिका ।

## DARŚAPŪRṆAMĀSAMANTRĀRTHACANDRIKA.

*By Vaidyanātha Pāyaguṇḍe.*

This is an exhaustive commentary on the Mantras of the Darśapūrṇamāsa, a collection of which is represented in the MS. described above under No. 134. There are three MSS. of this commentary in this collection and two of them (Acc. Nos. 10944 and 11546) contain the Darśapūrṇamāsaprayoga also intermixed with this commentary. The Mantras are taken here according to the Prayoga prescribed in the Bodhāyanaśrautasūtra. All these three MSS. differ considerably, and it appears probable that they represent three different versions of the work.

The author Vaidyanātha Pāyaguṇḍe according to the introductory verses found in the MSS., Acc. Nos. 565 and 11546 appears to have composed this work for the pleasure of his patron Badrīśa who seems to have induced him to write this treatise. It is stated here that this Badrīśa belonged to a reputed family of Śrīraṅgapaṭṭaṇa, and that his forefathers Govindarāya, Vidvadrāya, Keśavarāya and others were famous for their wealth, learning and devotion towards the deity Śrīraṅganātha.

The MS., Acc. No. 10944, on the other hand, contains a different series of introductory verses wherein it is stated that the author Vaidyanātha Pāyaguṇḍe was patronized by a chieftain known as Bāpūjī, the son of Mahādeva of the Ātreyakula who lived in the city of Indraprastha or Delhi on the banks of Jamna. This Bāpūjī is stated here as a great devotee of God Viṣṇu, noble and a patron of scholars. It is also recorded that he was a friend of Bālājī Bājīrao (Pèśve) who flourished in the middle of the 18th century and this work was composed by the author Vaidyanātha for the pleasure of his patron Bāpūjī. This Bāpūjī seems to be identical with the Bāpūjī Mahādeva Hiṅgane who is known to have worked for some time as an ambassador in Delhi for Pèśvas. It is also possible to think in this connection that the author Vaidyanātha may have written different versions of the same work for the pleasure of his two patrons belonging to Śrīraṅgapaṭṭaṇa and Indraprastha or Delhi.

In all these three MSS. no mention is made of the genealogy of the author Pāyaguṇḍe. There are a good many works on different subjects such as grammar, Śrauta, Dharmaśāstra, poetics etc. which are ascribed to Vaidyanātha Pāyaguṇḍe. It seems that there is a confusion in the identity of the author of these works because there are two writers known as Vaidyanātha Pāyaguṇḍe. One is the son of Mahādeva and Veṇī and the other is the son of Rāmabhaṭṭa and grandson of Viṭṭhala. The latter is sometimes known to have belonged to the Tatsat family instead of Pāyaguṇḍe. Aufrecht in his catalogue page 612 states both of them to have belonged to the Pāyaguṇḍe family while many printed editions of his works on poetics generally ascribe him to the Tatsat family. It is generally believed that the Vaidyanātha Pāyaguṇḍe, son of Mahādeva, was a disciple of the famous grammarian Nāgeśabhaṭṭa who flourished in the first half of the 18th century and wrote several original works and many scholarly commentaries on grammatical works.

The other Vaidyanātha, son of Ramabhaṭṭa of the Tatsat family, is also believed to have written several works on poetics. He is known to have flourished in 1683 A. D. according to a statement made by him in his work called the Udāharaṇacandrikā, a commentary on the Kāvyaprakāśa.

Our author seems to be identical with the Vaidyanātha Pāyaguṇḍe, who was the disciple of Nāgeśa and the son of Mahādeva and Veṇī since he was patronized, according to the MS. No. 10944, by Bāpūjī Mahādeva, the friend of Bālājī Bājirao Peśva whose time is fixed as the middle of the 18th century.

*Beginning* (*Acc. No. 565*):—

श्रीगणेशाय नमः । हरिः ॐ ।
आश्रये जगदाधारे हेरम्बाङ्घ्रिसरोरुहे ।
यद्रजःस्पर्शनाद्विघ्नवार्धिः शुष्यत्यसंशयम् ॥ १ ॥
श्रीरङ्गपट्टणे ह्यासन् श्रीमद्गोविन्दरायकाः ।
श्रीरङ्गध्यानतोऽवाप्तश्रीरङ्गप्रतिरूपकाः ॥ २ ॥
तद्वंशप्रभवा विद्वद्रायकेशवरायकाः ।
रमारमणपादाब्जप्राप्तभूमीन्द्रवैभवाः ॥ ३ ॥
कर्मब्रह्मोक्तहृदया विप्रदीनार्तरक्षणाः ।
वैदग्ध्यौदार्यविषये कनिष्ठाधिष्ठिता भुवि ॥ ४ ॥
वरीवर्त्ति च बद्रीशो बदरीनाथरूपधृक् ।
अवतीर्णो यदुदरात्पित्रन्यूनगुणः प्रभुः ॥ ५ ॥
वैद्यनाथः पायगुण्डे यथामति तु तन्मुदे ।
आलोक्यानेकभाष्यार्थानेकीकृत्य च यत्नतः ॥ ६ ॥
बौधायनर्षेः सर्वर्षिप्रवरमौलिनः ।
कलयामि क्रमांद्दर्शपूर्णमासानुगान्मनून ॥ ७ ॥

अथ मन्त्रव्याख्यानम् ।

आपोहिष्ठेति ऋक् । हिशब्द एवकारार्थः प्रसिद्ध्यर्थो वा । हे आपो यूयमेव मयोभुवः स्थ । सुखस्य भावयित्र्यो भवथ । स्नानपानादिहेतुत्वेन सुखोत्पादकत्वं प्रसिद्धम् । तास्तादृश्यो यूयं नोऽस्मान् ऊर्जे रसाय भवदीयरसानुभवार्थं दधातन स्थापयत ।

(*Acc. No. 11546*):—

Introductory verses in this MS. are the same as found in the above MS. Then it begins—

अथ तत्राहिताग्निरन्वाधानदिन पर्वणीत्यर्थः । प्रातरग्निहोत्रं हुत्वा श्मश्रूपपक्षकेशलोमानि वापयित्वा नखानि निकृन्तयीत । कृतस्नाननवनीताभ्यञ्जनाञ्जनोऽहतवासा यजमानः स्नातैः पत्न्यध्वर्य्वादिभिः सहैकविंशतिदर्भपिञ्जूलैः पवनं कुर्यात् ।

(*Acc. No. 10944*):—

This MS. contains a version different from that of the other two MSS.

श्रीगणेशाय नमः । श्रीशं वन्दे ।
आश्रये जगदाधारे हेरम्बाङ्घ्रिसरोरुहे ।
यद्रजःस्पर्शनाद्विघ्नवार्धिः शुष्यत्यसंशयम् ॥ १ ॥
अस्ति श्रीमदमन्दमन्दरगिरिग्रावस्थलप्रस्खलत्-
त्वङ्गत्तुङ्गतरङ्गभङ्गिसुभगब्रध्नात्मजारोधसि ।
इन्द्रप्रस्थपुर जगज्जनयुतं सत्सम्पदामास्पदं
स्वःसाम्राज्यविडम्बिनिस्तुलगुणं भूमण्डलीमण्डनम् ॥ २ ॥
तत्रोदारपवित्रचित्रचरिते सद्विश्वविश्वम्भरा-
लम्बे श्रीचरणारविन्दयुगलध्यानादवाप्तोदये ।
आत्रेयाख्यकुलाम्बुधौ समभवद्रत्नं महादेवकं
शम्भुः सोप्यपरो विना मतिनिधिर्भालीयमालोचनम् ॥ ३ ॥
बापूजीति महामणिः प्रभुवरो वंशावतंसस्तत-
स्त्वेषो (?) मेघ इवावदातहृदयो विष्णोः पदालम्बनः ।
साक्षान्माधव एव सम्प्रति पुनस्त्रातुं जगन्मण्डलं
जातो यत्र शशाम शास्त्रसुविदां दारिद्र्यदावानलः ॥ ४ ॥
क्षमोद्वहनधीरताऽधरीकृतभुजगराजः ।
पञ्चेशः पुरुषार्थान् वहति यशोदयावर्धितः ॥ ५ ॥
यो वेदान्तविचारचारुसुमतिः सन्ध्यादिसत्प्रीतिमान-
न्नादिद्रविणादिदाननिरतो दिल्यां महाभाग्यवान् ।
ज्ञाता पण्डितवैदिकादिनिकरज्ञानैकनिष्ठः सुधीः
श्रीमान् दीनपरायणः सुजनतापूर्णः सदा सात्त्विकः ॥ ६ ॥

कर्मब्रह्मोक्तहृदयः कुर्वन्निन्द्रसदःश्रियम् ।
उमारमणपादाब्जप्राप्तभूमीन्द्रवैभवः ॥ ७ ॥
बालाजीबाजिरायाणां प्रेमपात्रतमं सदा ।
विद्वान् हि सर्वनीतिज्ञो भूपतिस्नेहयुक् प्रभुः ॥ ८ ॥
वैद्यनाथः पायगुण्डे यथामति तु तन्मुदे ।
आलोच्यानेकभाष्यार्थानेकीकृत्य च यत्नतः ॥ ९ ॥
बौधायनऋषेः सर्वऋषिप्रवरमौलिनः ।
कलयामि क्रमाद्दर्शपूर्णमासानुगान्मनून् ॥ १० ॥

आहिताग्निरन्वाधानदिने प्रातरग्निहोत्रं हुत्वा श्मश्रूपपक्षकेशलोमनखानि वापयित्वा कृतस्नाननवनीताभ्यञ्जनोऽहतवासाः स्नातैः पत्न्यध्वर्य्वादिभिः सह प्रत्येकं सप्तभिः सप्तभिर्दर्भपिञ्जूलैर्मुखं नाभिं गुल्फौ च संमृज्य दर्भान् समुच्चित्य प्रोक्ष्योदङ्निरस्यति। अप उपस्पृश्य तत्पवनं० ।

× × × × ×

अथ मन्त्रव्याख्यानम्। आपोहीति। आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन। महेरणाय चक्षस इति। हि शब्द एवकारार्थः प्रसिद्ध्यर्थो वा। हे आपो यूयमेव मयोभुवः स्थ। सुखस्य भावयित्र्यो भवत। स्नानपानादिहेतुत्वेन सुखोत्पादकत्वं प्रसिद्धम्। तास्तादृश्यो यूयं नोऽस्मानूर्जे रसाय भवदीयरसानुभवार्थं दधातन स्थापयत।

*End (Acc. No. 10944):—*

पृथुबुध्नो विस्तीर्णमूलः। मन्त्रेष्वनुष्ठानेन च मूलेषु वैकल्यरहितः। स भवानविकलं यज्ञं द्रष्टुमिच्छन्त्या महत्या विद्वत्सभया युक्तः। असुः प्राणः सोऽस्यास्तीत्यसुरः। हे असुर प्राणवन्नग्ने। एष पुनः प्रार्थ्यमाने यज्ञ उक्तविशेषविशिष्टो भूयात्। ब्राह्मणांस्तर्पयत वै। हे परिचारकाः सर्वतो ब्राह्मणांस्तर्पयत वै। हे परिचारकाः सर्वतो ब्राह्मणानृत्विजोऽन्यांश्च तर्पयत वै। तर्प्येरन् भोजनादिभिः।

*Colophon :—*

इति श्रीमत्पायगुण्डोपनामकवैजनाथभट्टकृता बौधायनीयदर्शपूर्णमासमन्त्रार्थसङ्ग्रहचन्द्रिका समाप्ता।

*Post-Colophon :—*

शाके १८०२ ज्येष्ठसुदि ३ गुरौ पटवर्धनोपाह्वसीतारामेण वृश्चिकपुरे इदं पुस्तकं लिखितम् ॥

## 136

### 315. दर्शपूर्णमासाज्यविचारः ।

### DARŚAPŪRṆAMĀSĀJYAVICĀRA.

*By Rāmabhaṭṭa, son of Viśvanātha Hosiṅga.*

It is a scholarly discussion on the propriety of the practice of melting the ghee required for the Darśapūrṇamāsa by means of a red-hot iron rod in winter when it becomes hard in the middle of the performance. The author subsequently decides in favour of the practice of melting ghee with a red-hot iron rod.

*Beginning:*—

अथ दर्शपूर्णमासयोराज्यभागार्थं जुह्वादिषु चतुरादि कृत्वा गृहीतमाज्यं शरदावृतुषु घनीभूतं चेदृजुमाघारयति सन्ततमाघारयति सर्वाणीध्मकाष्ठान्यभ्यज्याघारयति सन्ततं जुहोतीत्यादिवाक्यैराघाराद्युद्देशेन विहिताः सन्तत्यादिगुणा न सम्भवन्तीति याज्ञिकैस्तप्तलोहेन तस्य द्रवीभावं सम्पाद्य प्रयाजाद्यनुष्ठीयते । तद्युक्तमयुक्तं वेति संशये युक्तमिति ब्रूमः। विशिष्टविधौ विशेषणविधिरार्थिकवत्सातत्यादिविधेर्द्रवीभावसाधनस्यापि विहितत्वात् । किञ्चार्थाद्वा कल्पनैकदेशत्वादित्येतत्सूत्रव्याख्यावसरे सन्दिग्धार्थे यथा शक्नुयात्तथा कुर्यादिति वाक्यशेषः कल्पनीय इत्युक्तं भट्टपादैस्तेनात्रापि तप्तलोहेन द्रवीभावं सम्पाद्य सन्तत्यादिहोमाः कार्या इति सिध्यति ।

*End:*—

लौकिकाग्निसन्तापितस्य पूर्वमेव निराकृतत्वादतिरिक्तं कर्मणो यच्च हीनमित्यनेनाधिक्येनापि दोषप्रतिपादनान्मन्त्रानुमन्त्रणस्रुवसङ्ख्यादिभिः संस्कृतजौहवाज्यस्याज्यस्थाल्याज्येन संसर्गेण प्रत्यवायापत्तेश्च । किञ्च नितराज्यतापिताज्यस्य वाहेन ( ? ) त्वदुक्तरीत्या निर्ऋतिभागत्वाय यत्किञ्चिदेतत् । तस्मात्सुष्ठूक्तं तप्तलोहेन द्रवीभावं सम्पाद्य प्रयाजाद्यनुष्ठेय इति दिक् ।

*Colophon.*—

इति श्रीमद्विद्वन्मण्डनानन्तदेवान्तेवासिना होसिङ्गोपनामकभट्टविश्वनाथात्मजेन भट्टरामेण कृतोऽयं ग्रन्थः ।

*Post-Colophon:*—

शके १७५४ नन्दननामसंवत्सरे भाद्रपदशुद्ध २ इन्दुवासर ते दिवसि माचेगणोपनामकबाळंभट्टात्मजमाधवभट्टेन स्वार्थं परोपकारार्थं लिखितम् ।

## 137

### 316. दर्शेष्टिप्रयोगः ।

DARS'EṢṬIPRAYOGA.

This is a manual of the Dars'eṣṭi with the Sānnāyya prayoga for those sacrificers who had already performed the Somayāga. This follows the Bodhāyana school.

*Beginning:—*

श्रीगणेशाय नमः । अथ सन्नयतो दर्शेष्टिप्रयोगो लिख्यते । पवनपावनानन्तरं यजमानो देशकालौ सङ्कीर्त्य श्रीपरमेश्वरप्रीत्यर्थमामावास्येन हविषा यक्ष्ये । त्रिरुपांशु त्रिरुच्चैः । तन्म० तत्त क्र० । ॐ तथा । आमावास्यं हविः । व्रीहिमयः पुरोडाशो द्रव्यम् । आज्यं दधि पयश्च । पञ्च प्रयाजाः । अग्नीषोमावाज्यभागौ । आग्नेयोऽष्टाकपालः पुरोडाशः । वैष्णवं ध्रौवाज्यम् ।

*End:—*

यजमानः स्वायतन उपविश्य पयस्वतीत्यादि ब्राह्मणांस्तर्पयत वै इत्यन्तं करोति । यस्य० तम् । अनेन दर्शेष्ट्याख्येन कर्मणा भगवान् यज्ञरूपी परमेश्वरः प्रीयतां न मम । तत्सद्-ब्रह्मार्पणमस्तु ।

*Colophon:—*

इति बौधायनीयसन्नयतो दर्शेष्टिप्रयोगः समाप्तः ।

*Post-Colophon:—*

शके १७६२ शार्वरीनामसंवत्सरे आश्विनशुक्लद्वितीयायां न(ना)मजोशीत्युपनाम्ना नारायणेन लिखितम् ।

*In different hand—*

इन्द्रस्य याज्या पुरोनुवाक्या । ऐन्द्रसानसिं रयिम् । प्रससाहिषे पुरुहूत शत्रून्० । इन्द्रस्य महेन्द्रपक्षे । महा इन्द्रो य ओजसा । भुवस्त्वमिन्द्र ब्रह्मणा महान्० । महेन्द्रस्य ।

---

## 138

### 317. दिशामवेष्टिप्रयोगः ।

DIS'AMAVEṢṬIPRAYOGA.

It is a manual of the Dis'āmaveṣṭi which is originally an auxiliary rite to the Rājasūya sacrifice. It is also allowed to be performed separately by those who desire to obtain valour. This belongs to the Apastamba school.

*Beginning:—*

श्रीः । अथ दिशामवेष्टिः । आग्नेयमष्टाकपालमिति पञ्च । तया ब्राह्मणो राजन्यो वैश्यो वा तेजस्कामो यजेत । यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये कृत्वाऽऽहुतिमाहुतिं हुत्वा तमभिघारयेद्यदि राजन्य ऐन्द्रं यदि वैश्यो वैश्वदेवमित्यापस्तम्बसूत्रम् । आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा । ऐन्द्रमेकादशकपालमृषभो दक्षिणा । वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा । मैत्रावरुणीमामिक्षां वशा दक्षिणा । बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा । इत्यापस्तम्बश्रुतेः ।

तत्र कालः । अमावास्यायां पौर्णमास्यां वा उदगयन आपूर्यमाणपक्षे कृत्तिकादिनक्षत्रेषु रेवत्यां वा कार्यम् । यजमानः प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीन इत्यादि । ब्रह्मवर्चसकामोऽहं दिशामवेष्ट्या यक्ष्य इति सङ्कल्प्य । विद्युत् ।

*End ·—*

हविःशेषभक्षणादि । त्रीणि समिष्टयजूंषि । इदं हविरित्यामिक्षाभक्षणम् । अगन्म ब्रह्मवर्चसं ब्रह्मवर्चसमगन्म संदशस्त इत्यादि । यज्ञो बभूव० यज्ञशंचमवर्जम् । सिद्धमिष्टिः सन्तिष्ठते । अथ दक्षिणा । हिरण्यमाग्नेय्याम् । ऋषभ ऐन्द्र्याम् । द्वादश पष्ठौह्यो गर्भिण्यो वशा मैत्रावरुणस्य शितिपृष्ठो बार्हस्पत्यामित्याश्वलायनसूत्रोक्ता । हिरण्यनियतसङ्ख्यं सुवर्णं दद्यात् । वत्सतरी गोजातौ स्त्रीबाला विसृष्टमातृस्तना । शितिपृष्ठः कृष्णपृष्ठः । ऋषभः सेचनसमर्थः । सर्वे गोजातय एव भवन्ति । पष्ठौह्यः पञ्चवर्षास्ता गर्भिणीर्दद्यात् । वशा मैत्रावरुणस्याप्रजननसमर्था इति वृत्तिकृत् ।

*Post-Colophon:—*

शके १७५६ जयनामसंवत्सरे .भाद्रपदशुक्लषष्ठ्यां सोमे ते दिवसि माचे गणोपनामकबाळम्भट्टात्मजमाधवभट्टेन स्वार्थं परोपकारार्थं लिखितं समापितम् ।

---

**139**

318. द्वादशाहक्लृप्तिः ।

DVADAŚAHAKLPTI.

*By Tālavṛntanivāsin.*

This is a manual of the Dvādaśāha and it contains rules for the guidance of the priests of the Udgātṛ group in that sacrifice. Here is given a list of Stotras to be sung on different occasions according to the Drāhyāyanaśrautasūtra. There are two MSS. of this work in this collection. The first, No. 6742 contains a short version of this Klpti while the other, No. 6979 is a larger version. The former MS. contains, besides the Dvādaśāhaklpti, Klptis for the Agniṣṭut, Punastoma, Mahānāmnī and the Saumikacāturmāsya. The description given below is taken from the larger version. The authorship is attributed to Tālavṛntanivāsin because this codex contains some other works of the same author in the beginning and at the end.

*Beginning:—*

अथ द्वादशाहस्य क्लृप्तिरुच्यते । स द्वादशाहो द्विविधः । सत्रात्मकोऽहीनात्मकश्च । सत्रात्मकोऽपि द्विप्रकारः । समूढरूपतया व्यूढरूपतया च । तथैवाहीनात्मकोऽपि समूढो व्यूढश्च । तत्र सत्रव्यूढोऽहीनव्यूढश्चाग्निना पृथिव्यौषधिभिरित्यादिना दर्शितः । सत्रव्यूढस्तल्लिङ्गदर्शनात् । आसते उपयन्ति सत्रेभ्योऽहर्भ्य इत्यादि सत्रलिङ्गम् । अहीनलिङ्गं च जायते यज्ञैर्वितेनाहीनान् सहस्राण्यादित्सतामित्याद्यहीनलिङ्गदर्शनात् । सत्रसमूढस्तावत्कल्पकारेण दर्शितः द्वादशाहस्य षोडशीमन्तावतिरात्राविल्यादिना । अहीनसमूढस्तु न्यायेन कल्पनीयः । एवं द्वादशाहप्रकारा उक्ताः । तेषां मध्येऽहीनव्यूढद्वादशाहस्य क्लृप्तिरुच्यते । तस्यैव प्रस्तुतत्वात् । तत्र प्रथममहः प्रायणीयातिरात्रः ।

*End:—*

उदितानि नक्षत्राणीति प्रोक्ते पूर्वया द्वारा उपनिष्क्रम्य सुब्रह्मण्याप्रणवैर्वाचं विसृजेरन् । इदमहरत्यग्निष्टोमम् । एवं दशममहः समाप्तम् । मानसस्तोत्रेणाग्निष्टोममतीत्य वर्तमानत्वादग्निष्टोमावभित इति वादमात्रम् । यथा गवामयनेऽतिरात्रस्योक्थ्यत्ववादः । यदुक्थ्यो वज्रकर्तोरनन्तरायेति । अथ उदयनीयातिरात्रस्य यज्ञसारथ्यादि सुब्रह्मण्यान्तं पूर्ववत् । स च प्रायणीयातिरात्रवदुदयनीयातिरात्रं कार्यम् । सदस्येव बहिष्पवमानस्तवनमिति विशेषः । तत्राहरन्तिकी सुब्रह्मण्या न कार्या । उत्तरदिवसाभावात् । उदवसानीयान्त एतस्याहः समाप्तिः ।

*Colophon:—*

समाप्तो द्वादशाहः ।

---

**140**

320. **द्वादशाहपौण्डरीकप्रयोगः ।**

DVADAŚĀHAPAUṆḌARĪKAPRAYOGA.

This is a manual of the Dvādaśāhapauṇḍarīkaprayoga according to the Apastambaśrautasūtra.

*Beginning:—*

श्रीगणेशाय नमः । पौण्डरीकप्रयोगः । माघमास्यमावास्यायां प्रातरग्निहोत्रं हुत्वा प्राणानायम्य सङ्कल्पं करोति । द्वादशाहेनाहीनभूतेन साग्निचित्येन यक्ष्ये प्रजापतये स्वर्गं लोकमवाप्नवानि । एषु लोकेषु प्रतितिष्ठति । विद्युदग्नि । सोमप्रवाकवरणं कृत्वा सोमप्रवाक द्वादशाहमृत्विग्भ्यो मे प्रब्रूहि । यज्ञेश्वरशर्मणो द्वादशाहो भविष्यतीत्यादि । कच्चिन्नाहीन इत्युक्तेऽहीनभूतो द्वादशाहः कच्चिन्नन्यस्तमार्विज्यमित्यादि पितरो भूरित्यन्तम् । एवं ब्रह्महोतृद्गातॄणां वरणम् । होतुस्तु को यज्ञ इत्युक्तेऽहीनभूतो द्वादशाहः । क ऋत्विजः । नारायणशर्मादयः । का दक्षिणा । अन्वहं द्वादशशतं दक्षिणा । मन्त्रवरणादि । नान्दीमुखं कृत्वाऽग्निं विहृत्य बृहस्पतिपुरोहिता इत्यादि प्रवर्ग्यसम्भरणान्तम् ।

× × × ×

इति समूढद्वादशाहः पौण्डरीकः समाप्तः ।

पौण्डरीकस्य द्वादशाहवत्कल्पः । महाग्निपक्ष एकाष्टकायाममावास्यायां वोपक्रमः । चैत्रमास्यमावास्यायां वा प्रातरग्निहोत्रं हुत्वा पौण्डरीकेण साग्निचित्येन महाव्रतसहितेन यक्ष्ये । सर्वामृद्धिमवाप्नवानि । परमेष्ठितां गच्छति । स्वर्गं लोकमभिजियांसमेषु लोकेषु प्रतितिष्ठति । केचित् त्रैधातवीया । विशुद्सीत्यादि । सर्वं द्वादशाहवत् । अहीनभूतः पौण्डरीक इति प्रतिवचनम् ।

*End:—*

दुन्दुभिघोषो माध्यन्दिनपवमाने वैराजस्य । अरणी शाक्वरस्य । अद्भिरवकावास्ताभि-र्वैतपेस्याधावो रैवतस्य । अद्भिर्दूर्वावास्ताभिरेतैर्बर्हिर्भ्यां च स्तोत्रोपाकरणम् । अथैतान् वत्सा-नित्यादि ताहक् तदिति विज्ञायत इत्यन्तम् । तृतीयसवनादि सर्वं ज्योतिरतिरात्रवत् । नात्रा-हीनसन्ततयः । अवभृथाद्युदवसानीयान्तं द्वादशाहवत् । अपरेद्युरनन्तरे पर्वणि सौत्रामणी मैत्रावरुणी च ।

*Colophon:—*

पौण्डरीकः समाप्तः ।

---

## 141

## 321. द्विभार्याग्निसंसर्गविधिः ।

### DVIBHĀRYĀGNISAMSARGAVIDHI.

This treatise gives directions how to mix the two sacrificial fires when one desires to marry a second wife. This work follows Trikāṇḍamaṇḍana's treatise on this subject. The MS. is much injured and moth-eaten.

*Beginning:—*

द्विभार्याग्निसंसर्गः ।

श्रीगणाधिपतये नमः ।

कामी सन्तानकामो वा यद्गच्छेत्पुनरुद्वहम् ।
उपाचरो ......... कव्यं वैवाहिकमतः परम् ॥ १ ॥

यस्य लौकिकाग्नौ द्वितीयविवाहश्चेत् स द्वितीयविवाहप्रभृति नवाहं.........तावत्र विधिवदुत्पाद्य पृथगुपासितः । तथैकादशे द्वादशे वा......... तत्रानुष्ठानसिध्यर्थमौपासना-ग्निद्वयसंसर्गं करिष्ये । द्वितीयाग्नावाज्यसंस्कारे द्वितीयामन्वारब्धायां चतुर्गृहीताज्यं गृहीत्वा ।

*End:—*

विवाहकर्ता प्रथमे विवाहे ......ष्वा जुहुयात्तदग्नौ ।
द्वितीयपाणिग्रहणादि सर्वं कुर्यात्तमिष्वा जुहुयात्तदग्नौ ॥

*Colophon:—*

त्रिकाण्डिवचनोक्तप्रकारेण द्विभार्याग्निसंसर्गः समाप्तः ।

142

## 323. नक्षत्रसत्रप्रयोगः।

## NAKṢATRASATRAPRAYOGA.

This is a manual of the Nakṣatrasatra where special Iṣṭis for all the 27 Nakṣatras are prescribed. This follows the Bodhāyanaśrautasūtra. At the end, it contains some Iṣṭis other than the Nakṣatreṣṭis. The following Iṣṭis are found here:—Kṛttikeṣṭi, Rohiṇīṣṭi, Mṛgaśirṣeṣṭi, Ārdreṣṭi, Punarvasviṣṭi, Tiṣyeṣṭi, Āśleṣeṣṭi, Magheṣṭi, Pūrvāphālguniṣṭi, Uttarāphālguniṣṭi, Hasteṣṭi, Citreṣṭi, Svātīṣṭi, Viśākheṣṭi, Paurṇamasīṣṭi, Anūrādheṣṭi, Jyeṣṭheṣṭi, Mūleṣṭi, Pūrvāṣāḍheṣṭi, Uttarāṣāḍheṣṭi, Abhijidiṣṭi, Śravaṇeṣṭi, Śraviṣṭheṣṭi, Śatabhiṣagiṣṭi, Pūrvaproṣṭhapadeṣṭi, Uttaraproṣṭhapadeṣṭi, Revatīṣṭi, Aśvayujeṣṭi, Apabharaṇīṣṭi, Amāvāsyeṣṭi, Candramasīṣṭi, Ahorātreṣṭi, Uṣaseṣṭi, Nakṣatradevateṣṭi, Sūryeṣṭi, Ādityeṣṭi, Vaiṣṇaviyeṣṭi. Here ends the Nakṣatrasatra. Then follow descriptions of some more rites which are considered to be auxiliary to the Nakṣatrasatra. Then some discussions are raised regarding the performance of the Nakṣatrasatra and answered.

*Beginning:—*

श्रीगणेशाय नमः। श्रीशाकम्भर्यै नमः।

प्रणम्य हेरम्बमुमेशमम्बां वाचं पदाब्जं गुरुकेशवानाम्।
विभाव्य सूत्रत्रयमादरेण नक्षत्रसत्रस्य विधिं तनोमि ॥ १ ॥
पापक्षयेणोडुगणाग्न्य(न)कामो यजेत मृत्युञ्जयकामनो वा।
समग्रसत्रेण यजेत वायुष्प्रवृद्धिकामो जननर्क्षकेष्ट्या ॥ २ ॥
त्रिरावृत्या यजेत्तस्मिन्नक्षत्रे मासि मासि च।
तस्यास्तच्चक्षुषोर्देवौ जीववन्तौ समेतरा ॥ ३ ॥
प्रायश्चित्तप्रसङ्गे तत्सूत्रबौधायनोऽब्रवीत्।
अपमृत्योश्च पापस्य नाशार्थं सङ्गतिस्त्वियम् ॥ ४ ॥
वैशाख्याः पौर्णमास्याः प्राक् भरणीभिर्युता ह्यमा।
तस्यामारम्भणं कार्यमपि वा भरणीयुता ॥ ५ ॥

× × × × ×

आदावग्निरनुमतिरन्ते सञ्चरदैवते।
प्रतीष्टि निर्वपेदेवं मध्ये नक्षत्रदेवताम् ॥ २७ ॥
श्रीमत्यौ योजयेद्धाय्ये पुष्टिमन्तौ च हव्यवत्।
संयाज्ये स्विष्टवत्यौ च प्रतितन्त्रमयं विधिः ॥ २८ ॥
एवं संक्षेपतोक्त्वाऽथ प्रयोगोऽतः प्रदर्श्यते ॥ २९ ॥

अथ प्रयोगः।

यस्यां कस्याममावास्यायां पौर्णमास्यां वा भरणीयुक्तायां कृत्तिकायुक्तायां वा आरम्भः। आरम्भात्पूर्वदिने नान्दीश्राद्धं रात्रावुदकशान्तिं प्रतिसरबन्धं च कुर्यात्। प्रातः पत्नीसहितः स्नानादिपञ्चकं कुर्यात्।

× × × × ×

अपमृत्युजयकामो वा आयुष्कामो वा पापनिर्णोदनपूर्वकं ज्योतिष्कामो वा ब्राह्मणोक्ता-न्नादादिफलकामो वा श्रीपरमेश्वरप्रीत्यर्थं ज्योतिषामयनसंज्ञकनक्षत्रसत्रेण यक्ष्ये । त्रिरुपांशु त्रिरुच्चैः ।

× × × × ×

अन्वारम्भणीयां कृत्वा श्वोभूते प्रातरग्निहोत्रं हुत्वा याः पुरस्तादित्यादि॰ श्रीपरमेश्वर-प्रीत्यर्थं कृत्तिकानक्षत्रेष्ट्या यक्ष्ये ।

*End.*—

विष्णुरिदं इ॰ । विष्णोरहमु॰ इत्यादि ब्राह्मणतर्पणान्ता इष्टिः सन्तिष्ठते । सत्रसमाप्त्य-नन्तरं पूर्णफलावाप्त्यर्थमग्निष्टोमेन यजेत । तदसम्भव ऐन्द्राग्नेन निरूढपशुना यजेत । तद-सम्भव इष्ट्या यजेत । इष्टिस्तु सवनेष्टिरिति बोधायनः । वश्वानरीति कार्ये शालीकी-कात्यायनौ । याः पुरस्तादित्यादि । नक्षत्रसत्रसम्पूर्णतासिद्ध्यै सवनेष्ट्या यक्ष्ये । अग्निरिन्द्रो विश्वेदेवा इति प्र॰ ।

× × × × ×

ततो ब्राह्मणतर्पणम् ।

दशौदना भवेदिष्टिः पशुबन्धः शतौदनः ।
आधाने त्रिंशतं वैश्वदेवादौ च शतं शतम् ॥
सोमे सहस्रसङ्ख्याकमुक्तं ब्राह्मणतर्पणम् ।

शतौदनः ।

तदशक्तौ त्रिभागोनं त्रिभागं वा प्रकल्पयेत् ।

इति ब्राह्मणसन्तर्पणविधिः ।

अथ संशयविचारः क्रियते । तत्रादौ संशयः । किं नक्षत्रह्रासवृद्धी विचार्ये वा उत उत्तरोत्तरदिन उत्तरोत्तरेष्टिः कार्येति । तत्र नक्षत्रस्य देवतात्वादपभरणीयुक्तपर्वण्यारम्भ-श्रवणान्नक्षत्र एवेष्टिः कार्येति । तत्र सम्पूर्णं नक्षत्र उत यागकालपर्याप्त उत उदयादौ त्रिमुहूर्तमात्रयोगो नक्षत्रं ग्राह्यम् । सामान्यनिर्णयात् विशेषाश्रवणाच्च । नैतत् । ‘ यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः । ’ इत्युक्तत्वाद्यागकालनिर्णये × × × × इत्यादि मन्त्रलिङ्गादपि कृत्तिकादीनां नक्षत्राणामेव देवतात्वम् । अग्न्यादीनां तत्तन्नक्षत्र-देवतात्वे सत्यप्यत्र नक्षत्रसत्रे विशेषणत्वमेव वक्तुमुचितम् ।

*Colophon.*—

इति संशयनिर्णयः समाप्तः ।
इति बोधायनोक्तनक्षत्रसत्रः समाप्तः ।

## 143

### 324. नक्षत्रेष्टिपद्धतिः ।

### NAKṢATREṢṬIPADDHATI.

*By Mahādevayajvan.*

This is another manual of the Nakṣatrasatra where 27 Nakṣatreṣṭis are required to be performed. This work is intended for the followers of the Hiraṇyakeśiyaśrautasūtra. The author Mahādevayajvan says

that he prepared this manual for the Hiraṇyakeśīyas according to the Bodhāyana Śrautasūtra, because the Satyāṣāḍhaśrauta does not contain this Prayoga. This manual may be considered to belong to the Hiraṇyakeśīya school since the general rules governing the performance of this Iṣṭi are the same as laid down in the Hiraṇyakeśīyaśrautasūtra. The author Mahādeva was a native of Vijayanagara and seems to be identical with the Mahādeva–the reputed author of the commentary on the Satyāṣāḍhaśrautasūtra because he refers to his commentary, Vaijayantī on the Satyāṣāḍhaśrautasūtra for a clear understanding of the performance of this Iṣṭi. At the end of the work, there is the Hautraprayoga of the Nakṣatreṣṭi, but it is incomplete.

*Beginning.—*

श्रीगणेशाय: नमः ।

नक्षत्रेष्टीष्टयो नेव व्याख्याताः पृथगाशिषः ।
सत्याषाढेन यत्स्मार्त्ताः स्पष्टब्राह्मणकल्पकाः ॥ १ ॥
आयुष्कामस्त्रिवारं वा स्वे नक्षत्रे यजेदिति ।
बोधायनोऽब्रवीत्तत्राप्येकस्यामेव कामना ॥ २ ॥
समुदायात्फलं त्वेकमप्युक्तममुनैव तु ।
तत्र प्रयोगः क्रियते महादेवेन यज्वना ॥ ३ ॥
सत्याषाढमतालम्बी तदुक्तपरिभाषया ।
काम्येष्टीनां विशेषेण चोदना चाहितः (?) स्फुटा ॥ ४ ॥
यतः सूत्रकृताऽप्युक्तमनुक्तमन्यतोऽपि हि ।
व्याख्यास्याम इह ग्राह्यकर्तृबाहुल्यवादिना ॥ ५ ॥

तत्र काम्येष्टिप्रकरणे बौधायनीयं सूत्रम् ।

अथ नक्षत्रेष्टीर्व्याख्यास्यामोऽग्निर्वाऽकामयतान्नादो वादेनाहं स्यामिति ता ब्राह्मण-व्याख्याताः । सा या वैशाख्याः पौर्णमास्याः पुरस्तादमावास्या भवति सा सकृत्संवत्सरस्या-पभरणीभिः सम्पद्यते । तस्यामारभेतेति ।

× × × ×

Leaf 8 a. अथ प्रयोगक्रमः । भरणीपूर्वेद्युर्नान्दीश्राद्धमुदकशान्तिप्रतिसरबन्धं भरण्यां प्रातरग्निहोत्रं हुत्वा दम्पती अलङ्कृतौ शुक्लवस्त्रोपवीतिनावाचान्तौ दर्भेष्वासीनौ दर्भान्धारय-माणौ यतासू विघ्नेश्वरादिकेष्टदेवतापूजापूर्वकं देशकालादि स्मृत्वा नक्षत्रसत्रेण ज्योतिषा-मयनेन यक्ष्ये । पापं निर्णुद्य ज्योतिष्यप्राप्याय पुनर्मृत्युञ्जयानीति यज्ञनारायणप्रीतिद्वारेत्युभौ सङ्कल्प्य ऋत्विजो वृणीते ।

*End:—*

चतुस्त्रिंशेहि श्वोभूते वैष्णवेष्ट्या यक्ष्ये । यज्ञे प्रतिष्ठां गमेयमिति । स० पौर्णमा० वैष्णवश्चरुराग्नेयविकारः । विष्णवे जुष्टं० । विष्णो ह० । क्रमेण प्रो० । मन्त्रेणाभि० । विष्णवे नु० । विष्णुं यज । इदं विष्णुरित्यनुवाक्या प्र तद्विष्णुरिति याज्या । विष्णोरहं० । नाद्विष्णवे स्वाहेति त्रय उपहोमाः । विष्णुरिदमकृतेति । सर्वासामिष्टीनां संस्थाजपान्तं समानम् । इष्टिः सन्तिष्ठते । ३७ ॥ इत्येवमौपवसथ्येन पञ्चत्रिंशद्दिनानि भवन्ति । आसां समाप्तावनन्तरदिने

ऐन्द्राग्नेन निरूढपशुबन्धेन नक्षत्रेष्ट्यङ्गभूतेनेष्ट्वा बौधायनेनोक्तपथिकृद्वैश्वानरेष्टी दर्शपूर्णमासौ यजेतेति । तत्रेष्टमाचार्यस्येत्युक्तमेव । काले नित्येष्टिः कर्त्तव्येत्येव सिद्धान्तः । सा सति सम्भवे पृथगसति सम्भवे नक्षत्रेष्ट्या समानतन्त्रा । पूर्वं नित्यहवींषि । अनन्तरं नक्षत्रहवींषीति तन्त्रेऽपि क्रमः । केनापि कारणेनातिपत्तौ बौधायनोक्तं ग्राह्यम् । ऐन्द्राग्नेन पर्वण्येव यजेतेत्याचार्यमतम् । अनन्तरमेवेत्यन्येषां केषांचित् । पश्वसम्भवे त्विष्टिं वैश्वानरीमिति स्मृतिवचनात् यथाकथञ्चिद्वैश्वानरीष्टिरित्युपपादनीयम् ।

सत्याषाढीयसूत्रस्थपरिभाषास्तथा विधीन् ।
सामान्यन्यायशास्त्रं च दृष्ट्वा सूत्रान्तराणि च ॥ १ ॥

रचितोऽतिप्रयत्नेन महादेवन यज्वना ॥
विष्णौ प्रतिष्ठितो हारो नक्षत्रेष्टिप्रयाजयुक् ।
(स) दर्शनीयगुणः सभ्ये रक्षणीयस्तमोऽन्तकृत् ॥ २ ॥
नानासूत्रप्रयोगेषु वैपरीत्यं क्वचित्क्वचित् ।
दृष्ट्वा भ्रमो न कर्त्तव्यः स्वाचार्यस्य मताद्बुधैः ॥ ३ ॥
गम्भीरपरिभाषाभिर्ज्ञापकैश्च प्रकीर्णकैः ।
दृष्टीकृतार्थज्ञातं हि प्रयोगो रचितो मया ॥ ४ ॥
याज्ञिकाः स्वेच्छया वापि मीमांसानादरेण यत् ।
रचयन्ति परं गर्वात्ते किं वाच्यास्तु मद्विधैः ॥ ५ ॥
यज्ञेषु सूत्रान्तरभाष्यकारग्रन्थेषु नानामतिविभ्रमः स्यात् ।
नान्यो भवत्यप्यसहस्ररश्मीन्विना क्रियामार्गविकासहेतुः ॥ ६ ॥
देशान्तरात्समानीय सूत्रव्याख्या अनेकशः ।
प्रतिष्ठितः श्रौतमार्गः सत्याषाढाभिसम्मतः ॥ ७ ॥
सन्तुष्टये तस्य हरिहरदीक्षितयज्वना ।
निर्वैरग्रामवासस्य वासिष्ठान्वयशालिनः ॥ ८ ॥
कृतो मयाऽल्पविस्तारो ग्रन्थः सन्दिह्यतेऽत्र यत् ।
प्रयोगवैजयन्त्याख्यव्याख्यानात्तन्निवार्यताम् ॥ ९ ॥

*Colophon.*—

इति श्रीविजयनगरस्थेन महादेवयज्वना कृता नक्षत्रेष्टिपद्धतिः समाप्ता ॥

*Then begins the Hautra.*—

अथ नक्षत्रेष्टिप्रयोगः । तत्रान्वारम्भणीया । तस्याः प्रयोगः । नमः प्रवक्त्र इत्यादि । पञ्चदश सामिधेन्यः । आवाहनकालेऽग्निमग्न आवह सोममावह ।

*It ends:*—

अथ पुनर्वसुनक्षत्रेष्टिः । नमः प्रवक्त्र इत्यादि । सप्तदश सामिधेन्यः । आवाहनकाल आग्नेयान्तं पूर्ववत् । अदितिपुनर्वसुमावह । अनुमति० देवाँ आज्यपाँ इत्यादि । पञ्चमे प्रयाजे ये ३ यजामहे स्वाहाऽग्निं स्वाहा सोमं स्वाहाऽदितिपुनर्वसुं स्वाहा देवान् । श्रीकृष्णार्पणमस्तु ।

## 144

### 328. नेष्टृप्रयोगः ।

### NEṢṬṚPRAYOGA.

This is a manual for the guidance of the Neṣṭṛ priest, the assistant of the Adhvaryu in the performance of the Agniṣṭoma sacrifice.

*Beginning*:—

नेष्टप्रयोगस्य प्रातःसवनमाध्यन्दिनतृतीयसवनानां याज्या उच्यन्ते । आज्यं तानूनप्त्रं करिष्यन्तोऽभिमृशन्ति । अनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशास्तिपाः । अनभिशस्त्यञ्जसा सत्यमुपगेषं स्विते माधाः । स्पृष्टोदकं (व) राजानमाप्याययन्ति । अंशुरंशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविद आ तुभ्यमिन्द्र प्यायतामा त्वमिन्द्राय प्यायस्वाप्याययास्मान् सखीन् सन्या मेधया स्वस्ति ते देव सोम सुत्यामुदृचमशीय । स्पृष्टोदकन्निह्नुवन्ते (व) । प्रस्तरे पाणी निधाय उत्तानां दक्षिणां सव्यां नीचम् ।

*End*:—

अथ तृतीयसवनम् । उपस्थानं प्रातःसवनवत् । ये + हे अग्ने वनः सुहव आहि गन्तन निबषसद्तनारनिष्ठन अथामन्दस्व जुजुषाणोऽन्धसस्त्वष्टुर्देवेभिर्जनिभिः सुमद्गणावौ सोमस्याग्ने वीही वौ । आग्नीध्रं पात्नीवतस्य यजति । ये + हे एभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवोहि श्वाः । पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमावह मादयस्वावौ । सो + ही वौ यज्ञपुच्छं होतृवत् ।

---

## 145

### 330. पक्षहोमनिर्णयः ।

### PAKṢAHOMANIRṆAYA.

*By Gaṇeśakaviśvara.*

Here is an elaborate discussion on the method of the Pakṣahoma where daily oblations of the Agnihotrahoma are offered simultaneously at the end of a Pakṣa or fortnight. The author discriminates here between the principal and the auxiliary parts of the Agnihotra, and quotes profusely from the several authoritative Śrauta works. The object of the work seems to be to condemn the method of the Pakṣahoma followed by some persons who contend that the whole of the Agnihotrahoma should be repeated during the Pakṣahoma. The author establishes here that the principal part of the Agnihotra alone should be repeated in the performance of the Pakṣahoma leaving aside the auxiliary part.

*Beginning*:—

अथाग्निहोत्रहोमेऽङ्गप्रधाननिर्णयः । तत्राग्निहोत्रं जुहुयात्स्वर्गकाम इति वाक्येनाग्निहोत्रस्य कर्मणः फलसम्बन्धेन प्राधान्यमन्येषां फलवत्सन्निधावफलं तदङ्गमिति न्यायेनाङ्गत्वमिति सिद्धेऽग्नित्रयसाध्यानां सर्वेषामपि होमानामग्निहोत्रहोमत्वेन प्राधान्यमुताहवनीयसाध्यानामेव तत्संज्ञत्वेन प्राधान्यमापराग्निसाध्यानां होमानामङ्गत्वमिति सन्दिह्यते । न चात्रोभय-

थाप्यनुष्ठाने विशेषाभावात्काकदन्तपरीक्षावद्व्यथैवायं निर्णय इति वाच्यम् । सत्यम् । यद्यपि प्रातिस्विकानुष्ठाने नास्ति विशेषस्तथाप्यन्वहमनुष्ठानासम्भवे वाचनिकपक्षहोमाद्यनुष्ठाने क्रियमाणे प्रमादादिना होमानामननुष्ठाने जातेऽस्त्येव विशेषः । तथाहि । यदि सर्वाग्निसाध्यानामपि होमानामग्निहोत्रशब्दवाच्यत्वेन प्राधान्यं तदा पक्षहोमादौ सर्वेऽप्यावर्त्तनीयाः ।

*End:*—

एवं च स्वकीयकात्यायनसूत्रतत्प्रामाणिकान्युपाध्यायादिभाष्याण्यनेकशाखान्तराणि सूत्राण्यन्ततः प्रामाणिकानि च तद्भाष्याणि सर्वे मूलभूताः स्पष्टतराश्च श्रुतयस्तन्मूलभूतास्त्रिकाण्डमण्डनादिग्रन्थास्तथा स्मृत्यर्थसारमदनपारिजातादिनिबन्धान् सर्वमूलकानन्तदेवस्वाम्यादिकृतप्रयोगान् सर्वाश्रयं मीमांसातन्त्रं मीमांसाकरं तन्त्रं सर्वानुसार्येवाकाशीरामेश्वरमाश्वलायनमापस्तम्बभारद्वाजबौधायनहिरण्यकेश्यादिसर्वधुरीणयाज्ञिकानामनुष्ठानं चानादृत्य कस्यचिच्छुष्कवैदिकपारिभाषिकयाज्ञिकनिर्मितरत्नगुम्फादिपद्धत्यनुसारेण यत्कातीयानां पक्षहोमादावाहवनीयाधिकरणकप्रधानाग्निहोत्रहोमवदापराग्निकहोमानामप्यावृत्याऽनुष्ठानं तत्तादृशानामेव वैदिकयाज्ञिकानामुचितम् । नैवाकरग्रन्थावगाहनसमर्थानां पण्डितधुरीणानाम् । पूर्वोक्तानामपि तन्नैव हि प्रतिष्ठाकरम् । न वाग्निहोत्रजन्यं साम्प्रदायिकं फलं जनयति । किन्तु प्रमादादिना क्षारकूपजलपानवद्बहुकालमनुष्ठितानुष्ठाननिर्वाहमात्रं फलं जनयतीति सवेदमीमांसापरिपुष्टमतयः शिष्टवरिष्ठाः परिशीलयन्त्विति दिक् ।

*Colophon.*—

इति श्रीमत्कवीश्वरोपनामकगणेशेन कृतः पक्षहोमनिर्णयः ।

---

## 146

## 331. परिशिष्टकारिका ।

### PARIŚIṢṬAKĀRIKĀ.

Here is a collection of 58 verses taken from a Pariśiṣṭa—probably one of the Pariśiṣṭas of the Kātyāyanaśrautasūtra, and it deals with the Agnihotrahoma, Punarādhāna and Pravāsavidhi. It is incomplete and incorrect.

*Beginning :*—

ॐ परिशिष्टादुद्धृतानि श्लोकानि लिख्यन्ते ।
सायंहोमेषु यद्द्रव्यं प्रातर्होमेषु तद्भवेत् ।
भिन्नद्रव्यं हुतं यस्तु अहुतं तस्य तद्भवेत् ॥ १ ॥
उदितेऽनुदिते चैव समयाध्युषिते तथा ।
क्षुधाकाले तथाप्येके पक्षहोमं तु कारयेत् ॥ २ ॥
वाराणां(?)तु मुनिभिः पक्षहोमश्रुतः स्मृतः ।
यथाकथं हि वचनं श्रुत्युक्तं हि समाचरेत् ॥ ३ ॥
चतुर्दश गृहीतं तु सकृदुन्नयने हविः ।
एका समित्सकृद्धोमः सोऽर्द्धमासाय कल्पते ॥ ४ ॥

चतुर्दशगुणं कृत्वा स्रुचापात्रेण पूरयेत् ।
एवं हि गार्हपत्ये च दक्षिणाग्नौ प्रजुह्वति ॥ ५ ।
सर्वं हुत्वाऽऽहुतिं सायं व्युष्टायामपरेऽहनि ।
एतेनैव विधानेन जुहुयात्प्रातराहुतिम् ॥ ६ ॥
ऋषिभिश्च पुरा दृष्टमापत्कालेषु सर्वदा ।
अरण्योश्च समारोप्य श्रुतिदृष्टेन कर्मणा ॥ ७ ॥

*End:—*

एककालमृतौ स्यातां दम्पती कालपर्ययात् ।
शालाग्निना दहेत्पत्नीं वैतानेन प[ति] दहेत् ॥ ५४ ॥
कुशपञ्चाशको ब्रह्मा तदर्द्धं विष्टरं स्मृतम् ।
तदर्द्धमासने प्रोक्तं तदर्द्धमर्द्धं (?) विन्यसेत् ॥ ५५ ॥
दशभ्योदकौ दत्त्वा चतुर्भ्योऽष्टौ च पञ्चकान् ।
द्विकेन पूरयेत् षड्भ्यः षड्भ्यो द्विकमिति स्थितिः ॥ ५६ ॥
चात्वालादुत्तरतः कुर्याच्छामित्रस्य रथान्तरम् ।
चात्वालात्पश्चिमतः कुर्यादुत्करस्य रथान्तरम् ॥ ५७ ॥
शामित्रात्पश्चिमतः कुर्यात् हवध्यस्य रथान्तरम् ।
उत्करादुत्तरतः कुर्यात् हवध्यस्य रथान्तरम् ॥ ५८ ॥

---

## 147

## 332. पर्यायशस्त्राणि ।

### PARYĀYAŚASTRĀṆI.

A collection of hymns called Paryāyaśastras which are to be recited by the Hotṛ priest in the sacrifices.

*Beginning:—*

अथ पर्यायशस्त्राणि । होतुः शस्त्रम् । हिं भूर्भुवः स्वरोम् । शों सा पों पाषन्तमापोऽन्धस इन्द्रमभिप्रगायत । विश्वासाहंशतक्रतुममंहिष्मंचषणीनों त्रिः । पुरुहूतं पुरुष्टुतं पुरुहूतं पुरुष्टुतम् । गाथान्यासनश्रुतमिन्द्र इति ब्रवीत । नोमिन्द्र इन्नो महानामिन्द्र इभो महानाम् ।

*End:—*

धियो हिन्वाना उशि जो मनीषिणे मभिस्वरा निषदागा अवस्यवः । इन्द्रे हिन्वाना द्रविणा न्याशतों शोमिन्द्र श्रेष्ठानि द्रविणानि धेहि । चित्तिं दक्षस्य सुभगत्वमस्मों पोषं रयिणामरिष्टिं तननाम् । स्वाद्मानवाचः सुदिनत्वमह्नों त्रिः । ये हे तिष्ठा हरिरथ आयुज्यमाना याहि वायुं नियुतोनो अच्छ । पिबास्यन्धो अभिसृष्टो अस्मे । इन्द्र स्वाहा ररिमाते मदायावो-याज्या ।

---

**148**

## 334. पर्वनिर्णयः ।

## PARVANIRṆAYA.

*By Rāmabhaṭṭa.*

The author Rāmabhaṭṭa decides in this small treatise the exact time for the performance of the Darśapūrṇamāsa sacrifice, other Iṣṭis, and animal sacrifices which are to be performed on the analogy of the Darśapūrṇamāsa. In this connection he quotes extensively from the earlier works belonging to the different schools of the Śrauta literature.

*Beginning:—*

श्रीगणेशाय नमः । अथेष्टिविषयः पर्वनिर्णयः । तत्र सन्धौ यजेतेति श्रुत्या सन्धिकालमात्रस्य यागाङ्गत्वं यद्यपि प्रतीयते तथापि सन्धिमभितो यजेतेति श्रुत्यन्तरवशात् सन्धिपार्श्वद्वयवर्तिपर्वप्रतिपत्समुदाय एव तत्कालः । तेन सा लक्षणया कृत्स्नप्रयोगकालविधायिकैव । अत एव बोधायनः ।

सूक्ष्मत्वात्सन्धिकालस्य सन्धेर्विषय उच्यते ।
सामीप्यं विषयं प्राहुः पूर्वेणाह्ना परेण च ॥ इति ॥

एवं च पौर्णमास्यां पौर्णमास्या यजेतेत्यादिश्रुतिरपि पौर्णमासीशब्दस्य सन्धिवाचित्वे पूर्वोक्तरीत्या तत्पार्श्वद्वयवर्तितिथिद्वयसमुदायलक्षणया कृत्स्नप्रयोगकालविधायिकैव ।

*End:—*

तदुक्तं कात्यायनेन ।

आवर्त्तनात्प्राक् यदि पर्वसन्धिः कृत्वा तु तस्मिन् प्रकृतिं विकृत्याः ।
तदैव यागः परतो यदि स्यात्तस्मिन्विकृत्याः प्रकृतेः श्व एव ॥ इति ॥

आग्रयणे तु विशेषः श्रुतावुक्तः यस्मिन्कालेऽमावास्या सम्पद्येत तयेष्ट्वाऽथैतया यजेत । यदि पौर्णमासी स्यात्तयेष्ट्वाऽथ पूर्णमासेन यजेतेति । अपूर्वे सोमेऽपि मीमांसकमते तिथेरेवाङ्गत्वेन विधानात्तस्याश्चावर्त्तनतत्पूर्वसन्ध्योः पूर्वेद्युर्भूयः प्रयोगैकदेशव्याप्तिलाभात्तस्यापि पूर्वेद्युरेवानुष्ठानम् । याज्ञिकमते तु परद्युः । तथा च त्रिकाण्डमण्डनः—

खण्डे पर्वणि सोमश्चेत्प्रतिपन्मिश्रपर्वणि ।
सोमसुत्या प्रयोक्तव्येत्याह कौषीतकीश्रुतिः ॥ इति ।

इति रामभट्टकृतः पर्वनिर्णयः ।

कारिकाभाष्ये । सद्यस्कालपक्षे तु यस्मिन्दिनेऽन्वाधानं तस्मिन्नेव दिन इष्टिः । सद्यस्कालपक्षे तिथिं प्रतिपादयति ।

सद्यस्कालो भवेद्यद्वा पौर्णमासस्तु पार्वणः । इति ।

× × × ×

शाङ्खायने:—

मसूरान् लवणान् क्षारान् चणकान् कोरदूषितान् ।
माषान्मधु परान्नं च वर्जयेत्पर्वणि द्विजः ॥ इति ॥ तत्रैव ।

*Colophon:—*

इति पर्वनिर्णयः समाप्तः ।

*Post-Colophon:—*

संवत् १८११ शके १६७६ मासाब्दे इन्द्रप्रस्थे तारणाब्दे उत्तरायणे ग्रीष्मर्तौ ज्येष्ठशुक्लाष्टम्यां वारो सौम्यस्तथैव च । इदं पुस्तकं उग्रजकरोपनामकरामसूनुना लक्ष्मणेन लिखितम् । स्वार्थं परोपकारार्थं च ।

---

## 149

## 336. पवित्रेष्टिप्रयोगः ।

## PAVITREṢṬIPRAYOGA.

This is a manual of the Pavitreṣṭi which is calculated to purify persons from their sins. This follows the Āpastambaśrautasūtra.

*Beginning:—*

हरिः ॐ । मृगारेष्टिवत्पवित्रेष्टिः । तत्र विशेषः । अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा प्राणानायम्य सङ्कल्पः । मम सम्प्राप्तसमस्तपापक्षयार्थं पवित्रेष्ट्या यक्ष्ये । विद्युदसि । अग्न्यन्वाधानादि । अद्य यज्ञाय । इमामूर्जं पञ्चदशीम् । पेष्टं हविः । पौर्णमासं तन्त्रम् । सप्तदश सामिधेन्यः । बर्हिरादेश्य व्रतप्रवेशः । अलङ्कृत्य । परिस्तरणं देवा देवेषु कर्मणे वामित्यादि । पात्रप्रयोगकाले चतुश्चत्वारिंशत्कपालानि स्फ्यद्वंद्वमन्वाहार्यस्थालीं च । इतराणि प्रकृतिवत् ।

*End:—*

यद्देवा देवहेडनमित्यनुवाकेनाच्छिद्रपाठेन विंशतिऋचा स्रुवेण प्रत्यृचं गार्हपत्ये जुहोति । गणहोम उक्ता देवता । यज्ञो बभूव यज्ञशाश्रमवर्जम् । ब्राह्मणतर्पणान्तम् । इष्टिः समाप्यते ।

एतामिष्टिं कुर्वन् सर्वपापैः प्रमुच्यते ।
ऐन्द्रेन मृगारेण कदाचिन्मित्रविन्दया ॥
पवित्रेष्ट्या विशुध्यन्ति सर्वघोराः प्रतिग्रहाः ।
तदेषा हि यज्ञगाथा गीयते ।
वैश्वानरीं व्रातपतिं पवित्रेष्टिं तथैव च ।
ऋतावृतौ प्रयुञ्जानः पुनाति दशपूरुषम् ॥

इति । हरिः ॐ ।

---

## 150

## 337. पवित्रेष्टिप्रयोगः ।

## PAVITREṢṬIPRAYOGA.

*By Anantadeva.*

This is another manual of the Pavitreṣṭiprayoga according to the Bodhāyana school. Here the Hautra portion of the Iṣṭi is intermixed with the Prayoga.

*Beginning:—*

श्रीगणेशाय नमः। अथ पवित्रेष्टिः । यः संवत्सरमतिप्रवसति शुद्धिकामो वा पवित्रेष्ट्या यजेत् । तथा च बौधायनः । यथा एतत्सोऽपरिमितं प्रवसति न संवत्सरमतिप्रवसतीत्येवेदमुक्तं भवति स उ त्वेदतिप्रवसेत्पवित्रेष्ट्या यजेत । एतयैव यजेताभिशस्तोऽभिशस्यमानो वैतयैव यजेतर्तुव्यतिक्रमेदाख्यतिक्रमेऽयोनौ वा रेतः सिक्त्वा तथैव यजेत संवत्सरमर्धपादमेकविंशतिरात्रं वा तिर्यग्योनिगतान् ज्ञातीन् जात्यन्तरे वर्तमानान् दुष्कृतैरुपरुद्धान् दश पूर्वान् दशापरान् पुनात्यात्मानं चैकविंशं पङ्क्तिं च पुनाति न च पुनरावर्तत इति गोपालः। वत्सरातिप्रवासे तु पवित्रेष्टिस्तयोर्भवेदिति । आश्वलायनीयाश्च सैषा संवत्सरमतिप्रवसतः शुद्धिकामो वेति । अत्र प्रवसत इति पुंस्त्वमुपलक्षणम् । पत्न्यामपि प्रवसन्त्यामिष्टत्वादिति तद्व्याख्यातारः। तस्याः कालः । उदगयन आपूर्यमाणपक्षे देवनक्षत्राणि समुदितानि । प्रवसतः प्रवासानन्तरं पर्वणोर्वा ।

× × × ×

हविरासादनान्तं समानम् । ततो होता । शोचिष्केशस्तमीमहोमपामिदं न्ययनं समुद्रस्य निवेशनम् । अन्यं तेऽस्मत्तपन्तु हेतयः पावकोऽस्मभ्यं शिवो भवों ३ नमस्ते हरसे शोचिषे नमस्तेऽस्त्वर्चिषे । अन्यं ते० भवों० ३ समिद्धो० । आवाहने । अग्निं पावकवन्तमावह । सोमं पावकवन्तमावह ।

*End:—*

ततः समानं कर्मापत्नीसंयाजेभ्यः । तत्र पुरस्ताद्गृहपतेर्यद्देवा देवहेडनमित्यच्छिद्रानुवाकेन प्रत्यृचं स्रुवाहुतीर्जुहोति । विष्णुक्रमोपसर्पणेऽगन्म शुद्धिं शुद्धिमगन्म । पुनरालम्भवर्जम् । ब्राह्मणतर्पणान्ता सन्तिष्ठत इष्टिः ।

अवादीत्थमनन्तेन शिष्टेष्टजनतुष्टये ।
पवित्रेष्टिप्रयोगोऽयं तेन तुष्यतु यज्ञभुक् ॥

*Colophon:—*

इति पवित्रेष्टिः समाप्ता ।

*Post-Colophon:—*

अनले वत्सरे कृष्णे श्रावणे सौम्यवासरे । रामेश्वरेण लिखितं पवित्रेष्टिपुस्तकम् ।

---

## 151

### 338. पवित्रेष्टिप्रयोगः ।

### PAVITREṢṬIPRAYOGA.

*By Anantadeva.*

In this treatise the author Anantadeva collected all the authorities from the Śrautasūtras and the Dharmasūtras wherever the Pavitreṣṭi is prescribed as an expiatory rite on various occasions. The work does not deal with the actual Prayoga portion of the Pavitreṣṭi.

*Beginning:—*

अथ पवित्रेष्टिर्वितन्यते। तत्र निमित्तानि। मैत्रायणीयपरिशिष्टे। अथ यद्याहिताग्नेर्दैवान्मानुषाद्वाऽपराधात्स्वयमजुह्वतः संवत्सरोऽतीयात् अतिशतयोजनमध्वातिक्रमो वा भवेत् भार्यारजसि सूतकमृतकयोर्वा प्रवासः स्याद्द्विषदन्नस्य द्विषतो वा प्राशनं भवेत् पर्वण्युपस्थानलोपे भार्यागमने च सन्ततपक्षत्रयहोमविच्छेदे च वृषभखरोष्ट्रयुक्तयाने दिवा स्वभार्यागमने सूर्योदयास्तमयोः स्वापे अमनोज्ञस्वप्नदर्शनसुरासवगन्धाघ्राणे पतितान्त्यजाभिप्रतिग्रहयोश्चान्यान्युपपातकान्युक्तानि। तेषु तेषु पवित्रेष्टिः प्रायश्चित्तिरिति। अन्यान्यपि निमित्तान्युक्तानि बौधायनीये धर्मसूत्रे।

*End:—*

तस्य स्यात्पुनराधेयं पवित्रेष्टिरथापि वा। इति त्रिकाण्डवचनात्संवत्सरातिप्रवासेऽब्दपर्यन्तं स्वकर्तृकहोमाभावस्यार्थसिद्धत्वादीदृशे विषये पुनराधेयप्रवृत्तिमप्यभ्युपगम्य पुनराधेयपवित्रेष्ट्योः शक्ताशक्तभेदेन व्यवस्थां केचिदिच्छन्ति। अन्ये तु अब्दे स्वयमेव जुहोतिवचनमप्रवसदाहिताग्निविषयमेव। तत्रैव शक्ताशक्तभेदेन पुनराधेयपवित्रेष्ट्योर्व्यवस्था।

प्रवसदाहिताग्निस्तु अब्दपर्यन्तं सान्तत्येन स्वातिरिक्तकर्तृकहोमस्य
देशान्तरगते पत्न्यावग्निहोत्रादिकं तथा।
ऋत्विक्समायुता पत्नी कुर्यान्नव तु सौमिकम्॥

इति शास्त्रेणाभ्युपगमेन तत्र दोषाभावादतिप्रवासे तन्नैमित्तिकपवित्रेष्टिमेव विकल्पेनेच्छन्ति। इदमेव च युक्तम्।

अवादीत्थमनन्तेन पवित्रेष्टिविनिर्णयः।
प्रीयतां यज्ञभुग्विष्णुर्याज्ञिकास्तुष्टिमाप्नुयुः॥

*Post-Colophon.—*

शके १७१२ साधारणनाम संवत्सरे चैत्रवद्य १४ ते दिवसि मांचेगण इत्युपनाम्ना माधवेन लिखितम्।

---

## 152

### 341. पवित्रेष्टिप्रयोगः।

### PAVITREṢṬIPRAYOGA.

This is another manual of the Pavitreṣṭi according to the Bodhāyanaśrautasūtra. It contains all the necessary Mantras for the Iṣṭi, and at the end the views of Bharadvāja and Bodhāyana regarding the performance of the Pavitreṣṭi are also stated.

*Beginning:—*

श्रीगणेशाय नमः। अथ पवित्रेष्टिप्रारम्भः। प्रातर्होमानन्तरं दर्भेष्वासीनो दर्भान्धारयमाणो मम दश पूर्वान्दशापरान् तारयितुकाम एनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं पवित्रेष्ट्या यक्ष्ये। विद्युत्। अद्य यज्ञाय। इमामूर्जं पञ्चदशीम्। पवित्रेष्टं हविः। पौर्णमासं तन्त्रम्। बर्हिराहृत्य व्रतप्रवेशः। सप्तदश सामिधेन्यः। ततस्त्वात्रयोविंशतिधा। अलङ्कृत्य परिस्तरणम्। देवा देवेषु कर्मणे वामित्यादि। पात्रप्रयोगकाले चतुश्चत्वारिंशत्कपालानि। स्फ्यश्चन्द्रम्। इतराणि प्रकृतिवत्।

*End:*—

इमं मे वरुण तत्त्वायामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयासि ॥ २० ॥ अग्नये गृहपतयेऽनुब्रूहीत्यादि । यज्ञो बभूव यज्ञशञ्चमवक्षम् । सिद्धमिष्टिः सन्तिष्ठते । संवत्सराधिक-प्रवासनिमित्तं च पवित्रेष्टिं तथैव च विहिता भरद्वाजसूत्रे न संवत्सरव्यतिप्रवासे यदिच(?) प्रवासे पवित्रेष्ट्या यजति ।

वैश्वानरीं व्रातपतिं पवित्रेष्टिं तथैव च ।
ऋतावृतौ प्रयुञ्जानः पुनाति दश पूरुषान् ॥ १ ॥

दश पूर्वान्दशापरानित्यनेन सहैकविंशतिपुरुषानुद्धरेदित्याह भगवान्बौधायनः ।
विनायकभट्टखेडकरस्येदं पुस्तकम् ।

---

## 153

### 344. पशुबन्धप्रयोगः ।

### PAŚUBANDHAPRAYOGA.

This is a manual of the Nirūḍhapaśubandhaprayoga according to the Apastambaśrautasūtra.

*Beginning:*—

सर्वांल्लोकान्पशुबन्धयाज्यभिजयति । तेन यक्ष्यमाणोऽमावास्यायां पौर्णमास्यां वा प्रात-रग्निहोत्रं हुत्वा प्राणानायम्य सङ्कल्पं करोति । पशुबन्धमारप्स्ये । तेन संवत्सरे संवत्सरे यक्ष्ये । पुनः सङ्कल्प्यैन्द्राग्नेन निरूढपशुबन्धेन यक्ष्ये । तेन परमेश्वरं प्रीणयानि । उपर्यग्नावरणी धारयन्नुपति । अयं ते योनिः+रयिम् । अरण्योरग्नीन् समारोप्य यागोपकरणैः सह देवयजनं गत्वा देवयजनमुद्धत्यावोक्ष्याग्निं मथित्वोपावरोह + दुरोणे निवर्तमानामभिमन्त्रयते । गार्हपत्यायतने निधाय । विद्युदसि । ऋत्विजो वृणीते । ततोऽध्वर्युराहवनीयं विहृत्य जुह्वां सकृद्गृहीत्वा षड्ढोतारं मनसाऽनुद्रुत्याहवनीये सग्रहं जुहोति ।

*End:*—

अपोऽन्वचारिषं रसेन समसृक्ष्महि । पयस्वां अग्न आगमन्तम मा संसृज वर्चसा । ब्रह्मा अयाडग्निरित्यादि + ब्रह्मत्वं ब्रह्मत्वं यजमानोऽग्निना देवेनेत्यादि । गोमां अग्ने विमां अश्वीत्यन्तम् । यूपं यजमान उपतिष्ठते । नमः स्वरुभ्यः सन्नाममापगादपश्चाद...स्वान्तं भूयासं शृङ्गाणीवेत् शृङ्गिणां सन्नात्मावगत आशासानः सुवीर्यं रायःस्पोषं स्वश्वियम् । बृह + ष्ठ इति च । यज्ञशञ्चम इत्यादि । ब्राह्मणांस्तर्पयत वै । काण्ड + नमो नमः । आत्मन्यरण्योर्वाऽग्नीन् समा-रोप्य यागोपकरणैः सह पत्न्यन्वारब्धोऽग्न्यगारं प्रविश्य गार्हपत्यायतने लौकिकमग्निं प्रतिष्ठा-प्योपावरोह्य मथनपक्षेऽग्निं मथित्वोपावरोहेत्यभिमन्त्र्य तमग्निं गार्हपत्यायतने निधाय धृष्ट्या-दानादि पूर्ववत् । हरिः ॐ ।

154

## 346. पशुबन्धप्रयोगः।

## PAŚUBANDHAPRAYOGA.

This MS. contains only a list of duties observed during the performance of the Nirūḍhapaśubandha according to the Kātyāyanaśrautasūtra. But the necessary Mantras which are to be recited while performing each duty are not stated. In the beginning, the anonymous author discards certain auxiliaries of this sacrifice, on the strength of its similarity with the Agniṣomīyapaśu and he quotes in this respect certain rules from the Pūrvamīmānsī and the Śrautasūtras. The paper and handwriting used in this MS. seem to be very old.

*Beginning:—*

ॐ निरूढपशुबन्धे प्रयोगे मातरः श्राद्धम् । अग्नीषोमीयप्रकृतित्वान्नान्वारम्भणीया । तत्प्रकृतित्वं च प्रकरणे धर्मविधानादिह चानुपदेशात् । सूत्रकारप्रस्थानाच्चाग्नीषोमीयदर्शनादिति । इहाप्युपदेशोऽस्तीति चेत्तेषां विशेषकत्वान्मन्थनादिवत् । यूपवत्कथं पलाशत्वञ्चेति । न च निरूढे विशसनादीनि सन्ति । न च निरूढो विशसनान्यग्नीषोमीयाद्ग्रहीतुं शक्नोति । इतरांश्च दर्शपूर्णमासाभ्याम् । आकाङ्क्षायाः सकृदुत्पत्तेः । तस्मादग्नीषोमीयप्रकृतित्वमिति तत्र नान्वारम्भणीया । आरम्भाभावात् ।

× × × ×

तस्माद्वैषम्यमन्वाहार्येण । समारोपः । गृहेषु मन्थनम् । विहरणम् । अग्न्यन्वाधानम् । ब्रह्मवरणम् । यूपाहुतिः । गृहेष्वाज्यशेषमादाय सतक्षा यूपं प्रति गच्छति । यूपाभिमर्शनम् । अभिमन्त्रणं वा । प्र-छतः । छेदनप्रदेशे स्रुवेणोपस्पर्शनम् । कुशतरुणाऽन्तर्धानम् । छेदनम् । प्रथमशकलग्रहणम् । पततोऽभिमन्त्रणम् । स्थाण्वाहुतिः ।

*End:—*

ततः प्रणीताविमोकः । राक्षसभागः । पूर्णपात्रनिनयनादि व्रतविसर्गान्तं पौर्णमासवत् । ततो गार्हपत्य आज्यसंस्कारं कृत्वा चतुर्गृहीत्वा समित्पूर्वकं मध्यमेऽग्नौ जुहोत्युरु विष्णव इति । अस्या आहुतेः समृध्यर्थं तथोत्साहदानमध्वर्यवे । अथ समारोप्य निर्मथ्य देया । ततो भागप्राशनम् । ब्राह्मणतर्पणप्रैषः । शतब्राह्मणभोजनम् । समिदाधानम् । पुनरुद्धृत्याग्निहोत्रहोमः ।

*Colophon:—*

इति निरूढपशुः समाप्तः ।

ग्रन्थसङ्ख्या १६९.

## 155

### 347. पशुबन्धप्रयोगः ।

### PAS'UBANDHAPRAYOGA.

*By S'eṣa*

This is a manual of the Nirūḍhapaśubandhaprayoga according to the Bodhāyanaśrautasūtra. There are four MSS. of this work in this collection and out of them two MSS. (work No. 348) slightly differ from the other two. The version in those two MSS. actually agrees with the MSS. described under Nos. Hps. II. 735, CS. I. 288 etc., where no author's name is found. However, the authorship of this work is attributed here to one Śeṣa on the strength of the marginal note शे. प. बौ. and a statement पशुशेषप्रयोगप्रारम्भः found on the front page of the MSS. of both the versions. Perhaps this Śeṣa may be identical with the Govinda Śeṣa, son of Śesa Yajñeśa who seems to have composed Prayogas on all the Vedic sacrifices according to the Bodhāyanaśrautasūtra and whose Agniṣṭomaprayoga is described above under Work No. 103, Hps. II. 738, W. II. 1453 etc.

*Beginning*:—

अथ बौधायनपशुशेषप्रयोगप्रारम्भः ।

श्रीगणेशाय नमः । श्रीसाम्बसद्गुरुनाथाय नमः । अथ पशुबौधायनप्रयोगः । उदगयने पूर्वपक्षे देवनक्षत्रे वाऽमावास्यायां वा यजनीये वा पौर्णमास्यां वा सकृत्प्रयुञ्जीताशक्तस्य शक्तस्य संवत्सरे संवत्सरे वा । पूर्वेद्युर्नान्दीश्राद्धादि श्वोभूते पुण्याहं वाचयेत् । याः पुरस्तादित्यादि । स्वर्गकामः पशुना यक्ष्य इति सङ्कल्प्य ऋत्विजो वृत्वाऽर्हयित्वा पशुना यक्ष्यमाणोऽन्वारम्भणीयया यक्ष्य इति सङ्कल्प्य ब्राह्मणतर्पणान्तं कृत्वा समारोप्य देवयजनं गत्वा मथित्वोपावरोह्यायतने निधायाग्नीन्विहृत्य मनस्वतीं हुत्वा मनो ज्योतिः० घृतेन स्वाहा । परित्यज्याग्निं पुनर्विहृत्यान्वारब्धे यजमाने षड्ढोतारं मनसाऽनुद्रुत्य सग्रहं चतुर्गृहीतं जुहोति ।

*End*:—

पशुबन्धेऽन्वाधानं व्रतोपायनं पृष्ठ्यां प्रणीतां याजमानमाज्यभागौ प्राशित्रं यजमानब्रह्मभागौ चतुर्धाकरणं विष्णुक्रमणमित्येकादश धर्मानुत्सृजन्ति ।

पाशुके वितते तन्त्रे होमकाल उपस्थिते ।
अपरे तु विहारे स्यात्स वै वोत्तरवेदिके ॥
सद्यस्काले पशोः पक्षे होमकाल उपस्थिते ।
समाप्यैव तु होतव्यं काल एव जुहोति तु ॥

*Colophon*:—

<u>निरूढपशुबन्धप्रयोगः समाप्तः ।</u>

*Post-Colophon*:—

शके १७४८ व्ययनाम संवत्सरे श्रावणशुक्लषष्ठ्यां तिथौ सौम्यवासरे समाप्तम् ।

इदं पुस्तकं रानडे इत्युपनामलक्ष्मणेन लिखितम् । इदं पुस्तकं पट्टवर्द्धनोपनामबाळकृष्णेनेदं पुस्तकम् ।

## 156

### 351. पशुबन्धप्रयोगः ।

### PAS'UBANDHAPRAYOGA.

*By Gopīnātha Dīkṣita, son of Gaṇeśasomayājin.*

This is a manual of the Nirūḍhapaśubandhaprayoga according to the Hiraṇyakeśīyaśrautasūtra. The author Gopīnātha Dīkṣita seems to have composed several Prayoga works for the Vedic sacrifices according to the Hiraṇyakeśīyaśrautasūtra and some of his works are also described in this volume.

*Beginning.*—

श्रीमङ्गलमूर्तये नमः ।

वात्सल्यात्पितरौ कपोलयुगलं स्वस्यागतौ चुम्बितुं
दृष्ट्वा कुञ्चितमास्यपद्ममलं चेषत्स्मितं सत्वरम् ।
अन्योन्यं शिवयोस्ततः सुवदने युक्ते अभूतां तयो-
रित्थं येन विनोदितौ स भगवान्बालो गजास्योऽवतु ॥ १ ॥

अथ सत्याषाढहिरण्यकेशिसूत्रानुसारिनिरूढपशुबन्धप्रयोगप्रारम्भः । तत्र द्विविधः पशुः । दर्शपूर्णमासवन्नित्यः काम्यश्च । तत्र काम्यपक्षे स्वर्गकाम ऐन्द्राग्नेन निरूढपशुबन्धेन यक्ष्य इति पशुकाम ऐन्द्राग्नेन निरूढपशुबन्धेन यक्ष्य इति सर्वलोकाभिजयकाम ऐन्द्राग्नेन निरूढपशुबन्धेन यक्ष्य इत्यादि तत्तत्कामानुसारेण सङ्कल्पः । नित्यपक्षे श्रीपरमेश्वरप्रीत्यर्थमैन्द्राग्नेन निरूढपशुबन्धेन यक्ष्य इत्येतावानेव सङ्कल्पः । उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थमैन्द्राग्नेन निरूढपशुबन्धेन यक्ष्य इत्येवं वा । प्रथमे प्रयोगे सत्यधिकारे यावज्जीवमैन्द्राग्नेन निरूढपशुबन्धेन यक्ष्य इति सङ्कल्पवाक्ये विशेषः ।

*End*:—

इति मन्त्रात्तत्रस्थमेव पशुसम्बन्धि सभागं गृहीत्वा प्राश्नाति । प्राश्याचम्य विष्णोः क्रमोऽस्यभिमातिहेत्यादि । यज्ञशश्नम इत्यादि संस्थाजपान्तं कृत्वा । आशासानः सुवीर्यं रायस्पोषतिष्ठ । संस्थिते यजमानो यूपमुपतिष्ठते । इत ऊर्ध्वं न यूपस्पर्शः । ब्रह्मा अयाडग्निर्जा–यज । वृष्टिरसि वृश्च । ब्राह्मणांस्तर्पयत वै । शतब्राह्मणभोजनम् ।

× × × ×

अथ पाशुको विहारः ।

तुर्याङ्गुलो नकारलयोऽष्टौ प्राक् परिकीर्तिताः ।
अष्टाङ्गुलाधिकारत्निभिश्चतुर्भिस्तु पश्चिमे ॥ १ ॥
चतुर्दशाङ्गुलयुतारत्निभिस्तु त्रिभिः पुरः ।
रथमात्रिर्वेदिरिति पक्षे मानमिदं स्मृतम् ॥ २ ॥

मानार्धाभ्यासविधिना श्रोण्यंसपरिकल्पना ।
अपि वा षडरत्नि स्यात्प्राची वेदिस्तु पाशुकी ॥ ३ ॥
वेदारत्निस्तु पश्चात्स्यात्तिरश्ची पाशुबन्धिकी ।
भवेत्तिरश्ची पुरतस्त्र्यरत्निरिति वेदिका ॥ ४ ॥
असन्नतैव वेदिः स्यात्पाशुक्युभयपक्षके ।
एनयाहवनीयस्य स्यात्संलग्नैवसन्नना (?) ॥ ५ ॥

*Colophon:—*

श्रीः इत्योकोपाह्वश्रीमद्गणेशदीक्षिततनुजश्रीमद्गोपीनाथदीक्षितकृतहिरण्यकेशीसूत्रानुसारिनिरूढपशुबन्धप्रयोगः ।

---

## 157

### 353. पाथिकृतीष्टिप्रयोगः ।

### PĀTHIKṚTĪṢṬIPRAYOGA.

This is a manual of the Pāthikṛtiṣṭiprayoga where the performance of the Pāthikṛti along with the Vaiśvānareṣṭi is treated of simultaneously. This follows the Apastambaśrautasūtra.

*Beginning:—*

पाथिकृतीं वैश्वानरीञ्च समानतन्त्रं कुर्वन्निष्ट्या यक्ष्ये । तया परमेश्वरं प्रीणयानि । विद्युदसीत्यादि । देवा गातुविद इत्यादि । ऐन्द्रं हविः । पौर्णमासं तन्त्रम् । ............... सामिधेन्यः । बर्हिराहृत्य व्रतप्रवेशः । अलङ्कृत्य परिस्तरणम् । देवा देवेषु कर्मणे वामित्यादि ।

*End:—*

अमुत्रामुष्मिल्लोके । सहस्रधारेऽक्षीयमाणे । ते दध्र .........पृथिवीमन्तरिक्षं दिवं च । ताभ्यामनडुद्धिरण्याभ्यामतितराणि मृत्युम् । दक्षिणत एत ब्राह्मणाः । इमं वोऽनडुहं......... अहिंसन्तो यथाभागं प्रतिगृह्णीध्वम् । शूद्राय गामित्यनडुहः । अग्नये हिरण्यमिति हिरण्यस्य । यशो बभूव यशशश्रमवर्जम् । सन्तिष्ठते ब्राह्मणतर्पणान्तम् ।

---

## 158

### 354. पिण्डपितृयज्ञप्रयोगः ।

### PIṆḌAPITṚYAJÑAPRAYOGA.

This is a manual of the Piṇḍapitṛyajñaprayoga which is to be performed on the new-moon day. It belongs to the Āpastamba school,

*Beginning:—*

अमावास्यायां यदहश्चन्द्रमसं न पश्यति तदहः पिण्डपितृयज्ञं कुरुते । अपराह्णेऽधिवृक्ष-सूर्ये वा । अपरेण गार्हपत्यं पत्न्या सह प्राचीनावीती सङ्कल्पः । पिण्डपितृयज्ञेन यक्ष्ये । तेन + मि । द्विः । विद्युदसि + मि । द्विः । दृष्टचन्द्रायां तु प्रतिपदीष्टिं समाप्य दक्षिणाग्निं प्रणीय प्राचीनावीती । अपां मेध्यं यज्ञियं सदेवं शिवमस्तु मे । आच्छेत्ता वो मारिषं जीवानि शरदः शतम् । समूलं सकृदाच्छिन्नं बर्हिराहरति ।

*End:—*

अस्मिन् पिण्डपितृयज्ञे यजुष्टो यज्ञभ्रेषप्रायश्चित्तं करिष्ये । भुवः स्वाहा । वायव इदम् । अस्मिन्कर्मणि सम्भावितसमस्तविध्यपराधप्रायश्चित्तार्थं सर्वप्रायश्चित्तमाहवनीये । अनाज्ञातजपो विद्यमाने प्राचीनावीती । वृष्टिरसि + गाम् । द्विः ।

*Colophon.—*

सन्तिष्ठते पिण्डपितृयज्ञः । अपः पिण्डानभ्यवहरेत् । ब्राह्मणं वा प्राशयेत् ।

---

**159**

355. **पिण्डपितृयज्ञप्रयोगः ।**

PIṆḌAPITṚYAJÑAPRAYOGA.

This is another manual of the Piṇḍapitṛyajñaprayoga according to the Hiraṇyakeśiyaśrautasūtra.

*Beginning:—*

श्रीगणेशाय नमः । अथ पिण्डपितृयज्ञः । अमावास्यायामपराह्णे पिण्डपितृयज्ञः कार्योऽस्मिन्नहनि पुरस्ताच्चन्द्रमा न दृश्यते । एकोनषष्टिघटिकायां चतुर्दशीसत्वेऽपरेऽहनि मुहूर्ताधिकामावास्यासत्व इष्ट्युत्तरं परेद्युरेवापराह्णे कार्यः । तदसत्वे पूर्वेद्युरेवान्वाधानोत्तरम् । तत्रानुष्ठानक्रमः ।

पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं तु साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥

उपवेषानन्तरं वैश्वदेवं कृत्वा यजमानः प्राचीनावीती दक्षिणाग्नेः पश्चादुपविश्य पितृप्रीत्यर्थं पिण्डपितृयज्ञेन यक्ष्ये । अध्वर्युर्यजमानो वाऽसिदं कमण्डलुं चादाय दर्भदेशं गत्वा अपां मेध्यं यज्ञियं सदेवं शिवमस्तु मे । आच्छेत्ता वो मारिषं जीवानि शरदः शतम् । सकृदाच्छिन्नं समूलं बर्हिराच्छिनत्ति ।

*End:—*

पत्नी तं पिण्डं प्राश्नाति गर्भिणी चेत्पत्नी पञ्चममासप्रभृति न प्राश्नाति । ये समानाः समनसः पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञे देवेषु कल्पताम् ।

ये सजाताः समनसो जीवा जीवेषु मामकाः ।
तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः ॥

सकृदाच्छिन्नानभ्युक्ष्याग्नावादधाति । इतरौ पिण्डावप्सु प्रवाहयति । यस्य स्मृत्येति विष्णुं स्मृत्वेश्वरार्पणं कुर्यात् । अग्निवृक्षसूर्यकाले करणपक्षे श्राद्धोत्तरं पितृयज्ञः कार्यः । अनाहिताग्नेस्त्वेवमेव पिण्डपितृयज्ञः । तत्र विशेष उच्यते । चरूद्वासनान्तमौपासने कर्म कृत्वा ये रूपाणीत्युल्मुकं हृत्वा तमुपसमाधाय मेक्षणनिधानान्तं तस्मिन्कृत्वा असुरा इत्यादि करोति । पङ्क्तिप्राजापत्याभ्यामतिप्रणीतदेशे गत्वा यदन्तरिक्षमिति गार्हपत्यपदरहितेन तमुपतिष्ठते । औपासने सकृदाच्छिन्नप्रहरणम् । अन्यत्समानम् । अपि वा सर्वमौपासन एव कर्त्तव्यम् । अतिप्रणीतस्तु श्रौतवदृष्टार्थः ।

*Colophon.—*

सन्तिष्ठते पितृयज्ञः ।

अक्षता गर्भिणी चैव गतरक्ता रजस्वला ।
नाश्नीयान्मध्यमं पिण्डं जारिणी च प्रसूतिका ॥

इति प्रयोगः समाप्तः ।

× × × ×

इदं पुस्तकं गद्रे इत्युपनामकभास्करेण लिखितं स्वार्थं परमार्थम् ।

---

## 160

## 357. पित्र्येष्टिकारिका ।

PITRYEṢṬIKĀRIKA.

This MS. contains the memorial verses for the Pitryeṣṭi which is an auxiliary to the Cāturmāsya. It belongs to the Bodhāyana school.

*Beginning.—*

पितृयज्ञेन यक्ष्येऽथ सङ्कल्पस्तदनुष्ठितिः ।
विद्युदग्निप्रणयनं वेदस्फ्यादानमेव च ॥ १ ॥
वेदेर्दक्षिणपूर्वार्द्धे भवेत्स्तम्बयजुर्हृतिः ।
परिग्रहो ऋतमसीत्यादि पूर्वं भवेदिह ॥ २ ॥
अपारेरम इत्यादि यावद्दर्पं परिग्रहः ।
नेमात्रेरेति देवस्य सवितुर्भूमिरित्यपि ॥ ३ ॥
आहृत्याग्निं दक्षिणाग्नेस्तूष्णीं वेद्यां निधाय च ।
यजुषान्वाहितस्तस्मिंस्तूष्णीमाहवनीयके ॥ ४ ॥

*End.—*

देवौ यज यजेत्याद्यः प्रैषो यज इतीतरः ।
निवीतिनो भवन्त्येते आयुषे त्वेत्यनन्तरम् ॥ ६१ ॥
कृत्वा यज्ञोपवीतं तु स्वगादैव्येति निर्दिशेत् ।
संस्रवान्ते क्षाल्यपानाज्यस्थालीस्रुवं स्रुचौ ॥ ६२ ॥

आदाय गच्छेदध्वर्युर्गार्हपत्यं स्रुचौ क्षिपेत् ।
सम्पत्नीदाक्षिणाग्नानि प्रायश्चित्तानि नो यजुः ॥ ६३ ॥
तूष्णीं बर्हिःप्रहरणं ध्रौवं होमे समापयेत् ।
यज्ञभागमवघ्राय वेद्यभिस्तरणादि च ॥ ६४ ॥
यं देवा भर्जनार्थे यद्रमें तदर्पीति च ॥ ६५ ॥

*Colophon.*—

इति पैतृक्याः कारिका समाप्तेयम् ।

*Post-Colophon*—

शके १६७४ अङ्गिरानामाब्दे आषाढाधिक्य शुद्ध १४ वारो रविस्तथैव च ।
इदं पुस्तकं उप्रजकरोपनामकरामसूनोर्लक्ष्मणस्य सत्यम् ।

---

## 161

### 359. पिष्टपशुमीमांसा ।

PIṢṬAPAS'UMĪMĀṄSA.

*By S'rīnivāsa Vyāsa son of Tirumalārya.*

It is established in this work that the images of animals made of flour only are meant to be offered in the Vedic animal sacrifices and the practice of killing the living animals in those rites is condemned.

*Beginning:*—

प्रणम्य श्रीवेङ्कटेशमिष्टदेवं गुरूनपि ।
भक्त्या मीमांसनं पिष्टपशोः कुर्वे यथामति ॥ १ ॥
शान्तिपर्वणि मोक्षधर्मे नारायणीये–
सवनीयस्य पशोः काल आगते तु बृहस्पतिः ।
पिष्टमानीयतामत्र पश्वर्थमिति भाषते ॥
तथा ऋषय ऊचुः । बीजैर्यज्ञेषु यष्टव्यमिति वैदिकी श्रुतिः ।
अजसंज्ञानि बीजानि छागं नो हन्तुमर्हथ ।
नैष धर्मः सतां देवाः कथं बध्येत वै पशुः ॥ इत्यादि ।
दानधर्मे युधिष्ठिर उवाच:—
अहिंसा परमो धर्म इत्युक्तं बहुशस्त्वया ।
श्राद्धेषु च भवानाह पितॄनामिषकाङ्क्षिणः ॥
इत्यादि युधिष्ठिरकृतप्रश्नस्य बहुधा परिहारमुक्त्वा इदमुच्यते ।
इदमन्यत्तु वक्ष्यामि प्रमाणं विधिनिर्मितम् ।
प्रमाणमृषिभिर्जुष्टं वेदेषु परिनिष्ठितम् ॥
प्रवृत्तिलक्षणो धर्मो व्रतार्थिभिरुदाहृतः ।

इत्यादिना काम्यकर्माणि मांसमुक्त्वा निष्कामकर्मणि–
य इच्छेत्पुरुषोऽत्यन्तमात्मानं निरुपद्रवम् ।
स वर्जयेत मांसानि प्राणिनामिह सर्वशः ॥
श्रूयते हि पुराकल्पे तृणव्रीहिमयः पशुः ।
येनायजन्त यज्वानः पुण्यलोकपरायणाः ॥

*End:—*

मीमांसकानां न हि निन्द्जस्य न्यायापरस्यात् कुलधर्म एव(?) ।
न हि स्तुतिन्यायमपि प्रकल्प्य प्राशस्त्यहानिं च परे विद्ध्यात् ॥

विधेयान्तरसन्निधानेऽपि निन्दा यदो मन्दचौप्यस्तुतौ (?) पर्यवस्येत् सुरापाननिन्दाव्यहो सोमपानस्तुतावेव कस्मात्संविश्रान्तिमेतीति । न चायं न्यायो मीमांसकासंमत इति वाच्यम् । न हि वयं मीमांसकानां किङ्कराः येन तद्भक्तिमनुस्मृत्यैव सर्वं वक्तव्यमिति निर्बन्धः । तथा सति तदुक्तचतुर्थ्यन्तशब्ददेवतात्वादेरप्यङ्गीकर्त्तव्यतापातात् । इति सर्वं समञ्जसम् ।

यो व्यासवंशेऽजनि तिर्मलार्यस्ततोऽजनि श्रीनिवासाभिधानः ।
विद्वान्भूत्सोमयाजी स पिष्टपशुं कृत्वाऽकरोत्तं निबन्धनम् ॥
मया रचितया पिष्टपशुमीमांसयाऽनया ।
श्रीमत्सत्यबोधगुरुयज्वहृद्गतः प्रीयतां हरिः ॥

*Colophon:—*

इति प्रत्यक्षपशुखण्डनपुरःसरं पिष्टपशुसमर्थनं समाप्तम् ।

*Post–Colophon:—*

संवत् १८७६ तथा शके १७४१ प्रमाथीनामसंवत्सरे मार्गशीर्षवद्य २ भृगुवासर ते दिवसि माचेगगोपनामकबाळम्भट्टात्मजमाधवेन लिखितं काशिक्षेत्रे समापितं स्वार्थं परोपकारार्थं च ।

---

## 162

## 360. पिष्टपशुविचारः ।

### PIṢṬAPAŚUVICĀRA.

This is another treatise which denounces the practice of killing the animals in the Vedic sacrifices. The author introduces here the Puroḍāśa or a cake made of rice-flour to be offered in those sacrifices instead of the animals. He quotes in support of his view several passages from the Vedas and Purāṇas.

*Beginning:—*

श्रीरामचन्द्राय नमः ।

कृष्णं रमापतिं नत्वा सत्यजैत्रं जगद्गुरुम् ।
साधयिष्ये पशुस्थानपुरोडाशं कलौ युगे ॥

ननु कथं पशुस्थाने पुरोडाशः । मुख्याभावे प्रतिनिधिग्रहणम् । सत्यम् । मुख्यस्य निषेधात् । तथा हि पुरुषं वै देवाः पशुमालभन्त तस्मादालब्धान्मेध उदक्रामत् । सोऽश्वं प्राविशत् । तस्मादश्वो मेध्यो भवतु । अथैनमुत्क्रान्तमेधमत्यार्जन्त । स किं पुरुषोऽभवदिति । पुरा कदाचिद्देवाः स्वकीययज्ञेषु पुरुषं पशुमालभन्त । पशुं कृत्वा तेन पशुना यष्टुमुद्युक्तवन्तः । तस्मादालब्धान्मेध उदक्रामत् । मनुष्यपशोः सकाशान्मेधो यज्ञयोग्यहविर्भाग उदक्रामत् । मनुष्यं परित्यज्यान्यत्रागच्छत् ।

*End:—*

यथोक्तं पराशरसंहितायाम्–

पशुयागं प्रकुर्वाणः कलौ वेदविदां वरः ।
पश्वाकृतिं यवाद्याज्यैः कारयित्वा स्वमन्त्रतः ॥
तत्र प्राणं प्रतिष्ठाप्य तत्तन्मन्त्रैर्वपां चरेत् ।
तेन विष्णुः प्रसन्नः सन्ददाति स्वान्मनोरथान् ॥

तथा शङ्खस्मृतिः–

कलौ श्रेयान्प्रतिनिधिः कलौ पापबहुत्वतः ।
पशुयागे समारब्धे ब्राह्मणैर्वेदपारगैः ॥
तत्तन्मन्त्रैर्वपाहोमं कुर्याद्वेदविदां वरः ।

मनुरप्याह–

कुर्याद्घृतपशुनत्र कुर्यात्पिष्टपशूनथ ।
नत्वेव च वृथा हन्तुं पशुमिच्छेत्कदाचन ॥

*Colophon:—*

इति पशुविचारः ।

*Post-Colophon.—*

शके १७३४ अङ्गिरानामसंवत्सरे भाद्रपद १४ ते दिवसि माचेगणोपनामकबालम्भट्टात्मजमाधवेनेदं पुस्तकं लिखितम् ।

---

## 163

### 361. पुनराधेयप्रयोगः ।

### PUNARADHEYAPRAYOGA.

*By Anantadeva*

This is a manual of the Punarādheyaprayoga or re-kindling the sacrificial fires according to the Apastambaśrautasūtra.

*Beginning*—

श्रीगणेशाय नमः। अथानन्तदेवकृतापस्तम्बीयपुनराधेयप्रयोगः। आश्वलायनः। आधानाद्यामयावी यदि वार्ता व्यथेरन् पुनराधेय इष्टिरिति। आमयाव्युदग्व्याधिमान् अर्ताः पुत्रपश्वादयः। व्यथा हानिः। आधानानन्तरं तस्मिन्संवत्सरे यद्येतानि निमित्तानि स्युस्तदा पुनराधेयं कर्तव्यमित्यस्मिन् सूत्रेऽर्थाल्लभ्यत इति वृत्तिकृत्। अन्ये त्वामयावी रोगवानित्याहुः। आधाने कृते योनर्ध्नोति स पुनरादधीत प्रजाकामः पशुकामः पुष्टिकामो वा पुत्रमरणं पत्नी तन्नाशे सति पुनराधेयमित्युपदेशः।

*End*:—

सत्वं न इति याज्या। अग्नीवरुणयोरहं० वृत्रहा०। न चतुर्धाकरणम्। अन्वाहार्यो दक्षिणा। अगन्मेति पूर्ववत्। यज्ञो बभूव यज्ञशाखमवर्जम्। ब्राह्मणतर्पणान्तं प्रकृतिवत्। इति पुनराधेयम्। पुनस्तस्मिन्निमित्ते पुनराधेयान्ते लेकः सलेक इत्याहुतीर्जुहोति। आदित्येभ्य इदमिति त्यागः। इति तत्र विशेषः।

*Colophon*.—

इत्यनन्तदेवीयः पुनराधेयप्रयोगः।

काम्ये निमित्तयोगे वा पुनराधेयमिष्यते।
निमित्तेषु यथायोगमाधानमथ वा भवेत्॥

× × × ×

अङ्गनाशेऽङ्गनाशे पुनराधेयमिष्यते।
ज्यानिः सर्वस्वहानिः स्यात्स्पष्टं माध्यन्दिनश्रुतेः॥
अतोऽल्पद्रव्यनाशे तु पुनराधिर्न तन्मतात्।
अग्न्याद्युपद्रुतेऽप्याधिः सत्यापाढादिदर्शनात्॥
प्रमीते पुनराधानमृत्विग्भ्रातृपुरोहिते।
बौधायनमतिः प्राह नेत्थं सूत्रान्तरेष्विदम्॥
आधानाद्यामयित्वेव बह्वृचाः पुनराहितिः।
कथयन्ति प्रतिज्ञानामंशे तामेव वाजिनः॥
उद्वातेऽग्नौ विहारात्प्राङ्मध्यमामेष्य(?) जन्मनि।
लोकाश्रयादावनिक्षिप्तेऽभ्युदयेऽस्तमयेऽपि वा॥
विशिष्टहेतुना तेन जातवेदा विनश्यति॥

इति मण्डनः।

*Post-Colophon* —

शके १७५४ नन्दननामसंवत्सरे माघशुद्ध ४ ते दिवसि माचेगणोपनामकबाळंभट्टात्मजमाधवेन लिखितं सम्पादितं स्वार्थं परोपकारार्थम्।

## 164

### 362. पुनराधेयप्रयोगः ।

### PUNARĀDHEYAPRAYOGA.

This is another manual of the Punarādheyaprayoga according to the Āpastamba School.

*Beginning:—*

श्रीगणेशाय नमः । अथ पुनराधेयप्रयोगः । अग्नीनाधाय तस्मिन् संवत्सरे यो नर्ध्येति प्रजाकामः पशुकामः पुष्टिकामः सर्वस्वहानौ पुत्रमर्त्यायां स्वज्ञातिनिरुध्यमानेष्वङ्गवैकल्ये वेति निमित्तेष्वागामिपौर्णमासीष्टिं कृत्वाऽग्नीन् पुनराधास्ये । ऋध्यामं वर्षासु रोहिण्यामित्यादि सङ्कल्प्योत्सर्गेष्टिः । इष्ट्वा यक्ष्ये । विद्युदसीत्यादि । अद्य यज्ञाय । इमामूर्जं प्रथमाम् । चेष्टं हविरिदमेषां मयि । पौर्णमासं तन्त्रम् । पञ्चदश सामिधेन्यः । पात्रप्रयोगकालेऽष्टत्रिंशत्कपालानि । स्थाली स्फ्यश्च द्वन्द्वम् । इतराणि यथाप्रकृति । निर्वपणकाले । अग्नये जुष्टं निर्वपामि । अग्नये वैश्वानराय जुष्टं० । वरुणाय जुष्टं० । अग्नयेऽप्सुमते जुष्टं० । मित्राय जुष्टं० । अदित्यास्त्वोपस्थे सादयाम्यग्ने हव्यं रक्षस्वाग्ने वैश्वानर हव्यं रक्षस्व वरुण हव्यं रक्षस्वाग्ने सुमन्हव्यं रक्षस्व मित्र हव्यं रक्षस्व ।

*End:—*

अग्निरिदं ह० सोम इदं ह० अग्नीवरुणाविदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्राताम् । देवानामाज्यपामित्यादि । अग्नीवरुणयोरहमु० । यज्ञो बभूव यज्ञशश्रमवर्जम् । ब्राह्मणतर्पणान्तम् ।

*Colophon:—*

इति पुनराधेयप्रयोगः ।

योऽग्न्याधेयानन्तरं पुनराधेयं कृत्वा तथायं प्रायश्चित्ताधानं करोति तस्य येऽग्नय इति सर्वदर्विहोमान्ते लेकः सलेकः सुलेकस्तेनादित्या आज्यं जुषाणावियं तु स्वाहा । आदित्येभ्य इदम् । केतः सकेतः सुकेतस्तेनादित्या आज्यं० हा । आदित्येभ्य० । विवस्वाँ अदितिर्देवहूतिस्तेन० तु स्वाहा । आदित्येभ्य० । इति तृतीयाधाने विशेषः ।

*Post-Colophon:—*

शके १७५४ नन्दनाख्ये माघे कृष्णाष्टमी ते देवासि मात्वेगणोपनामकबाळंभट्टात्मजमाधवेन ।

---

## 165

### 365. पुनस्स्तोमक्लृप्तिः ।

### PUNASSTOMAKḶPTI.

*By (Tālavṛntanivāsin).*

Here is a list of Stomas and Sāmans required for the Punasstoma sacrifice according to the Drāhyāyaṇaśrautasūtra. The author's name is not mentioned here but the authorship may be attributed to Tālavṛntanivāsin on the strength of his other works on the same subject found in this MS.

*Beginning*:—

पुनःस्तोमस्य क्लृप्तिरुच्यते । अथैष पुनःस्तोम इत्यनुवाकेन पुनःस्तोम उक्तः । तत्र सूत्रम् । उच्चावचान् याजयित्वोपनीय वा तेभ्यः समावृत्तस्य पुनःस्तोमेन यजेतेति । तस्य कल्पः । रौरवयौधाजयेन्तरामैधातिथं नौधसस्यर्क्षु शुद्धाशुद्धीयं ब्रह्मसाम । यत्पदं निधनं संहितस्य लोके गोषूक्तं पौष्कलस्याश्वसूक्तं प्रमंहिष्ठीयं हारिवर्णं शुद्धाशुद्धीयं स्वासु यदेदं समानमितर-ज्ज्योतिष्टोमेनेति । तत्रव स्तोमक्लृप्तिः । द्वादश माध्यन्दिनं सवनम् ।

*End*:—

अथोक्थानि । प्रमंहिष्ठीयं हारिवर्णं स्वास्वेडं शुद्धाशुद्धीयमित्युक्थ्यानि त्रिवृत्स्तोमः । दक्षिणाकाले तस्य द्वादशमिथुनौ दक्षिणा इति धानञ्जय्यः । पुनः संस्कृतो रथः पुनरुत्स्यूतं श्यामूलं पुनर्धेनुः पुनर्वत्स इति शाण्डिल्य इति ।

*Colophon* —

इति पुनःस्तोमस्य क्लृप्तिरुक्ता ।

---

## 166

## 366. पूर्णाहुतिप्रयोगः ।

## PŪRṆĀHUTIPRAYOGA.

This is a manual of the Pūrṇāhutiprayoga which is performed as an expiatory rite instead of the Pāthikṛti and Vaiśvānareṣṭi when one fails to perform the Nirūḍhapaśubandha in its time.

*Beginning*:—

ॐ निरूढपशुबन्धातिपत्तिप्रायश्चित्तार्थं पशुबन्धस्य मुख्यकालातिपत्तिप्रायश्चित्तार्थं च पाथिकृत्या वैश्वानर्याश्च स्थाने पूर्णाहुतिं सर्वप्रायश्चित्तं च होष्यामि । द्वादशगृहीतेन स्रुचं पूरयित्वाऽऽहवनीये जुहोति ।

*End*:—

वार्त्रघ्नावाज्यभागौ । अग्निर्वैश्वानरः प्रधानदेवता । अग्निर्वृत्राणि त्वं सोम प्रधानस्योर्यागः । वैश्वानरो अजी + ओजसो ये यजामहे । अग्निं वैश्वानरं प्रष्टो दिवि + नन्तां वो पिप्रीहि । अग्ने यद्द्य । शञ्च मे ।

---

## 167

## 367. पोतृप्रयोगः ।

## POTṚPRAYOGA.

This is a manual for the guidance of the Potṛ priest who is one of the assistants of the Brahmā in the Agniṣṭoma sacrifice.

*Beginning*:—

पोताप्रयोगस्य प्रातःसवनमाध्यन्दिनतृतीयसवनानां याज्या उच्यन्ते । आज्यं तान्-नपृक्तं करिष्यन्तोऽभिमृशन्ति । अनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपाः । अनभि-शस्त्यञ्जसा सत्यमुपगेषं स्विते माधाः । स्पृष्ट्वोदकं राजानमाप्याययन्ति । अंशुरंशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविद आलभ्यमिन्द्र प्यायतामा त्वामिन्द्राय प्यायस्व ।

*End:*—

अथ तृतीयसवनम् । धिष्ण्योपस्थानं पूर्ववत् । ये यजामहे आवो वहन्तु सप्तयोरघुष्यन्तोरघुपवत्वानः प्रजिगात बाहुभिः । सीदताबर्हिरुरवस्सदस्कृतम्मादयध्वं मरुतो मध्वोऽन्धसावौ । सोमस्याग्ने वीहि वौ । भक्षणं पूर्ववत् । यज्ञपुच्छं होतृवत् ।

*Colophon:*—

पोताप्रयोगः समाप्तः ।

---

## 168

### 370. पौण्डरीकपवमानाज्यप्रस्तावसामानि ।

### PAUṆḌARĪKAPAVAMĀNĀJYAPRASTĀVASĀMANI.

Here is a list of Prastāvasāmans chanted by Prastotṛ priest in the Ajya and Pavamāna Stotras during the performance of the Pauṇḍarika sacrifice.

*Beginning:*—

आर्भवं प्रसुन्वान इत्यौदलमेकर्चम् ।

अग्निर्वृत्राणि । अग्ने स्तोमम् । यमग्ने वृत्सुमत्तम् । अष्टमस्यार्भवे अभिनो वाजसातमिति । नवमस्य हा इ हूवा इ अक्रनिति वासिष्ठम् । जतावानं वैश्वानरं विश्वेभिरग्नेऽग्निभिः ।

*End:*—

युञ्जन्ति वृघ्नमरुषो । युञ्जन्त्यस्य काम्यो ।
केतुं कृण्वन्न केतवो । तमीडिष्वायो अर्चिषो ।
य इद्ध आविवासतो । गिरा वज्रो न संभृतोम् ।

*Colophon:*—

पौण्डरीकस्य पवमानाज्ययोः प्रस्तावो लिखितः । ओम् ।

---

## 169

### 371. पौण्डरीकप्रयोगः ।

### PAUṆḌARĪKAPRAYOGA.

This is a manual of the Samūḍhapauṇḍarikaprayoga according to the Āpastambiya School.

*Beginning:*—

समूढस्य पौण्डरीकस्य प्रयोगः । सोमेन यक्ष्ये अभ्यासङ्ग्यषडहेन छन्दोमसप्तमाष्टमनवमाहेन × × ष्टोमदशमाहेन नानास्तोमोत्तमाहेनाग्निष्टोमप्रथमाहेनोक्थ्यद्वितीयतृतीयचतुर्थपञ्चमषष्ठसप्तमाष्टमनवमाहेनाग्निष्टोमदशमाहेन विश्वजिदतिरात्रचरमाहेनाहीनभूतेन समूढेन साग्निचित्येन पौण्डरीकेणैकादशरात्रेण रथन्तरबृहद्रथन्तरबृहद्रथन्तरबृहद्रथन्तर बृहद्रथन्तरबृहद्रथन्तरसर्वपृष्ठसाम्नाऽन्वहश्चाद्वादशशतदक्षिणेन । तेन परमेश्वरं प्रीणयानि । विद्युदसि । सोमप्रवाकवरणादि सक्षेदान्ते नान्दीदक्षिणाग्न्याहवनीयौ विहृत्य बृहस्पतिपुरोहितेत्याद्यूखामाच्छिणत्तीत्यन्तम् ।

*End* :—

अन्यत्सर्वं पूर्ववदुदवसानीयान्तम् । नात्र प्रतिप्रस्थातुः शाखाहरणम् । न वसतीवरी-ग्रहणम् ।

*Colophon* :—

पौण्डरीकप्रयोगः समाप्तः ।

*Post-Colophon*:—

अत्र सर्वपृष्ठास्तोर्यामोक्ताः सर्वे पृष्ठधर्मा भवन्ति । यावग्निष्टोमौ तौ पक्षाविति श्रुतिमङ्गीकृत्य प्रयोग उक्तः । × × × प्रयोगोऽप्येष एव । कश्चिद्विशेषः । अभ्यासङ्गयषडहः चतुष्टोमः सप्तमाहः छन्दोमाष्टमनवमदशममहः । ज्योतिरात्रैकादशाहस्त्वेन सङ्कल्प ऊह्यः ।

---

## 170

### 372. पौण्डरीकप्रयोगः ।

### PAUṆḌARĪKAPRAYOGA.

This is another manual of the Pauṇḍarīkaprayoga of the Vyūḍha form according to the Bodhāyana School. At the end of the MS., there are Prayogas for the Yūpaikādaśinī, Paśvaikādaśinī and the Tvāṣṭrapaśu.

*Beginning* :—

अथ बौधायनप्रयोगः । पौण्डरीकस्य प्रयोगः । तत्र सूत्रम् । तस्याहः । अभ्यासङ्गयः षडहस्त्रयश्छन्दोमा दशममहरथातिरात्र इति । तथा चाश्वलायनसूत्रम् । पृष्ठ्यस्तोमश्छन्दोमा गौतमस्तोमो विश्वजित् । अयं समूढः । व्यूढो नवरात्रो महाव्रतं वैश्वानर इति द्वितीयः । तत्राश्वलायनमतमवलम्ब्य व्यूढपौण्डरीकस्य प्रयोग उच्यते । तत्र मासापवर्गः । तस्यापरिमिता दीक्षा । द्वादशोपसदः । एकादश सुत्याः । एवं मासापवर्गः । पूर्वेद्युर्नान्दीमुखादि । रात्रावुदकशान्तिं प्रतिसरबन्धं च कृत्वा श्वः स्नानादिपञ्चकं कुर्यात् । ऋत्विजः स्नानादिचतुष्टयं कुर्युः ।

Leaf 19b. विवर्तयन्ति परिधीनित्यस्मिन्पक्षे हृदयशूलोद्वासनश्चात्रोहेन कर्तव्यम् । पत्नीसंयाजादि सर्वमनुक्तं प्रकृत्यग्निष्टोमवत् ।

*Colophon* :—

सन्तिष्ठते व्यूढपौण्डरीकप्रयोगः ।

Then begins the Aikādaśinī.

अथैकादशिनीप्रयोगो लिख्यते ।

एकादशिनाः क्रतुपशवश्च विकल्पन्ते । तत आग्नेयैन्द्राग्नैन्द्रसारस्वत्याः आग्नेयादिवरुणान्ता ऐकादशिनाः पशवः ।

*End:—*

ततः पत्नीशालायामागत्य पात्नीवतं यूपमुपतिष्ठते । आशासानः तिष्ठ इत्यनूहेन । देश-भेदात् । अन्यत् सर्वं प्रकृतिवत् ।

*Colophon:—*

इति यूपैकादशिनीपश्वैकादशिनीत्वाष्ट्रपशोश्च प्रयोगः ।

*Post-Colophon:—*

शके १७७० फाल्गुनशुक्ल १५ तद्दिने पुस्तकं पाण्डरङ्गेण समाप्तः । ग्रन्थसङ्ख्या ५००

---

## 171

## 373. पौर्णमासीष्टिप्रयोगः ।

### PAURṆAMĀSĪṢṬIPRAYOGA.

It is an exhaustive Prayoga of the Paurṇamāsīṣṭi according to the Apastambaśrautasūtra. It contains the Mantras to be recited by the priests and the necessary directions for each and every detail. At the end, the Vaimṛdhaprayoga is also fully described.

*Beginning:—*

अथातः पौर्णमासीष्टिं व्याख्यास्यामः । प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान्धारयमाणः पवित्रपाणिः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति । उपात्तदुरितक्षयद्वारा श्रीविष्णुप्रीत्यर्थ-मनुनिर्वाप्यैन्द्रवैमृधेन सह पूर्णमासेन यक्ष्ये । तेन श्रीविष्णुं प्रीणयानि । ततो वपनम् । विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमि । यक्ष्यमाणोऽप उपस्पृशति । एवं पत्नी । अस्मि-न्पूर्णमासयागेऽध्वर्युं त्वां वृणीमहे । वृतोऽस्मि करिष्यामीत्यध्वर्युः । एवं ब्रह्मादीन् वृत्वा । अध्वर्युराहवनीयार्थमग्निमुद्धृत्य दक्षिणाग्निं प्रणीयाहवनीयं प्रणयति ।

*End:—*

नारिष्ठाय परमात्मन इदम् । आप्यायताम् । जुह्वामुपस्तीर्य । सर्वेषां हविषामुत्तरार्द्धात्स-कृत्सकृत् स्विष्टकृतेऽवद्यति । द्विः पञ्चावत्तिनः । द्विरभिघार्य । दैवतसौविष्टकृतैडचातुर्द्धा-करणिकानामुत्तरमुत्तरं ज्यायांसं हविः प्रत्यभिघारयति । अग्नये स्विष्टकृतेऽनुब्रूहि । दक्षिणाऽतिक्रम्य । आश्रावय । अस्तु श्रौषट् । अग्निं स्विष्टकृतं यज । वषट्कृते जुहोति । अग्नये स्विष्टकृत इदम् । अग्नेः स्विष्टकृतोऽहं देवइज्यया आयुष्मान् यज्ञेन प्रतिष्ठां गमेयम् । प्रत्याक्रम्य । जुह्वामप आनीय ।

वैश्वानरे हविरिदं जुहोमि सहस्रमुत्सं शतधारमेतम् ।
स नः पितरं पितामहं प्रपितामहं स्वर्गे लोके पिन्वमानो बिभर्तु ॥ स्वाहा ।
अग्नये वैश्वानरायेदम् । अन्तःपरिधि निनयति निनयति ।

---

## 374. प्रकृतिविकृतियागकालविवेकः ।

## PRAKṚTIVIKṚTIYĀGAKĀLAVIVEKA.

*By Gaṅgādhara, son of Rāmacandra.*

Here is an exhaustive discussion on the subject of fixing up the exact time in which the Darśapūrṇamāseṣṭi and its Vikṛti sacrifices are to be performed. It is a scholarly work and the author collects several authorities from the Vedas, Śrautasūtras, Smṛtis and the Nibandha works in support of his view-points. He follows generally the Kātyāyana-śrautasūtra, but refers often to other Sūtrakāras also.

*Beginning*:—

श्रीगणेशाय नमः ।
जयत्येको जगत्यां श्रीहरिशङ्करदीक्षितः ।
त्रयीसारविवेक्तृश्रीरामचन्द्रगुरोर्गुरुः ॥ १ ॥
रामचन्द्रं गुरुं नत्वा गर्गकर्कादियाज्ञिकान् ।
श्रुतिसूत्रगुरुप्रोक्तो यागकालो निरूप्यते ॥ २ ॥
तत्रैतच्छ्रूयतेऽमायां पौर्णमास्यां यजेदिति ।
तेनामापूर्णिमारूपं श्रुतिस्मृत्युक्तमुच्यते ॥ ३ ॥

यथा ।

कलाः षोडश कला ध्रुवा सान्याः कलाः ।
पञ्चदशाहोरात्रतः क्रमात् (?) ॥ ४ ॥
क्षीयन्ते वा प्रपूर्यन्ते प्रोच्यन्ते तिथयश्च ताः ।
प्रतिपत्प्रमुखाः पञ्चदश्यन्ताः पक्षयोः कलाः ॥ ५ ॥
प्रतिपन्नाम विज्ञेया चन्द्रस्य प्रथमा कला ।
एवं पञ्चदशी यत्र क्रमात्सम्पूर्यते कला ॥ ६ ॥
पौर्णमासीति सा ज्ञेया क्षीयते यत्र सा त्वमा ।

तथा च श्रुतिः । स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पत्न्यः पञ्चदशकलाः ध्रुववास्य षोडशी कला । रात्रिभिरेवापूर्यतेऽपक्षीयते योऽमावास्यायां रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायत इति । रात्रयस्तिथयः । ततोऽमावास्यानन्तरं प्रातः प्रतिपदादिक्षणे जायते ।

*End*:—

तेन नैमित्तिकेनैव निमित्तानन्तरं कृतिरिति । एवं च सति जननोत्तराव्यवहितपर्वण्येव मुख्यकालात्सूतके जातेष्टिः । सूतकाद्बहिः पर्वसन्निपाते तु तत्रैव । जननाव्यवहितपर्वातिक्रमे मुख्यकालातिक्रमाद्गौणकालाविधानान्नैव जातेष्टिः । अतिपत्तिनिमित्ता पाथिकृतेष्टिरिति सिद्धम् ।

अत्र सम्यगसम्यग्वा लिखितं तद्विमत्सरैः ।
याज्ञिकैः सर्वथा शोध्यं मया तेष्वञ्जलिः कृता ॥
यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव केवलम् ।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्नहि ॥

*Colophon:—*

इति श्रीमन्महायाज्ञिकश्रीहरिशङ्करचरणानुगृहीतमहायाज्ञिकपाठकश्रीरामचन्द्रसूनुना गङ्गाधरेण कृतः प्रकृतिविकृतियागकालविवेकः समाप्तः ।

*Post-Colophon:—*

निगमदृङ्मुनिभूमितहायने ( 1724 ) नभसि कृष्णदले नवमीदिने ।
शिवपुरे शिवदत्तसमाह्वयो व्यलिखदुद्धवशुक्लतनूद्भवः ॥

---

## 173

### 375. प्रकृतिविहारः ।

### PRAKṚTIVIHĀRA.

*By Toro Govinda, brother of Toro Nārāyaṇa.*

In this work the author explains the form of the alter required for the Darśapūrṇamāsa sacrifice in 24 verses following the method prescribed in the Bodhāyana's S'rautasūtra.

*Beginning:—*

श्रीगणेशाय नमः ।

मार्तण्डं भैरवं देवं महालक्ष्मीनृसिंहकम् ।
बौधायनमृषिश्रेष्ठं प्रणम्य पितरौ गुरून् ॥ १ ॥
सर्वतोमुखयज्वाऽपि तोरो नारायणानुजः ।
गोविन्दस्तु विहारस्य प्रमाणं कुरुते स्फुटम् ॥ २ ॥
चतुरस्रां दीर्घकालामपि वा सर्वतः समाम् ।
तत्र प्राच्यां दक्षिणस्यां द्व्यरत्निद्वारसंयुताम् ॥ ३ ॥
एवं निर्माय तन्मध्ये प्राचीसूत्रं निपातयेत् ।
पश्चादारभ्य पूर्वान्ते प्रक्रमाष्टकसम्मिते ॥ ४ ॥
शङ्कुं दत्वाऽथ पश्चान्ते गार्हपत्यं प्रकल्पयेत् ।
द्वादशाङ्गुलसूत्रेण भ्रामयेन्मण्डलाकृतिम् ॥ ५ ॥

*End:—*

अङ्गुलस्य तिलाः प्रोक्ताः चतुस्त्रिंशत्तु सङ्ख्यकाः ।
प्रक्रमो द्विविधः प्रोक्तो द्विपदस्त्रिपदोऽपि वा ॥ २३ ॥
बोधायनीयसूत्रोक्तविहारस्य निरूपणम् ।
अकारि तोरो गोविन्ददीक्षितेन सुबोधकम् ॥ २४ ॥

*Colophon:—*

इति बोधायनसूत्रद्वैधकर्मान्तभाष्यानुसारी प्रकृतिविहारः समाप्तः ।

*Post-Colophon —*

शके १७६३ ध्रुवनामाब्दे आश्विनाश्विकवद्य ४ ते दिवसि मावेगणोपनामकमाधवभट्टेन स्वार्थं परोपकारार्थं च ।

---

## 174

## 376. प्रक्रमादिविचारः ।

### PRAKRAMĀDIVICĀRA.

Here is a polemical discussion on the exact forms in which the Prakrama, Paridhi, Kapālopadhāna and Vedi are to be performed. As the exact definitions are not available in the S'rautasūtras, the author deals with these topics in this short treatise. The MS. is incomplete.

*Beginning:—*

श्रीगणेशाय नमः । अथ प्रक्रमे चिन्त्यते । अष्टसु प्रक्रमेष्वेकादशसु द्वादशसु सप्तसु प्रक्रमेष्वर्धव्यामे च साग्निचित्ये इत्यादिसामान्याकारेण प्रक्रमसङ्ख्योक्ता । नोक्तं प्रमाणं प्रक्रमस्य । अत्र केश्चिदुच्यते ।

आधाने पदिकं कुर्यात् सौमिके द्विगुणो भवेत् ।

अग्नौ त्रिपदकं कुर्यादेतत्प्रक्रमलक्षणम् ॥ इति प्रक्रमप्रमाणम् ।

तदयुक्तम् । गृहद्वयासम्भवात् । अन्यत्राष्टप्रक्रमपक्षे वेदिरेव न सम्भवति । दक्षिणाग्नेरवरुद्धत्वात् ।

*End:—*

तत्र पश्चाद्यजमान इति ब्रह्मणः पश्चात्स्पर्शयोगाच्च वेदेर्दक्षिणतो यजमानस्योपवेशनम् । ततोऽर्थादाहवनीयस्य दक्षिणतो ब्रह्मण उपवेशनम् । आहवनीयमभिमुख उपविशतीत्युक्तत्वाच्च । प्राशित्रस्य ग्रहणोत्तरं प्राशनपक्षे वेद्यामेव । परिधीनपरेण संचरो होष्यत इति गमनागमनं स्रुक्सादनं च सुकरं भवति । अपरिमितां वा इत्यत्रापरिमितं प्रमाणाद्भूय इति शुल्बोक्तेः । अपरिमितशब्दोऽधिकवाची नत्वल्पवाची । अल्पे प्रमाणाभावात् ।

## 175

## 377. प्रतिगरप्रयोगः।

### PRATIGARAPRAYOGA.

Here is a list of the Pratigaras uttered by the priests belonging to the Adhvaryu group when the Hotṛ priest is reciting the Sastra-hymns during the performance of different sacrifices. This MS. seems to be a fragment of the Mahāvrataprayoga. It follows the Drāhyāyaṇaśrautasūtra.

*Beginning*:—

अस्य शास्त्रस्य स्तोत्रियानुरूपात्पूर्वशंसनात्पूर्वमभिप्रवः सुराधसमित्याद्यवसानेषु ओथामोदैवमदे इति प्रतिगरः। प्रणवेषु मदामोदैवोमथेति प्रतिगरः। सर्वास्वेकपदासु प्रणवान्तं प्रतिगरः। दूरोहणे चावसानयुक्ते प्रणवे प्रणवान्तः प्रतिगरः। एवमुक्थ्यशास्त्रे प्रशास्तुः प्रतिगरः।

*End*:—

अच्छावाकस्योक्थ्ये प्रतिगरः। प्रवोमहेमतय इति सूक्ते न्यूङ्खेषु न्यूङ्खः प्रतिगरः। मदे मधोमदस्य मदिरस्य मदैवो ओ ओ ओं मोथा मोद इवोमिति प्रतिगरः। निष्कैवल्यशास्त्रे होतुः पृष्ठे न्यूङ्खेषु षट्सु ओ ओ ओ ओ औ मेदामो दैवोमथ इति प्रतिगरो भवति। अन्यत्सर्वं प्रकृतिवत्।

---

## 176

## 378. प्रतिगरप्रयोगमञ्जरी।

### PRATIGARAPRAYOGAMAÑJARĪ.

*By Jagannātha Dīkṣita, son of Yādava Somayājin.*

Here is a scholarly discussion on the method of uttering the Pratigaras by the priests who are authorized to recite them in various Vedic sacrifices when the Sastra-hymns are being chanted. It is according to the Aśvalāyanaśrautasūtra.

*Beginning*:—

श्रीगणेशाय नमः।

नत्वाश्वलायनाचार्यमाश्वलायनसूत्रगान्।
आश्वलायनसूत्रोक्तशास्त्रप्रतिगरान्ब्रुवे ॥ १ ॥

अथाश्वलायनोक्तप्रतिगरप्रयोग उच्यते। तत्र प्रतिगरो नाम प्रतिगीर्यते प्रत्युच्चार्यत इति प्रतिगरः। नन्विह हि शास्त्रे प्रतिगर एव विधीयते न कर्त्ता। न च वाच्यं कर्मचोदनायां होतारमिति होतैव कर्त्तेति। तस्य शास्त्रे व्यापृतत्वात् प्रतिगरस्य शास्त्रसमकालत्वात् प्रतिगरशब्दवाच्यत्वाच्च। तस्मात् कर्त्रन्तरमन्वेषणीयम्। तत्राध्वर्युरेव भवति।

शंसावाध्वर्यो प्रति मे गृणीहीति मन्त्रवर्णात् । अध्वर्यो शोंसा वोमित्याहावदर्शनाच्च ।
× × × कात्स्न्येनाध्वर्यवे आम्नानाभावात् । बह्वृचब्राह्मणे विहितत्वाच्च । मन्त्रलिङ्गं तु कथञ्चिद्योजनीयम् । वृत्तिकारभाष्यकारावप्येवमाहतुः । तस्मादग्न्भ्रेषप्रायश्चित्तं युक्तमिति सुधीभिरूहनीयम् ।

अथ प्रतिगरा उच्यन्ते । तत्रेदं सूत्रम् । शस्त्रस्वरः प्रतिगर ओथामोदैवेति शोंसामो दैवेत्याहावे प्लुतादिः प्रणवे प्लुतादिरवसाने प्रणवे प्रणव आहावोत्तरेऽवसाने च प्रणवान्तो वा । यत्र यत्रचान्तःशस्त्रं प्रणवेनावस्यति प्रणवान्त एव तत्र प्रतिगरः । शस्त्रान्ते तु प्रणव इति । अयमर्थः ।

*End.*—

यन्विमं पुत्रमिच्छन्तीत्येवमाद्यासु गाथासु तथेति प्रतिगरः । एवं तथेति गाथाया इति वचनात् । सर्वत्र ब्राह्मणजा श्लोका गाथा इत्युच्यन्ते । ब्राह्मणवाक्येषु प्रतिगरो नास्ति । ऋचां गाथानां च प्रतिगरविधानात् । अयं प्रतिगरो ऋगन्ते गाथान्ते च वेदितव्यः । नान्यत्र भवतीति वृत्तिकारोक्तेः । अथाश्वमेधे पारिप्लवशंसने हिरण्मये कूर्चे उपविश्य प्रतिगृणाति । हिरण्मये कूर्चेऽध्वर्युरासीनः प्रतिगृणातीति वचनात् । तत्र यदा होताऽध्वर्यो इत्याह्वयीत तदा हो होतरिति प्रतिगरं ब्रूयात् । अयमेव प्रतिगरोऽत्रैव वक्तव्यो नान्यत्रेति वेदितव्यम् । विधानाभावादेति सर्वं शिवम् ।

जगन्नाथस्य सन्तुष्ट्यै यज्वोपकृतये सताम् ।
तथा मुदे प्रबोभूयाज्जगन्नाथकृतोद्यमः ॥

*Colophon:*—

इति श्रीमत्सकलविद्याविशारदात्रेयचिपोळ्णकरोपाह्वयादवसोमयाजितनुजजगन्नाथ-दीक्षितविरचिताश्वलायनसूत्रोक्तप्रतिगरप्रयोगमञ्जरी समाप्तेति ।

---

**177**

## 379. प्रतिप्रस्थातृप्रयोगः ।

### PRATIPRASTHĀTṚPRAYOGA.

It is a manual dealing with the duties of the Pratiprasthātṛ priest, the assistant of the Adhvaryu, in the Varuṇapraghāsaparvan of the Cāturmāsya sacrifice. All the Mantras in the MS. are accented.

*Beginning:*—

श्रीगणेशाय नमः । अथ प्रतिप्रस्थातृत्वप्रयोगः । एषु वरुणप्रघासेषु प्रतिप्रस्थातारं त्वां वृणे । वृतोऽस्मि । मधुपर्कादि । त्वया वेदमिति वेदं कृत्वा । स्फ्यादानादि स्ववेदिमानम् । ऋतमसीति पूर्वपरिग्रहः । नेमान्तराः । अथाग्निप्रणयनम् । प्रथमायां त्रिरनूक्तायां गच्छेयुः । अग्नेर्भस्मास्यग्नेः पुरीषमसि । अग्ने बाधस्व विमृधो वुदस्वापामीवा । अपरक्षांसिसेध ।

*End:*—

एधोऽस्येधिषीमहि । प्रथमाम् । समिदसि द्वितीयाम् । तेजोऽसि तेजोऽनुप्रेहि इति तृतीयाम् । अपोऽन्वचारिषं रसेन समसृक्ष्महि पयस्वानग्न आगमं तं मा संसृज वर्चसा । इत्युपस्थाय यं देवा इत्यादि । सन्तिष्ठते प्रस्थातृत्वम् ।

*Colophon* —

इति चातुर्मास्यान्तर्गतवरुणप्रघासाङ्गप्रतिप्रस्थातृत्वप्रयोगः समाप्तः ।

*Post-Colophon* —

शके १७३७ युवानामसंवत्सरे वैशाखवद्य ४ ते दिवसि मात्वेगणोपनामकबालम्भट्टात्मज-माधवभट्टेन लिखितं स्वार्थं परोपकारार्थं च ।

---

## 178

### 380. प्रतिप्रस्थातृप्रयोगः ।

### PRATIPRASTHĀTṚPRAYOGA.

It is a manual guiding the Pratiprasthātṛ priest in his duties for the Jyotiṣṭoma sacrifice according to the Apastambaśrautasūtra It is incomplete.

*Beginning.*—

श्रीगणेशाय नमः । आपस्तम्बसोमप्रस्थातृत्वप्रयोगो लिख्यते । सोमप्रवाकः । अमुक-शर्मणः सोमो भविष्यति तत्र भवता प्रतिप्रस्थात्रियं कर्तव्यम् । को यज्ञः । कल्याण्यो ज्योतिष्टोमसोमः । क ऋत्विजः । आधानादिषु केशवमित्रादयः । का दक्षिणा । सन्ति कल्याण्यो दक्षिणाः सुरूपा बहुमूल्या द्वादशशतं गावः । महन्मे वोचो भर्गो मे वोचो यशो मे० तेन भुक्षिषीय । जपित्वा । आपो मे होत्रा० प्रतिप्रस्थाताऽहं ते मानुषः । स्वगृह्योक्त-मधुपर्कः । दीक्षणीयेष्टिः । वसति प्रायणेष्टिः । सोमक्रयः । प्रतिप्रस्थाता राजासन्दीमुद्वहति ।

*End:*—

प्रतिप्रस्थाता द्विदैवत्यपात्राणि विमुञ्चति । वायुर्वो विमुञ्चत्विति । विमुच्यापरया द्वारा निर्हृत्य मार्जालीये प्रक्षाल्य पूर्वया द्वाराऽतिहृत्य यथायतनं सादयति । अनूयाजादि-ष्वेकादशगुदकाण्डहोमः । निरूढवत् वाजिनभक्ष्यः । दधिक्राव्णो० । आग्नीध्रे दधिद्रप्सान् भक्षयन्ति । उभा कवी युवा० सृजामहे० तानूनप्त्रिणः सख्यानि विसृजन्ते । पशुवत् हृदयशूलमुद्वासयति । अथावभृथस्य तन्त्रं प्रक्रमति ।

---

## 179

### 381. प्रतिप्रस्थातृप्रयोगः ।

### PRATIPRASTHĀTṚPRAYOGA.

This is another manual dealing with the duties of the Pratiprasthātṛ priest in the Atyagniṣṭoma sacrifice which is a variety of the Jyotiṣṭoma. This follows the Bodhāyanaśrautasūtra. The MS. is incomplete at the end.

*Beginning:—*

श्रीगणेशाय नमः। बोधायनात्यग्निष्टोमप्रतिप्रस्थातृप्रयोगः। प्रतिप्रस्थाता स्नात्वाऽऽचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य श्रीपरमेश्वरप्रीत्यर्थमार्त्विज्यं करिष्यन्नात्मनः शुद्ध्यर्थं पवनमन्त्राचमनमन्त्रप्रोक्षणानि करिष्य इति सङ्कल्प्य पवनमन्त्राचमनमन्त्रप्रोक्षणानि कृत्वा ऋत्विग्भिः सहाग्न्यगारं प्रविश्योत्तरत उपविशति। तन्म ऋध्यतामित्युक्ते तत्त ऋध्यतां तत्ते समृध्यतां तत्ते सम्पद्यतां काम इति प्रतिब्रूयात्। अमुकवर्मणः सोमो भविष्यति तत्र भवता प्रातिप्रस्थात्रं कर्तव्यमिति सोमप्रवाकेणोक्तः तं पृच्छति को यज्ञ इति। ज्योतिष्टोमोऽत्यग्निष्टोमः सोम इत्युक्ते क ऋत्विज इति पृच्छति। यज्ञदत्तशर्मादय इत्युक्ते के याजयन्तीति पृच्छति। ते चान्ये चेत्युक्ते कच्चिन्नाहीन इति पृच्छति। नाहीनो ज्योतिष्टोमोऽत्यग्निष्टोमः सोम इत्युक्ते कच्चित्कल्याण्यो दक्षिणा इति पृच्छति। सन्ति कल्याण्यो दक्षिणाः सुरूपा बहुमूल्या द्वादशशतं गाव इत्युक्तेऽमुकवर्माऽहं प्रातिप्रस्थात्रेण त्वागच्छामि याजयतु मा भवानिति यजमानेन सम्प्रार्थ्यादित्यो मेऽध्वर्युरिति वृतो महन्मे वोचो भर्गो मे वोचो यशो मे वोचः स्तोमं मे वोचः × × × तन्मा विशतु तेन भुक्षिषीय। अथ बौधायनमधुपर्कः।

*End.—*

उपांशुग्रहणकाले वृद्धिवाचने कृते सन्तृसस्य राज्ञः सव्यपाणावङ्गुल्यन्तरालेषु द्वौ द्वावंशाविति षडंशान् सचते। यदाऽध्वर्युः सम्प्रेष्यति प्रतिप्रस्थातरुदकंसेन उदचमसेन वा जघनेनाहवनीयं प्रत्युपलम्बस्वेति। तदा उदपात्रमादाय जघनेनाहवनीयं तिष्ठति। अथ सव्येनैव पाणिना उपांशुपात्रमप्यादत्ते। अंशुग्रहे हुते एतदुदपात्रमध्वर्यवे प्रयच्छति। तेनाध्वर्युर्मार्जयति। यदाऽध्वर्युरुपांशु।

---

## 180

### 385. प्रयोगरत्नमाला।

### PRAYOGARATNAMĀLA.

*By Viśvambharadīkṣita Thiṭe, son of Mayūreśvara.*

This treatise deals with all sorts of expiatory rites in connection with all the Vedic sacrifices. It contains exhaustive Prayogas for all of them. In the beginning of the MS., there are 12 leaves giving a list of contents of the work under 230 main heads of the Prāyaścittas. It is a scholarly work and the author discusses in the beginning several important features of the sacrifices and quotes several authorities in support of his views. The work is intended for those who belong to the Ṛkśākhā and follow the method of performance according to the Bodhāyanaśrautasūtra. The author says in the beginning that he has followed in preparing this work both the Śrautasūtras of Āśvalāyana and Bodhāyana and also the commentaries thereon. There is another MS. of this work where the Prāyaścittas for the whole of the Somaprayoga is treated.

*Beginning:—*

श्रीगणेशाय नमः । श्रीविष्णवे नमः ।

विश्वेशं माधवं सूर्यं गणेशं जगदम्बिकाम् ।
अग्निश्च भैरवं ध्यात्वा नत्वा च पितरौ गुरून् ॥
आश्वलायनसूत्रं च तद्भाष्याणि तथैव च ।
तद्वृत्तिं च प्रयोगांश्च ग्रन्थानन्यान्यथोदितान् ॥
यानि बौधायनोक्तानि सूत्राणि विविधानि च ।
तद्भाष्याणि प्रयोगांश्च प्रदीपादीन्यथामति ॥
सूत्रान्तराणि चालोच्य यत्नतः स्वहिताय वै ।
प्रयोगरत्नमालेयं प्रायश्चित्तस्य ग्रथ्यते ॥
बौधायनीयकल्पस्य कृतो येन परिग्रहः ।
ऋक्शाखीयः स यष्टा चेत्तदैतस्याः परिग्रहः ॥

अथ तदुपयोगित्वेन किञ्चिल्लिख्यते । तत्रादौ परिभाषाप्रकरणमुच्यते । तत्राश्वलायनसूत्रकारः । विध्यपराधे प्रायश्चित्तिरिति । विधिशब्देन श्रुतिविहितमुच्यते । अपराधोऽन्यथाभावोऽभावो वा । विहितस्याकरणेऽन्यथाकरणे च प्रायश्चित्तिः कर्त्तव्या । प्रायो विनाशः । चित्तिः सन्धानम् । विनष्टसन्धानं प्रायश्चित्तिरित्युक्तं भवतीति वृत्तिः । तत्सन्धानं द्विविधम् । सेन्द्रियरूपमतीन्द्रियरूपञ्च । तत्राद्यस्योदाहरणम् । आहवनीयमवदीप्यमानमर्वाक् शम्यापरासादितं त एकं पर उत एकमिति संवपेदित्यादि आश्वलायनसूत्रम् । द्वितीयस्याग्निहोत्रहोमे चेत्यादि आश्वलायनसूत्रम् । अत्र किञ्चिदुच्यते ।

*End:—*

अथ व्याहृतिभिः सर्वप्रायश्चित्तम् । तत्र बौधायनः ।

व्याहृतयश्चतुष्पादा नवांशाश्च षडक्षराः ।
चतुर्णामपि वेदानामादिमध्यावसानिकाः ॥
मन्त्रोनं वाऽतिरिक्तं वा दुरिष्टं वापि यद्भवेत् ।
व्यपोहयन्ति पाप्मानं तस्माद्व्याहृतयः स्मृताः॥ इति।

यद्यृक्तो यज्ञभ्रेष आगच्छेद्भूरिति गार्हपत्ये जुहुयात् । यदि यजुष्टो भुव इत्यन्वाहार्यपचने । यदि सामतः सुवरित्याहवनीये । अथ यदि सर्वतः सर्वा जुहुयादिति ।

अत्र विवरणोक्तं किञ्चिल्लिख्यते । व्याहृतयस्तु चतुष्पादाः । व्यस्तास्त्रयः । समस्ता एका । मन्त्रोनं मन्त्रेणोनं कर्म । दुरिष्टम् । दुष्टेन इष्टं दुष्टेन हविःकर्त्रा मन्त्रेण वेति । यदि सर्वतः सर्वा जुहुयादिति ब्रह्मत्वभ्रेष इत्यर्थः । तत्र समस्तव्याहृतिराहवनीये जुहुयात् । एता व्याहृतयोऽग्निहोत्रसोमव्यतिरिक्तं प्रायश्चित्तमिति ।

*Colophon:—*

श्रीमद्द्रविडरामचन्द्रदीक्षितप्रसादाद्वैराजक्षेत्रापरनामवांयिक्षेत्रवासि थिटे इत्युपनामकमयूरेश्वरात्मजविश्वम्भरदीक्षितग्रथितायां श्रौतप्रायश्चित्तप्रयोगरत्नमालायां प्रकीर्णकप्रकरणम् ।

## 181

## 387. प्रवसद्याजमानविधिः ।

PRAVASADYĀJAMĀNAVIDHI.

This treatise deals with the duties of the Yajamāna or sacrificer when he is away from his house on the days of the Iṣṭi or Homa and also when his wife is out of the house due to periodic illness. This follows the Āpastambaśrautasūtra.

*Beginning.*—

श्रीगणपतये नमः। अथ प्रोषितस्य यजमानस्य प्रवासे कर्त्तव्यविधिः। तत्र त्रिकाण्डमण्डनः।

प्रोषितस्याधुना तत्र स्वयं कृत्यं निरूप्यते।
प्रवसन्निष्टिकाले वा होमकाले सदाऽपि वा॥
उभयत्रापि याजमानं विहाराभिमुखो जपेत्।
यत्रान्यत्राप्यधिकृतस्तदीयं याजमानकम्॥
तत्सर्वं प्रजपेत्काले विहाराभिमुखः पतिः।
विहाराभिमुखत्वं तु वाराहो न नियच्छति॥
यावन्ति स्वामिकार्याणि मन्त्रोक्तानीतराणि च।
तेषां निवृत्तिः सर्वेषां तत्स्थाने जप एव हि॥

× × × ×

तत्र प्रयोगः। यजमानो यागदिने विहाराभिमुखः प्राङ्मुखो वा विहृदसीत्यादि ॐ निर्वप दक्षिणत एत उत्तरतः परीत ब्राह्मणांस्तर्पयत वै इति प्रेषरहितान् वृष्टिरसीत्यादि-मन्त्रान् जपेत्।

× × × ×

इति प्रवसद्याजमानविधिः।

अथ पत्नीरजस्वलायां सत्यां कर्त्तव्येष्टिप्रयोगः।

*End.*—

तथा च कात्यायनः।

प्रक्रान्तमग्निहोत्रादि कर्म यच्छ्रुतिचोदितम्।
आर्तवाभिप्लुतां पत्नीं विहाय कुरुते द्विजः॥
इष्ट्यामारम्भणीयायां प्रकृतेर्वैकृतेष्टिषु।
कृतादूर्ध्वमृतुं दृष्ट्वा कुर्यात्कार्यं न लोपयेत्॥ इति।

ततो ऋतुगमने अमूहमस्मि सा त्वम्। द्यौरहं पृथिवी त्वम्। सामाहमृक्त्वम्। तावेहि सम्भवाव। सह रेतो दधावहै। पुंसे पुत्राय वेत्त वै। रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय। इत्याह्वानम्। ततो विष्णुर्योनिमित्यादि त्रयोदशभिरभिमन्त्र्य हिङ्कृत्य तामुपेयात्।

*Colophon:*—

समाप्तोऽयं प्रोषितस्य यजमानस्य प्रवासे कर्तव्यविधिः।

## 182

### 388. प्रवासयाजमानम् ।

### PRAVĀSAYĀJAMĀNA.

*By Yājñika S'ivadhara.*

This MS. contains a work dealing with the duties of the Adhvaryu etc. who officiate for the sacrificer in his absence at the full and new-moon sacrifices. The MS. also contains at the end a portion of the work Pravasadyājamānavidhi described above. The colophon and the author's name are copied by a different hand.

*Beginning*—

यजमाने प्रवसति सूत्रभाष्यानुसारतः अध्वर्य्वादिभिर्गृहे कर्त्तव्येष्टिप्रयोगः । पत्नी विहाराद्बहिः द्विराचम्य तीर्थेन प्रविश्य गार्हपत्यस्य पश्चाद्दर्भेष्वासीना अमन्त्रकं यावदङ्गग्लानिस्तावत्प्राणानायम्य पूर्णमासेन यक्ष्ये दर्शेन यक्ष्य इति सङ्कल्प्य । अस्यां पूर्णमासेष्ट्यामध्वर्युं त्वामहं वृण इत्यादिभिरध्वर्य्वादिचतुरो वृणीते । वृतोऽध्वर्युर्गार्हपत्यादाहवनीयमुद्धृत्येत्यादि ।

*End*:—

वेदस्पर्शः पूर्ववह्नेरुपस्थानं समिन्धनम् ।
विप्रतर्पणमित्यादि विहारेऽध्वर्युराचरेत् ॥
इष्टिप्रयोजनार्थानि स्वामिकार्याणि यानि तु ।
तूष्णीमध्वर्युरेतानि कुर्यान्मन्त्रान् जपेत्पतिः ॥
अदृष्टार्थानि लुप्यन्ते जपेन्मन्त्रांश्च तानपि ।

इति त्रिकाण्डमण्डनोक्तेः । यद्यपि त्रिकाण्डमण्डनकारिकायां यजमानपदार्थानां तूष्णीकत्वं प्रतीयते तथापि रामाण्डारादिग्रन्थावलोकनेन मन्त्रत्वमुचितम् । विष्णोः क्रमोत्सर्पणं तु तत्रस्थ एव यजमानः कुर्यात् । न तु त्यागादीनीत्येके । स्वग्रामे पत्न्या ऋत्विग्द्वाराऽग्निहोत्रपिण्डपितृयज्ञदर्शपूर्णमासाः कर्त्तव्याः ।

*Colophon*:—

इति याज्ञिकशिवधरेण यजमाने प्रवसति गृहेऽन्यकर्तृकेष्टिप्रयोगः ।

Then begins the Pravasadyājamānavidhi.

*Post-Colophon.*—

शके १७५७ दुर्मुखाब्दे भाद्रशुक्लद्वितीयायां माचेगणोपनामकमाधवभट्टेनेदं पुस्तकं लिखितं स्वार्थं परोपकारार्थं च ।

---

## 183

### 389 प्रवासविधिप्रयोगः ।

### PRAVASAVIDHIPRAYOGA.

This treatise deals with a special form of worship of the three sacrificial fires by the Yajamāna when he goes out for earning money. This is according to the Āśvalāyanaśrautasūtra.

*Beginning:—*

श्रीगणेशाय नमः । अनन्वाहिताग्निर्भार्यासमीपेऽग्निं निधाय धनाद्यर्थं प्रयाणप्रसक्तौ प्रवासोपस्थानं कृत्वा गच्छेत् । स च धनाद्यर्थं न तीर्थाद्यर्थम् । तदुक्तं त्रिकाण्डमण्डने ।

द्रव्याण्यर्जयितुं गच्छेत्तीर्थाद्यर्थं न तु क्वचित् । इति । विद्यार्थमपि कार्यं इत्युक्तमाचार्यैः । तत्र प्रयोगः ।

इदं कर्म आहिताग्निः स्वयमेव कुर्यात् । अग्नीन् विहृत्य प्रज्वलयेत् । विहाराद्बहिर्गत्वाऽऽचम्य तीर्थेन प्रविश्य गार्हपत्यस्य पश्चादुपविश्य प्राणानायम्य मम धनाद्यर्जनार्थं प्रवासविधिं करिष्य इति सङ्कल्प्य आहवनीयस्य वायव्येऽत्यन्तसमीपं गत्वा तमुपतिष्ठते । शंस्य पशून् मे पाहि ततो गार्हपत्यस्य वायव्यदेशे तिष्ठन् नर्य प्रजां मे पाहि । तेनैव मार्गेण दक्षिणाग्नेर्वायव्यदेशे स्थित्वा अथर्व पितॄन् मे पाहि ।

*End:—*

ततस्तान् प्रपद्येत ।

गृहानहं सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरान् ।
इरां वहन्तो घृतमुक्षमाणास्तेष्वहं सुमनाः संविशानि ॥ इति ॥

ततः शिवं शंग्मं शंयोः शंयोरिति मन्त्रावृत्या त्रिरनुवीक्षणं कुर्यात् । अथवा अपि पन्थामित्युक्त्वा विहृतां ज्वलितां तीर्थेन प्रपद्येत । गार्हपत्यस्य पश्चात् स्थित्वा अभयं वोऽभयं मेऽस्त्वित्युपस्थाय परिसमूहनादिशेषं पूर्ववत् । दशरात्रादूर्ध्वं प्रवासे उपस्थाय मनस्वतीर्हुत्वा परिसमूहनादि पूर्ववत् । अनुपस्थिताग्नेः प्रवासे इहैव सन्नित्ये तावदेव नान्यत्किञ्चिदित्युक्तं वृत्तिकृता । संवत्सरादूर्ध्वं प्रवासे पवित्रेष्टिः कार्या ।

*Colophon:—*

इति प्रवासोपस्थानविधिः ।

---

## 184

### 390. प्रवासविधिप्रयोगः ।

### PRAVĀSAVIDHIPRAYOGA.

This MS. also contains the same work as that described above, but there are many variant readings. As this work closely follows the Agnihotraprayoga of Anantadeva which is another work in this codex, it is possible to think that the authorship of this work may also be attributed to him.

---

## 185

### 392. प्रवासविधिप्रयोगः ।

### PRAVĀSAVIDHIPRAYOGA.

This is another treatise dealing with the Pravāsavidhi. But it is similar to the work described above with some slight differences.

*Beginning*:—

अग्नीन् विहृत्य प्रज्वलयेत् । तीर्थेन प्रविश्य गार्हपत्यस्य पश्चादुपविश्य प्राणानायम्य मम धनाद्यर्जनार्थं प्रवासविधिं करिष्य इति सङ्कल्प्याहवनीयस्य वायव्येऽत्यन्तसमीपं गत्वा तमुपतिष्ठते ।

*End*:—

अथागमनविधिः । अपि पन्थामित्युक्त्वा विहृतां ज्वलितां ज्ञात्वा तीर्थेन प्रविश्य गार्हपत्यस्य पश्चात् स्थित्वा अभयं वोऽभयं मेऽस्त्वित्युक्त्वा परिसमूहनादि । शेषं पूर्ववत् । दशरात्रादूर्ध्वं प्रवासे तूपस्थाय मनस्वतीर्हुत्वा परिसमूहनादि पूर्ववत् ।

*Colophon*:—

इति प्रवासविधिः समाप्तः ।

---

## 186

### 396. प्रवासविधिप्रयोगः ।

### PRAVĀSAVIDHIPRAYOGA.

This also is another Pravāsavidhiprayoga and seems to be the last part of the Agnihotrahomaprayoga of Anantadeva in the same way as the MS. described above under No. 184.

---

## 187

### 400. प्रशास्तृप्रयोगः ।

### PRAŚĀSTṚPRAYOGA.

This treatise gives directions for the duties of the Praśāstṛ priest in the Nirūḍhapaśubandha sacrifice. Praśāstā is also known as the Maitrāvaruṇa and he is an assistant to the Hotṛ priest.

*Beginning*:—

अस्मिन्निरूढपशुबन्धे प्रशास्तारं त्वां वृणीमहे । वृतोऽस्मि करिष्यामि । तीर्थेन प्रपद्य मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रतिगृह्णामि अवक्रो विधुरो भूयासमिति दक्षिणोत्तराभ्यां पाणिभ्यां दण्डं प्रतिगृह्य उत्तरेण होतारमतिव्रजेत् । दक्षिणेन दण्डं हरेन्न चानेन संस्पृशेदात्मानं वाऽन्यं वाऽऽप्रैषवचनात् । प्रेषितो वेद्यां दण्डमवष्टभ्य ब्रूयात् । होता यक्षदग्निं समिधासुषमिधा समिद्धन्नाभा पृथिव्यास्संगथे वामस्य ।

*End*:—

यजमानो बहुभ्य आसंगतेभ्यः । एष मे देवेषु वसुवार्यां यक्ष्यत इति ता या देवा देवता नान्यदुस्तान्यस्मा आच शास्वाच गुरस्वेषितश्च होतुरसि भद्रवाच्याय प्रेषितो मानुषस्सूक्तवाकाय सूक्तान् ब्रूहि । अत्राग्नौ दण्डं प्रहरत् यज्ञपुच्छं होतृवत् । हरिः ओम् ।

---

## 188

### 401. प्राजापत्येष्टिप्रयोगः ।

### PRĀJĀPATYEṢṬIPRAYOGA.

This is a manual of the Prājāpatyeṣṭi which should be performed by those who want to renounce this world and adopt the Sannyāsāśrama. This is also known as the Utsargeṣṭi and is described above under work No. 200. At the end of this work, there are some alternative Prayogas and the sacrificers are advised to perform them when they are unable to do the Prājāpatyeṣṭi.

*Beginning*—

श्रीगणेशाय नमः ।

अथ प्राजापत्येष्टिर्लिख्यते । आहिताग्निः सन्न्यासमिति च । अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा पूर्ववत्वात् सन्धिपर्वणि प्राकृतं कर्म समाप्य प्राजापत्येष्टिं कुर्यात् । अद्येत्यादि । सर्वकर्मपरित्यागार्थं चतुर्थाश्रमस्वीकारार्थं च प्राजापत्येष्ट्या यक्ष्ये । विद्युत् । अग्नीन् विहृत्य । अद्य यज्ञाय । इमामूर्जं पञ्चदशीं० । ऐष्टिकं हविः । अमावास्यायां पौर्णमास्यां वा तन्त्रम् । पञ्चदश सामिधेन्यः । पात्रप्रयोगकाले द्वादश कपालानि स्फ्यश्च द्वंद्वम् । पुरतोऽन्वाहार्यस्थालीवर्जमितराणि प्रकृतिवत् ।

*End:*—

दक्षिणत एत ब्राह्मणाः । इदं वो हिरण्यं यथाभागम् । राजा त्वा० णेऽग्नये हिरण्यम् । तेनामृतत्वमश्यामित्यादि । सूक्तवाके । प्रजापतिरहमु० । देवेभ्य आज्यपेभ्य इत्यादि । यज्ञो बभूव । यज्ञशं चमवर्जम् । ब्राह्मणतर्पणान्तं समानम् ।

*Colophon:*—

सन्तिष्ठते प्राजापत्येष्टिः ।

आज्यहविष्कं वा कुर्यात् । प्राजापत्ये वैश्वानरीं त्रैधातवीयां वा सर्वस्वदक्षिणाग्निमिष्टिं कुर्यात् । अपुत्रश्चेन्मुमूर्षोरासन्नकाले इष्ट्यशक्ताविष्टीनां मध्ये यः कश्चिद्देवतायै पूर्णाहुतिं जुहुयात् । × × × × ×

गार्हपत्यस्य पश्चादुपविश्य । अग्निं मनसि सम्यग्ध्यात्वा । या ते अग्ने० सक्षय एहि । इत्यात्मनि समारोप्य विष्णुं स्मरेत् । ततः सन्न्यासं कुर्यात् ।

*Post-Colophon:*—

उम्रजकरोपनाम्नो रामचन्द्रसूनोर्लक्ष्मणस्येदं पुस्तकम् । तैलङ्गदेशे रुद्रनूरग्रामे ।

---

## 189

### 403. प्रायश्चित्तकल्पतरुः ।

### PRĀYAŚCITTAKALPATARU.

This treatise deals with the expiatory ceremonies for the Vedic sacrifices. It is intended for the followers of the Āśvalāyanaśrautasūtra. The anonymous author of the work states that he had compiled here not only those Prāyaścittas mentioned in the Āśvalāyanaśrautasūtra

and the Brāhmaṇa portions of the Vedas but also from the other Srautasūtras whenever necessary. The Prāyaścittas collected here are for the Adhāna, Agnihotra and Darśapūrnamāsa.

*Beginning*:—

श्रीगणेशाय नमः ।

प्रणम्य विष्णुं देवेशमाश्वलायनगोचरम्(ः) ।
क्रियते सुखबोधाय प्रायश्चित्तमहीरुहम्(ः) ॥ १ ॥
आश्वलायनसूत्रोक्तमनुक्तौ ब्राह्मणोदितम् ।
प्रसङ्गादन्यशाखीयं प्रायश्चित्तमिहोच्यते ॥ २ ॥

अथ परिभाषा । यत्र प्रायश्चित्तं नोक्तं तत्र सर्वप्रायश्चित्तम् । आज्यं संस्कृतं चेत्तदा गार्हपत्यस्य पश्चादुपविश्य द्वे पवित्रे कृत्वा आज्यस्थाल्यां निधाय विलीनाज्यं तस्मिन्निक्षिप्य दर्भाग्रद्वयं निक्षिप्योल्मुकेन त्रिः पर्यग्निकृत्वा निक्षिप्याप उपस्पृश्य सवितुष्ट्वा इति मन्त्रेण तूष्णीं वोत्पूय पवित्रेऽग्नावाधाय स्रुवं संमृज्याचम्य प्राणानायम्य देशकालावनुकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं कर्मसाङ्गतासिद्ध्यर्थं सर्वप्रायश्चित्तं करिष्ये ।

× × × ×

Leaf 3 b. इति प्रायश्चित्तकल्पतरौ परिभाषा ।
अथाग्निहोत्रप्रायश्चित्तानि ।

Leaf 36 a. इति प्रायश्चित्तकल्पतरावग्निहोत्रप्रायश्चित्तानि ।

अथैष्टिकानि । होमार्थमग्नी अनिरस्यान्वाधानार्थमग्नी निहितौ तदा लौकिकारण्योरयं ते योनिरिति समारोप्योपावरोहेति मथित्वा स्वस्थाने निदध्यात् ।

*End*:—

त्र्यंबकार्थं कृत्स्नाग्नीन् स्वस्थाने निधाय सर्वप्रायश्चित्तं कृत्वा पुनरेकदेशोद्धरणम् । प्रणयनोत्तरं योनिभूतदक्षिणाग्नेरनुगमे न प्रायश्चित्तम् । भवं तन्न इति होमाय वैश्वदेवादिषु मथिताग्नेरनुगमे पुनर्मन्थनं सर्वप्रायश्चित्तम् । न होतुः पुनर्मंथनीयापाठः ।

*Colophon*:—

इति प्रायश्चित्तकल्पतरौ आधानादिप्रायश्चित्तानि ।

अथ कल्पतरुं त्वेनमाश्वलायनशाखिनः ।
भव(ज)न्तु सुखिनः श्रौतमार्गे श्रान्ता गतागतैः ॥ १ ॥
प्रपश्चितं पूर्वग्रन्थात्स्वयुक्त्या न हि किंचन ।
प्रमादादसदप्यत्र तच्छोध्यं याज्ञिकैर्बुधैः ॥ २ ॥

इत्याश्वलायनशाखिनां प्रायश्चित्तकल्पतरुराश्रयीभूतः ।

*Post-Colophon*:—

संवत् १८२३ व्ययनामाब्दे लिखितं सदाशिवसूनुदामोदरेण लिखितम् ॥
तोरोपनाम्नस्येदं पुस्तकम् ।

## 190

### 404. (प्रायश्चित्तकारिका।)

### ( PRĀYAS'CITTAKĀRIKA. )

( *By Kapardī* )

This MS. contains the memorial verses dealing with the expiatory rites for the Vedic sacrifices. The work begins abruptly without a benedictory verse and treats of the following topics. 1. प्रायश्चित्तपरिभाषा or the general rules for the expiatory rites, 2. हविर्व्यापत्तिनिमित्तप्रायश्चित्त or atonement for the damage done to the offerings, 3. अरणिनाश or damage to the Aranis, 4. अग्निनाश or damage of the sacrificial fires, 5. यजमानपत्नी-दोष or defect found in the sacrificer or his wife. The MS. is incomplete in the middle and at the end and contains only 13 leaves with a uniform marginal remark क in all the leaves. Though there is no mention of the title of the work and the name of the author in the MS., it is possible to think, on the strength of this marginal remark, that Kapardin is likely to be the author of these Kārikas and this work may be the part of his voluminous treatise known as the Kapardikārikā. The scribe, while copying this codex seems to have systematically followed a method of noting the first letter of the author's name in the margin of each leaf and as such the other leaves in this codex, containing the Jaiminīyaśrautasūtra and the Trikāṇḍamaṇḍana's work, are also regularly marked respectively with जै and त्रिकाण्डी in the margin. The work generally follows the 9th Praśna of the Āpastambaśrautasūtra where the expiatory rites are treated of.

*Beginning.*—

विधीनामपराधे तु प्रायश्चित्तं प्रचक्षते ।
श्रुतिप्रचोदितं कर्म विधिरित्यभिधीयते ॥
अन्यथा करणं प्राहुरपराधस्तु कर्मणाम् ।
कर्मणामत्र विच्छित्तिः प्राय इत्यभिधीयते ॥
सन्धानं चित्तमाख्यातं विच्छिन्नस्य तु कर्मणः ।
(इत्थ)या विध्यपराधे तु प्रायश्चित्तं प्रचोदितम् ॥
अथापराधे पुंसाञ्च प्रायश्चित्तं विधीयते ।
परिवत्तृत्वदोषादौ प्रायश्चित्तं यथा भवेत् ॥
क्वचिज्जपः क्वचिद्धोमः क्वचिच्चैव पुनःक्रिया ॥
उपवासः क्वचिद्दानं क्वचिच्चैषां समुच्चयः ॥
जपोऽनाज्ञादिकं तत्र होमा मिन्नादयः स्मृताः ।
सान्नाय्यनाशनादौ तु पुनरिज्या पुनः क्रिया ॥
उपवासोऽग्निहोत्रस्य हविःस्कन्नः प्रदर्शितः ।
दानमत्र निरुप्तादि हविषां स्कन्दने भवेत् ॥
एकस्मिन् श्रूयमाणानि प्रायश्चित्तानि दूषणे ।
प्रयोजनान्तरत्वाच्च तत्रैव च समुच्चयः ॥

× × ×

Leaf 3. इति प्रायश्चित्तपरिभाषा । अथ हविर्व्यापत्तिनिमित्तानि ।

*End* :—

अथ पत्न्यां प्रसूतायां पूर्वोक्तन्यायमार्गतः ।
सोमादीनि च कर्माणि कर्तव्यानीति निर्णयः
दशाहानन्तरं तत्र पत्नीं कर्मसु योजयेत् ।
अथो दशाहादूर्ध्वन्तु शुद्धा पत्नी प्रसूतिका ॥
मासादिकर्मनियमो न स्यात् प्रारब्धकर्मसु ।
अन्वाधाने कृते पश्चादाशौचादिसमुद्भवे ॥
प्रारब्धं कर्म कुर्वीत नेतराणीति निर्णयः ।
संकल्पे तु कृते पश्चात् सर्वेषां चैव कर्मणाम् ॥
आशौचादौ समुद्भूते प्रारब्धं तु समाचरेत् ।
प्रारब्धकर्मणां मध्ये पितृयज्ञाद्युपागमे ॥
कर्मान्तरत्वात्तेषाञ्चानुष्ठानं तत्र नो भवेत् ।
प्रारब्धकर्मणोऽङ्गत्वं यस्य तत्र प्रदृश्यते ॥
आशौचे तदनुष्ठानं स्यान्नेतरदुपागतम् ।
सोमे तु वरणादूर्ध्वमाशौचे सति ऋत्विजाम् ॥
गृहीतमधुपर्काणान्नाशौचमिति निर्णयः ।
महर्त्विग्व्यतिरिक्तानां तत्र त्वाशौचसंभवे ॥
तानूनप्त्रस्य संस्पर्शादूर्ध्वन्नाशौचमिष्यते ।
यावत्सख्यविसर्गान्तं नाशौचमिति केचन ॥
यावत्त्वोदवसानीया नाशौचमिति केचन ।
मध्ये त्वसोमयज्ञानामाशौचे सति ऋत्विजाम् ॥
तान्विहायान्यर्त्विग्भिः तानि कर्माणि कारयेत् ।
ऋक्षाधाने कृते होमारम्भात् प्राक् चेद्रजस्वला ॥
त्र्यहं गुप्तिहोमः स्यात् स्नातायां होममाचरेत् ।

---

## 191

## 405. ( प्रायश्चित्तकारिकादि )

## ( PRĀYAŚCITTAKĀRIKĀDI ).

*( By Trikāṇḍi )*

This MS. contains a set of verses dealing with several expiatory rites, minor and other sundry ceremonies, connected with all the Vedic sacrifices. It gives elaborately instructions to the sacrificers in all practical difficulties and provides substitute in all probable circumstances. It seems that it is a part of a voluminous work as it begins abruptly with expiatory rites and without even a benedictory verse. There is no colophon stating the title and the author of the work in the MS. But the work seems to be a part of the Trikāṇḍamaṇḍana's work known as the Āpastambasūtradhvanitārthakārikā because the first leaf of this MS. is marked in the margin as 'Trikāṇḍi'. The

other works contained in this codex are the Jaiminiśrautasūtra and the Kapardikārikā and those leaves also are similarly marked in the margin with letters जै. and क. respectively showing the title and the name of the author of the work. It is well known that the work of Trikāṇḍamaṇḍana now available in print is not a complete one and that there are several MSS. in this and in other collections containing the other parts of the work ascribed in the colophons to Trikāṇḍamaṇḍana. See Nos. 63, 64 above and HPS. II. 629–630. The MS. is incomplete at the end.

*Beginning*:—

त्रिकाण्डी ।

अथाग्नीनां तु संसर्गे प्रायश्चित्तं निरूप्यते ।
अन्यैः श्रौताग्निभिर्वापि लौकिकाग्निभिरेव वा ॥ १ ॥
स्मार्ताग्निभिर्वा संसर्गे प्राप्ता यस्याग्नयस्तदा ।
इष्टिस्तत्र तु कर्तव्या विधिवद्विविचेऽग्नये ॥ २ ॥
पाश्चात्यपूर्वयोर्वाग्न्योः संसर्गे सति तत्र तु ।
इष्टिस्तु विविचे कार्या इति श्रौतविनिर्णयः ॥ ३ ॥
पाश्चात्यदक्षिणाग्न्योस्तु संसर्गे समुपागते ।
पूर्वदक्षिणयोर्वापि वह्न्योः संसर्गसम्भवे ॥ ४ ॥
अग्नये वीतये तत्र संसर्गेष्टिरिति श्रुतिः ।
गृहदाहाग्निना वापि तथा च दववह्निना ॥ ५ ॥

× × ×

Leaf 34 b. आरभ्य गार्हपत्याग्नेराधानं पर्वतारके ।
पूर्वाग्न्याधानपर्यन्तं वर्तते यदि तत्र तु ॥
पर्वाधानं च नक्षत्राधानं तत्र प्रचक्षते ।
अनुष्ठानप्रसिध्यर्थमग्न्याधेयादिकर्मणाम् ॥
भाष्यकारानुसारेण वक्ष्यते कालसङ्ग्रहः ।
अहोरात्राणि विदधद्विश्वस्य मिषतः प्रभुः ॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
चन्द्रस्य क्षयवृद्धिभ्यां रवेर्गत्या तथा विधिः ॥
कालस्तु बहुधा जज्ञे यज्ञाः स्युः कालसाधनाः ।
मेषादिस्थे सवितरि यो यो दर्शः प्रवर्तते ॥
चान्द्रमासास्तत्तदन्ताश्चैत्राद्या द्वादश स्मृताः ।
तेषु या या पूर्णमासी सा सा चैत्र्यादिका स्मृता ॥

*End*:—

आग्नेयस्य तदङ्गत्वान्निर्वापो न पृथग्भवेत् ।
दक्षिणां वैकृतीं तत्र प्रकृत्या सह दापयेत् ॥
वैशेषिकाङ्गान्यत्रापि याज्यानीति विनिर्णयः ।
यजतो यजमानस्य या स्याद्य फलप्रदा ॥

सा देवतेति विज्ञेया फलदातृत्वदर्शनात् ।
चतुर्थ्यन्तपदोक्तानां शब्दानां येन केन च ॥
हविःप्रक्षेपणार्थानां देवतात्वं प्रचक्षते ।
कर्मणा यजते येन द्रव्यैस्त्वनधिकारिणा ॥
विहितेष्वेव कालेषु यजमानस्तु सोमतः ।
हूयते देवतायै तु यज्ञे ऋत्विग्भिरग्निषु ॥
यद्यज्ञसाधनं द्रव्यं तद्धविः परिकीर्तितम् ।
ध्रायते पतनादाज्यपुरोडाशादि कर्मसु ॥
आघारं यागहविषां पात्रमित्यभिधीयते ।
प्रतितन्त्रं तु यजते पूर्णमासादिकर्मसु ॥
अङ्गेष्वपि प्रधानत्वात्प्रयाज इति कीर्त्यते ।
प्रतितन्त्रं प्रधानानां यजते यस्त्वनन्तरम् ॥
प्रधानभूतमङ्गानामनुयाज इति स्मृतः ।
आधानानन्तरं पर्वण्यागते सोमतां पुरा ।
तत्रैन्द्राग्नस्य यजने सोमयागे ततः स्मृते ॥
इन्द्रयागेप्यथ

---

## 192

### 408. प्रायश्चित्तदीपिका ।

### PRĀYAŚCITTADĪPIKĀ.

*By Kavī Toḍaramalla.*

This treatise deals with the expiatory rites to be performed in connection with the Vedic sacrifices. It contains six chapters and treats of the atonements for the following sacrifices: Agnihotra, Darśapūrnamāsa, Iṣṭi, Ādhāna, Paśu, and Soma. The author of the work is Toḍaramalla and he is stated in the colophons of this work as Poet, scholar, and also well versed in all the three Vedas. He belonged to the Kāśyapa Gotra. Aufrecht in his catalogue p. 214 states that Toḍaramalla was the son of Bhagavatīdāsa, a minister of Akbar and the author of the Toḍarānanda, an extensive encyclopædia of civil and religious law, astronomy and medicine. He seems to be identical with Rāja Toḍarmal, who was the finance minister in the court of Akbar and flourished in the second half ( Cir. 1565-1589 A. D. ) of the 16th century. He seems to have encouraged several scholars and as such many works were compiled under his patronage. Our author also may be the same Toḍaramalla of the Akbar's Court, but in the MS. he is stated only as a Kavi. He quotes several writers and works among whom the following also are included: Trikāṇḍamaṇḍana, Bhāradvāja, Kauṇḍinyagṛhya, Śankarakinkara, Bodhāyana, Kātyāyana, Rudraswāmin, Devala and Apastamba. He generally follows the Apastambaśrautasūtra.

*Beginning* —

श्रीगणेशाय नमः । अथाग्न्यनुगमनप्रायश्चित्तमुच्यते । तत्र गार्हपत्यानुगमनेऽरणी गार्हपत्यभस्मना संस्पृश्य मथित्वोपावरोह्यायतने निधायाहवनीयं प्रणीय मित्रादिहोमं जुहुयात् । मित्राय स्वाहा । वरुणाय स्वाहा । अग्नये स्वाहा । अग्नये व्रतपतये स्वाहा ।

× × × ×

Leaf 2 b.

शुक्तौ रजतवद्यत्र दृश्यते मायया जगत् ।
तद्ब्रह्माहमिति ज्ञेयं सच्चिदानन्दविग्रहम् ॥

प्रायश्चित्तसुधानिधीनां

सुखेन कर्मबोधार्थं प्रायश्चित्तं लघूक्तिभिः ।
श्रौतानां कर्मणां वक्ष्ये तेन शङ्करकिङ्करः ॥

अथ सर्वपापक्षयार्थं ब्रह्मानुसन्धो वा इह शुक्तौ रजतवदिति । अयमाशयः । श्रौतानां कर्मणामवदारे (?) शङ्कराह्निकया प्रायश्चित्तानि यानि वक्ष्यन्ते तानि तथैवाचरितव्यानि । यत्र तु नोक्तमुक्तमपि न प्रतीयते वा तत्र सर्वत्र ब्रह्माहमिति भावयेत् । तदेव सर्वप्रायश्चित्तम् । अतएव बह्वृचे दुर्निमित्तानां दुःस्वप्नकालानां च प्रायश्चित्तान्युक्त्वाऽन्ते सर्वत्रासाधारण्येन यः सर्वेषां भूतानामान्तरः पुरुषः स आत्मेति विधायेत्युक्तम् ।

× × × ×

Leaf 16 a. अनेकग्रन्थसारांशमालोच्य विदुषां यदि ।
अग्निहोत्रपरिच्छेदप्रायश्चित्तं प्रकाशितम् ॥

अग्निहोत्रप्रकाशे प्रायश्चित्तं नाम प्रथमः परिच्छेदः ।

अथ दर्शपूर्णमासप्रायश्चित्तान्युच्यन्ते । तत्र च सूर्याचन्द्रमसोरत्यन्तसन्निकर्षकालोऽमावास्या ।

Leaf 32 b. कवितोदरमल्लेन त्रैविद्येन महात्मना ।
अग्न्याधेयप्रकरणे प्रायश्चित्तमुदीरितम् ॥

इत्याधानप्रकरणं चतुर्थः परिच्छेदः ।

अथान्वारम्भणीया ।

*End:*—

केचित्सर्वप्रायश्चित्तमनाज्ञातत्रयं च हुत्वा लौकिकाग्निमाहृत्य गुदहोमं कुर्वन्ति । पर्यग्निकरणकाले श्रुष्यमपर्यग्निकरणे उल्मुकैकदेशमाहृत्य पशुश्रपणार्थं निदधाति । तस्यानुगमने सर्वप्रायश्चित्तं च कृत्वा उत्तरवेदिराहरणम् । चातुर्मास्येषु वैश्वदेववरुणप्रघासादिषु अग्निप्रणयने कृते ॥

विद्वत्तोडरमल्लेन काश्यपेन महात्मना ।
कृता त्रैविद्यवृद्धेन प्रायश्चित्तप्रदीपिका ॥

*Colophon* :—

इति कवितोडरमल्लेन प्रायश्चित्तदीपिका समाप्ता ॥

*Post-Colophon:—*

शके १७३६ भावनामसंवत्सरे मार्गशीर्षवद्य १० ते दिवसि माचेगणोपनामकबाल-म्भट्टात्मजमाधवभट्टेन इदं पुस्तकं लिखितं समापितं स्वार्थं परोपकारार्थम् । अवरङ्गाबाद शेहर जूनाबजार मध्यस्थले लिखितं समापितम् ॥

---

**193**

409. **प्रायश्चित्तनिर्णयः ।**

PRĀYAŚCITTANIRṆAYA.

*By Venkaṭanātha.*

This short work deals with the expiatory rites for the Vedic sacrifices. The author Venkaṭanātha comments upon the original text in Tamil and describes the Prayoga in a language mixed with Tamil and Sanskrit words. It is stated in the introductory stanza that the atonement for the Somapāna is to be described here, but the work treats of the expiatory rites connected with the Adhāna and Agnihotra sacrifices in a regular form. The MS. is incomplete.

*Beginning:—*

यं ह्येव फलदं मत्वा यत्नात्कर्माणि कुर्वते ।
तं वन्दे राममव्यक्तं वन्द्यं ब्रह्मादिभिः सुरैः ॥
सुखबोधाय बालानां प्रायश्चित्तस्य निर्णयः ।
उच्यते सोमपानस्य वेङ्कटनाथेन भाषया ॥

Leaf 2 b. आधानप्रायश्चित्तं समाप्तम ।
अग्निहोत्रकालेऽग्न्यनुगतिप्रायश्चित्तम् ।

*End.—*

आग्नीध्रीयप्रणयनानन्तरं शालामुखीयानुगति ।

---

**194**

417. **प्रायश्चित्तप्रयोगः ।**

.PRĀYAŚCITTAPRAYOGA.

*By Vāsudeva.*

This is another treatise dealing with the expiatory rites for the Vedic sacrifices from the Ādhāna ceremony to the Soma sacrifice. The author follows the Āpastambaśrautasūtra in the arrangement of the Prāyaścittas. There is no mention of author's name in the MS., but the work is attributed to Vāsudeva on the strength of the marginal note, वासु, found in many of the leaves. He is the son of one Viśvapayajvan and a disciple of Pañcanadīsvara. This Vāsudeva may be distinguished from the reputed Vāsudevadīkṣita, the son of Mahādevavājapeyin and Annapūrṇā, who was patronised by the Maratha kings of Tanjore. However, it may be said that Viśvapayajvan, the father of our author may be identical with the Viśveśvara Vājapeyin, the elder brother and the preceptor of the reputed Vāsudevadīkṣita.

*Beginning*—

श्रीगणेशाय नमः ।

श्रीमद्विश्वपयज्वनः सुविदुषः सूनुस्समस्ताधिकः (?)
श्रीमत्पञ्चनदीश्वरस्य विबुधः (दुषः) सूत्रस्य तात्पर्यतः ।
श्रीमत्पञ्चनदीश्वरस्य कृपया धर्केऽधुना कर्मणो
वैगुण्ये सति तस्य चित्तमखिलं सारं श्रुतेः सङ्ग्रहात् ॥

प्रणयनकालात्पूर्वं गार्हपत्यानुगमने गार्हपत्यभस्मना नीत्यरणिं(?) संस्पृश्य मथित्वाऽऽयतने निधायाहवनीयं प्रणीय गार्हपत्यानुगतिप्रायश्चित्तार्थं तपस्वतेष्ट्याः स्थाने मित्रादिद्वादशाहुतीर्होष्यामीति सङ्कल्प्य सकृद्गृहीत्वाऽऽहवनीये जुहुयात् । मित्राय स्वाहा मित्रायेदम् । वरुणाय स्वाहा वरुणायेदम् । अग्नये स्वाहा] अग्नय इदम् । अग्नये व्रतपतये स्वाहा । अग्नये व्रतपतय इदम् । अग्नये तपस्वते जनद्वते पावकवते स्वाहा ।

Leaf 13 b. अथ दर्शपूर्णमासप्रायश्चित्तमुच्यते ।

तत्राग्न्यनुगतिप्रायश्चित्तं पूर्वमेवाग्निहोत्रप्रायश्चित्ते उक्तम् । प्रणीतापात्रे जलग्रहणानन्तरं समापोऽद्भिरग्मतेति संयवनात् पूर्वं तत्पात्रगतानामपां स्कन्दने शेषेणैवापोहिष्ठा मयो भुवः ।

*End.*—

अत्र पत्न्या मीमांसकैः स्वामित्वस्य साधितत्वात् पत्नीवदस्याग्निहोत्रं भवति । युक्ता मे यज्ञमन्वासातै यदि सीमन्ते पत्नी आदित्योऽस्तमियादित्यादिभिः पत्न्याः प्रवासानुपपत्तेश्च । प्रोषितयजमानमरणोक्तप्रायश्चित्तं पत्नीमरणेऽपि समानम् । याज्ञिकास्तु पत्न्या अङ्गत्वमभ्युपगच्छन्तः यजमानमरणोक्तं प्रायश्चित्तं न भवति । सोमव्यतिरिक्तमध्ये पत्नीमरणे कथञ्चित् शेषसमाप्तिः । सोममध्ये पत्नीमृतौ निर्मन्थ्येन दाहयित्वा क्रतुः समापनीयः । तत्र शेषभक्षणमार्जालीयप्रक्षेपः कार्य इति वदन्ति । हरिः ओम् ।

ध्रियन्ते यत्रपो मुञ्च पृथिव्या संभवेदिच (?) ।
यन्मेत्र तु यदत्रापि यदन्नमपि रुद्रिय (?) ॥
× × × ×
उदुत्यं सप्तचित्रं तु सौवुरिरभ्युदितो जपेत् ।
विश्वे देवा अभि पुनः मनोनाज्ञातकैर्जपः ॥

---

## 195

## 420. प्रायश्चित्तप्रयोगः ।

## PRĀYAŚCITTAPRAYOGA.

This anonymous work deals with the Prāyaścittas for the different Vedic sacrifices beginning from the Adhāna to Soma. The MS. is incomplete. The author deals with the subject taking into consideration all possible difficulties of a sacrificer and going into every detail of the sacrifices. It follows generally the Āpastambaśrautasūtra. The first leaf of the MS. is broken. The work seems to be a part of a bigger work.

*Beginning:—*

......................सा जीव शरदः शतमित्यनूढां कुमारीमभिमन्त्रयते । अनेकत्वे आवृत्तिः । प्राणजपौ न स्तः । ओम् । नवरात्रप्रवासेऽभयंकरेति गार्हपत्यमुपस्थायाहवनीयं ........ .........त्रोजनान्यातयति + विधेम । इत्याहवनीयमुपस्थाय । जुह्वां सकृद्गृहीत्वा मनोज्योतिः + घृतेन स्वाहा । आहवनीये जुहुयात् । मानसज्योतिष इदम् । अनन्तरं गृहा मा भीतेत्या..................त्युपस्थानमकृत्वा ग्रामान्तरं गृहान्तरं वा गतः रात्रौ तत्रैव वसेत् ।

× × × ×

Leaf 2 b. अत्रादावनुद्धरणप्रायश्चित्तमुच्यते । [उदयात्पूर्वमस्तमयात्पूर्वमाहवनीयानुद्धरणप्रायश्चित्तार्थं मनोज्योतिर्जुषतां त्रयस्त्रिंशत्तन्तव इति द्वे चतुर्गृहीते आहुती होष्यामीति संकल्प्य प्रणयनानन्तरं जुह्वां चतुर्गृहीतं गृहीत्वा मनोज्योतिर्जुषतां + घृतेन स्वाहा । मनसे ज्योतिष इदम् । त्रयस्त्रिंशत्तंतवः + अप्येतु स्वाहा । देवेभ्य इदम् । धर्मायेदमिति वा । अनन्तरमग्निहोत्रं जुहुयात् ।

*End:—*

सदसः हविर्धानस्य मण्डपस्य हविर्धानशकटयोर्वा दाहे सोमेऽनभिदग्धे ग्रहचमसादिकं गृहीतं ग्रहीष्यमाणं हुतं होष्यमाणं सम्यग्विविच्य तत्समीप एव स्थाल्यन्तरे समारोपणतो वा प्रत्यक्षतो वाऽग्निं नीत्वा तूष्णीं मन्त्रैर्वा वेद्यादिकं कृत्वा अपेक्षितं पुनरुत्पाद्य कृतान्तादुपक्रम्य यथापूर्वं कर्मशेषं समापयेत् । प्राग्वंशमात्रस्याग्नीध्रमण्डपमात्रस्य वा पुनस्तन्निमाय तत्रैव यागशेषसमाप्तिः । न स्थाल्यन्तरे । सोमे कार्त्स्न्येनाभिदग्धे यदपहृतप्रायश्चित्तं यो नेदिष्ठः स्यादित्यादि तत्कृत्वा तेन क्रतुना पुनर्यजेत । एकां गां दक्षिणां दद्यादित्यस्य स्थाने पञ्च गा दद्यात् । सोमैकदेशे विद्यमाने तु अपेक्षितं सोमद्रव्यमाहृत्य संसृज्य यजेत न पुनर्यागः । रसैकदेशे विद्यमानेऽपि अपयमादिभिर्वर्धयित्वा यजेत ।

---

## 196

## 422. प्रायश्चित्तप्रयोगः ।

### PRĀYAŚCITTAPRAYOGA.

This work deals with the expiatory rites for the Vedic sacrifices according to the Āśvalāyana school. Prāyaścittas for the Ādhāna and Agnihotra are treated here with full details. The 8th and 9th leaves contain the table of contents.

*Beginning:—*

श्रीगणेशाय नमः ।

अथाश्वलायनानां श्रौतप्रायश्चित्तानि लिख्यन्ते । अन्वाहिताग्नेः प्रयाणमुपपतेत्तदा ब्रह्मा आज्यं संस्कृत्य जान्वाच्याहवनीये स्रुवेण जुहोति । ओं तुभ्यं ता अङ्गिरस्तमो विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिरे स्वाहा । यजमानः अग्नये कामायेदम् । ततोऽरणीसेकः । अयं ते योनिरित्याश्वलायनमन्त्रेण अरणी गार्हपत्ये प्रतितपेत् । त एव तूष्णीमितरयोः । पाणीवाप्याते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानम् । अच्छा वसूनि कृण्वन्नस्मे नर्यापुरूणि । यज्ञो भूत्वा यज्ञमासीद योनिं जातवेदो भुव आजायमानः । इति गार्हपत्ये पाणी प्रतितपेत् । तूष्णीमितरयोः ।

Leaf 4 a. अथाग्निहोत्रप्रायश्चित्तम् । यदि गार्हपत्योऽनुगच्छेत् तदा भस्मनाऽरणी संस्पृश्य मन्थयेत् ।

*End:—*

ग्राम्येणाग्निना संसर्गेऽग्नये संवर्गायेष्टिः । वद्युतेन संसर्गेऽग्नयेऽप्सुमतेष्टिः । विरुद्धमन्न-भोजने अग्नये वैश्वानरायेष्टिः । कपाले नष्टे इयमेवेष्टिः । जीवति यजमाने मृतशब्दे श्रुतेऽग्नये सुरभिमतेष्टिः । यस्य भार्या गौर्वा यमौ जनयेत्तदा मारुतेष्टिः । एतासामिष्टीनामशक्तौ संस्कृताज्येन द्वादशगृहीतेन पूर्णाहुतिः । अग्नये वैश्वानरायेत्यादि ज्ञेयम् ।

*Colophon :—*

इत्याश्वलायनश्रौतप्रायश्चित्तप्रकरणं समाप्तम् ।

अथ श्रौतप्रायश्चित्तानुक्रमणिका लिख्यते ।

× × × ×

*Colophon:—*

इति श्रौतप्रायश्चित्तानुक्रमणिका समाप्ता ।

*Post-Colophon.—*

शके १६७३ प्रजापतिवत्सरे वैशाखशुक्लपञ्चम्यामिदं पुस्तकं पटवर्धनोपनामकगणेश-भट्टात्मजबल्लालेन लिखितं समाप्तिमगमत् ।

---

**197**

## 423. प्रायश्चित्तप्रयोगः ।

## PRĀYAŚCITTAPRAYOGA.

This is another treatise dealing with the expiatory rites for the Vedic sacrifices. It is intended for the sacrificer who being a follower of the Aśvalāyana school adopts the methods prescribed in the Bodhāyanaśrautasūtra. Prāyaścittas for the Ādhāna, Agnihotra and Darśapūrṇamāsa are treated here.

*Beginning.—*

श्रीगणेशाय नमः ।

अथाश्वलायनयजमानस्य बौधायनसूत्रमुत्सार्याजस्राग्नेः प्रायश्चित्तानि । तत्रादावनुगत-प्रायश्चित्तानि । यदि गार्हपत्योऽनुगच्छेत्तदा गार्हपत्यभस्मनाऽरणी संस्पृश्य भस्म निष्का-स्यायतनं गोमयेनोपलिप्येत ।

आजज्ञे प्रथममेभ्यो योनिभ्योऽधिजातवेदाः ।

सगायत्र्या त्रिष्टुभा जगत्याऽनुष्टुभा च देवेभ्यो हव्यं वह न प्रजानन् ॥

मन्त्रेण मथित्वा गार्हपत्यायतने निदधाति । इतरयोरनुगमनं नास्ति ।

*End —*

अथवा स्वयं यजमान एक एव कर्ता तदा अष्टमी न जुहोति । एवं ब्रह्माऽहं होताऽहमध्व-र्युरहमाग्नीध्रोऽहं यजमान एक एव यज्ञे तत्पर्वाणि तन्मे देवा रक्षन्तु प्राणान्मा मा हिं-सिषुः स्वाहा । देवेभ्य इदम् । ततो हविषां पश्चादन्तर्वद्युपविष्ट एवाग्निहोता वेत्वग्नेरित्यादि सर्वं स्विष्टकृतं कुर्यात् । विहारदेश उपविश्य वैश्वानरे हविषामित्यादि । अवान्तरेडां स्वदक्षिणे

पाणौ यजमानेनावदापयति । तदभावे पत्न्या अन्तर्वेद्युपविश्यानुयाजान् । केव(ल) यजमानपक्षेऽन्वाहार्यमासाद्य न प्रतिग्रहः । इतरद्यथा यथा । इत्येकाध्वर्यवप्रकारः । सर्वत्र(स) मिदाहुती । प्रायश्चित्तानि ।

इदं पुस्तक ।शके १६७४ अंगिरानामसंवत्सरे अधिकमासे कृष्णपक्षे चतुर्थ्यां तिथौ भृगुवासरे धनिष्ठादिवसे तद्दिने रात्रौ षट्घटिकामध्ये समाप्तं कृतम् । इदं पुस्तकं हस्ताक्षरफाटकोपनामकहरिभट्टस्य सुतगोविन्देन लिखितं संपूर्णम् ।

---

## 198

## 424. प्रायश्चित्तप्रयोगः ।

## PRĀYAŚCITTAPRAYOGA.

This treatise deals with the atonements for the flaws in chanting the Sāmans during the performance of the Jyotiṣṭoma sacrifice. This MS. contains two versions of these Prāyaścittas: one in prose and the other in poetry. But the prose version seems to be based on the versified one. No author's name is stated in the MS, but the versified part may be attributed to one Gaṇeśa since the beginning portion entirely agrees with the Gaṇeśakārikā. (see above No. 94.)

*Beginning of the prose.—*

कारिकोक्तप्रकारेण प्रायश्चित्तान्युच्यन्ते । दीक्षणीयादिषु साम्नां भ्रेषे वैष्णव्या-ज्याहुतिः सर्वप्रायश्चित्तञ्च । अत्र प्रायश्चित्तान्तरेण सह सर्वप्रायश्चित्तस्य समुच्चयः । व्याहृतिभिः व्यस्ताभिः समस्ताभिश्च होमः सर्वप्रायश्चित्तमित्युच्यते । शार्ङ्गादिधर्मसाम्नां भ्रेषे पुनर्गीत्वा महाव्याहृतिभिर्होमः । महन्म इत्यादि यजुषां भ्रेषे पुनर्जपित्वा व्याहृति-त्रयजपः ।

*End of the prose.* Leaf 3 b.

पूर्वमुक्तेष्वनुक्तेषु सर्वेषु निमित्तेष्वपि सर्वप्रायश्चित्तमेवेति गौतमः । सर्वत्र मन्त्रलोपे वैष्णवाहुतिरिति शाट्यायनः । आवृत्तिस्तोत्रेषु पवमानेषु व्यत्यासे आभिर्गीर्भिराहुतिरिति शाण्डिल्यः । सर्वत्र मन्त्राणां क्रियाणाञ्च लोपे महाव्याहृतिचिन्तनमिति धानञ्जय्यः । अयञ्च जपः आरब्धस्तोत्रे मध्ये उत्थाय होतुमशक्यत्वात्तदा कार्यः । यदा होतुं शक्यः तदा होम एवेति अवस्थितम् । एवमुक्तान्यनुक्तानि बुद्ध्या पर्यालोच्य यथायथं कुर्युरिति सर्वं समञ्जसम् ॥

*Beginning of the Kārikā:—*

गणेशं शारदां नत्वा कल्पकारं तथैव च ।
प्रायश्चित्तानि कल्प्यन्ते क्रतुवैगुण्यशान्तये ॥
शार्ङ्गादिपरिसाम्नाञ्च प्रस्तोता स्खलितो यदि ।
पुनर्गीत्वा तदाज्येन महाव्याहृतिभिर्हुनेत् ॥

इष्टयज्ञसाम्नां शेषश्चेद्विशेषोऽत्र प्रकल्प्यते ।
विष्णवर्चमुक्त्वा प्रस्तोता जुहुयात्सर्पिषाहुतिम्
प्रवर्ग्योद्वासनात्पूर्वं प्रायश्चित्तानि यानि च ।
प्राग्वंशे तानि सर्वाणि हुनेदाहवनीयके ॥

*End:—*

तत्कृत्वा पञ्चमं पृष्ठं तृतीयसवने स्तुयुः ।
आर्भवस्य भवेत्साम्नां स्थाने च त्रिवृता स्तुयम् ॥
सफपरिश्रयन्वेति प्रथमं सा(भ)र्चार्भवेत् (?) ।
आजीगवं तृचे प्रोक्तमिति सामत्रयं बुधैः ॥
सोमातिरेके सवनात्तृतीयात् त्रिवृता स्तुयुः ।
किमित्येति बृहत्तम शिपिविष्टवतीष्वलम् ॥
सोमाधिके सति प्रातस्सवने ह्रासयेत्सदा ।
माध्यन्दिने पृष्ठगाने तेन तत्सम्पाद्यते ॥
एवमेवान्ययोः कुर्युः स्तोत्रसाकल्यसम्पदे ।
शेषं प्रकृतिवत्कर्म सवनेषु त्रिषूच्यते ॥

*Colophon:—*

इति प्रायश्चित्तविषये कल्पकारिकाऽष्टोत्तरशतं सम्पूर्णम् ॥

---

## 199

## 425. प्रायश्चित्तप्रयोगः ।

## PRĀYASCITTAPRAYOGA.

This treatise deals with the expiatory rites for the Vedic sacrifices according to the 9th Praśna of the Āpastambaśrautasūtra. This codex contains the same Praśna also in the beginning as the other work. The MS. is much injured and all leaves are moth-eaten.

*Beginning.—*

अग्निहोत्रप्रायश्चित्तम् ।

श्रीगुरुभ्यो नमः । ऊर्ध्वं तदुक्तप्रायश्चित्तं करिष्ये । जुह्वां चतुर्गृहीतं गृहीत्वा मनो ज्योति + ते स्वाहा । .................. सर्वप्रायश्चित्तं कुर्यात् । स्वगृहात्प्रयास्यन् वास्तोष्पतिहोमं करिष्यामीति स ल्प्य गार्हपत्यं प्रज्वाल्य जुह्वां सकृद्गृहीत्वा । वास्तोष्पते प्रति=ष्वदे वास्तोष्पते श...............स्सदानस्वाहा । वास्तोष्पतय इदम् । अरण्योरात्मनि वाऽग्निं समारोप्य गच्छेत् ।

*End.—*

अत्र दीक्षणीयाप्रधानयागात्पूर्वमग्निहोत्रकालप्राप्तौ गुप्त्यर्थमग्निहोत्रमावश्यकम् । तत्पूर्वं समानमिष्टिपूर्वकमाधा......क्षत्रयोप्यजस्र इति केचित् । न सूत्रकारभाष्याभिप्रेरितम् । श्रीरामार्पणमस्तु ॥

---

## 200

### 427. प्रायश्चित्तप्रयोगः ।

### PRĀYAS'CITTAPRAYOGA.

This short work deals with the expiatory rites connected with the Agnihotra sacrifice according to the Apastambas'rautasūtra. The work is incomplete.

*Beginning:—*

अग्निहोत्रप्रणयनात्पूर्वं गार्हपत्यानुगमने गार्हपत्यभस्मना नित्यारणी संस्पृश्य मथित्वाऽऽयतने निधाय गार्हपत्यात्तूष्णीमाहवनीयं प्रणीय गार्हपत्यानुगतिप्रायश्चित्तार्थं तपस्वतेष्ट्याः स्थाने मित्रादिद्वादशाहुतीर्हुत्वा तमग्निं परित्यज्य प्रणयनकाले प्रणयनपूर्वकमग्निहोत्रं कुर्यात् । प्रणयनात्पूर्वं मथनस्य यद्यनवकाशः तदा गार्हपत्यभस्मना नित्यारणी संस्पृश्य किञ्चिद्धस्ताभ्यामुत्तरारणिशङ्कुना मथित्वा विरम्य लौकिकाग्निमाहृत्य गार्हपत्यायतने निधाय प्रणयनाद्यग्निहोत्रान्तं कृत्वा तानग्नीन् परित्यज्यात्वरमाणोऽग्निं मथित्वा गार्हपत्यायतने निधाय गार्हपत्यादाहवनीयं प्रणीय गार्हपत्यानुगतिप्रायश्चित्तार्थं तापस्वतेष्ट्याः स्थाने मित्रादिद्वादशाहुतीर्हुत्वा ।

*End:—*

अपोढाग्नौ विद्यमाने गार्हपत्यानुगमने आहवनीये सर्वप्रायश्चित्तं हुत्वाऽपोढाग्नेरेकदेशमग्निं गार्हपत्ये निधाय पाकं कुर्यात् । गार्हपत्यापोढाग्न्योर्युगपदनुगमने गार्हपत्यं मथित्वाऽऽयतने निधाय गार्हपत्यानुगतिप्रायश्चित्तार्थं मित्रादि हुत्वाऽपोढाग्न्यनुगतिप्रायाश्चित्तार्थं सर्वप्रायश्चित्तञ्च हुत्वा पाकादि कुर्यात् ।

---

## 201

### 428. प्रायश्चित्तप्रयोगः ।

### PRĀYAS'CITTAPRAYOGA.

This short work treats of the expiatory rites connected with the milk to be offered in the Agnihotra. The MS. is incomplete.

*Beginning:—*

अथ स्कन्नप्रायश्चित्तम् ।

अग्निहोत्रे दुह्यमाने पयः स्कन्दति चेत् तदा ।

यदद्य दुग्धं पृथिवीमसक्तं यदोषधीरप्यसरद्यदापः ।

पयोग्रहेषु पयोघ्नियासु पयोवसेकेषु पयोऽस्तु तन्मयि ॥

इति मन्त्रेणाभिमन्त्र्य

समुद्रं वः प्रहिणोमि स्वां योनिमपि गच्छतु ।

अच्छिद्रः प्रजया भूयासं मापरासेचिमकपयः ।

इत्यद्भिरुपसृज्य सर्वप्रायश्चित्तं कुर्यात् । प्रातःकाले स्कन्ने तु सायं होमपर्यन्तं यजमानपत्न्यौ नाश्नीयाताम् । सायंकालस्कन्ने तु आगामिप्रातर्होमपर्यन्तं नाश्नीयाताम् ।

*End.*—

शेषाभावे आदानायोग्ये स्कन्नप्रायश्चित्तं कृत्वा पयःप्रतिनिध्याज्य स्रुचि तूष्णीं गृहीत्वा होमः कर्तव्यः । मार्जनान्तं कृत्वाऽग्नीन् परित्यज्य पुनः ध्रुष्टिरसीत्यादि पुनः प्रणयनं कृत्वा होमानन्तरं वृष्टिरसीत्यन्ते जुह्वां सकृदाज्यं गृहीत्वा अवतेहेडो वरुण+कृतानीति पुरोनुवाक्या-मनूच्य उदुत्तमं वरुण+अदितये स्याम स्वाहा । वरुणायेदम् । इति हुत्वा गार्हपत्यादिहोमादि कुर्यात् । स्वाहाऽग्नये वैश्वानरायेत्याप्राचीनस्कन्नमुच्यते । तत्र स्कन्ने ।

---

## 202

### 433. प्रायश्चित्तप्रयोगः ।

### PRĀYAŚCITTAPRAYOGA.

This work deals with the expiatory rites in connection with the Agnihotra and Darśapūrṇamāsa sacrifices. These Prāyaścittas are intended for a sacrificer who follows the Āśvalāyana school but preserves the sacrificial fires as prescribed in the Bodhāyanaśrauta. This codex contains two MSS. of this work. The first is incomplete in the beginning and contains two leaves describing the table of contents. It is stated here that this work follows Trikāṇḍamaṇḍana's treatise on Prāyaścittas.

*Beginning*—

श्रीगणेशाय नमः । श्रीवेदपुरुषाय नमः । अथाश्वलायनयजमानस्य बौधायनस्वसूत्रा-नुसार्यजस्राग्नेः प्रायश्चित्तानि । यदि गार्हपत्योऽनुगच्छेत्तदा गार्हपत्यभस्मनाऽरणी संस्पृश्य भस्म निष्कास्यायतनं गोमयेनोपलिप्य ।

इतो जज्ञे प्रथममेभ्यो योनिभ्योऽधिजातवेदाः ।
सगायत्र्या त्रिष्टुभा जगत्यानुष्टुभा च देवेभ्यो हव्यं वह न प्रजानन् ॥

मन्त्रेण मथित्वा गार्हपत्यायतने निदधाति । इतरयोरनुगमनं नास्ति । ततोऽग्नये तपस्वते जनद्वते पावकवतेऽष्टाकपालः पुरोडाशः पूर्णाहुतिर्वा ।

*End:*—

सति यज्वनि त्रयाणामभावेऽध्वर्युरेकाध्वर्युप्रायश्चित्तं न कुर्यात् । यज्वनि ऋत्विक्त्वेन कर्तृत्वमापदि सत्रे च । विहितत्वात् । प्रकृतेऽपि तस्यर्त्विक्त्वेन कर्तृत्वस्य विद्यमानत्वादृत्विक्-समासाभावेन प्रायश्चित्ताभावः प्रायश्चित्तवैयासिक्यानुसारिणा गोपालेनाभिहितः । अत एव यत्र यज्वैव स्यान्नापरस्तदापि नैकाध्वर्यवप्रायश्चित्तम् । यजमानर्त्विक्त्वयोर्विद्यमानत्वात् । यद्येकाकी पतिः कुर्यात् स्याद्बौधायननिष्कृतिः । इति तु त्रिकाण्डमण्डनः ।

*Post-Colophon*:—

शके १६८० बहुधान्यनामसंवत्सरे आषाढशुद्धसप्तमी तद्दिने समाप्तम् ।

---

## 203

### 434. प्रायश्चित्तप्रयोगः ।

### PRĀYAŚCITTAPRAYOGA.

*By the son of Kacchapeśa.*

This is another treatise dealing with the expiatory rites for the Agnihotra sacrifice. The author's name is not stated here but in the benedictory verse he is said only as the son or a disciple of Kacchapeśa. The MS. is injured.

*Beginning*:—

श्रीदक्षिणामूर्तये नमः ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
सर्वज्ञं सततं नत्वा कच्छपेशाभिधं गुरुम् ।
अज्ञानां सुखबोधाय प्रायश्चित्तं निरूप्यते ॥

आदावग्निहोत्रप्रायश्चित्तानि । प्रणयनात्पूर्वं गार्हपत्यनाशे गार्हपत्यभस्मना नित्यारणी संस्पृश्य मथित्वाऽऽयतने निधायाहवनीयं विहृत्य तपस्वतीष्टिस्थाने मित्राय स्वाहा । मित्रायेदम् । वरुणाय स्वाहा । वरुणायेदम् । अग्नये स्वाहा । अग्नय इदम् । अग्नये व्रतपतये स्वाहा । अग्नये व्रतपतय इदम् ।

*End*:—

यदा पुनरन्त्यां ता संस्कृतया तस्य परिक्रमणं न सम्भवेत् तदा तूष्णीं संभृत्य सर्वप्रायश्चित्तम् । यदा पुनः स्फुलिङ्गतया प्रायश्चित्तसमाप्तिपर्यन्तं तस्यावस्थानं भवेत् तदापि सर्वप्रायश्चित्तम् ।

---

## 204

### 435. प्रायश्चित्तप्रयोगः ।

### PRAYAŚCITTAPRAYOGA.

This treatise deals with the expiatory rites for the Darśapūrṇamāsa sacrifice.

*Beginning*:—

श्रीमद्दिव्यलक्ष्मीनृसिंहाय नमः ।

पञ्चस्थावदनं नत्वा श्रीषोश्वायण(?)श्रौतिनः ।
प्रायश्चित्तान्यैष्टिकानि लिख्यन्ते क्रमशो मया ॥ १ ॥

तत्रादावन्वाहिताग्निनाशे प्रायश्चित्तमापद्वीये । अन्वाधानानन्तरं दक्षिणाग्निनाशे गार्हपत्यान्तं प्रणीय दक्षिणाग्निनाशनिमित्तं प्रायश्चित्तं करिष्य इति सङ्कल्प्याज्यं संस्कृत्य स्रुचि चतुर्गृहीतं गृहीत्वाऽऽहवनीये समिधमाधाय जुहोति ।

मनोज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं समिमं दधातु ।

या इष्टा उषसो या अनिष्टास्ताः सन्तनोमि हविषा घृतेन स्वाहा ॥

मनसे ज्योतिष इदम् । साङ्गतासिद्ध्यर्थं सर्वप्रायश्चित्तम् ।

*End*:—

अभिगीर्भिर्यदतो न ऊनमाप्याय हरिवो वर्द्धमानः ।
यदा स्तोतृभ्यो महिगोत्रारुजासि भूयिष्ठभाजोऽधते स्याम ॥
ऐष्टिकं विहितं कर्म भ्रान्त्या यत्त्वन्यथा कृतम् ।
तस्य दोषव्युदासार्थं प्रायश्चित्तमपेक्षितम् ॥
श्रौतग्रन्थान्विलोक्यैव तन्मया लिखितं क्रमात् ।
पक्षमेकं समाश्रित्यानेन तुष्यतु यज्ञभुक् ॥

*Colophon*:—

इत्यैष्टिकानि प्रायश्चित्तानि समाप्तानि ।

---

## 205

### 437. प्रायश्चित्तप्रयोगः ।

### PRĀYAŚCITTAPRAYOGA.

This work deals with the expiatory rites for the Darśapūrṇamāsa sacrifice. The anonymous author of this work discusses elaborately the appropriateness of all these atonements prescribed in the Śrautasūtras and decides subsequently according to the rules laid down in the Pūrvamīmāṁsā works. After the Prāyaścitta portion, the author decides the exact time in which the Darśapūrṇamāsa and other Vikṛtiṣṭis are to be performed. In this connection he advances a lengthy discussion in order to decide the exact time of all the important Tithis, Saṅkrānti etc. when several rituals are to be performed. In doing this, he quotes from the Śrautasūtras, Purāṇas and the Dharmaśāstra works At the close of this discussion he reverts to the original subject of the Darśapūrṇamāsaprāyaścitta. The MS. is incomplete and injured. The material and the hand-writing of this MS. appear to be very old.

*Beginning*.—

ॐ नमो गणेशाय । अथेदानीं दर्शपूर्णमासयोः प्रायश्चित्तमभिधीयते । तद्यथा यदा आहवनीयदक्षिणाग्न्योरुद्धरणं न कृतमुद्धृतयोर्वोपशमः स्यात्तदाध्वर्युर्वं हुत्वा पुनरुद्धरेत् । उद्धरणं चाङ्गप्रधानार्थम् । यतोऽग्नयः सर्वार्थाः । अनङ्गमप्युद्धरणं प्रयोजयेत् । आहवनीय-उद्धृते यदि गार्हपत्य उपशमेत्तदा पञ्चभूसंस्कारान्कृत्वा निर्मथ्य स्वस्थाने संस्थाप्यः ।

अनुद्धृतश्चेद्दक्षिणाग्निस्तदा तमुद्धृत्य ब्रह्मवरणं वाचस्पतिप्रैषादिरहितं कृत्वाऽऽध्वर्यवं जुहोति। एवं प्राग्वरणादनादिष्टप्रायश्चित्तार्थं ब्रह्मोत्पाद्यते। ततोऽग्न्यन्वाधानादि × × ×
एतच्चाग्न्यन्वाधानादि ब्राह्मणतर्पणान्तं कर्म पौर्णमास्याममावास्यायाञ्च विधीयते।

तत्र च कर्मणः प्रतिपदार्थं प्रायश्चित्तमभिहितम्। इदानीं पौर्णमास्याममावास्यायां च यागाङ्गाङ्गिभावयोः स्वरूपाभिधानपूर्वकं तयोरप्रतिपत्तिप्रायश्चित्तमभिधीयते। तत्र चन्द्रादित्ययोरतिसन्निधिरमावास्या। अतिविप्रकृष्टत्वं च पौर्णमासी। तथा सङ्कर्षणकाण्डे विक्रमसान्निपातौ दर्शपूर्णमासयोरिज्याकालः। तत्संयोगात्कालनामधेयं श्रूयते।

× × × ×

अथ वैकृतेष्टिकालनिरूपणम्। त्रिकाण्डे।
यस्मिन् पर्वणि नित्येष्टिः प्रागेव पशवस्तदा।
सद्योऽथवा द्व्यहं कार्या ऊर्ध्वं चेत्सद्य एव ते॥

*End:—*

इत्येवं दर्शपूर्णमासकालनिरूपणप्रसङ्गेनान्यदपि संक्रान्त्यादिकृत्यकालनिरूपणं कृतम्। इदानीं दर्शपूर्णमासादिकालातिपत्तौ प्रायश्चित्तमभिधीयते। प्रज्ञातेष्ट्यतिपत्तौ च पथिकृदिष्टिर्भवति। प्रज्ञातग्रहणं व्याचष्टे नियतास्विति। अतिपतनमतिपातः। कालातिक्रम इत्यर्थः। नियतासु हि कालातिक्रम उपपद्यते। नानियतासु। अनियतकालत्वात्। तस्मान्नियतकालेष्ट्यतिपत्तौ पथिकृदिष्टिर्भवति।

× × ×

तथा कृष्णपक्षे सर्वासु तिथिषु पौर्णमासी। शुक्लपक्षेऽमावास्या तत्कालात्तस्य कर्मणश्च। यदि पौर्णमासं कर्म स्वकाले न कृतं दर्शकाले तु दर्शकर्म न कृतं तदा प्राक् पौर्णमासकालात्तत्रैव सम्प......

---

## 206

### 439 प्रायश्चित्तप्रयोगः।

### PRĀYAS'CITTAPRAYOGA.

*By S'rīnivāsadīkṣita.*

This work deals with the expiatory rites for the Agnihotra and Darśapūrnamāsa according to the Āpastambaśrautasūtra. The author's name is stated in the margin of the first leaf as Śrīnivāsadīkṣita. The subject is treated here elaborately and the MS. is incomplete.

*Beginning.—*

प्रसादाद्यस्य मूकोऽपि भवत्यागमपारगः।
स श्रीव्यङ्कटनाथो मां सदा रक्षतु नौमि तम्॥ १॥

अविघ्नमस्तु । ब्रह्मौदनपाकात्पूर्वं ब्रह्मौदनाग्न्यनुगतावौपासने सर्वप्रायश्चित्तं हुत्वा पुनरौपासनादग्निमाहृत्य ब्रह्मौदनाग्निप्रतिष्ठापनं कुर्यात् । ब्रह्मौदनपाकानन्तरमरणिनिष्पनात्पूर्वं ब्रह्मौदनाग्न्यनुगते औपासने ब्रह्मौदनाग्न्यनुगतिप्रायश्चित्तार्थं सर्वप्रायश्चित्तं हुत्वा पुनरौपासनादग्निमाहृत्य ब्रह्मौदनाग्निं प्रतिष्ठाप्य पुनः ब्रह्मौदनादि समानमावरदानान्तं कुर्यात् । उपावरोहेति । शिष्टं समानम् ।

*End:—*

आशौचे तदनुष्ठानं न स्यान्नैतदुपागतम् ।
सोमे तु वरणादूर्ध्वमाशौचे सति ऋत्विजाम् ॥
गृहीतमधुपर्काणां नाशौचमिति निर्णयः ।
महर्त्विग्व्यतिरिक्तानां तत्र त्वाशौचसम्भवे ॥
तानूनप्त्रस्य संस्पर्शादूर्ध्वं नाशौचमिष्यते ।
यावत्सख्यविसर्गान्तं नाशौचमिति केचन ॥
यावच्चोदवसानीया नाशौचमिति केचन ।
मध्यात्त्वसोमयज्ञानामाशौचे सति ऋत्विजाम् ॥
तान्विहायान्यऋत्विग्भिस्तानि कर्माणि कारयेत् ।
ऋक्षाधाने कृते होमारम्भात्प्राक् चेद्रजस्वला ॥
त्र्यहं गुप्तिहोमं स्यात्स्नातायां होममाचरेत् ।

---

## 207

### 441. प्रायश्चित्तविधानम् ।

### PRĀYAŚCITTAVIDHĀNA.

This work deals with the atonements for the flaws of the priests of the Udgātṛ group while chanting the Sāmans during the performance of the Soma sacrifice. These atonements, as stated here, are based on a work called the Prāyaścittakārikā probably the same as that described under Nos. 94 and 198 above. The prose portion found along with the Kārikās in the MS. described under No. 198 is similar to the present work and it is incomplete.

*Beginning:—*

प्रायश्चित्तकारिका । कारिकोक्तप्रकारेण प्रायश्चित्तान्तराण्युच्यन्ते । दीक्षणीयादिषु त्रिषु साम्नां भ्रेषे वैष्णव्याज्याहुतिः सर्वप्रायश्चित्तं च । अत्र सर्वत्र प्रायश्चित्तान्तरेण सह सर्वप्रायश्चित्तस्य समुच्चयः । व्याहृतिभिर्व्यस्ताभिः समस्ताभिर्होमः सर्वप्रायश्चित्तमुच्यते । शार्ङ्गादिब्रह्मसाम्नां भ्रेषे पुनर्गीत्वा व्याहृतिभिर्होमः ।

*End.*--

पूर्वमुक्तेष्वनुक्तेषु सर्वेषु निमित्तेष्वपि सर्वप्रायश्चित्तमेवेति गौतमः। सर्वत्र मन्त्रलोपे वैष्णव्या व्याहृतिभिरिति शाट्यायनः। आवृत्तिस्तोत्रेषु पवमानेषु व्यत्यासे आभिर्गीर्भिराहुतिरिति शाण्डिल्यः। सर्वमन्त्राणां क्रियाणां च लोपे महाव्याहृतिचिन्तनमिति धानञ्जय्यः। अयं च जपः।

---

**208**

446. प्रायश्चित्तसङ्ग्रहः।

PRĀYAŚCITTASAṄGRAHA.

*By S'aṅkarakiṅkara.*

This MS. contains the beginning part of Śaṅkarakiṅkara's work on the expiatory rites for the Vedic sacrifices and this part deals only with the Agnihotra Prāyaścittas. The MS. is injured and incorrect.

*Beginning*:—

... ... ... ...
तद्ब्रह्माहमिति ज्ञेयं सच्चिदानन्दविग्रहम् ॥
देशकालवयोऽवस्थाविद्वां(?) सामान्यमेव च।
ब्राह्मणानां समालोच्य ग्रन्थान् सर्वविनिर्मितान् ॥
आलोच्य सुलभान्पक्षान् तत्र तत्र विकल्पितान्।
सङ्गृह्य सुखबोधाय कुर्वे शङ्करकिङ्करः ॥

तत्र सर्वपापक्षयहेतुत्वात्प्रथमं ब्रह्मानुसन्धानमाह। शुक्तौ रजतवदिति। अयमाशयः। श्रौतानां कर्मणामपचारेषु शृङ्गग्राहिकप्रायश्चित्तानि वक्ष्यन्ते। तानि तदैवाचरितव्यानि। यत्र तु प्रायश्चित्तं नोक्तमुक्तमपि न प्रतीयते तत्र सर्वत्र ब्रह्माहमिति भावयेत्। तदेव सर्वप्रायश्चित्तम्।

× × × ×

होमकाले सर्वानुगमने वा गार्हपत्यं पूर्ववन्मथित्वा निधाय गार्हपत्यादग्निमुद्धृत्य यां दिशं प्रति वायुरावाति तां प्रति तस्मिन्नग्नौ वा वायवे स्वाहेत्याज्याहुतिं जुहा हुत्वा तमग्निं परित्यज्य ततः प्रकृतिवद्भूष्टिरसीत्यादि मार्जनान्तं कुर्यात्।

*End*:—

पतितचण्डालमहापतितमहाचण्डालरजस्वलोदक्यादिस्पर्शने आधानमेव। प्रणयनानन्तरं यदि पूर्वं प्रणीतमज्ञातं पुनरप्यन्येनाग्न्युद्धरणे। यदि पूर्वप्रणीतं ज्ञातं तदा पश्चादुद्धृतस्याग्नेरनुगमः नाश इत्यर्थः। यदि पश्चादुद्धृतमाहवनीयेन संसृष्टम्।

---

209

## 447. प्रायश्चित्तसाम ।

## PRĀYAŚCITTASĀMA.

Here is a collection of Sāmans designated as the Prāyaścittasāma. All the varieties of Sāmans are enumerated here but the Vedic sacrifices where they are to be chanted for the purpose of atonement, are not stated.

*Beginning:*—

उद्वत्प्राजापत्यं यो पुनानः सोमधारा । प्रत्नं सधस्थामाहिकेसादात् प्रच्छन्नं सधस्थनामाहोप्रेसाकाद्येत् ।

*End:*—

यज्ञाके देवं श्रवसं । अचिक्रदद्वि संहितम् । पवस्व वाजो । विषट्कारनिधमेक-स्याम् । पूरोहो उत्तरयज्ञायज्ञीयम् । विधुदद्वयि विषट्कारनिधनमेकस्याम् । वणमकिमित्तेलहो । गौरीविते । पवस्ववाज । पवस्वसोम । उत्सोडोथूरो । श्रायन्तियआन्धीगवद्यौतान्येकर्चानि प्रायश्चित्तानि ।

*Colophon.*—

प्रायश्चित्तं समाप्तम् ।

*Post-Colophon:*—

अग्निरग्ना शूचो कण्वरयन्तरमुत्तरे ककुभो । हरिः ॐ शुभमस्तु ।
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

---

210

## 450. प्रायश्चित्तार्थमाला ।

## PRĀYAŚCITTĀRTHAMĀLĀ.

*By Nārāyaṇakumbhārī, son of Nṛsiṁhakumbhārī*

This work deals with all sorts of expiatory rites related to the Agnihotra and Iṣṭis–Darśapūrṇamāsa etc. The author Nārāyaṇakumbhārī says that he has collected materials for this work from many other works on the subject and he seems to be a great scholar in the Vedic literature and poetics. He appears to have lived in the city of Pratiṣṭhāna–the original place of the Sālivāhana Saka era on the banks of the river Godāvari. This work is divided into two chapters called the Sārās. In

the beginning of the second chapter, the author incorporates a work called the Parvanirṇayadipa composed by his maternal grand father known as Rāmakṛṣṇa. In the treatment of the Prāyaścittas, he generally follows both the schools of Āśvalāyana and Apastamba and quotes profusely from the works belonging to those branches.

*Beginning*:—

श्रीगणेशाय नमः ।
नरसिंहाकृते विष्णो त्वत्कृतिं वर्णयामि किम् ।
अभक्तभक्तयोर्नित्यं कौपीनधनदो ह्यसि ॥ १ ॥
अत्रापरा तुल्ययोगितालङ्कारः ।
हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता ।
प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया ॥ २ ॥

इत्यपरातुल्ययोगिताया लक्षणमुदाहरणे । अभक्तपक्षे कौपीनधन इत्यत्राभेदरूपकालङ्कारः ।

रूपकलक्षणम् ।

विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् ।
रूपकं तत्त्रिधाधिक्यन्यूनतानुभयोक्तिभिः ॥

× × × × ×

लक्ष्मीनृसिंहं वन्देऽहं सत्यपूर्णं गुरुं तथा ।
निरानृसिंहौ पितरौ कुम्भारीत्युपनामकौ ॥
देवार्थं सुफलार्थं च प्रायश्चित्तार्थमालिका ।
नारायणेन क्रियते स्वल्पज्ञानाग्निहोत्रिणे ॥
पण्डितैर्विष्णुसङ्काशैर्मालिकेयं तु कुब्जिका ।
विरला सरला कार्या स्वात्मभूषणकाङ्क्षया ॥

श्रीसूर्यादिसुदेवतामणिमयी श्रीविष्णुमेर्वङ्किता
स्वाज्येनोज्वलिताग्निहोत्रिभिरलं वेदादिसद्गुम्फिता ।
द्रष्टृणां सुखदा हुताशनमुखैर्विप्रैः सदामन्त्रिता
प्रायश्चित्तसुमालिका नरहरे धार्या त्वया सर्वदा ॥
न श्रौतीयविचारकौशलमथो नो व्याकृतौ नैपुणं
नो मे गौतमभट्टशास्त्रसुगतिर्नाप्युत्कटोपासना ।
एवं सत्यपि चापलं विदधतो युक्तोपहासार्हता
श्रोतव्यं गुणिभिस्तथापि कृपया कीरोक्तिवन्मे वचः ॥
गुणिभिर्मेघसङ्काशैर्मद्वाक्यं क्षारजीवनम् ।
तत्पीत्वा मधुरं कृत्वा वृष्टिः कार्याऽर्थसिद्धये ॥

इष्टान् शिष्टान् यज्ञकारांश्च पृष्ट्वा
ग्रन्थान् दृष्ट्वा शुक्लदेवादिसृष्टान् ।
सद्ग्रन्थोक्तिर्लिख्यते श्रौतयुक्त्या
नाहं कर्ता प्रेरको यज्ञभर्ता ॥

अस्य व्याख्या । ग्रन्थसन्दर्भः । ग्रन्थनं नाम ग्रन्थः । सद्ग्रन्थो यस्यां सा सद्ग्रन्था । सद्ग्रन्था चासौ उक्तिश्च सद्ग्रन्थोक्तिः ।

× × × ×

निरातटस्थेन विनायकेन विघ्नालिहन्त्रा कुलदैवतेन ।
लक्ष्मीनृसिंहेन मयि स्थितेन सुप्रेरितोऽहं च तथा करोमि ॥

अथाधानविषय श्रुतिः स्मृतिश्च । यावज्जीवमग्निहोत्रं जुहोति । नैवानाहिताग्निर्म्रियेत ।

गीतायाम्—

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।

गृह्याग्निसागरे वह्निपुराणे—

यो दद्यात्काञ्चनं मेरुं पृथिवीं च ससागराम् ।
तत्सायं प्रातर्होमस्य तुल्यं भवति वा न वा ॥

× × × ×

यावज्जीवमग्निहोत्रं जुहोतीत्यादिश्रुतिस्मृत्याद्यनेकप्रमाणैरग्न्याधानस्य मोक्षसाधनत्वम् । तदग्नीनां चाधाननिष्पाद्यत्वात् द्विजानां श्रौताधानं नित्यमेव प्राप्तम् ।

तत्र सायं प्रातरादिहोमेषु पुरुषाणां भ्रान्तिप्रमादयुक्तत्वेनाकरणान्यथाकरणाभ्यां कर्मणो वैगुण्ये तत्परिहारपूर्वकं साफल्याय प्रायश्चित्तानि निरूप्यन्ते ।

× × × ×

*End of the first Chapter —*

नोल्लिख्यतेऽत्र बाहुल्यं ग्रन्थविस्तरतो भयात् ।
प्रायश्चित्तविशेषार्थं ग्रन्थानन्यान्विलोकयेत् ॥
दक्षोद्भवेशमुडजातटवासिना हि
कुम्भार्युपाभिधनृसिंहतनूद्भवेन ।
नारायणेन सुकृतात्सुकृतार्थमाला
स्वीकृत्य तां तु विबुधाः फलदा भवन्तु ॥

इति प्रायश्चित्तहोममालायाः प्रथमः सारः समाप्तः ।

*Beginning of the second Chapter:—*

श्रीनृसिंहं नमस्कृत्य श्रीनृसिंहात्मजोऽधुना ।
इष्टियोग्यामहं कुर्वे प्रायश्चित्तार्थमालिकाम् ॥

निरूप्य होमकृत्यानि त्विष्टिकृत्यं निरूप्यते ।
मातामहैर्बुधैः पूर्वं रामकृष्णाभिधैः कृतः ॥
पर्वनिर्णयदीपोऽयमिष्ट्यर्थं स प्रकाश्यते ।

कूर्मपूराणे—

दर्शं च पूर्णमासं च ये यजन्ति द्विजातयः ।
न तेषां पुनरावृत्तिर्ब्रह्मलोकात्सनातनात् ॥
अग्निहोत्रं यथाकालं नित्येष्टिं च समाचरेत् ।

अथ पर्वनिर्णयः—

प्रातर्होमादि निर्वृत्य यजेत प्रतिपर्वणि ।
आहिताग्निरतः पर्वनिर्णयः प्रोच्यतेऽधुना ॥
× × ×
प्रायश्चित्तमकृत्वा वा गौणकाले समाचरेत् ।
नित्येष्टिमग्निहोत्रं च भरद्वाजीयभाष्यतः ॥
मुख्यकाले हि मुख्यं चेत्साधनं नैव लभ्यते ।
तत्कालद्रव्ययोः कालमुख्यत्वं गौणताऽपि वा ॥
मुख्यकालमुपाश्रित्य गौणमप्यस्तु साधनम् ।
न मुख्यद्रव्यलाभेन गौणकालप्रतीक्षणम् ॥
इति मुख्यगौणकालनिर्णयः ।
अथेष्टिप्रायश्चित्तानि निरूप्यन्ते ।
तत्रेष्ट्यादौ ऋत्विग्वरणं कार्यम् ।

*End*:—

एवमग्निहोत्रदर्शपूर्णमासचातुर्मास्यादिषु स्वशाखानुक्ते प्रायश्चित्ते स्वशाखोक्ताशक्ता वा परशाखोक्तं प्रायश्चित्तं विधाय नित्यकर्म समापयेत्। अनुक्तप्रायश्चित्ते सर्वप्रायश्चित्त० । विष्णुस्मरणं चेति सङ्कल्पः ।

प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥
प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥
वासुदेवे मनो यस्य जपहोमार्चनादिषु ।
तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ॥

इति भगवद्वाक्यम् ।

श्रीसूर्यादिसुदेवतामणिमयी श्रीविष्णुमेर्वङ्किता
स्वाज्येनोज्वलिताग्निहोत्रिभिरलं वेदादिषड्गुम्फिता ।
द्रष्टृणां सुखदा हुताशनगुणा विप्रैः सदा मन्त्रिता
प्रायश्चित्तसुमालिका नरहरे धार्या त्वया सर्वदा ॥

नो लिख्यतेऽत्र बाहुल्यं ग्रन्थविस्तरतो भयात् ।
प्रायश्चित्तविशेषार्थं ग्रन्थानन्यान् विलोकयेत् ॥
पण्डितैर्मेवसङ्काशैर्मद्वाक्यं क्षारजीवनम् ।
तत्पीत्वा मधुरं कृत्वा वृष्टिः कार्यार्थसिद्धये ॥
दक्षोद्भवेशमुडजातटवासिना हि
कुम्भार्युपाभिधनृसिंहतनूद्भवेन ।
नारायणेन सुकृता सुकृतार्थमाला
स्वीकृत्य तां तु विबुधाः फलदा भवन्तु ॥

*Colophon.—*

इति श्रीमद्गोदावरीतीरविराजमानशालिवाहनशकस्थानक्षेत्रप्रतिष्ठाननिवासिना कुम्भारीनृसिंहार्यसूरिसूनुना श्रीनृसिंहपरायणनारायणेन विरचितायाः प्रायश्चित्तार्थमालिकाया द्वितीयसारः समाप्तोऽयमिष्टिप्रकरणे ।

*Post-Colophon.—*

शके १७५९ हेमलम्बसंवत्सरे पौष वद्य २ ते दिवसि मात्रेगणोपनामकबालम्भट्टात्मजमाधवेन लिखितं समाप्तम् ।

---

## 211

## 451. बहुपत्नीनिर्णयः ।

## BAHUPATNĪNIRṆAYA.

It is a polemical discussion on the relation existing between the sacrificer and his wife on one side and the Vedic sacrifices including the Ādhāna on the other. Several interesting topics are raised up here for discussion by the anonymous author of the work who seems to be well-versed in the Pūrvamīmāṁsā and Śrauta literature.

*Beginning:—*

जायापती अग्निमादधीयातामित्यादिवचने 'लिङ्गविशिष्टनिर्देशात् पुंयुक्तमैतिशायनः' इत्यधिकरणेन च दम्पत्योरग्न्याधानादावधिकारः प्रसिद्धः । ज्योतिष्टोमेनेत्याद्याश्चोदनाः श्रूयन्ते । तत्रेदं विचार्यते । किमुभयोः परस्परनिरपेक्षयोरधिकार उत सापेक्षयोरेवेति । यदा सापेक्षयोस्तदा पत्न्याः प्राधान्यं यजमानस्य गुणभूतत्वम् । आहोस्विद्यजमानस्य प्राधान्यं पत्न्या गुणभूतत्वमिति ।

यदा पत्न्या गुणभूतत्वं तदापि तस्या यज्ञकर्तृत्वं फलभोक्तृत्वं चास्ति नास्तीति । यदाप्यस्ति फलभोक्तृत्वं तदा तस्याः पूर्वं मरणे त्रेताग्निसाध्यः पितृमेधोऽस्ति नास्तीति । तत्र तावदाख्यातोपात्तायाः सङ्ख्याया गुणभूतोपादेयकर्तृगामित्वेन विवक्षितत्वादेकैकशः प्रयोग इति चेन्न ।

*End:—*

अथापि स्मृतिपादे विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमित्यधिकरणे प्रत्यक्षश्रुतिविरुद्धं वचनं न प्रमाणमित्युक्तं भाष्यकारैः। वार्तिककारैस्तु तस्मिन्नेवाधिकरणे प्रत्यक्षश्रुतिविरुद्ध-वचनेन बोधितमनुष्ठानं तच्छ्रुतिदर्शनपर्यन्तं नानुष्ठेयमित्युक्तम्। अतश्चापूर्वाधानेन बोधितं देवतात्यागरूपमनुष्ठानमनादृत्य पुनराधानमेवानुष्ठेयमित्यलमतिविस्तरेण। तदेतत्सर्वं सत्स-म्प्रदायप्रयोगपरिनिष्ठितविद्वांसो विभावयन्तु।

शके १७६४ शुभकृन्नामसंवत्सरे भाद्रपदशुद्ध १ इन्दु ते दिवसि माचेगणोपनामक-बाळम्भट्टात्मजमाधवभट्टेन लिखितं समापितम्।

*Colophon:—*

आधाने बहुपत्नीनां निर्णयः। इत्याधाने पत्नीप्रधानाप्रधाननिर्णयः समाप्तः।

---

## 212

### 452. बालावबोधपद्धतिः।

### BĀLĀVABODHAPADDHATI.

This work records only the duties observed by the priests in the Cāturmāsya and omits all the necessary Mantras which are to be recited while performing those duties. This seems to be a fragment of a bigger work–Bālāvabodhapaddhati–dealing with the Prayogas of all the Vedic sacrifices according to the Sāṅkhāyanaśrautasūtra. This MS. begins abruptly without a benedictory verse and contains the Cāturmāsyaprayoga up to the Sākamedhaparvan. The anonymous author of this work seems to have composed Prayoga works on the Sāṅkhāyanagṛhyasūtra also. (*vide* W. 1. p. 33). The paper and the hand-writing of this MS. are very old and the first leaf is injured.

*Beginning:—*

× × × ×

अग्निर्वैश्वानरः पर्जन्यः। अनुवाचने अग्नये वैश्वानरायानुब्रूहि। पर्जन्याय०। अग्निं वैश्वानरं य ऊ। पर्जन्यं यज। व्यूहने। अग्निर्वैश्वानरस्य पर्जन्योज्जिति०। अग्निर्वैश्वानरः पर्जन्यस्तमपनुदताम् ॥१॥ वैश्वदेवेऽहतवासःपरिधानम्। ऋत्विग्वरणम्। प्राचीनप्रवणाध्यव-सानम्। विहरणम्। अग्निमष्टा०। सोमश्च०। सवितारं द्वादशक० सरस्वतीं चरुणा। पूषणं पिष्टच०। मरुतः सप्तक०। अथवा मरुतः स्वतवसः। विश्वान्देवान् पयस्या। द्यावापृथिवी एकक०। सद्यो०। सप्तदशो०। अग्न्यन्वाधानं शाखाच्छेदनम्।

× × × ×

इति बालावबोधिन्यां पद्धतौ वरुणप्रघासाः परिसमाप्ताः।

कार्तिकशुक्लचतुर्दश्यां समारोपः।

उद्वसानम् । मन्थनम् । विहरणम् अग्नयेऽनीकवतेऽष्टाकपालः । ब्राह्मणतर्पणान्ते विशेषः । देवतावधारणे । अग्निमनीकवन्तमष्टाकपालेन पुरोडाशेन ।

*End:—*

पितृभ्यो बर्हिषद्भ्यो जुष्टम्० पितृभ्योऽग्निष्वात्तेभ्यो जु० । शेषाभिमर्शनादि । उदिङ्गने । यज्ञपतिं देवपितृयुवमिति । ग्रहणवत्प्रोक्षणम् । त्वा अधिकः । वज्रद्व्याय पित्र्याय कर्मणे० । देवपितृयज्यायै । कृष्णाजिनं पित्र्याय कर्मणे० । पितृयज्यायै । एवमुलूखलमुसलशम्यादृषदुपलशूर्पपात्र्युपवेषकपालेषु । आज्यस्थाली दैव्याय पित्र्याय कर्मणे । दे

---

## 213

### 455. ब्रह्मत्वप्रयोगः ।

### BRAHMATVAPRAYOGA.

This is a guidance to the Brahmā priest in his duties of the Iṣṭi sacrifices according to the Sūtra of the Atharvaveda.

*Beginning:—*

श्रीगणेशाय नमः । अथर्वसूत्रस्थब्रह्मत्वं लिख्यते । तत्र ब्रह्मा आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य अमुकेष्ट्यामार्त्विज्याधिकारार्थं स्नानवपनमन्त्राचमनमन्त्रप्रोक्षणानि करिष्ये इति सङ्कल्प्य सर्वं बौधायनोक्तं कुर्यात् । यजमानेन तन्म ऋध्यतामित्याद्युक्ते तत्त ऋध्यतां तत्ते समृध्यतां तत्ते सम्पद्यतां काम इति ब्रूयात् । यजमानः भूपते भुवनपते भुवांपते महतो भूतस्य पते ब्रह्माणं त्वामहं वृणीमहे । ब्रह्मा वृतो जपति ।

*End:—*

यजमानमाशास्ते ।

येषां प्रयाजा उत वानुयाजा हुतभागा अहुतादश्च देवाः ।
येषां वः पञ्च प्रदिशो विभक्तास्तान्वोऽस्मै सत्रसदः कृणोमि ॥

यदन्नमद्मि बहुधा विरूपमिति तृचेन सूक्तेन भागं प्राश्य—

यदन्नमद्मि बहुधा विरूपं हिरण्यमश्वमुत गामजामविम्
यदेव किञ्च प्रतिजग्रहाहमग्निष्टद्धोता सुहुतं कृणोतु ॥ १ ॥
× × × ×
यदन्नमद्मि अनृतेन देवा दास्यन्नदास्यन्नुत संगृणामि ।
वैश्वानरस्य महतो महिम्ना शिवं मह्यं मधुमदस्त्वन्नम् ॥ ३ ॥

आचम्य । देवसवितरेतत्ते प्राह तत्प्रच सुव प्रच यज बृहस्पतिर्ब्रह्मा स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहि स मां कर्मण्यमित्याह ।

*Colophon—*

इत्यथर्ववेदसूत्रस्थब्रह्मत्वप्रयोगः समाप्तः ।

---

## 214

### 456. ब्रह्मत्वप्रयोगः ।

### BRAHMATVAPRAYOGA.

This is another treatise dealing with the duties of the Brahmā priest in the sacrifices, the Darśapūrṇamāsa, Ādhāna and the Cāturmāsya. This follows the Drāhyāyaṇiyaśrautasūtra.

*Beginning:—*

श्रीगणेशाय नमः। अथ द्राह्यायणानां दर्शपूर्णमासावारभ्याग्निष्टोमपर्यन्तं ब्रह्मत्वप्रयोगो लिख्यते। तत्रादौ दर्शपूर्णमासप्रयोगः। यजमानोऽस्यां दर्शेष्ट्यां पौर्णमासेष्ट्यां वा ब्रह्माणं त्वां वृणीमहे। इति वृते वृतोऽस्मि करिष्यामीत्युक्त्वाऽऽचम्य पूर्वया द्वारा विहारदेशं प्रविश्याध्वर्युयजमानाभ्यां वृतोऽग्रेणाहवनीयं परीत्याहवनीयाद्दक्षिणतो निरस्तः परावसुर्ब्रह्मसदनात्तृणं दक्षिणा निरस्याप उपस्पृश्य। आवसोः सदने सीदामि। आहवनीयाद्दक्षिणत उपविशेत्।

*End:—*

पुनः पुनर्मन्त्रमावर्तयन् शं नो देवीरभिष्टये० शं योरभिस्रवन्तु नः। इत्युपस्पृश्यानवेक्षं प्रत्याव्रजेत् त्र्यम्बकेष्टिः समाप्ता। अदितेष्टिः प्रकृतिवत्। अश्वो दक्षिणा। अश्वं ददामि वरुणायाश्वकामैष ते इति विशेषः। सन्तिष्ठते साकमेधाः शुनासीरीयेष्टिः प्रकृतिवत्। द्वादशगवं सीरं दक्षिणा। सीरं ददामि। उत्तानाङ्गिरसाय सीरं कामैतत्ते। अश्वस्य पूर्ववन्न गवां प्रतिग्रहः।

*Colophon:—*

समाप्तानि चातुर्मास्यानि। ब्रह्मत्वप्रयोगः समाप्तः।

---

## 215

### 457. ब्रह्मत्वप्रयोगः ।

### BRAHMATVAPRAYOGA.

This is another work dealing with the duties of Brahmā in the Ādhāna, Iṣṭi, Paśu and Soma. This follows the Āpastamba School.

*Beginning:—*

अथातो ब्रह्मत्वं व्याख्यास्यामः। अग्न्याधेयसम्भाराहरणकाले दक्षिणेनाग्न्यायतनानि गार्हपत्यमथनदेशस्य दक्षिणतो निरस्तः परावसुरिति तृणं निरस्य अप उपस्पृश्य। आवसो सदने सीदामीत्युपविश्य भूर्भुवः स्वः बृहस्पतिर्ब्रह्माहं मानुष ओमिति जपेत्।

*End:—*

पत्नीसंयाजार्थं गमनमपि निरूढपशुवत्। उदयनीयापयस्ययोरैष्टिकं ब्रह्मत्वम्। उदवसानीया × × तौ च तत्तदायतन आसीत।

*Colophon:—*

इत्यग्निष्टोमब्रह्मत्वम्।

---

## 216

### 458. ब्रह्मत्वप्रयोगः ।

### BRAHMATVAPRAYOGA.

This is another guidance to the Brahmā priest for his duties in the the Darśapūrṇamāsa sacrifice according to the Hiraṇyakeśiyaśrautasūtra.

*Beginning:—*

श्रीगणेशाय नमः । अथ हिरण्यकेशीयब्रह्मत्वप्रयोगः । ब्रह्मा पात्रासादनानन्तरमेव आचम्य तीर्थेन प्रविश्योत्करं उपविशति । अहं भूपतिरहं भुवनपतिरहं महतो भूतस्य पतिर्देवेन सवित्रा प्रसूत आर्त्विज्यं करिष्यामि देव सवितरेतं त्वा वृणते बृहस्पतिं दैव्यं ब्रह्माणं तदहं मनसे प्रब्रवीमि मनो गायत्रियै गायत्री त्रिष्टुभे त्रिष्टुप् जगत्यै जगत्यनुष्टुभेऽनुष्टुब् बृहत्यै बृहती पङ्क्त्यै पङ्क्तिः प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यो विश्वे देवा बृहस्पतये बृहस्पतिर्देवानां ब्रह्माऽहं मनुष्याणां भूर्भुवः सुवः । वृतो जपति ।

*End:—*

सर्वेषु श्रौतेषु गार्ह्येषु कर्मसु यदि मृण्मयं पात्रं भिद्येत तदा ब्रह्मा तदभिमन्त्रयेत । भूमिर्भूमिमगान्माता मातरमप्यगात् । ऋध्यास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यताम् । इति कपालादिकं मृण्मयं पात्रं भिन्नमभिमन्त्रयते । ततस्तत्पात्रं परिकर्मा अप्सु निक्षिपेत् । कर्मव्यतिरिक्तकालेऽभिमन्त्रणं कर्तव्यम् । इति पक्षे तदानीं ब्रह्मणोऽभावे आगामिब्रह्मवरण-पर्यन्तं स्थापितं तत्पात्रमागामिप्रयोगे वृतो ब्रह्माभिमन्त्रयते । सर्वथा स्थापितुमशक्यं चेत्तदा स्वेनैवाभिमन्त्रणं कार्यमेव । अत्र सार्द्धद्वौ मामकौ श्लोकौः–

रसर्त्तुमुनिभूशाके क्रोधाख्ये वत्सरेऽपि च ।
मार्गस्य कृष्णवैष्णव्यां पुस्तकं ब्रह्मणः कृते ॥
पद्वर्धनेत्युपाह्वेन लिखितं स्वीयकर्मणे ।
अर्पितं तातचरणं सर्वविद्वत्सुमण्डितम् ॥
पुरुषोत्तमेन विप्रेण सत्कर्मकरणाय च ।

तातचरणं अत्र द्वितीयैकवचनमादरार्थमथवा उद्देश्यगतत्वात् ग्रहं सम्मार्ष्टि इतिवत् अविवक्षितम् । १७६६ मार्गशीर्ष वद्य ११ तद्दिने हरीशास्त्रीतनूजेन लिखितम् ।

---

## 217

### 462. ब्रह्मत्वप्रयोगः ।

### BRAHMATVAPRAYOGA.

This is another guidance to Brahmā for his duties in all the Vedic sacrifices including the Iṣṭi, Paśu, Soma, Adhāna and Cāturmāsya. This follows the Aśvalāyanīyaśrautasūtra. The author seems to be a great scholar and he quotes frequently from the Aśvalāyanīyaśrauta-sūtra, Vṛtti, Kārikā and the Bhāṣyas of Devatrāta and Siddhāntin.

*Beginning:—*

श्रीगणेशाय नमः। अथेष्टिब्रह्मत्वमिह वक्ष्यते। तत्रेदं सूत्रम्। अथ ब्रह्मणो होत्राचमनयज्ञोपवीतशौचानि नित्यः सर्वकर्मणाम्। अथ शब्दोऽधिकारार्थः। इदानीं ब्रह्मणो विधयोऽधिक्रियन्त इत्यर्थः। आचमनयज्ञोपवीते यथा होतुर्विहिते कर्माङ्गभूते तथा ब्रह्मणोऽपि विधीयेते। तस्य अङ्गुधारणा च नित्या भवति। तस्य यज्ञोपवीतशौचे नित्ये भवतः। विहारदेशादव्यावृत्तिश्च भवति। प्राक्चेष्टताऽस्य नेष्यते। कर्मान्तरालेषु ऋत्विक्षु नियत इत्येतदर्थं नित्यग्रहणम्। सर्वग्रहणं पाकयज्ञेष्वपि प्रापणार्थमिति वृत्तिकृदादयः। नित्यः सर्व० तान्यत्र। तत्रैवं प्रयोगः।

Leaf 7 b. सर्वेष्टिपशुसोमेषु ब्रह्मणोऽयं विधिः समः।
यत्र यत्र विशेषो यः स विशेषोऽथ कथ्यते ॥
ब्रह्मोदनाशने ब्रह्मा पुनर्निरसनासने। इति नृसिंहः।
पशुसोमेषु दर्शपूर्णमासयोर्ब्रह्मत्वप्रयोगः।
अथेदानीमग्न्याधाने यो विशेषः स उच्यते।

*End:—*

त्र्यम्बको नाम कर्मविशेषः। तत्र यदध्वर्युणोदितं तदस्मदीयैरपि कर्त्तव्यम्। त्र्यम्बकास्तु सव्यावृद्धच्छेदध्वर्युणोदितम्। मन्त्रं जपेद्ब्रह्मदिष्टे तैः समं तत एव च। इति नृ०। एतस्मिन्त्र्येष्टिः सन्तिष्ठते। ततः त्र्यम्बकेभ्यः प्रत्येत्यादित्येष्ट्या चरन्ति। अनीकवतेष्टिमारभ्य एतदन्ता इष्टयः साकमेधा उच्यन्ते। साकमेधाः समाप्ताः। अथ शुनासीरीयेष्टिः। पञ्चभ्यां पौर्णमास्यां शुनासीरीययाऽर्वाग्यथोपपत्ति वा वाजिनवर्जं समाना वैश्वदेव्या।

*Colophon.—*

चातुर्मास्यब्रह्मत्वप्रयोगः समाप्तः।

*Post-Colophon:—*

शके १७३८ धातानाम संवत्सरे श्रावणवद्य ७ ते दिवसि माचेगणोपनामकबालम्भट्टात्मजमाधवभट्टेन लिखितं सम्पादितं स्वार्थं परोपकारार्थं च।

---

## 218

### 463. ब्रह्मत्वप्रयोगः।

### BRAHMATVAPRAYOGA.

This is another work guiding the Brahmā priest in his duties of the Cāturmāsya sacrifice. This begins only from the Varuṇapraghāsaparvan and follows the Āśvalāyanaśrautasūtra.

*Beginning —*

श्रीगणेशाय नमः। अथाश्वलायनस्य वरुणप्रघासस्य ब्रह्मत्वप्रयोगो लिख्यते। अग्निप्रणयने आचम्योत्तरेण चात्वालगार्हपत्ययोर्गत्वा गार्हपत्यस्य दक्षिणतो निरसनोपवेशने कृत्वा गमनसमये आशुः शिशान इति सूक्तं जपन्नग्नेर्दक्षिणतो गत्वा सूक्तं समापयेत्। ततोऽग्रेणोत्तरां वेदिं गत्वोपविश्यातिमुक्तिहोमान्ते निरसनोपवेशने कृत्वा बृहस्पतिर्ब्रह्मेति जपः।

## 311

*End*:—

नैमित्तिकप्रायश्चित्तेषु होममन्त्रा भवेयुः । जपमन्त्राणां निवृत्तिः । अभिमर्शनादिक्रिया-मात्रमेव । तत्र निदर्शनम् । हविषां स्कन्नमभिमृशेत् । देवाजनमगन्निति । नैमित्तिकप्रायश्चित्तं तु प्रकृताहवनीय एव । विन्याहवनीयानुगमने योनितस्तूर्णीं प्रणीय । अन्वाहितप्रायश्चित्तम् । ततः प्रणीय सर्वप्रायश्चित्तमेव ।

*Colophon*.—

इति चातुर्मास्यब्रह्मत्वं सम्पूर्णम् ।

*Post-Colophon* —

शके १६७४ अङ्गिरानामसंवत्सरे ज्येष्ठशुद्ध ५ वारो गुरुस्तथैव च । इदं पुस्तकं उम्रजकर इत्युपनामक रामसूनोर्लक्ष्मणस्य हस्तम् ।

---

## 219

### 464. ब्रह्मत्वप्रयोगः ।

### BRAHMATVAPRAYOGA.

This is another guidance for the Brahmā in his duties of the Paśu and Agniṣṭoma sacrifices.

*Beginning*:—

श्रीगणेशाय नमः । पशौ प्रणयनात्पूर्वं निरसनोपवेशने ब्रह्मजपहीने कुर्यात् । प्रणीय-माने अग्नौ व्रजतामृत्विजां दक्षिणतो व्रजन् आशुः शिशान इति सूक्तं जपेत् । समाप्य निरसनोपवेशने कृत्वा ब्रह्मजपं कुर्यात् । अत ऊर्ध्वं वाग्यत आस्त आचात्वालमार्जनात् ।

× × × ×

सोमे सोमप्रवाकेण अमुकशर्मणः सोमो भविष्यति तत्र भवता ब्रह्मत्वं कर्तव्यं इत्युक्तो ब्रह्माणं पृच्छति को यज्ञः क ऋत्विजः का दक्षिणेति । तेन च प्रतिवचने दत्ते यजमानेन वृतः सन् जपति ।

*End*:—

उन्नेत्रोन्नीयमाने उन्नेतर उन्नों नयो नेतर्वै स्तोऽभ्युन्नयान इति जपेत् । उद्वयन्तम-सस्परि० । ज्योतिरुत्तममित्यादित्यम् । तदभावे आहवनीयमुपस्थायानवेक्षमाणा इत्यादि समिदाधानान्तं पशुवत् । संस्थितायां मैत्रावरुण्यामिक्षयाश्चेत्यादिभिः सर्वप्रायश्चित्तं हुत्वा संस्थाजपेनोपस्थाय तीर्थेन निष्क्रामेत् ।

*Colophon*.—

इति ब्रह्मत्व अग्निष्टोमः समाप्तः ।

*Post-Colophon*:—

शके १७३५ श्रीमुखनामसंवत्सरे ज्येष्ठशुद्ध ७ शनिवासर ते दिवसि मात्रेगणोपनाम बालम्भट्टात्मजमाधवेन लिखितम् ।

---

## 220

### 466. ब्राह्मणाच्छंसिप्रयोगः ।

### BRĀHMANĀCCHAMSIPRAYOGA.

This treatise deals with the duties of the Brāhmanācchamsin, one of the assistants of the Brahmā priest in the Agnistoma sacrifice. The work is incomplete in the beginning and at the end. It contains only the Bhakṣa portion with the Mantras related thereon.

*Beginning*:—

श्रीगणेशाय नमः । अध्वर्य उपह्वयस्व । वाग्देवी सोमस्य तृप्यतु । अपाम सोममममृता अभूम । अगन्म ज्योतिरविदाम देवान् । किन्नूनमस्मान् कृणवदरातिः । किमधूर्तिरमृत-मर्त्यस्य । शन्नो भव हृद आपीत इन्द्रो पितेव सोमसूनवे सुशेवः । सखेव सख्य उरुशंस धीरः प्रण आयुर्जीवसे सोमतारिः ।

*End*:—

उक्थं वाचि इन्द्राय ये यजामहे ऋजीषी वज्री वृषभस्तुराषाट् सुष्मी राजा वृत्रहा सोमयावा । युक्ता हरिभ्यामुपयासदर्वान् माध्यन्दिने सवने मत्सदिन्द्रावौ । सोमस्याग्ने । भक्षणं पूर्ववत् । नाप्यायनम् । ये यजामह इन्द्रश्च सोमं पिबतं बृहस्पते अस्मिन् यज्ञे मन्दसाना वृषण्वसु । आवां विशन्त्विन्दवः । स्वा भुवोस्मे रयिं सर्ववीरं नियच्छता वौ । सोमस्याग्ने वीहि वौ ।

*Colophon*.—

इति <u>ब्राह्मणाच्छंसिप्रयोगः</u> ।

---

## 221

### 469. ब्राह्मणाच्छंसिप्रयोगः ।

### BRĀHMAṆĀCCHAMSIPRAYOGA.

This manual also states the duties and Śastras of the Brāhmaṇā-cchamsin in the Aptoryāma sacrifice.

*Beginning*:—

अनाधृष्टमस्यना + धाः । अंशुरंशुष्टे + दृचमशीय । एष्टाराय एष्टा + पृथिव्यै जुष्टो वाचे भया + वाचे स्वाहा पुनरादाय पञ्चविग्राहं स्वाहा वाचे + महोभ्यः स्वाहा । अध्वना-मध्वपन इत्यादि सदसस्पतये नम इत्यन्तं मैत्रावरुणवत् । अथ प्रातःसवनस्य प्रस्थितयाज्या । ये—हे इन्द्र त्वा वृषभं वयं सुते सोमे हवामह स पाहि मध्वोऽन्धसा वौ । सोमस्याग्ने वीहि वौ । द्विर्वागोजः । अध्वर्य उपह्वयस्व । वाग्देवी सोमस्य तृप्यतु । अपाम सोमम् । शन्नो भव । आप्यायस्व सन्ते । अथ ऋतुयाज्या । ये + हे इन्द्रो ब्रह्मा ब्राह्मण...... तु ना सोमं पिबतु वौ ।

अथ शस्त्रम् । हिं भूर्भुवः स्वरोम ।

*End*:—

इति तृतीयपर्यायः । ब्राह्मणाच्छंसिनः पर्यायाः समाप्ताः । हरिः ओम् । ब्राह्मणाच्छंस्य-सोर्यामशस्त्रम् । हिं भूर्भुवः स्वरों शों तद्वोगायसुते सचा पुरुहूताय सत्वने

× × × ×

उक्थं वाचि । ये यजामहे । पनाय्यन्तदश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः सहस्रं शंसा उतये गविष्टौ सर्वामित्तामुपयाताविबध्या वौ । सोमस्याग्ने वीही वौ ।

---

## 222

### 470. भक्षमञ्जरी ।

### BHAKṢAMANJARĪ.

*By Jagannātha Dīkṣita, son of Yādava Dīkṣita.*

This work deals with the method of drinking the Soma juice in the Agniṣṭoma sacrifice and fixes up the order among the persons who should take part in it. The author Jagannātha Dikṣita seems to be a great scholar in the Śrauta literature and Pūrvamīmāṁsā since he quotes several rules of the Pūrvamīmāṁsa in support of his views. This work is based on the Bodhāyanaśrautasūtra.

*Beginning*.—

श्रीगणेशाय नमः ।

नत्वा बोधायनाचार्यं पितरं यादवाभिधम् ।
निरूप्यते सोमभक्षो बौधायनमतानुगः ॥ १ ॥

भक्षणे त्रीणि निमित्तानि श्रुता निर्दिष्टानि । वषट्कारः होमाभिषवौ समुच्चितौ समाख्या च । वषट्कर्तुः प्रथमभक्ष इति वषट्कारनिमित्तः । हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्तीति होमाभिषवावपरं निमित्तम् । प्रैतु होतुश्चमस इत्यादिसमाख्याऽप्यपरं निमित्तम् । ननु समाख्यया भक्षणं कार्यमिति श्रुत्या न विहितम् । वचनाभावात् । न च समाख्यैव भक्षस्य विधायिकेति वाच्यम् । तादृशपदानां नामधेयत्वेनान्वयदर्शनादिति चेत् । सत्यम् । समाख्याभक्षणं श्रुत्या न स्वरूपेण विहितमपि कार्यतस्तु विहितमेव । तथा हि ।

*End*:—

केचित्तु द्विर्भक्षणमुन्नेत्रा कर्तव्यमित्याहुः । अत्र युक्तमयुक्तं ज्ञात्वा यत्सम्यक् तत्कर्तव्यं सोऽयं यथानिमित्तभक्षः । यथाश्रुतभक्षस्तु सुलभत्वात् बहुभिर्लिखितत्वात् प्रायेणैतदनुष्ठानाभावाच्च नास्माभिर्निरूपितः ।

मया भ्रमेणान्यथा स्यादुक्तं तच्छोधने बुधाः ।
भवन्तु सदयाः सन्तः प्रयोगपरिनिष्ठिताः ॥

*Colophon*:—

इति श्रीदीक्षितयादवसूनुदीक्षितजगन्नाथकृता बौधायनमतानुसारिभक्षमञ्जरी सम्पूर्णा ।

---

## 223

### 473. महाव्रतदशाहसामानि ।

### MAHĀVRATADAŚAHASĀMĀNI.

Here is a list of Sāmans to be chanted during the performance of the Mahāvratadaśāha.

*Beginning:—*

ओम् । प्रथमस्य प्रसोमासो विपश्चित इति गायत्रं । प्रथमायामाश्वं द्वितीयायां सोमसाम तृतीयायां प्रसोमदेववीतय इति यौधाजयं प्रतुद्रवेत्यौशनमन्त्यम् । गायत्राश्वसोमसामयौधाजयौशनानां साम्नां पुष्कलाश्वभूतप्रजापतिसोमयुधाजिदुशनस इति ऋषयः ।

*End:—*

परिस्वानेरगिरिष्ठा इति गायत्रस्वाशिरामर्कौ पवस्वेन्द्रमच्छेति सफश्रुध्यपुरोजितीत्यौदलमाद्यायां मधुश्चुन्निधनम् । यज्ञायज्ञीयान्धीगवानि च सूर्यवतीषु कावमन्त्यम् । गायत्रस्वाशिरामर्कसफश्रुध्यौदलमधुश्चिन्निधनयज्ञायज्ञीयान्धीगवकावानां पुष्कलस्वाशिरामर्कसफप्रजापत्युदलप्रजापत्यग्निवैश्वानरान्धिगुकुत्सा इति ऋषयः ।

*Colophon:—*

महाव्रतदशमाहः समाप्तम् ।

---

## 224

### 475. महाव्रतप्रयोगः ।

### MAHAVRATAPRAYOGA.

Here is a collection of Stomas, Ṛks and Sāmans to be chanted during the Mahāvrata ceremony according to the Drāhyāyaṇaśrautasūtra. The method of chanting the Sāmans on different occasions is generally fixed in this work. Tālavṛntanivāsin may be the author of this treatise as this codex contains his several other works in the beginning and at the end.

*Beginning:—*

पारीगोतोषिश्चाता सुकाताप्रेम्

× × × ×

महानाम्नीरधिकृत्य सूत्रकारेण किञ्चिदुक्तम् । तदप्यत्र प्रदर्शयिष्यामः । सिमाबृहत्यनुष्टुप्सु योनौ यथापदं व्यूहेत् । त्रयोदशपादा महानाम्न्यः तद्वदेव बृहत्यनुष्टुभौ त्रयोदशपादा विभजेदिति । कुत इत्याह । स ऋग्धर्म इति । यथारूपमृगन्तरं कार्यमिति योनिस्तथारूपमृगन्तरं कार्यमित्येष हि ऋचां धर्म इति । सिद्धान्तमाह । सप्तधेत्याचार्या इति । सप्तधैव विभजेदिति ।

*End:—*

योन्यभिप्रायेण तत्। इह तु त्र्यक्षर एव प्रतिहारः। विच्छन्दस्वक्षरवृद्धिर्लोपश्च। तत्र गीतेन प्रतिहारं विद्यादित्युक्तत्वात्। प्रातिहारिकमेव गीतम्। प्रतिहारो वैच्छन्दसेष्वप्यपदादाविति सूत्रवचनाच्च। अत्र सूत्रकारेणोत्तमानुगानेऽविभागपक्ष एवमुक्तम्। स्तुतस्य स्तुतमसीत्यादि। उदवसानीयेष्टिपूर्णाहुत्यन्तं ज्योतिष्टोमवत्। एतं परिक्रमं सर्वक्रतुषु विद्यादित्यतिदेशात्।

*Colophon:—*

इति महाव्रतं समाप्तम्।

---

## 225

### 476. महाव्रतसामादि।

### MAHĀVRATASAMADI.

Here is a list of Sāmans chanted during the performance of the Mahāvrata, Sarvatomukha and Ādhāna sacrifices.

*Beginning:—*

श्रीगणेशाय नमः। अथैकाहिकसर्वजिन्महाव्रतप्रयोगस्य सामानि। अथ बहिष्पवमानम्। उपास्मै गायता नरोम्० अभिते मधु० पवमान०। उपोषु जातमप्तुरंगोभिर्भंगपरिष्कृतम्। इन्दुं देवा अयासिषुः। तमिद्वर्धंतु नो गिरो वत्सँ सँशिश्वरीरिव। य इन्द्रस्य हृदँ सनिः। अर्षानः सोमशं गवे धुक्षस्व पिप्युषीमिषां वर्धासमुद्रमुक्थ्यम्।

Leaf 9 b.

व्रतसंज्ञकात्पृष्ठादन्यानि स्तोत्राणि सर्वाणि पञ्चविंशतिस्तोमकानि पञ्चविंशमितरत्सर्वम्।

इति महाव्रतसर्वजित्सामानि समाप्तिमगमन्।

इदं पुस्तकं धोंडभट्टनान्दुरकरस्य।

अथ सर्वतोमुखसामानि। उपास्मै गा० तृच्। उपोषु जात० तृच्। पवमानस्य ते कवो० तृच्।

Leaf 19 a.

इति सर्वतोमुखानि सामानि समाप्तानि।

श्रीगणेशाय नमः। अथाधानसामानि। उद्गाता मन्थनारम्भकालेऽरण्योः स्पृष्ट्वा अरण्योरिति साम त्रिर्गायेत्। अरण्योरिति साम्नो भरद्वाज ऋषिः। त्रिष्टुप् छन्दः। अग्निर्देवता। मन्थनारम्भेऽरण्योरिति गाने विनियोगः।

*End:—*

इयेतम्। अभिप्रवः सुराधस ३४। ओहो वा० तृच।

*Colophon:—*

इत्याधानसाम समाप्तम् ।

*Post-Colophon:—*

घोण्डभट्टनान्दुरकरस्य पुस्तकम् । इदं पुस्तकं केशवदीक्षितेन सम्पादितम् ।

---

**226**

477. **मानवश्रौतप्रयोगः ।**

MĀNAVAŚRAUTAPRAYOGA.

This MS. contains Prayogas for the Agnihotra and Darśapūrnamāsa according to the Mānavaśrautasūtra belonging to the Maitrāyaṇīyaśākhā of the Black-Yajurveda.

*Beginning:—*

श्रीगणेशाय नमः ।

अथ मानवसूत्रानुसारेण सायंप्रातरग्निहोत्रहोमो लिख्यते । तस्य सायमुपक्रमः । प्रथमप्रयोगे देशकालौ सङ्कीर्त्य० र्थमग्निहोत्रहोममारप्स्यमानस्तदङ्गं गणपतिपूजनं पुण्याहवाचनं च करिष्ये । श्रीपरमेश्वरप्रीत्यर्थं सायंप्रातरग्निहोत्रं यावज्जीवं होष्यामि असति बाधके । त्रिंशतं वा वर्षाणि होष्यामि ।

Leaf 10 b.

अनेन प्रातरग्निहोत्रहोमाख्येन कर्म० न मम ओं तत्सद्ब्रह्मार्पणमस्तु ।

शके १७६३ प्लवनामसंवत्सरे माघशुक्ल ४ हस्ताक्षरमहिपतिभटजोशी थांद्रफळप्रगणे संगमनेरकरेण लिखितम् ।

श्रीगणेशाय नमः । अथ मैत्रायणीयशाखिनां मानवसूत्रोक्तदर्शपूर्णमासप्रयोगो लिख्यते । यजमानः प्रातर्होमानन्तरं श्मश्रुपक्षौ चादौ वापयित्वा केशान् दक्षिणोपक्रमं वापयेत् । ततः शिखाकक्षोपस्थवर्जमितराणि लोमानि । ततः सव्यहस्तस्य नखानध्यात्मं कनिष्ठिकातः कारयेत् । एवं दक्षिणहस्तस्य । पत्नी तु नखनिकृन्तनमेव कुर्यात् । ततः स्नानमुभौ कुरुतः ।

*End:—*

अनेन पौर्णमासाख्येन कर्मणा भगवान् यज्ञस्वरूपी श्रीपरमेश्वरः प्रीयतान्न मम ।

अनेन दर्शेष्ट्याख्येन कर्मणा भगवान् यज्ञस्वरूपी श्रीपरमेश्वरः प्रीयतान्न मम । ॐ तत्सद्ब्रह्मार्पणमस्तु । विष्णवे नमः ।

× × × ×

*Post-Colophon.—*

शके १७६३ प्लवनामसंवत्सरे भाद्रपदमासेऽयं समाप्तः ।

हस्ताक्षरमहीपतिभटजोशी ग्रामथांद्रफळ प्रगणे संगमनेरकरेण लिखितम् ।

---

# 227

## 479. मित्रविन्देष्टिप्रयोगः ।

## MITRAVINDEṢṬIPRAYOGA.

This is a manual of the Mitravindeṣṭi which is performed for obtaining wealth, longevity or friends. This Prayoga belongs to the Bodhāyanīya School. The MS. contains at the end Hautra prayoga and also the Sūtras dealing with this Iṣṭi in the 5th chapter of the Kātyāyanīyaśrautasūtra.

*Beginning:—*

श्रीगणेशाय नमः । अथ मित्रविन्देष्टिः । श्रीकामो वाऽऽयुःकामो वा मित्रप्राप्तिकामो वा तामिष्टिं कुर्यात् । इयं सार्वकालिका० पूर्वेद्युर्नान्दीमुखं रात्रावुदकशान्तिं प्रतिसरबन्धं च कृत्वा श्वोभूते स्नानादिपञ्चकं कुर्यात् । ऋत्विजः स्नानादिचतुष्टयं कुर्युः । पुण्याहे अग्न्यादयः प्रीयन्तामिति विशेषः । ऋत्विग्वरणमर्हणं च कृत्वा प्रथमप्रयोगेऽन्वारम्भणीयां कृत्वा वृत्तिकारमते त्वकृत्वा याः पुरस्तादित्यादि जपित्वा श्रीपरमेश्वरप्रीत्यर्थं मित्रविन्देष्ट्या यक्ष्ये० इति त्रिरुपांशु त्रिरुच्चैः ।

*End:—*

अग्नेः सोमस्य वरुणस्य मित्रेन्द्रस्य बृहस्पतेः सवितुः पूष्णः सरस्वत्यास्त्वष्टुरहमुज्जि० देवानामाज्यपानामित्यादि ब्राह्मणतर्पणान्तं समानम् ।

*Colophon:—*

सन्तिष्ठते मित्रविन्दा ।

*Then Hautra begins:—*

अथ हौत्रम् । नमः प्रवक्त्र इत्यादि० शोचिष्केशस्तमीमहो ३ पृथुवाजा अ० वो ३ तं सबाधोयत० भूतयो ३ समिद्धो अग्न इत्यादि०

*End:—*

अग्निः सोमो वरुणो मित्र इन्द्रो बृहस्पतिः सविता पूषणः सरस्वती त्वष्टा इदं० हविर० कृत देवा आज्यपा इत्यादि संस्थाजपान्तं प्रकृतिवत्०

*Colophon:—*

इति मित्रविन्देष्टिहौत्रम् ।

Sūtras of the Kātyāyanīyaśrauta.

सूत्रम् । मित्रविन्दा । श्रीराष्ट्रमित्रायुष्कामस्य दशहविराग्नेयोऽष्टाकपालः सौम्यश्चरुर्वारुणो दशकपालश्चरुर्वायव्यो मैत्रश्चरुरैन्द्राग्न एकादशकपालो बार्हस्पत्यश्चरुः etc.

*End:—*

स्वाहेति विराजौ संयाज्ये सहस्रवत्यौ वानूनोरास्व सहस्रवदुत नो ब्रह्मन्न विप इति दशदक्षिणा सहस्रं वा सहस्रं वा ।

*Colophon:—*

इति कात्यायनीये पञ्चमः ।

---

## 228

### 480. मित्रविन्देष्टिप्रयोगः ।

MITRAVINDEṢṬIPRAYOGA.

This is another manual dealing with the Mitravindeṣṭiprayoga according to the Aśvalāyanīyaśrautasūtra. It contains Hautra also at the end.

*Beginning:—*

श्रीगणेशाय नमः । अथ मित्रविन्देष्टिः । पौर्णमास्याममावास्यायां वा देवनक्षत्रेष्वापूर्यमाणपक्षे वा श्रीकामो राष्ट्रकाम आयुष्कामो वा मित्रविन्देष्टिं कुर्यात् । यथोक्तकाले कृतावश्यकक्रियः प्रातरग्निहोत्रानन्तरं केशादीन्वापयन्न वा । ततो वृद्धिश्राद्धमुदकशान्तिं च कृत्वा रात्रौ प्रतिसरबन्धं तन्त्रेण वा रात्रावुदकशान्तिं प्रतिसरबन्धं च कृत्वा श्वः प्रातर्होमानन्तरं द्व्यहकालां सद्यस्कालां वाऽन्वारम्भणीयां कुर्यान्न वा ।

*End:—*

अथोपांशु । अग्नेः सोमस्य वरुणस्य मित्रस्येन्द्रबृहस्पतेः सवितुः पूष्णः सरस्वत्यास्त्वष्टुः। अथोच्चैः । प्रिया० देवा० हविरिमो० तू वौषट् । उज्जितिवाचनेऽग्निः सोमो वरुणो मित्र इन्द्रो बृहस्पतिः सविता पूषा सरस्वती त्वष्टा इत्युपांशु । इदं हविरजुषतावीवृधत महो ज्यायो कृतेत्युच्चैः । अन्यत्सर्वत्र प्रकृतिवत् ।

*Colophon:—*

इति मित्रविन्देष्टिहौत्रप्रयोगः ।

---

## 229

### 481. मित्रविन्देष्टिप्रयोगः ।

MITRAVINDEṢṬIPRAYOGA.

This is another manual of the Mitravindeṣṭiprayoga according to the Āpastamba school.

*Beginning:—*

श्रीगणेशाय नमः । अथ मित्रविन्देष्टिप्रयोगः । दर्भेष्वासीनो दर्भान्धारयमाणः श्रीपरमेश्वरप्रीत्यर्थं मित्रविन्देष्ट्या यक्ष्ये । विद्युदसि । अध्वर्युवरणम् । अद्य यज्ञाय । ऐष्टं हविः । सप्तदश सामिधेन्यः । ततस्त्वात्रयोविंशतिधा पौर्णमासं तन्त्रम् । पात्रप्रयोगकाले । एकपञ्चाशत्कपालानि पञ्च स्थालयः स्फयश्च द्वन्द्वम् । अग्निहोत्रहवणीशूर्पं चेति द्वयम् । अन्वाहार्यस्थालीवर्जम् । शेषं प्रकृतिवत् ।

*End*:—

स्वष्टृसरस्वतीपूष्णसवितृबृहस्पतीन्द्रमित्रवरुणसोमाग्नेषा(?) महमुज्जितिमनूज्जेषम् । शंयुवाकादि सर्वं प्रकृतिवत् । यज्ञो बभूव यज्ञशञ्चमवर्जम् । इति सन्तिष्ठते ।

*Colophon*:—

इति मित्रविन्देष्टिः समाप्ता ।

*Post-Colophon*:—

इदं पुस्तकं उप्रजकरोपनामकरामभट्टस्य सुतलक्ष्मणेन लिखितम् । स्वार्थं परोपकारार्थं च । शके १६६६ रक्ताक्षीनामसंवत्सरे फाल्गुनशुक्लषष्ठ्यां वारो भौमस्तथैव च ।

230

## 484. मृगारेष्टिप्रयोगः ।

## MṚGĀREṢṬIPRAYOGA.

*By Anantadeva.*

This is a manual of the Mṛgāreṣṭi which is calculated to remove sins and diseases of a man. The author Anantadeva begins the work with a scholarly discussion on the result obtained from the Mṛgāreṣṭi and quotes several authorities in this connection. The work follows the Bodhāyana school. The MS. is injured.

*Beginning*:—

श्रीगणेशाय नमः ।

श्रीकृष्णं प्रणतार्तिघ्नमापदेवाभिधं गुरुम् ।
प्रणम्यानन्तदेवेन मृगारेष्टिविनिर्णयः ॥ १ ॥

तत्र कालः । यदीष्ट्या यदि पशुनेति वाक्यात् पौर्णमास्यां दर्शे वा । अथवा शुक्लपक्षे देवनक्षत्रे बौधायन उक्तत्वात् । उत्तरायणे शुक्लपक्षे देवनक्षत्राणि समुदितानि मुख्यः कालः शुद्धिकामस्य पर्वद्वयशुक्लप्रतिपदादियुक्तदेवनक्षत्राणि वा कालः । रोगयुक्तस्य चायमेव काल इति प्रायश्चित्तप्रदीपे । बौधायनसूत्रम् । अथ वै भवति यः पापयक्ष्मगृहीतः स्यात् ।

Leaf 4 a.

प्रकृतमनुसरामः । प्रथमप्रयोगे गणपतिपूजनं पुण्याहवाचनं च । अथ बौधायनोक्तकर्मणः पुण्याहवाचनम् । देशकालौ सङ्कीर्त्य पापयक्ष्माद्यन्यतमनिवृत्तिद्वारा अंह आग एनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीतिकामो वा पापक्षयकामो वा मृगारेष्ट्या यक्ष्य इति सङ्कल्प्यास्यां मृगारेष्ट्यामध्वर्युं त्वामहं वृणे ।

*End*:—

इत्यच्छिद्रानुवाकेन प्रत्यृचं हुत्वा गृहपतियागादि तर्पणान्तम् । यद् घर्मे कपाल उपचिन्वन्ति वेधसः । पूष्णस्तेऽपि व्रत इन्द्र० भुवतामिति द्विकपाल उद्वास्य यज्ञशञ्चमवर्जम् । सिद्धमिष्टिः सन्तिष्ठते ।

अवादीत्थमनन्तेन मृगारेष्टिविनिर्णयः ।
प्रीयतां यज्ञभोक्ताऽथ पवित्रेष्टिर्वितन्यते ॥

## 231

### 487. मृगारेष्टिप्रयोगः ।

MṚGĀREṢṬIPRAYOGA.

This is another manual dealing with the Mṛgāreṣṭiprayoga in detail according to the Bodhāyanaśrautasūtra.

*Beginning*:—

श्रीगणेशाय नमः। अथ मृगारेष्टिप्रयोगः । देशकालौ सङ्कीर्त्य महापापनिर्हरणार्थं श्रीपरमेश्वरप्रीत्यर्थं महामृगारेष्ट्या यक्ष्ये। विद्युत्। ऋत्विग्वरणम्। अग्नीन् विहृत्य देवा गातुविद इत्यादि। श्वो यज्ञाय० इमामूर्जं चतुर्दर्शां० महापवित्रैष्टं हविः । आमावास्यं तन्त्रम्। तत्र देवतानिर्देशः। अग्नीषोमावाज्यभागौ। अग्नये अंहोमुचे दशहविषमिष्टिन्निर्वपति।

*End*.—

इमं मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके । स्वाहा। वरुणा० तत्वायामि ब्रह्मणा० वरुणायेदम्। त्वन्नोऽग्ने वरुणस्य० अग्नीवरुणाभ्यामिदम्। स त्वन्नोऽग्ने वमो० अग्नीवरुणाभ्यामिदम्। त्वमग्नेऽयास्ययासन्मनसा हितः । अयासन्तु हव्यमहिषेयानो धेहि भेषजं स्वाहा। अग्नये अयस इदम् २०। ततो गृहपतिमिष्ट्वा शेषं समापयेत्। यज्ञो बभूव यज्ञशाश्वमवर्जम्।

*Colophon*:—

इति मृगारेष्टिः समाप्ता।

*Post-Colophon*:—

शके १६७४ अङ्गिरानामसंवत्सरे वैशाखशुक्ल १२ इयां वारो भामस्तथैव च।
इदं पुस्तकं कहाडोपनामकनागेशस्य।

---

## 232

### 488. मृगारेष्टिप्रयोगः ।

MṚGAREṢṬIPRAYOGA.

This is another manual of the Mṛgāreṣṭiprayoga according to the Āpastambaśrautasūtra.

*Beginning*:—

श्रीगणेशाय नमः। अथ मृगारेष्टिप्रयोगः। तस्याः कालः। उदगयने देवनक्षत्राणि मुख्यकालः समुदितः। अथवा देवनक्षत्रयुक्तादिपर्वद्वयं शुक्लप्रतिपदादि शुद्धिकामस्य रोग-

युक्तस्यायमेव कालः। प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान्धारयमाणः पवित्रपाणिः पत्न्या सह प्राणानायम्य अद्य आग एनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं मृगारेष्ट्या यक्ष्ये। विद्युत्।

*End.*—

ततो गृहपतियागादि। यानि घर्मे छिः। यद् घर्मे यानि घर्मे त्रिः। यद् घर्मे कपाले उपचिन्वन्ति वेधस० स्ते० अपि।

व्रत इन्द्र० वमुञ्चताम्। दधिक्राव्णो० इदं हविः। इत्युभाभ्यामामिक्षाभक्षणम्। यज्ञो बभूव यज्ञशाश्रमवर्जम्। सिद्धमिष्टिः सन्तिष्ठते।

*Colophon*:—

सन्तिष्ठते मृगारेष्टिप्रयोगः।

*Post-Colophon*:—

ऐन्दवेन मृगारेण कदाचिन्मित्रविन्दया।
पवित्रेष्ट्या विशुध्यन्ति सर्वे घोराः प्रतिग्रहाः॥

संवत् १८३७ फाल्गुनमासे शुक्लपक्षे पौर्णमास्यां भृगुवासरे तद्दिने इदं पुस्तकं समाप्तम्।

विनायकभट्ट खेडकरस्येदं पुस्तकम्।

---

## 233

## 491. मैत्रावरुणप्रयोगः।

## MAITRĀVARUṆAPRAYOGA.

This manual deals with the duties of the Maitrāvaruṇa who is also known as the Praśāstṛ in the Nirūḍhapaśubandha sacrifice.

*Beginning*:—

श्रीगणेशाय नमः। अथ निरूढपशुबन्धप्रशास्तृप्रयोगः। होत्रा प्रशास्तस्तीर्थेन प्रपद्यस्वेति प्रैषे दत्ते प्रागुदगोत्तरवेदिकाग्नेरवस्थाय निष्क्रम्य प्राङ्मुखो यज्ञोपवीत्याचम्य दक्षिणावृदन्तरेण चात्वालोत्करावभिहततरेण पादेन प्रपद्य होतुः समीपे प्रत्यङ्मुखस्तिष्ठति। होत्रा दण्डे दीयमाने मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रतिगृह्णाम्यवक्रो विथुरो भूयासमिति दक्षिणोत्तराभ्यां पाणिभ्यां तं प्रतिगृह्योत्तरेण होतारमतिव्रज्य दक्षिणेन होतारं दण्डं हरेत्।

*End*:—

ततो ग्रहणक्रमेण समिधोऽभ्यादधाति। अग्नेः समिदसि। तेजोऽसि। तेजो मे दाः स्वाहा इति प्रथमां समिधमौत्तरवेदिकेऽग्नावादधाति। सोमस्य समिदसि। दुरिष्टेर्मा पाहि

स्वाहा। इति द्वितीयाम्। पितॄणां सविदसि मृत्योर्मा पाहि स्वाहा इति तृतीयाम्। ॐ च मे स्वरश्च मे यज्ञोपच ते नमश्च यत्ते न्यूनं तस्मै ते उपयत्तेऽतिरिक्तं तस्मै ते नमः। इति संस्थाजपेनोपस्थाय तीर्थेन निष्क्रम्य।

*Colophon.*—

इति निरूढपशुबन्धमैत्रावरुणः समाप्तः।

*Post-Colophon:*—

शके १७९५ श्रीमुखनामसंवत्सरे फाल्गुनवद्य २ गुरुवासरे तद्दिने भालचन्द्रभट गोन्हे याणि लिखितम्।

---

## 234

### 495. मैत्रावरुणप्रयोगः।

### MAITRĀVARUṆAPRAYOGA.

This manual deals with the duties of the Maitrāvaruṇa priest in the Soma sacrifice.

*Beginning:*—

सोममैत्रावरुणप्रयोग उच्यते। आज्यं तानूनप्त्रं करिष्यन्तोऽभिमृशन्ति। अनाधृष्टमस्यनाधृष्टं देवानामोजोऽभिशस्तिपाऽनभिशस्त्यञ्जसा सत्यमुपगेषं स्विते माधाः स्पृष्ट्वोदकं राजानमाप्याययन्तीदमादि मदन्तीरप उपसत्सु। अंशुरंशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविद् आ तुभ्यमिन्द्र प्यायता मा त्वमिन्द्राय प्यायस्व। आप्याययास्मान् सखीन् सन्या मेधया स्वस्ति ते देव सोमसुत्यामुद्दिचमशीय। स्पृष्ट्वोदकं निह्नुवन्ते। प्रस्तरे पाणीन् निधायोत्तानां दक्षिणां सव्याम्।

*End* :—

अथ हारियोजनप्रचारः। अपाः सोममस्तमिन्द्र प्रयाहि कल्याणिर्जायासु रणं गृहे ते यत्रारथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणा वो। धाना सोमानामिन्द्राद्धि च पिब च बध्नान्ते हरीधाना उपऋजीषिञ्जिघ्नथा मा रथ चार्षणे सिञ्चस्व यस्त्वा पृच्छात्विपन् पत्नी त्वामीमदथा इत्यस्मिन् सुन्वती यजमाने कस्मै किमरास्था सुष्टु सुवीर्यं यज्ञस्यागुर उदचं यद्यचीकमतोतोतथाभूद्धोतर्यज। यज्ञपुच्छादि होतृवत् सर्वं कुर्यात्।

---

## 235

### 496. मैत्रावरुणप्रयोगः।

### MAITRĀVARUṆAPRAYOGA.

This is a manual of the Maitrāvaruṇaprayoga for the Agniṣṭoma, Bṛhaspatisava and Vājapeya. The MS. is much injured and moth-eaten. It has different paginations for the three Prayogas.

*Beginning*:—

हरिः ॐ। ज्योतिष्टोमेऽग्निष्टोमस्य मैत्रावरुणप्रयोग उच्यते। वृतोऽस्मि। करिष्यामि। मधुपर्कं होतृवत्। मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रतिगृह्णाम्यवक्रो विथुरो भूयासमिति प्रतिगृह्य होतारमतिव्रजेत्। दक्षिणेन दण्डं हरेत्। न चानेन संस्पृशेदात्मानं वाऽन्यं वा।

× × × × ×

Leaf 10 b.

अग्निष्टोमे मैत्रावरुणः समाप्तः। बृहस्पतिसवस्य मैत्रावरुणप्रयोग उच्यते।

Leaf 13 a.

अथ वाजपेयस्य मैत्रावरुणप्रयोग उच्यते। मधुपर्काद्यासुत्या समानम्।

*End*:—

होता यक्षदग्निं स्विष्टकृतमयाडग्निरग्नेराज्यस्य हविषः प्रियाधामान्ययाड्।

× × ×

---

## 236

## 501. यज्ञपशुमीमांसा।

## YAJNAPAŚUMĪMĀMSA.

*By Vāsudevabhaṭṭa.*

It is a scholarly discussion on the Vedic injunctions prescribing animal sacrifices. The author Vāsudevabhatta seems to be well-versed in the Vedic literature, Smṛtis and Purāṇas. It is established in this work that killing animals in Vedic sacrifices is allowed by the Śāstras and its prohibition is meant only for other purposes. The material and hand-writing of this MS. seem to be old.

*Beginning*:—

श्रीगणेशाय नमः। अथ यज्ञपशुमीमांसा। अग्नीषोमीयं पशुमालभेत सप्तदश प्राजापत्यान् पशूनालभेत इत्याद्यनेकश्रुतितन्मूलकसूत्रविहितेषु तेषु तेषु कर्मसु तत्तत्पश्वालम्भने तत्तत्कर्मविधिबोधितस्वर्गपुत्रपश्वादिफलकामस्यैवाधिकारः उतापवर्गार्थं यावन्नित्यनैमित्तिकैश्चित्तशुद्धिं कामयमानस्यापि। विधिबोधितफलकामस्यैव पशुहिंसायामधिकार इति पक्षेऽपि किं सर्वयुगेषु सर्वेषामधिकार उत युगविशेष इत्याद्यनेकप्रकाराः। ननु विविदिषन्ति ब्राह्मणा यज्ञेन दानेन तपसाऽनाशकेनेत्यादिश्रुतेर्यथोक्तानामेव यज्ञादीनां विविदिषां प्रति अश्वेन जिगमिषतीत्यत्रेष्यमाणगमनं प्रत्यश्वस्येवैष्यमाणज्ञानं प्रति च हेतुत्वमेवावगम्यते। न तु हिंसारहितानाम्। तादृशविधेरभावात्।

*End*:—

न कलौ क्रियते यज्ञो ह्यश्वमेधोऽपि गोसवः ।
नरमेधोऽक्षता नारी देवरात्पुत्रसन्ततिः ॥
गर्हेत सप्तकं ह्येतद्राजसूयं कमण्डलुः ।
अश्वमेधमखं यस्तु कलौ कर्तुमनीश्वरः ॥
अश्वदानं तु तेनेह कर्तव्यं विधिपूर्वकम् ।

इत्येतेन न यज्ञे गोवधः कार्य इति गोवधपुरस्कारेण निषेधः कलौ सामान्यतो हिंसा-यज्ञनिषेधेऽप्रसक्तप्रतिषेधः स्यादित्यपि प्रत्युक्तम् । कलौ निषिद्धपशुहिंसा यज्ञातिरिक्ताङ्गभूत-गोवधे पृथक् प्रायश्चित्तविधानार्थत्वात् ।

*Colophon* :—

इति श्रीमद्भट्टभद्रभानुसूनुगोलिगोपनामकभट्टवासुदेवविरचिता विविधा यज्ञपशु-मीमांसा समाप्ता ।

---

## 237

### 502. यज्ञपात्रलक्षणम् ।

### YAJÑAPĀTRALAKṢAṆA.

*By Reṇukārya.*

This codex contains two works dealing with the definitions for the sacrificial instruments according to the Sūtras of Kātyāyana and Bodhāyana. Both the works are in versified form and the first is attributed to Reṇukārya who follows the Kātyāyanaśrautasūtra.

*Beginning*.—

श्रीगणेशाय नमः ।

अथारणिपात्रलक्षणम् ।

अधुना लक्षणं वक्ष्ये पात्राणामनुपूर्वशः ।
विलोक्य नैगमं शास्त्रमन्यानि च विशेषतः ॥ १ ॥
अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः ।
तस्य या प्राङ्मुखी शाखा वोदीची ऊर्ध्वगाऽपि वा ॥ २ ॥
शाखां तामाहरेद्विप्रः पृष्ठतोऽनवलोकयन् ।
आरणी तन्मयी कार्या तन्मयी चोत्तरारणिः ॥ ३ ॥
संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते ।
अभावे त्वशमीगर्भाद्धरेदेवाविलम्बयन् ॥ ४ ॥
श्वेताङ्कुरो भवेद्विप्रः क्षत्रियो लोहिताङ्कुरः ।
पीताङ्कुरस्तु वैश्यस्य शूद्रः कृष्णाङ्कुरो भवेत् ॥ ५ ॥

Leaf 4 a.

अभावे मुख्यवृक्षस्य यज्ञियस्य तरोरिह ।
यत्किञ्चित्पात्रजातं तदिति भास्करसम्मतम् ॥ ५० ॥
अश्वत्थादरणी ग्राह्या नान्यस्माद्देव वृक्षतः ।
एवं सर्वेषु शास्त्रेषु दृष्टं सूत्रान्तरेष्वपि ॥ ५१ ॥
शान्तिबुद्धया विविच्याथ तरुणीवल्लभेन च ।
यज्वना रेणुकार्येण कृतेयं गृह्यकारिका ॥ ५२ ॥

इत्यरणीयज्ञपात्रलक्षणं समाप्तम् ।

समित्पवित्रं वेदश्च त्रयः प्रादेशसम्मिताः ।
इध्मस्तु द्विगुणः कार्यः त्रिगुणः परिधिः स्मृतः ॥ १ ॥
स्मार्ते प्रादेश इध्मो वा द्विगुणः परिधिः स्मृतः ॥ २ ॥

बौधायनः –

श्रौताङ्गभूतपात्राणां लक्षणं तु मयोच्यते ।
हस्त्योष्ठ्यो हंसमुख्यश्च तथा वायसपुच्छकाः ॥ ३ ॥

*End*:—

षोडशाङ्गुलायामामधरारणीं कुर्यात् । तावतीमेवोत्तरारणीं कुर्यात् । उत्तरारण्याः सकाशात्पश्चिमे भित्रं प्रजननं पुत्रकसंज्ञमष्टाङ्गुलं कुर्यात् । अरण्योरुत्तराधरभागौ विदारितवृक्षस्कन्धोत्तरभागनिबन्धनः ॥ २१ ॥

अविदारिते यथा । उत्तरारण्यवसाने त्वधरारण्या एव प्रजननं कुर्यात् । मन्थोपमन्थानो द्वादशाङ्गुलौ खादिरौ दृढौ कुर्यादिति बोधायनाशयः ।

*Colophon*:—

इति बौधायनीये पात्रारणीलक्षणम् ।

*Post-Colophon*:—

उम्रजकरोपनाम्ना रामचन्द्रसूनुना लक्ष्मणेनेदं लिखितम् । संवत् १८१६ शके १६८१ प्रमाथी संवत्सरे ज्येष्ठकृष्ण ७ वारो रविस्तथैव च ।

---

## 238

### 503. याजमानप्रयोगः ।

### YĀJAMĀNAPRAYOGA.

This work deals with the duties of the Yajamāna or the sacrificer in the Adhāna or the ceremony of kindling the sacrificial fire according to the Apastambaśrautasūtra.

*Beginning*:—

श्रीगणेशाय नमः । आधानयाजमानं लिख्यते । प्रातरौपासनं हुत्वा दर्भेष्वासीनो दर्भान्धारयमाणः पवित्रपाणिः पत्न्या सह प्राणानायम्य देशकालौ सङ्कीर्त्याग्नीनाधास्यमानो

निर्विघ्नतासिध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं च करिष्य इति सङ्कल्प्य पुण्याहवाचनान्ते पुनः प्राणानायम्याग्नीनाधास्ये सर्वक्रत्वर्थं यैरस्म्यधिकृतो यांश्च शक्ष्ये प्रयोक्तुमिति पूर्वाधाने सङ्कल्पः । विद्युत् । अग्नीनाधास्ये । विच्छिन्नसन्धानार्थमिति विच्छिन्नाधाने सङ्कल्पः । अस्मिन्नाधानेऽध्वर्युं त्वां वृणीमहे । एवं ब्रह्माणं होतारमाग्नीध्रं च ।

*End*:—

अथ विराट्क्रमैर्यजमान उपतिष्ठते ।
अथर्वपितुं मे गोपायान्नं प्राणेन सम्मितम् ।
त्वया गुप्ता इषमूर्जमदन्तो रायस्पोषेण समिषा मदेम ॥
दक्षिणाग्निम् ।
नर्य प्रजां मे गोपाय मूलं लोकस्य सन्ततिम् ।
आत्मनो हृदयान्निर्मितां तां ते परिददाम्यहम् ॥
गार्हपत्यम् ।
शंस्य पशून् मे गोपाय विश्वरूपं धनं वसु ।
ग्रहाणां पुष्टिमानन्दं तांस्ते परिददाम्यहम् ॥
इत्याहवनीयम् ।
पञ्चधाग्नीन् व्यक्रामद्विराट्सृष्टा प्रजापतेः ।
ऊर्ध्वा रोहद्रोहिणी योनिरग्नेः प्रतिष्ठितिः ॥
सर्वाग्नीनुपस्थाय ।
अग्नये पवमानायेदं० । अग्नये पावकायेदं० । अग्नये शुचयेदं० ।

*Colophon*:—

इत्याधानयाजमानप्रयोगः समाप्तः ।

---

**239**

504. **याजमानप्रयोगः ।**

YAJAMĀNAPRAYOGA.

This work deals with the duties of the Yajamāna of the Atharvaveda in the performance of the Agnihotra.

*Beginning*:—

श्रीगणेशाय नमः ।

अथाथर्वणयजमानाग्निहोत्रहोमप्रयोगः । विहाराद्बहिराचम्य तीर्थेन प्रविश्य गार्हपत्यस्य पश्चादुपविश्य प्राणानायम्य देशकालौ स्मृत्वा श्रीपरमेश्वरप्रीत्यर्थं सायमग्निहोत्रं पयसा होष्यामि इति सायम् । प्रातरग्निहोत्रमिति प्रातः ।

अव्यसश्च व्यचसश्च बिलं विष्यामि मायया । ताभ्यामुद्धृत्य वेदमथ कर्माणि कृण्महे ॥

इति मन्त्रं जपित्वाऽग्निहोत्रीं धेनुं ब्राह्मणेन दोहयित्वाऽग्निहोत्रार्थं गोपयो गार्हपत्येऽधिश्रयति । अभिज्वाल्य त्रिः पर्यग्निकृत्वा । उल्मुकं निरस्याप उपस्पृश्य स्रुवेणाद्भिराप्याय्य तत्त्वोदंचमुद्वासयति ।

*End:—*

शतांरेतश्चमात्रं चेत ऊर्ध्वमुभौ काम० । शतां चक्षुश्च मा पशुबन्धश्च यज्ञोमुतोर्वांश्च मुभौ कामप्रैभूत्वा क्षित्या सहाविशताम् । इति संस्थाजपः । यस्य स्मृत्येत्यादि कर्मेश्वरार्पणं कुर्यात् । उद्धरणपक्षे पुरा च्छायानां सम्भेदाद् गार्हपत्यादाहवनीयमभ्युद्धरेत् । मृत्युर्वै पाप्मानं छायातिरसौ संप्रेयं कृत्वोद्धराहवनीयमिति संप्रैपवर्जमेकाग्नौ ।

× × ×

हौम्यैः समिद्भिः पयसा स्थालीपाकेन सर्पिषा ।
सायं प्रातर्होम एतषामेकेनापि सिध्यति ॥ इति गोपथब्राह्मणपरिशिष्टे ।
यवव्रीहिमहाव्रीहिप्रियङ्गूनां हि तण्डुलाः ।
श्यामाकतण्डुलतिला आसाद्य श्रुतिचोदिताः ॥ १ ॥

---

## 240

### 506. याजमानप्रयोगः ।

### YĀJAMĀNAPRAYOGA.

This MS describes the duties of the Yajamāna in the performance of the Darśapūrṇamāsa according to the Hiraṇyakeśiyaśrautasūtra.

*Beginning:—*

श्रीगणेशाय नमः ।

अथ दर्शपूर्णमासयाजमानो लिख्यते । यजमानः पौर्णमास्यां प्रातरग्निहोत्रानन्तरं श्मश्रुपक्षकेशलोमनखानि वापयित्वा स्नात्वाऽपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान्धारयमाणो यजमानः पत्न्या सह प्राणानायम्य देशकालौ सङ्कीर्त्य श्रीपरमेश्वरप्रीत्यर्थं दर्शपूर्णमासाभ्यां यक्ष्ये । त्रिरुपांशु त्रिरुच्चैः सङ्कल्प्य तत्रेदानीं पौर्णमासेष्ट्या यक्ष्ये इत्युक्त्वा । अमावास्यायां तु श्रीपरमेश्वरप्रीत्यर्थं दर्शेष्ट्या यक्ष्ये इत्येवं सङ्कल्प्य तत्पूर्वमस्यां पौर्णमासेष्ट्यामध्वर्युं त्वामहं वृणे ।

*End:—*

अनृणा अस्मिन्ननृणाः परस्मिंस्तृतीये लोके अनृणाः स्याम । ये देवयाना उत पितृयाणाः सर्वान्पथो अनृणा आक्षीयेम ।

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥
काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे ।
स्वर्गापवर्गदात्रे च यज्ञेशाय नमो नमः ॥
प्रायश्चित्तान्यनेकानि जपः कर्मात्मकानि च ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

ज्ञात्वाऽज्ञात्वा कृतेनैव विधिनाऽविधिनापि वा ।
प्रीणातु भगवानीशः कर्मणाऽनेन शाश्वतः ॥
प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतः ॥

*Colophon*:—

इति याजमानं समाप्तम् । यज्ञेश्वरार्पणमस्तु ।

*Post-Colophon* —

शके १७७३ विरोधकृन्नाम संवत्सरे स्वार्थं परार्थं च ।
इदं पुस्तकं दात्ये इत्युपनामक विनायकेन लिखितम् ।
महादेवभट नारायणभट हरभट विनायक विष्णुशास्त्रीसदाशिव ।

---

## 241

### 508. याजमानप्रयोगः ।

### YĀJAMĀNAPRAYOGA.

This work deals with the duties of the Yajamāna in the Āgrayaneṣṭi which is to be performed at the time of the production of new corns. This follows the Apastambīya school.

*Beginning*:—

श्रीगणेशाय नमः ।

अथाग्रयणे लिख्यते । दर्भेष्वासीनो दर्भान्धारयमाणः पवित्रपाणिः पत्न्या सह प्राणानायम्य देशकालौ सङ्कीर्त्य पुण्यतिथौ श्यामाकाग्रयणं समानतन्त्रं कुर्वन् व्रीह्याग्रयणेन यक्ष्ये इति सङ्कल्प्य । विद्युत्० । ऋत्विग्वरणादि । अन्वाधाय । यजमानो विशेषः । अद्य यज्ञाय । इमामूर्जं पञ्चदशीं आग्रयणीयं हविः । आमावास्यं तन्त्रम् । अग्निमन्वाधाय । पयस्वतीरित्यादिव्रतप्रवेशः । यज्ञोऽसीति० । अयं यज्ञः । यो नः कनीय ० । अपनमिन्द्राग्नी० । पुनः यो नः कनीय० । अपतं विश्वे देवा भुवनान्नुन्दतां० । ममाग्ने पञ्चहोतेत्यासन्नाभिमर्शनम् ।

*End*:—

अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः । विष्णुक्रमादि । यज्ञो बभूव । यज्ञशञ्चमवर्जम् । सिद्धमिष्टिः सन्तिष्ठते ।

*Colophon*.—

इति आग्रयण आपस्तम्बीययाजमानः समाप्तः ।

*Post-Colophon*.—

शके सत्रासे १७८५ रुधिरोद्गारिनामसंवत्सरे माहे आश्विने मासे कृष्णपक्षे प्रतिपत्तिथौ १ भौमवासरे तद्दिने लिखितम् ।

खेडकर इत्युपनामक गणेशभट्टात्मजसुत काशीनाथभट्टेन लिखितम् ।

## 242

## 509. याजमानप्रयोगः ।

YĀJAMĀNAPRAYOGA.

This is another work containing the duties of the Yajamāna in the Cāturmāsya sacrifice according to the Bodhāyanaśrautasūtra.

*Beginning* --

श्रीगणेशाय नमः ।

अथ चातुर्मास्यानां याजमानमुच्यते । तत्रादौ प्रथमप्रयोगे वैश्वानरेष्टिप्रयोगो वक्ष्यते । चातुर्मास्यान्यारप्स्यमाणोऽन्वारम्भणीयापूर्वदिने प्रातर्वैश्वदेवं कृत्वा पुण्याहवाचनपूर्वकं नान्दीश्राद्धं रात्रावुदकशान्तिप्रतिसरबन्धौ विधाय प्रातः स्नानादिपञ्चकान्ते पश्चाद्गार्हपत्य-स्येत्यादिनिविष्टमित्यन्ते स्वर्गकामसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं चातुर्मास्यैर्यक्ष्ये । तन्म ऋध्यतामित्यादि ॐ तथेत्यन्ते । ऋत्विग्वरणमर्हणं च कृत्वा ।

*End.*—

सूर्यायेदं० सूर्यस्याहमु० । शेषं वैश्वदेववत् । सामिष्टियजुंपिकाले उपवेषोपगूहनं च । ब्राह्मणतर्पणान्तं पूर्ववत् । अनुवत्सरीणां स्वस्तिमाशास्ते । ततोऽग्नीन् प्रदक्षिणीकृत्य नमस्कृत्य विष्णुं स्मृत्वा भगवदर्पणं कुर्यात् । इति शुनासीरीयपर्व ।

*Colophon*:—

इति चातुर्मास्ययाजमानं समाप्तम् ।

*Post-Colophon*:--

शके १६ से ९७ मन्मथनामसंवत्सरे फाल्गुन शुद्धपञ्चमी भृगुवासरे तद्दिने महादेव-भट्टसुतयज्ञेश्वरभट्टजेजूर्करेण लिखितम् ।

---

## 243

## 510. याजमानप्रयोगः ।

YAJAMĀNAPRAYOGA.

This is another MS. dealing with the duties of the Yajamāna in the Cāturmāsya sacrifice according to the Apastambaśrautasūtra. The method of the Prayoga treated here is the performance of the sacrifice within five days.

*Beginning*:—

श्रीगणेशाय नमः ।

अथ चातुर्मास्ययाजमानप्रारम्भः । यथाप्रयोगपक्षमाश्रित्य ऐष्टिकचातुर्मास्यैर्यक्ष्य इति पञ्चाहिकानां सङ्कल्पः । एषु चातुर्मास्येष्वध्वर्युं त्वामहं वृणे । एवं ब्रह्माणं होतारमाग्नीध्रम् । चातुर्मास्यान्यारभमाणः पञ्चहोतारं होष्यामि । चातुर्मास्यान्यारप्स्यमाणोऽन्वारम्भणीयया यक्ष्ये । विद्युदसि० अद्य यज्ञाय । इमामूर्जं चतुर्दशीं० त्वान्वारम्भणीयं हवि० प्रियेण नाम्ना प्रियं सद आसीद । यज्ञोऽसीति द्विः ।

*End*:—

इन्द्रस्य शुनासीरस्याहमु० वायोरहमु० सूर्यस्याहमु० यज्ञो म आगच्छतु । अनुवत्सरीणां स्वस्तिमाशास्ते । इदं हविः । तर्पणान्तम् । पूर्ववदुन्दनादि ।

*Colophon*:—

इति <u>चातुर्मास्ययाजमान</u>ः समाप्तः ।

*Post–Colophon*:—

शके १७६३ प्लवनामसंवत्सरे आषाढवद्य ४ सौम्यवासर तद्दिने माचेगणोपनामक बाळम्भट्टात्मजमाधवभट्टेन लिखितम् ।

---

## 244

### 512. याजमानप्रयोगः ।

### YAJAMĀNAPRAYOGA.

This work describes the duties of the Yajamāna in the Agniṣṭoma sacrifice according to the Āpastamba school.

*Beginning*:—

श्रीगणेशाय नमः ।

अथ सोमयाजमानम् । दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य विच्छिन्नसोमपीथसन्धानार्थमैन्द्राग्नपशुं दौर्ब्राह्मण्यपरिहारार्थमाश्विनं च पशुमग्नीषोमीयेन पशुना सहोपालम्भं कुर्वन् सोमेन यक्ष्ये । ज्योतिष्टोमेनाग्निष्टोमेन रथन्तरसाम्ना द्वादशशतगवदक्षिणेन तेन श्रीपरमेश्वरं प्रीणयामि । विद्युदसीत्यप उपस्पृश्य । अस्मिन् ज्योतिष्टोमेऽग्निष्टोमे सोमे सोमप्रवाकं त्वां वृणीमह इति वृत्वा मधुपर्कादिभिरभ्यर्च्य । सोमप्रवाक सोमं मे प्रब्रूहि ऋत्विग्भ्य इत्याह । केभ्य इति सोमप्रवाकेनोक्ते विष्णुशर्मादिभ्य इत्याह ।

*End:—*

वेदमुपस्थाय । आग्नायान्तर्वेद्यासीन इति मोक्षां जपति । ये देवा यज्ञहन इत्यादि । ततो यज्ञशंचम इति जपति । वृष्टिरसीत्यप उपस्पृश्य ब्राह्मणांस्तर्पयत वै इति संप्रेष्यति । प्राजहितं समारोप्य प्रागुदग्वोद्वसाय । यजमानोऽरणी धारयमाण इदमनु: श्रेयोवसानमागन्म शिवे नो द्यावापृथिवी उभे इमे । गोमद्धनवदश्ववदूर्जस्वत्सुवीरा वीरैरनुसञ्चरेमे । देवयजनमध्यवसाय मथित्वोपावरोह्य विहृत्य पूर्णाहुतिं जुहोति । द्वादशगृहीतेन स्रुचि पूरयित्वा । इदं विष्णुर्विचक्रमे० सुरे स्वाहा । अन्तर्वेद्यास्तिष्ठन् पूर्णाहुतिं जुहोति । सैवेष्टि: सन्तिष्ठते । सायमग्निहोत्रं जुहोति । प्रातर्होम: सन्तिष्ठतेऽग्निष्टोम: ।

*Colophon:—*

इति सोमयाजमानं समाप्तम् ।

---

## 245

## 513. याजमानप्रयोग: ।

### YĀJAMĀNAPRAYOGA.

This is another MS. dealing with the duties of the Yajamāna in the Agniṣṭoma sacrifice according to the Bodhāyanīya school.

*Beginning:—*

श्रीगणेशाय नम: ।

ॐ सोमेन यक्ष्यमाण: पूर्वेद्युर्वृद्धिश्राद्धं रात्रावुदकशान्तिप्रतिसरबन्धाविधाय प्रातरग्निहोत्रं हुत्वा ऋत्विग्भि: सह स्नानादिपञ्चकं विधाय वेद्युत्करयोर्मध्येन प्रपद्य गार्हपत्यस्य पश्चात् प्रागग्रेषूपविष्ट: सपत्नीको य: पुरस्तादित्यादि निविष्टमित्यन्तमुक्त्वा विच्छिन्नसोमपीथसन्धानार्थमैद्राग्नं पशुं दौर्ब्राह्मण्यपरिहारार्थमाश्विनं पशुमग्नीषोमीयेन पशुना समानतन्त्रं कुर्वन् द्वादशस्तोत्रेण द्वादशशस्त्रेण सप्रवर्ग्येण रथन्तरसाम्ना द्वादशशतगवाद्यन्यतमदक्षिणेन ज्योतिष्टोमेनाग्निष्टोमसंस्थेन चतुष्टोमेन स्वर्गकाम: सोमेन यक्ष्ये त्रिरुपांशु त्रिरुच्चै: । तन्म ऋध्यतामित्यादि ।

*End:—*

नम आदित्येभ्योऽद्भ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यो लोकं मे यजमानाय विन्दतैष वै यजमानस्य लोक एतास्म्यत्र यजमान: परस्तादायुषे स्वाहा । अपजहि परिघम् । अपहत परिघम् । युजे वाचं शतपदीम् । गाये सहस्रवर्तनि गायत्रं त्रैष्टुभं जगाद्विश्वा रूपाणि सम्भर्तार देवा ओकांसिचा १२१२ कायिरे । आ ३४५ तन्तवे मा ज्योतिषामुकशर्मन् । अनुमा तनुहि ज्योतिषा ।

*Colophon*:—

बौधायनीयमग्निष्टोमयाजमानं समाप्तम् ।

---

## 246

### 514. याजमानप्रयोगः ।

### YĀJAMĀNAPRAYOGA.

This is another MS. dealing with the duties of the Yajamāna in the Agniṣṭoma sacrifice according to the Āpastambaśrautasūtra. The MS. is injured and incomplete.

*Beginning*:—

वसन्तेऽमावास्यायां पौर्णमास्यां वा सुत्या यथा स्यात्तथोपक्रमः कर्तव्यः । एका दीक्षा-पक्ष एकादश्यामुपक्रमः । तिस्रो दीक्षापक्षे नवम्यामुपक्रमः । यस्य पित्रादयोऽनिष्टप्रथमयज्ञाः स ऐन्द्राग्नेनेष्ट्वाऽथ सोमेन यजेत । अपि वा अग्नीषोमीयस्योपालम्भं कुर्यात्तत्रैवं सङ्कल्पः । प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति । त्रिपुरुषसोमपीथविच्छेदप्रायाश्चित्तार्थमैन्द्राग्नं पशुं दौर्ब्राह्मण्यनिर्हरणार्थमाश्विनं पशुं चाग्नी-षोमीयेन पशुना सहोपालम्भं कुर्वन् सोमेन यक्ष्ये ज्योतिष्टोमेनाग्निष्टोमेन रथन्तरसाम्नैक-विंशतिदक्षिणेन । तेन परमेश्वरं प्रीणयानि ।

*End* :—

आपो देवीस्तुडितीर्विश्वशंभुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पतिर्नो हविषा प्रयातु स्वाहा । मानसा मे मनो दीक्षताग्ना स्वाहा । अद्भ्यो द्यावापृथिवीभ्यामन्तरिक्षाय बृहत इदं मनस इदम् ।

---

## 247

### 515. याजमानप्रयोगः ।

### YĀJAMĀNAPRAYOGA.

This is another work dealing with the duties of the Yajamāna in the Aikāhikacāturmāsya sacrifice according to the Bodhāyanaśrautasūtra.

*Beginning*:—

श्रीगणेशाय नमः ।

ऐकाहिकचातुर्मास्ययाजमानप्रारम्भः । पश्चाद्गार्हपत्यस्य पत्न्या सह प्राणानायम्य देश-कालौ सङ्कीर्त्य यः पुरस्तादित्यादि निर्विघ्नमित्यन्ते श्रीपरमेश्वरप्रीत्यर्थमैकाहिकचातुर्मास्यै-र्यक्ष्ये इति त्रिरुक्त्वा । ओं तथा । ऐकाहिकचातुर्मास्यसम्बन्धि हविः । व्रीहिमयः पुरोडाशो व्रीहिमयश्चरुः आज्यं च । आमिक्षा पयो यवमयो धाना यवमयः करम्भः । नव प्रयाजाः अग्नीषोमावाज्यभागौ । अग्निः सोमः सविता सरस्वती पूषा मरुतः स्वतवसो विश्वेदेवा द्यावापृथिवी इन्द्राग्नी मरुतो वरुणः ।

*End:—*

अग्ने समिदसि तेजोऽसि तेजो मे दाः स्वा० । सोमस्य समिदसि दुरिष्टेर्मा पाहि स्वा० । पितॄणां समिदसि मृत्योर्मा पाहि स्वा० । सर्वत्राग्नय० पयस्वतीरित्यादि । अग्नये सप्तवत इ० । संवत्सरीणां स्वस्तिमाशास्ते । परिवत्सरीणां स्व० । इदावत्सरीणां स्वस्ति० अनुवत्सरीणां स्वस्तिमाशास्ते ।

*Colophon:—*

इति ऐकाहिकचातुर्मास्ययाजमानः समाप्तः ।

---

## 248

## 516. याजुषहौत्रकर्तव्याकर्तव्यविचारः ।

## YĀJUṢAHAUTRAKARTAVYĀKARTAVYAVICĀRA.

Here is a discussion on the subject of employing the Hotṛ priest in the Vedic sacrifices. It is generally believed that the followers of the Ṛgveda are to be engaged as Hotṛ priests in the sacrifice. But the author establishes in this work that a follower of the Yajurveda also may be employed as Hotṛ in case a Ṛgvedi priest is not available.

*Beginning:—*

श्रीशं वन्दे ।

अथ हौत्रादिषु वेदपरिग्रहविचारः । तत्राथर्ववेदभाष्योपोद्घाते गोपथब्राह्मणम् । अथ प्रजापतिः सोमेन यक्ष्यमाणो वेदानुवाचकं वो होतारं वृणीयाह । कमध्वर्यु कमुद्गातारं कं ब्रह्माणमिति । त ऊचुः । ऋग्विदमेव होतारं वृणीष्व । यजुर्विदमध्वर्युम् । सामविदमुद्गातारम् । अथर्वाङ्गिरोविदं ब्रह्माणम् । तथाहास्य यज्ञश्चतुष्पात्प्रतितिष्ठतीति । अत्र प्रथमवाक्ये श्रुतोऽप्येवकारः उत्तरवाक्यत्रयेऽप्यनुषञ्जनीयः न्यायसाम्यात् । तेन वाक्यचतुष्केऽपि हौत्रादिविषये ऋग्वेदादीनामयोगान्ययोगयोर्व्यवच्छेदादृग्वेदेनैव हौत्रं यजुर्वेदेनैवाध्वर्यवं सामवेदेनैवौद्गात्रमथर्ववेदेनैव ब्रह्मत्वमिति चतुर्विधनियमसिद्धिः ।

*End:—*

एवं च यत्र स्वशाखायुक्ताध्वर्यवादिविधीनां वैयर्थ्यं तत्रैव तदनुसारेणानुष्ठानम् । तदभावे तु तत्तद्वेदायुक्ता एवाध्वर्यवादिप्रयोगाः कार्या इति निष्कर्षः सिद्धः । यथामत्युक्तमेतन्निपुणतरबुद्धिभिर्धर्मदर्शिभिर्मात्सर्यमुत्सार्य विचार्यमिति प्रार्थना । विचार्य च तदनुसारेण स्वशाखाद्यनुसारिण आध्वर्यवादिप्रयोगा ऊह्या इति शिवम् । एवं हौत्रादौ ऋग्वेदादेर्मुख्यत्वे स्थिते होत्रादिऋत्विगपि तत्तद्वेदायुक्तसंस्कारसंस्कृतस्तत्तच्छाखाद्यध्यायी च मुख्यः । अभ्यर्हितत्वेनान्तरङ्गत्वात् । असम्भवेत्वन्योऽपि तत्तत्कर्मवेत्ता । कर्मणः प्राधान्यात् । न त्वङ्गानुरोधेन प्रधानभूतकर्मानुष्ठानस्य लोपः कार्य इति ज्ञेयम् ।

*Colophon:—*

इति याजुषहौत्रकर्तव्याकर्तव्यविचारः ।

---

## 249

### 518. वाजपेयप्रयोगः ।

### VAJAPEYAPRAYOGA.

This is a manual of the Vājapeya sacrifice according to the Hiraṇyakeśiyaśrautasūtra.

*Beginning*:—

श्रीमङ्गलमूर्तये नमः । अथ वाजपेयप्रयोगो वक्ष्यते । वाजपेय इति कर्मनाम । वाजोऽन्नं सोमः सुरा च तस्मिंश्च योगादृत्विग्भिर्वाजसृद्भिः पीयते । तेन वाजपेयेन ब्राह्मणो राजन्यो वा यजेत । स वा एष ब्राह्मणस्य चैव राजन्यस्य च यज्ञ इति श्रुतेः । अकामसंयोगात्संस्थान्तःपातित्वाच्च नित्यो भवति । शास्त्रान्तरे फलदर्शनात्काम्योऽपि भवति । तस्माद्वाजपेयो नित्यः काम्यश्च भवति । तस्य कालः शरद्वसन्तो वा । तस्य सप्तदश दीक्षास्तिस्र उपसद एकविंशी प्रसुतः ।

*End*:—

ऋत्विजस्तानि समशः प्रतिविभज्य भक्षयन्ति । अनवद्रानीयानि च वाजसृद्भ्यस्तानि दक्षिणस्यां वेदिश्रोण्यां विभार्थीकृत्य भक्षयन्ति । सर्वाभिर्जाघनीभिः पत्नीः संयाजयन्ति । एतदादि समानमाप्रातरग्निहोत्रात् ।

*Colophon*:—

सन्तिष्ठते वाजपेयः ।

*Post-Colophon*:—

तेनेष्ट्वा सौत्रामण्या यजेत । न कश्चन प्रत्युत्तिष्ठति । बृहस्पतिसवेनेष्ट्वा प्रत्युत्तिष्ठेदित्यापस्तम्बः । चतुष्टोमेनेति बौधायनः ।

शाके द्व्यभ्राश्वभूतुल्ये (१७०२) पौषासितहरौ रवौ ।
वाजपेय प्रयोगोऽयं लल्लेनालेखि बाबुना ॥ १ ॥
श्रीमच्छङ्करपादाब्जमकरन्दलिहां सताम् ।
काशीनाथसुतेनेह पुण्यग्रामे महापुरे ॥

---

## 250

### 521. वासुदेवीयकारिका ।

### VASUDEVĪYAKĀRIKA.

*By Vāsudeva.*

This MS. contains a series of Kārikās or verses dealing with the performances of the Dvitiyaśyenaciti, Triṣāhasra, Pauṇḍarīka, Mahāvrata, Aruṇaketuka and Vaiśvadeva. There is a continuous pagination in all 33 leaves. The first work, Dvitiyaśyenaciti only is attributed to Vāsudeva.

It is incomplete and ends in the 18th leaf. Leaves 19–23 contain Triṣāhasrakārikā. Leaves 24–25a contain the Pauṇḍarīkakārikā which is described under No. TSL. 2643. Remaining leaves contain Kārikās for the Mahāvrata, Āruṇaketuka and Vaiśvadeva. All these works are anonymous and incomplete.

*Beginning*:—

वासुदेवकारिका ।

द्वितीयस्य श्येनचितो वासुदेवाध्वरी सुधीः ।
तनोति भाष्यवृत्यादिरीत्या सङ्ग्रहकारिकाः ॥ १ ॥

पर्वण्येकाष्टकायां वा सङ्कल्पो विकृतेः कृतोः ।
अमुना साग्निचित्येनेत्युक्त्वा पृष्ठाद्युदाहृतिः ॥ २ ॥

विद्युत्सोमप्रवाकस्य वरणादि तु सौमिकम् ।
सक्षे(?)दान्ते विहृत्याग्निं बृहस्पत्यादिराहुतिः ॥ ३ ॥

तूष्णीं स्रुक्स्रुवसंमार्गश्चतुर्वाज्यस्य गृह्यते ।
चतुर्गृहीतमपरमृचा स्तोमेति हूयते ॥ ४ ॥

Leaf 18 a.

विनायकं नमस्कृत्य गुरून्वागीश्वरीमपि ।
त्रिषाहस्रप्रयोगस्य कारिकाऽद्य वितन्यते ॥ १ ॥

त्रिप्रस्तारास्त्रिषाहस्रे चितयः परिकीर्तिताः ।
तूष्णीं पुरीषं प्रस्तारे प्रस्तारे घटनार्थकम् ॥ २ ॥

चित्यन्ते तु समन्त्रं स्यादिति भाष्ये निरूपितम् ।
पुरीषान्तेति सूत्रेण पञ्चेत्यादिश्रुतेरपि ॥ ३ ॥

*End*:—

पञ्चमं मानुषं यज्ञं सर्वैर्दद्याद्धविर्बलिम् ।
प्रथमं शाकलो होमो द्वितीयं तु षडाहुतिः ॥ १ ॥

बलिहारस्तृतीयं तु पैतृकं तदनन्तरम् ।
रौद्रं ततः परं चैव वैहायसबलिं पुनः ॥ २ ॥

देवयज्ञं ततः प्रोक्तं पितृयज्ञं ततः परम् ।
भूतयज्ञं ततः प्रोक्तं मानुषं तत उच्यते ॥ ३ ॥

ततश्च काकभूतानां बलिक्रम इहरितः !
द्वे चैकद्वे च चतुरस्त्रयस्त्वेकैकशः क्रमात् ॥ ४ ॥
दश चैकमिति प्रोक्तं वारिसेचनकं क्रमात् ।

## 251

## 523. विधुराधानप्रयोगः ।

## VIDHURĀDHĀNAPRAYOGA.

*By Govinda.*

In this short work the author deals with the performance of the Vidhurādhāna or kindling the sacrificial fire for a widower. He quotes in the beginning the Sūtras of Bodhāyana, Bharadvāja and Āpastamba as an authority for the performance of this rite.

*Beginning.*—

श्रीगणेशाय नमः ।

ॐ । अथात ऋतुनक्षत्राणामेव मीमांसा । ऋतूनेवाग्रे व्याख्यास्यामोऽथ छन्दांसीति । वसन्ते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्यो वर्षासु रथकार इति सर्वेषां त्वेव वसन्ते आधानं सर्वेषां रोहिण्यां यथावर्णं त्वेव छन्दांस्यपि लुनु (?) खलु कामनियुक्तान्यग्न्याधेयानि भवन्ति । यथैतद्भवति कृत्तिकास्वग्निमादधीत रोहिण्यामग्निमादधीत ।

× × × × ×

अथ प्रयोगः । मम विधुराधानाधिकारदिनादारभ्यैतावत्कालपर्यन्तं विधुराग्निसन्धानाभावजनितप्रत्यवायपरिहारार्थं प्रतिसंवत्सरमेकैकप्राजापत्यात्मकं प्रायश्चित्तं येन केनचित्प्रत्याम्नायद्वारा कृत्वाऽऽधानोक्तकाले प्राणानायम्य देशकालौ सङ्कीर्त्य विधुराग्नीनाधास्यमानो निर्विघ्नतासिध्यर्थं गणपतिपूजनं कर्मणः पुण्याहवाचनं करिष्ये ।

*End.*—

यद्याहिताग्निर्विच्छिन्नाग्निरुत्सृष्टाग्निर्विधुराग्निर्वा प्रमीयेत तस्य प्रायश्चित्तं न तमन्येन त्रेताग्निभ्यो दहन्तीति विज्ञातमसा वा एष तमः प्रविशति सह तेन य आहिताग्निमन्येन त्रेताग्निभ्यो दहन्तीति विज्ञायते । आधानप्रभृति य ईज्यमान एवाग्नयो भवन्तीति ।

*Colophon:*—

गोविन्दकृतविधुराधानप्रयोगः ।

---

## 252

## 524. विधुराधानप्रयोगः ।

## VIDHURĀDHĀNAPRAYOGA.

This MS. contains three kinds of Vidhurādhānaprayoga according to the Srautasūtras of Āpastamba, Bodhāyana and Āśvalāyana. The anonymous author quotes freely from several works and deals with all the topics connected with this performance.

*Beginning*:—

अथापस्तम्बाश्वलायनानुसारी विधुराधानप्रयोगो लिख्यते । तत्र प्रथमतस्तस्य पुनःसन्धानं बह्वृचकारिकायाम् :-

अनाश्रमी न तिष्ठेत क्षणमप्यग्निना विना ।
आचरेद्यदि मूढात्मा वेश्याजः परिकीर्तितः ॥ १ ॥
सन्धानं विधुरः कुर्यात् पृष्ठोदिविविधानतः ।
औपासनं ततः कुर्यात्सायमादि यथाक्रमम् ॥ २ ॥
पिण्डयज्ञादिकं चैव तस्मिन्नेव हुताशने ।
पुनःसन्धानवत्कुर्याल्लाजहोमान्तमेव हि ॥ ३ ॥
ततश्चाज्याहुतीस्तत्र चतस्रो जुहुयादिमाः ।
अयाश्चाग्नेरिदं विष्णु सप्त तेऽग्न एव च ॥ ४ ॥

*End*:—

इत्याश्वलायनस्यैकेष्टिपक्षः ।

अथापस्तम्बशाखिन इष्टित्रयं प्रयोगान्तरे वक्ष्यामः । अन्वारम्भणीयां चेति । दर्शपूर्णमासाग्रयणादीनि शेषाणि कर्माणि न भवन्तीत्यापस्तम्बस्मरणात् । मण्डनः -

केचित् पत्युः प्रधानत्वान्नाद्रियन्ते तु योषितम् ।
तेनेष्टौ स्यान्महेन्द्रेज्या न स्युः सारस्वतादयः ॥ १ ॥
आहिताग्निर्मृतस्त्रीक आदधानोऽन्यया सह ।
कृतारम्भादिधर्मोऽपि कृतसोममखोऽपि वा ॥ २ ॥
अकृतारम्भसोमेज्यां भार्यामेवानुवर्तते ।
नास्ति माहेन्द्रसान्नाय्यं सन्ति सारस्वतादयः ॥ ३ ॥

इत्यनन्तदेवकारिका ।

*Colophon*:—

इत्यापस्तम्बबोधायनसूत्रोक्तविधुराधानप्रयोगः ।

---

## 253

### 525. विधुराधानप्रयोगः ।

### VIDHURĀDHĀNAPRAYOGA.

This short work deals with the Ādhānaprayoga for a widower according to the Bodhāyanaśrautasūtra. No author's name is found in this MS.

*Beginning:—*

अथातो मृतपत्नीकस्य विवाहासमर्थस्य होमविधिं व्याख्यास्यामः। प्रणवेन लौकिकाग्निं परिगृह्यान्वग्निरुषमग्रमख्यदित्यानीय पृष्ठोदिवीति प्रतिष्ठाप्य तत्सवितुस्त्वां सवितुरद्यानो देव सवितर्विश्वानि देव सवितरिति चतसृभिश्चतस्रः समिधोऽभ्याधायाग्निमलङ्कृत्योपासनं जुहुयादेवमहरहः काले प्रणवादिहोमान्तं कुर्यादाविवाहादासंन्यासादामरणादनाश्रमदोषो नास्तीत्याह भगवान् बोधायनः। अथ विधुराधानप्रकारः। देशकालौ सङ्कीर्त्य विधुरोऽहमात्मप्रयोजनपूर्वकं श्रीपरमेश्वरप्रीत्यर्थमग्नीन् पुनराधास्य इति सङ्कल्प्य गणपतिपूजनमृत्विग्वरणं चेष्ट्यन्तमविकृतमाधानं कुर्यात्। क्षौमवस्त्रं यजमानस्यैव। न पत्न्यर्थस्य।

*End:—*

अरणीसमारोपपक्षे सप्तधा वेष्टितऽरणी कृत्वा ताभ्यां सहैव गच्छेत्। अजिन १ कम्बल २ दर्भ ३ गोकेश ४ शण ५ भूर्जपत्र ६ तालपत्रात्मकानि सप्त ७। पञ्चपक्षे तालभूर्जपत्रयोर्निवृत्तिः। त्रित्वपक्षे गोकेशशणभूर्जपत्रतालपत्राणां निवृत्तिरिति द्रष्टव्यम्।

*Colophon:—*

इति विधुराधानम्।

---

## 254

### 526. विधुराधानविचारः।

### VIDHURĀDHĀNAVICĀRA.

*By Caturdhara Nīlakaṇṭha, son of Govinda Dīkṣita.*

It is discussed here whether a widower is allowed to kindle the sacrificial fires once again according to the Śastras or not. The author quotes in this connection many authorities and comments upon several texts bearing on this subject.

*Beginning:—*

अथ चतुर्धरनीलकण्ठप्रणीतापत्नीकाधानविचारः। श्रीशं वन्दे।

यज्ञेश्वरं नमस्कृत्य बहून् ग्रन्थान् विभाव्य च।
अपत्नीकस्याग्निहोत्राद्यस्ति नेति विचार्यते॥

तत्रायं पूर्वः पक्षः। सङ्ग्रहे—

प्राप्ताप्राप्ताग्निहोत्रौ ह्व्यपह्नदहनौ स्तः प्रणष्टाग्निहोत्रौ इति बह्वृचब्राह्मणे। निविष्टे मृता पत्नी वाग्निहोत्रमिति श्रूयते। आहिताग्नौ यजमाने निविष्टे कर्मण्यग्निहोत्रादौ बद्धश्रद्धे सत्यग्निहोत्राद्यारम्भादूर्ध्वं प्राग्वा मृता चेन्नष्टाग्निहोत्र एवायं भवति। पूर्वाग्नेः पत्नीसंस्कारार्थमुपयुक्तत्वात्।

× × × ×

सिद्धान्तमाह ।

प्राप्तं चेष्ट्यग्निहोत्राग्रयणमकरणे दोषिणोराहिताग्न्योः । इति । तदाहुर्य आहिताग्निरमा- वा० रिति । तदाहुर्य आहिताग्निराग्रयणे० रिति चेति । आहिताग्निमात्रस्येष्टिकालातिपत्ता- वाग्रयणाकरणे च प्रायश्चित्तश्रवणात्तदुभयं नित्यमिति गम्यते । एवमग्निहोत्रपिण्डपितृ- यज्ञयोरपि लोपे प्रायश्चित्तविधानान्नित्यत्वमूह्यम् । अत एवाग्निहोत्राकरणादपत्नीकस्य प्रत्यवायो दृश्यते ।

*End:—*

उपसंहरति ।

नष्टोत्सृष्टोपयुक्तः स नियतमनलं सम्भृतो वाऽऽदधीत । स विधुरोऽपत्नीको नष्टं सोमो- ल्लङ्घनादिनिमित्तेन । उत्सृष्टं विधिपूर्वकं त्यक्तं वा । शवाग्नयो वा एते ये मृतायां पत्न्यां धार्यन्त इति शवाग्निधारणस्य प्रागुक्तरीत्याऽगत्या प्राप्तस्य निन्दितत्वात्तेषामुत्सर्गः प्राप्नोति । ततश्चोत्सृष्टाग्निर्नष्टाग्निर्वाऽपत्नीकोऽप्यादधीत । एवं भार्यार्थोपयुक्तानप्यपत्नीकोऽपि स जीवन्ना- दधीत । एवंविधानप्यग्नीनादधीत । विनैवाधानं मृतस्यापत्नीकस्य पुत्रा अवश्यं प्रेताधानं कुर्युरित्यर्थः । तदेतदनन्तदेवादिग्रन्थे स्पष्टमिति दिक् ।

*Colophon.—*

इति चतुर्धरवंशावतंसगोविन्ददीक्षिततनुजनीलकण्ठस्य कृतिः समाप्ता ।

---

## 255

## 527. विभ्रष्टेष्टिस्थालीपाकादि ।

VIBHRAṢṬEṢṬISTHĀLĪPĀKĀDI.

This MS. contains two works called the Vibhraṣṭeṣṭisthālīpāka and Āgrayaṇasthālīpāka. The MS is much injured and moth-eaten.

*Beginning.—*

विभ्रष्टेष्टिस्थालीपाकप्रयोग उच्यते । प्रथमपर्वातिक्रमणं चेत्.........दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति ।

...........दर्शपूर्णमासयोः प्रथमपर्वातिक्रमणदोषनिवारणार्थं विभ्रष्टेष्टिस्थालीपाकं करिष्य इति सङ्कल्प्य ।

Beginning of the Āgrayaṇasthālīpāka:—

शरत्कालेऽमावास्यायां पौर्णमास्यां वा स्थालीपाक... .....पुनः प्राणानायम्याग्रयण- स्थालीपाकं करिष्ये । नवानां स्थालीपाकं श्रपयित्वा ।

*End:—*

अर्द्धाधानं चतुर्दश्यां यागः सन्धिदिने भवेत् ।

*Colophon:—*

सन्धिविषयः समाप्तः ।

---

**256**

## 528. विहारकारिका ।

VIHĀRAKARIKA.

*By Gopāla.*

This MS. contains sixteen verses dealing with the alter of the Darśapūrṇamāsa.

*Beginning*—श्रीगणेशाय नमः ।

अथ विहारगोपालकारिका लिख्यते ।

आहापराग्नेः पूर्वाग्निमष्टासु प्रक्रमेष्विति ।
प्रक्रमान् पञ्चधा कृत्वा षष्ठं भागं समावपेत् ॥ १ ॥
पाशौ स्यन्द्यान्तयोः सर्वं पुनः सम्भुज्य पञ्चधा ।
लक्षणं द्वित्रिमध्ये स्याच्छङ्कोः पाशौ नियम्य च ॥ २ ॥
तस्य भागद्वयं पश्चात्पुरस्तात्त्रितयं तथा ।
लक्षणं दक्षिणाकृष्य दक्षिणाग्नेः प्रकल्पयेत् ॥ ३ ॥

*End.*—

आयामं द्वादशे कृत्वा त्रयोदशे निरञ्छनम् ।
चतुर्दशे तु श्रोणिः स्याद्दंसे पञ्चदशे तथा ॥ १५ ॥
अष्टादश तु पाशः स्यात्सा वेदी दार्शिकी भवेत् ॥

*Colophon*:—

इति गोपालकृता प्राकृतविहारकारिका समाप्ता ।

*Post-Colophon*:—

यदि भूमिरणुस्तत्र वेदिं सन्नमयेत्कथम् ।
बहिःकोणस्थशङ्कुभ्यो दक्षिणोत्तरपार्श्वयोः ॥
अष्टाङ्गुलप्रमाणे तु शङ्कुं चतुरमादिशेत् ।
अङ्गुलेरष्टमी रज्जुं पार्श्वमानीं विवर्धयेत् ॥
क्षिप्त्वा पाशौ बहिः शङ्कौ रज्वा तां नमयेत् क्रमात् ।

इति ग्रन्थान्तरे विहारः ।

आयाममक्ष्णयायस्य मध्याद्यत्तु विशिष्यते ।
तृतीयेन सह द्वेधा मध्यं चिह्नं तु कारयेत् ॥
शङ्कोरुत्तरतो रज्जुं कृत्वा चिह्नं तु लक्षणम् ।
आलिख्य मण्डलं तस्मिन्नुत्तरार्धं परित्यजेत् ॥
मध्यात्कोट्यामपायस्य पार्श्वतः परिकृष्य तत् ।
अतिरिक्ततृतीयेन सह मण्डलमालिखेत् ॥

इति विहारकारिका सम्पूर्णा ।

इति गोपालकारिकाविहार ।

**257**

## 530. विहारकारिका ।

VIHĀRAKĀRIKĀ.

*By Gopālācārya.*

This treatise deals with the technical terms used in the Sulbasūtra with reference to the construction of the alter and the mathematical calculations required for it. This follows the Śulbasūtra of Bodhāyana.

*Beginning*—श्रीगणेशाय नमः ।

अथाग्न्यायतनम् ।

उपासनीयपद्मनाभो नत्वा सिंहाननं रमाम् ।
त्रेताग्न्यायतनश्लोकान् कुर्वे शुल्बानुसारतः ॥ १ ॥
पुनरुक्तिर्न दोषाय बालबोधाय मे कृतिः ।
याज्ञिकास्त्वनुगृह्णन्तु कुशलाः श्रौतकर्मणि ॥ २ ॥
पुंसि समस्थिते वापि प्रपदोच्छ्रित एव वा ।
ऊर्ध्वबाहौ पञ्चमोंशः स हस्तः कथितो बुधैः ॥ ३ ॥
हस्तस्य च चतुर्विंशभागोऽत्राङ्गुलमीरितम् ।
अङ्गुलस्याष्टमो भागः स वयः परिकीर्तितः ॥ ४ ॥
प्रक्रमो द्विपदः शुल्बसूत्रे बोधायनोऽब्रवीत् ।
आपस्तम्बैस्तु द्विपदस्त्रिपदो वा विकल्पितः ॥ ५ ॥
कात्यायनस्त्वेकपद आधानादौ व्यवस्थितिः ।
सोमादौ द्विपदः प्रोक्तश्चयने त्रिपदः स्मृतः ॥ ६ ॥

*End.*—

उत्तरां श्रोणिपर्यन्तं लिखेत्ततोंसयोः क्रिया ।
दक्षिणोत्तरयोरंसशङ्कोः सूत्रं निपातयेत् ॥ ४२ ॥
द्विगुणीकृत्य तत्सूत्रमन्तयोः पाशसंयुतम् ।
मध्ये लक्षणसंयुक्तं शङ्को पाशौ प्रमुच्य च ॥ ४३ ॥
लक्षणं पूर्वतो नीत्वा तत्र शङ्कुं निहत्य च ।
उभौ पाशौ समभ्याग्रं तस्मिन् शङ्कोः प्रमुच्य च ॥ ४४ ॥
सूत्रस्य मध्यचिह्नेन दक्षिणांसादथारभेत् ।
औत्तरांसाल्लिखेदित्थं वेद्यायतनलक्षणम् ॥ ४५ ॥

*Colophon*:—

इति बोधायनोक्तविहारकारिका गोपालाचार्यकृता समाप्ता ।

*Post-Colophon.*—

इदं पुस्तकं उम्रजकरेत्युपनामकरामसूनुना लक्ष्मणस्य हस्तकम् ।
शाके १६७४ अङ्गिरानामाब्दे ज्येष्ठकृष्ण ३० वारो रविस्तथैव च ।

## 258

### 534. वैश्वानरेष्टिप्रयोगः ।

### VAIŚVĀNAREṢṬIPRAYOGA.

This is a manual of the Vaiśvānareṣṭi which is calculated to remove sins. Here the duties of the performer only are stated without necessary Mantras.

*Beginning* —

श्रीगणेशाय नमः ।

अथ वैश्वानरेष्टिर्लिख्यते । अद्येत्यादि । सर्वपापक्षयद्वारा श्री० थं इष्ट्या यक्ष्ये इति सङ्कल्प्य । विद्युत्० । अग्नीन्विहृत्य । अद्य यज्ञाय० । इमामूर्जमिति । यथातिथि । ऐष्टं हविः । पौर्णमासं तन्त्रम् । पञ्चदश सामिधेन्यः ।

*End*:—

अग्नेर्वैश्वानरस्याहं० न्नादः । न पार्वणहोमः । नारिष्टान् हुत्वा । ततः स्विष्टकृदादि । सर्वं प्रकृतिवत् । दक्षिणाकाले शतमानं समानम् । यज्ञो बभूव । यज्ञशास्रमवर्जम् । सिद्धमिष्टिः सन्तिष्ठते । इयमिष्ट्योच्चैः कुर्यात् ।

*Colophon*:—

इति वैश्वानरेष्टिः समाप्ता ।

*Post-Colophon*:—

उपजकरोपनाम्नो रामचन्द्रसूनोर्लक्ष्मणस्येदं पुस्तकम् । तैलंगदेशे रुद्रपुरग्रामे ।

---

## 259

### 537. श्येनकारिका ।

### ŚYENAKĀRIKĀ.

This versified treatise deals with the method of the construction ot the sacrificial alter having the form of a Syena bird. At the end of the work the measurement of the bricks required for the alter is also stated.

*Beginning* —

श्रीगणेशाय नमः ।

आद्यस्तरे श्येनचितौ चतस्रः पादेष्टकाः शीर्षिणि पुरोपदध्यात् ।
पश्चात्ततः षोडशियुग्ममन्तर्विशेषकं पञ्च ततश्च पादाः ॥ १ ॥

तिस्रोऽर्धिका: षोडशिके ततोऽर्द्धा ततश्च पश्चादपि रुद्रपादा: ।
पक्षाग्रयोश्चापि तदग्रसंज्ञा: पृथक् पृथक् चापि चतस्र एव ॥ २ ॥
तेष्वेव पक्षाप्ययययोश्चतस्र: चतस्र एता विशया निधेया: ।
तत: पृथक् पक्षयुगस्य मध्ये तथा चतस्रोऽपि च पक्षमध्या: ॥ ३ ॥

*End.*—

प्राजापत्या त्रयोदश्यामाद्या तूभयपक्षयो: ।
अन्त्ययो: पक्षसंज्ञे द्वे पुच्छे चाद्या त्रयोदशी ॥ ७५ ॥
दशम्यान्तु तृतीया च यवाज्यानीतिसंज्ञका: ।
ततश्च वज्रिणीर्दिक्षु ततश्चोत्तरपक्षके ॥ ७६ ॥
मध्यानामुत्तरास्तिस्र: पक्षाख्या लोकसंज्ञका: ।
मध्यानां दक्षिणास्तिस्र: पावमान्यस्तु तत्र वै ॥ ७७ ॥
अथ दक्षिणपक्षेऽपि मध्यानामुत्तरास्तथा ।
पक्षसंज्ञास्तु सप्तैता: प्रोक्ताश्छन्दस्यसंज्ञका: ॥ ७८ ॥
शिर:प्रदेशे शिष्टास्तु राष्ट्रभृत्संज्ञका: स्मृता: ।
लोकम्पृणास्तत: शिष्टा एकोनत्रिंशदेव हि ॥ ७९ ॥
हिरण्यादि यथापूर्वं समाप्ता: श्येनकारिका: । ८० ।

गार्हपत्यचितिचतुरस्रकरणी द्वात्रिंशदङ्गुलो व्यायामतृतीयांश: । अर्द्धयुक्तचतुर्विंशैस्तिलै: समन्वितस्त्रयोदशाङ्गुलो व्यायाम: सप्तमो भाग: ।

× × ×

यो यस्याग्नेर्मानदण्डस्तस्य य: षोडशांशोऽष्टादशकरणी ॥ ४६ ॥ चतु: सविशेषार्द्धस्य ७'१ शक: । तत्त्रिंशांशोनितो ज्ञेयो नमन्या सप्तमो बुधै: । अ० ति २'१ पादोनपुरुषस्य अ० ३१ ति २९ ।

---

## 260

## 539. श्येनचिन्मन्त्रोपधानकारिका ।

### ŚYENACINMANTROPADHĀNAKĀRIKĀ.

This MS. contains verses dealing with the construction of the sacrificial alter having the form of a Śyena bird. This work may be attributed to Āṇḍavilā otherwise known as Tālavṛntanivāsin since there is a marginal remark 'आ' indicating the name Āṇḍavilā in all the three leaves. The preceding work in this codex is also ascribed to Āṇḍavilā on the strength of the similar marginal remark. (See work No. 184)

*Beginning:*—

पर: श्येनचिन्मन्त्रोपधानकारिका ।
पञ्चम्यन्त्या क्रमण्याख्या तुर्या मध्ये तु मण्डला ।
आरोहे उत्तरे वामा द्वितीया सप्तमावलौ ॥ १ ॥

सिद्धौ तदन्त्या पूर्वान्ते ज्योतिः पञ्चम्युपादिमा ।
त्रयोदशीचतुर्द्दश्योः सन्ध्यान्यौ द्वे उपान्तिमे ॥ २ ॥
ऋतव्ये पूर्वयोरन्त्येषाढा ज्योतिरुत्तरा ।
एकादश्यन्तिमा धर्मा द्वादश्यन्त्या कुलायनी ॥ ३ ॥
षष्ठी मध्यमुखस्थानं वक्ष्यते पुरुषाकृतिः ।
द्वादश्याः पूर्वयोराद्ये द्वादश्यां त्रिचतुर्थके ॥ ४ ॥

*End:*—

पञ्चमादिचतुर्ष्वेवं द्वौ द्वौ पक्षाङ्गुलीयकौ ।
पक्षतिश्चाष्टमे व्यत्यस्यैकस्मिन्दशके व्ययः ॥
एकादशे च मूर्ध्नोऽस्य पक्षयोर्नमनं स्फुटम् ।
पक्षाग्रचतुरस्राणामग्नीशानदलांस्त्यजेत् ॥
चत्वारिंशत्कर्ण एकस्तिलैर्द्वादशभिः स्रुतः ।
तिलपञ्चकसंयुक्तः कर्णोऽन्यः सप्तविंशकः ॥
चतुर्दशतिलैर्युक्तो द्विचत्वारिंशदङ्गुलः ।
चतुर्थः सविशेषः स्याच्चतुस्त्रिंशदङ्गुलः ॥

---

## 261

### 543. संहिताहोमपद्धतिः ।

### SAMHITĀHOMAPADDHATI.

*By Bhairava, son of Viśvanātha.*

This is a fragment of a big work called the Saṁhitāhomapaddhati. This MS. is injured and incomplete in the middle and at the end. The author describes here several methods of the Saṁhitāhoma which is to be performed on reciting Mantras of the Saṁhitā of the Ṛgveda. He records different views of Śaunaka, Aśvalāyana, Śāṅkhāyana, Kauṣītaki etc. on this subject and deals with the performance of this rite with such details as Ṛṣi, Chandas, Devatā of each Ṛk.

*Beginning:*—

श्रीगणेशाय नमः ।

नत्वा गणपतिं साम्बं श्रीमत्त्रिपुरसुन्दरीम् ।
ऋग्वेदान्तर्गतां शाखां शाकलाख्यामथाश्रित्य वै ॥
ऋग्विधा............शौनकाचार्यमेव च ।
वैट्ठलिर्विश्वनाथश्च जडयोपाह्वाभिधानतः ॥

तत्सूनुना भैरवेण संहिताहोमपद्धतिः ।
...........श्रीविश्वनाथतुष्ट्यर्थं बालबुद्धये ॥

शौनकः ।

तस्माद् द्विजः प्रशान्तात्मा जपहोमपरायणः ।
तपस्यध्ययने युक्तो भवेद्भूतानुकम्पया ॥
क्षत्रियो बाहुवीर्येण तरेदापद्मात्मनः ।
धनेन वैश्यः शूद्रस्य जपहोमैर्द्विजोत्तमः ॥
एषा हि संहिता देवैः सर्वब्रह्ममयीनिवृत् (?) ।
उग्रेण तपसा दृष्टा विश्वामित्रेण धीमता ॥
होमांश्च जपयज्ञांश्च नित्यं कुर्वीत चैतया ।
सर्वकामसमृद्ध्यर्थं परं ब्रह्मेदमुच्यते ॥

अथ ऋग्वेदान्तर्गतशाकलसंहितामन्त्राणां खिलरहितानां द्वासप्तत्युत्तरचतुःशतदश-सहस्राणि भवन्तीति स्वाहाकारान्तैर्मन्त्रैर्न चेन्मन्त्रे पठित इत्याश्वलायनसूत्र उक्तत्वात् प्रतिमन्त्रं स्वाहाकारेणैव होमः कर्तव्य इति ।

*End:*—

आ मित्र इति तृचस्य-आबहुवृक्तो मित्रावुष्णिक् यद्येति दशर्चस्य-आपौरोश्विना-वनुष्टुप् कुष्ठ इति दशर्चस्य आपौरोश्विनावनुष्टुप् प्रतिप्रियतम इति नवर्चस्य आत्रे-वस्युरश्विनौ पङ्क्तिः । आभातीति पञ्चर्चस्य ।

---

## 262

### 547. सर्वतोमुखप्रयोगः ।

### SARVATOMUKHAPRAYOGA.

(*By Tālavṛntanivāsin*)

This MS. contains a list of Stomas, Stotras, Ṛks and Sāmans required for the performance of the Sarvatomukha sacrifice. This work follows the Drāhyāyaṇaśrautasūtra with reference to the Stotra portion but the main performance of the sacrifice is according to the Āpastambaśrautasūtra. The authorship is attributed to Tālavṛntani-vāsin as this codex contains some of his other works in the beginning and at the end.

*Beginning:*—

सर्वतोमुखस्य क्लृप्तिरुच्यते । औपच्छदानन्तरमापस्तम्बेन सर्वतोमुख उक्तः । सर्वतो-मुखेन यजेत यः कामयेत सर्वमिदं भवेयमिति । मध्ये गार्हपत्यः प्रतिदिशं सौमिका विकाराः । त्रिवृत्प्राच्यां दिशि पञ्चदशो दक्षिणतः सप्तदशः पश्चादेकविंश उत्तरत इति । तानि च त्रिवृदा-दीनि चत्वारि मुखानि । पृष्ठ्यस्तोमः षडहो विश्वजिदतिरात्र इत्यनुवाकोक्तस्य बृहद्रथन्तरपृष्ठ-पृष्ठ्यस्तोमषडहस्य चतुर्भिरहोभिः कर्तव्यानि । स्तोमान्वयात् । यत्र हि षडहस्य सम्पूर्णता तत्रैव वैरूपादीनां प्रवृत्तिः । न्यूनतायां तु बृहद्रथन्तर एव व्यत्यासं प्रयोगः ।

*End:*—

निधनसमये हिरण्यमुद्गाता धारयेत् । सर्वे वाऽभिमृशेयुः । एवमुत्तरयोः । हिरण्यं सम्प्रदायं षोडशिना स्तुवत इति श्रुतेः । सम्प्रदायमिति णमुल्प्रत्ययान्तः । उत्तमां प्रस्तुत्येत्यादि । अश्वमुद्गाता प्रतिगृह्णीयात् हिरण्यं च । ऐन्द्रं सहोसर्जितस्य त इन्द्रविन्द्रपीतस्येन्द्रियावतोऽनु-ष्टुप्+भक्षयामीति भक्षणम् । ऐन्द्रं सह इति चमसस्यासत्र उदस्य हरिवदिति वचनात् । अस्मिन्मुखे सर्वाणि स्तोत्राण्येकविंशानि । यज्ञपुच्छं यथापूर्वम् ।

सर्वतोमुखतन्त्रस्य प्रयोगः कथितोऽधुना ॥
आपस्तम्बीयसूत्रस्य प्रयोगस्यैव दर्शनात् ।

*Colophon:*—

सर्वतोमुखं समाप्तम् ।

---

## 263

### 548. सर्वतोमुखप्रस्तावभक्तिः ।

### SARVATOMUKHAPRASTĀVABHAKTI.

Here is a list of Ṛks and Sāmans to be chanted in all the four parts of the Sarvatomukha sacrifice. The list is incomplete.

*Beginning.*—

सर्वतोमुखस्य प्रस्तावभक्तिः । पूर्वमुखस्य बहिष्पवमानम् । उपास्मै गायता नरो० अ-भित्ते मधुना पयो० स नः पवस्व शं गवो० उपोषु जातमप्तुरो० तमिद्वर्द्धन्तु नो गिरो० अ-र्षाणः सोम शं गवो० पवमानस्य ते कवो० ।

*End:*—

श्रुधी हावन्तीरश्वियामयस्ता आ इन्द्राना वीयसाङ० तमुग्रवामार्यगिरः । सर्वाणि सप्तदशानि । पश्चिमविहारस्य समाप्तिः । उत्तरमुखस्य क्लृप्तिः ।

---

## 264

### 549. सर्वतोमुखविधिः ।

### SARVATOMUKHAVIDHI.

This is another list of Ṛks and Sāmans required for the Stotras of the Sarvatomukha sacrifice.

*Beginning:*—

अथ सर्वतोमुखविधिं व्याख्यास्यामः। उपास्मै गायता नर उपोषु जातमप्तुरं पवमानस्य ते कव इति बहिष्पवमानम्। प्रकृतिवदपिच्छन्दोदैवतानि। अग्न आनोमित्रा याहीन्द्रात्याज्यानि। तेषां प्रकृतिवदपिच्छन्दोदेवताः। अथ माध्यन्दिनम्। प्रसोमासो विपश्चित इति गायत्रमेकस्यामभिद्रोणानि बभूव इत्याश्वमेकस्यां सुता इन्द्राय वायव इति सोमसामैकस्याम्।

*End:*—

प्रत्यस्मै पिपीपव इति गौरिवितं षोडशी साम। गौरिवितस्य शाक्वर अनुष्टुबिन्द्रः। इन्द्रश्च बृहच्च समभवतामिति विधायकब्राह्मणम्। सर्वं प्रकृतिवत्। सर्वाणि स्तोत्राण्येकविंशानि।

*Colophon.*—

सर्वतोमुखक्कृप्तिः समाप्ता।

---

## 265

### 557. सर्वानुक्रमणी।

### SARVANUKRAMAṆĪ.

*By S'rīnivāsādhvarin.*

This work is divided into six chapters and describes exhaustively the Prayogas of the Dars'apūrṇamāsa, Ādhāna, Agnihotra and Iṣṭiprāyas'cittas. The author is a follower of the Jaiminiyasūtra but he composed this work according to the Āpastamb'as'rautasūtra. In the first chapter he describes general rules pertaining to the Vedic sacrifices and the priests. The following parts of the work deal with the duties of all the five priests of the Iṣṭi. All Mantras to be recited by the priests are stated here in full. The MS. is injured and has two paginations.

*Beginning* :—

........................प्रयोगस्य वक्ष्यमाणस्य सामान्यत उपयोक्ष्यमाणानि पूर्वमुच्यन्ते। दर्शपूर्णमासानां विष्टिः। अन्वारम्भणीया ............................धानादनङ्गं प्रत्याम्नानात्प्रतिषेधादर्थलोपाच्च प्रकृतिधर्मो निवर्तते। एकदेवता आग्नेयविकाराः। द्विदेवता अग्नीषोमीयविकाराः बहुदेवताश्च। ऐन्द्राग्नविकारा वा। × × × ×

Leaf 2 b.

इति सामान्यानि। अथ दर्शपूर्णमासाधानाग्निहोत्रेषु यजमानपञ्चमानामितिकर्तव्यं सर्वमनुक्रम्यते। अथ श्रीमान् यजमान इष्टिदिनात्पूर्वेद्युः प्रातरग्निहोत्रं हुत्वा सङ्कल्प्य व्युप्तकेशः

स्नात्वा विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमीत्यप उपस्पृशति। अथ पयस्वतीरोषधय: पयस्वद्वीरुधां पय: । अपां पयसो यत्पयस्तेन मामिन्द्र संसृज । इति यजमानपत्न्यावनतिसुहितमश्नीत ।

× × × ×

इति विश्वामित्रगोत्रजैमिनिसूत्रश्रीनिवासाध्वरिविरचितायां दर्शपूर्णमासचतुरात्विज्यानुक्रमण्यां प्रथम: पटल: ।

देवस्येत्यादि शकरीश्चेत्यन्तं प्रागुक्तं वेदिकरणमत्र कर्तव्यं पूर्णमासे चेत् । अथाध्वर्युर्ब्रह्मन्नुत्तरं परिग्राहं परिगृहीष्यामीत्यामन्त्रित: × × × × अप उपस्पृश्य ब्राह्मणांस्तर्पयत वै इति सम्प्रेष्यति ।

इति विश्वामित्रगोत्रजैमिनिसूत्रश्रीनिवासाध्वरिविरचितायां दर्शपूर्णमाससर्वानुक्रमण्यां तृतीय: पटल: । समाप्ता चेयं दर्शपूर्णमासानुक्रमणी ।

× × x ×

इति श्रीविश्वामित्रगोत्रजैमिनिसूत्रश्रीनिवासाध्वरिविरचितायां सर्वानुक्रमण्यां चतुर्थ: पटल: ।

अथाग्निहोत्रप्रयोग: ।

× × × ×

इति पिण्डपितृयज्ञप्रयोग: ।

इति विश्वामित्रगोत्रजैमिनिसूत्रश्रीनिवासाध्वरिविरचितायां सर्वानुक्रमण्यां पञ्चम: पटल: । .................. ।

इष्टिप्रायश्चित्तानि संगृह्यन्ते । आधानार्थानां च तत्रैव सङ्ग्रह: । प्रायश्चित्तोपयोगीनि सामान्यान्यादौ प्रदर्श्यन्ते ।

*End* :—

यदि बर्हिस्तरणं पूर्वमेतन्निमित्तं स्यात्तदा बर्हिषि सादनं विनाऽन्यत्सर्वं कर्तव्यमिति सिद्धम् ।

*Colophon*:—

इति विश्वामित्रगोत्रजैमिनिसूत्रश्रीनिवासाध्वरिविरचितायां सर्वानुक्रमण्यां प्रायश्चित्तपटले इष्टिप्रायश्चित्तनाम उत्तरार्द्धं समाप्तम् । समाप्तश्चायं षष्ठ: पटल: ।

---

## 266

### 558. सुब्रह्मण्यप्रयोग: ।

SUBRAHMAṆYAPRAYOGA.

This work deals with the duties of the Subrahmanya priest who is the assistant of the Udgātṛ priest in the Agniṣṭoma sacrifice.

*Beginning*—

अथ सुब्रह्मण्यप्रयोगः ।

ज्योतिष्टोमेनाग्निष्टोमेन रथन्तरसाम्ना अमुकदक्षिणेनाहं यक्ष्ये । तत्र भवता सुब्रह्मण्यीयं कर्तव्यम् । महन्मे वोचो भर्गो मे वोचो यशो मे वोचः स्तोमं मे वोचो भुक्तिं मे वोचः सर्वं मे वोचस्तन्मामवतु तन्मा विशतु तेन भुक्षिषीय । ततो मधुपर्कः । सुब्रह्मण्यो विष्टराद्यन्यवेक्षते । अर्हणा पुत्रवाससा धेनुरभवद्य मे । सा नः पयस्वतीदुहा उत्तरामुत्तरां समाम् । इति विष्टरः । इदमहमिमां पद्यां विराजमन्नाद्यायाधितिष्ठामि । तिष्ठत्युपवति । यजमानः । विष्टरो विष्टरो विष्टरः ।

*End*:—

वरुणो वो नयतु देव्यो दक्षिणा रुद्राय गास्तयाभिमृतत्वमशीय । वयांसिदात्रे भूयासुमयो मह्यं प्रतिग्रहीत्रे । क इदं कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत्कामेन वः प्रतिगृह्णामि कामैतास्ते । गवां प्रतिग्रहः । इति चतुर्थमहः ।

*Colophon*:—

इति सुब्रह्मण्यप्रयोगः समाप्तः ।

*Post-Colophon*:—

शके १७३५ श्रीमुखनामसंवत्सरे ज्येष्ठशुद्ध १२ गुरुवासर ते दिवसि माचेगणोपनामकबाळम्भट्टात्मजमाधवेन लिखितं समाप्तम् ।

---

## 267

## 559. सोमकालविचारः ।

## SOMAKĀLAVICĀRA.

Here is a discussion on the subject of the time when the Somayāga is to be performed. It is established in this work that the sacrificer need not wait for the period of Uttarāyaṇa but he is allowed to perform the Somayāga at any time after celebrating the Adhāna ceremony.

*Beginning*—

श्रीगणेशाय नमः ।

ॐ सोमेन यक्ष्यमाणोऽग्निमादधीतेति वाक्येनाधानानन्तरं कर्तव्यत्वेन विहिते सोमे उत्तरायणापेक्षाऽस्ति नास्तीति विचार्यते । आधानानन्तरसोमे सोमेन यक्ष्यमाणो नर्तुं पृच्छेन्न नक्षत्रमिति ऋतुनक्षत्रातिक्रमवचनमस्ति । तत्किं यथाश्रुतं विहितं विहितकालमात्रपरं वेति भवति सन्देहः । तत्र ऋतुनक्षत्रातिक्रमवचनस्य विहितकाललक्षणायां प्रमाणाभावात् वसन्ते ज्योतिष्टोमः । उदगयनपूर्वपक्षपुण्याहसन्निपाते यज्ञकालोनादेश इति श्रुतिच्छन्दोगसूत्रकारवचनविहितयोः ऋतुनक्षत्रयोराधानानन्तरसोमेऽनङ्गत्वेऽप्युदगयनपूर्वपक्षयोरनङ्गत्वे प्रमाणाभावात् ।

*End:—*

अपि च स्मृत्यर्थसारतुल्यप्रमाणाद्देवस्वामिकृते बोधायनग्रन्थे स्पष्टमेव दक्षिणायने ज्योतिष्टोमानुष्ठानमुक्तम् । तत्र हि ज्योतिष्टोमकालप्रतिपादनावसरे स काल उदगयनपूर्वपक्षे प्रतिपदि दीक्षा पञ्चम्यां सुत्या । द्वितीयायां दीक्षा षष्ठ्यां सुत्या । एवं तृतीयायामित्यादि पौर्णमासीपर्यन्तं बोध्यमित्येकं कालमुक्त्वा यद्वा संवत्सरस्य पूर्वपक्षे प्रतिपदि दीक्षा पञ्चम्यां सुत्या द्वितीयायां दीक्षा षष्ठ्यां सुत्या एवं पौर्णमासीपर्यन्तमिति पक्षान्तरं स्पष्टमुक्तम् । आधानमध्यकालातिरिक्तसर्वकाले भवतीति घण्टाघोष एव । ......................मोऽपि दक्षिणायने निर्विवादं शिष्टैर्यदा यावदनुष्ठीयत इति शिष्टा अपि प्रमाणभूता अत्रास्तीत्यलमतिप्रसङ्गेन ।

---

## 268

## 562. सोमभक्षविवेकः ।

## SOMABHAKṢAVIVEKA.

*By Tipābhaṭṭa, son of Rāmabhaṭṭa.*

This treatise deals with the method in which the Soma juice is to be sipped by the priests of different ranks in the Agniṣṭoma, Ukthya and Ṣoḍaśī Saṁsthās of the Jyotiṣṭoma sacrifice. The author Tipābhaṭṭa follows generally the Āśvalāyanaśrauta but he quotes frequently from the different Śrautasūtras such as the Āpastambīya, Kātyāyanīya and others.

*Beginning:—*

श्रीगणेशाय नमः ।

अथाश्वलायनानां सोमभक्षविवेकोऽभिधीयते । तत्र होमाभिषवनिमित्तभक्षणम् । वषट्कारनिमित्तभक्षणम् । समाख्यानिमित्तभक्षणम् । तत्रादौ द्विदेवत्यग्रहभक्षणप्रकारो लिख्यते । अथ होता आगतमध्वर्युमयाळ्ग्नीदिति पृच्छति । अयाळित्यध्वर्युणा प्रत्युक्तः । यद्यध्वर्युरयाळग्नीदिति ब्रूते होत्रा न प्रष्टव्यः यद्यध्वर्युरयाळित्येतावदेव ब्रूते तदाऽयाळग्नीदिति होत्रा पूर्वमेव प्रष्टव्यः । एवमध्वर्युवशेन विशेषविकल्पः । इत्युक्तं सिद्धान्तभाष्ये ।

*End:—*

यदा तु ग्रहेण सह पुरोडाशयागस्तदा ग्रहं भक्षयित्वा चमसं भक्षयेदिति देवत्रातः । यदा चमसेन सह पुरोडाशयागस्तदा चमसानेव भक्षः । तथा च अतिरिक्तोक्थशस्त्रान्तपर्यायशस्त्रवद्भक्षविधिरित्युक्तमन्विलायां मञ्जनभट्टीये विधिरत्नमालायां चैवं नृसिंहकारिकायां च ।

कर्तव्योऽनुवषट्कारो भक्षणं पूर्ववद्भवेदिति ।

*Colophon*:—

इति सोमभक्षविवेकः समाप्तः ।

इति श्रीमद्गङ्गरोपनामकरामभट्टात्मजतिपाभट्टेन विरचिते सोमभक्षविवेकनिरूपणं समाप्तिमगमत् ।

*Post-Colophon*.—

शके १७६२ शार्वरीनामसंवत्सरे चैत्रवद्य ३ भानु तद्दिने मावेगणोपनामकबालम्भट्टात्मजमार्तण्डभट्टेन लिखितं स्वार्थं परोपकारार्थं च ।

---

## 269

## 564. ( सोमसंस्थाप्रयोगः । )

## (SOMASAṀSTHĀPRAYOGA.)

This MS. contains Prayogas for six varieties or Saṁsthās of the Jyotiṣṭoma sacrifice which are to be performed on the analogy of the Agniṣṭoma Saṁsthā. The Prayogas for the Sautrāmaṇi, Bṛhaspatisava and Āmikṣī are also stated after the Vājapeya. The title of the work and the author's name are not found in the MS. It is much injured and moth-eaten.

*Beginning*:—

ॐ अथात्यग्निष्टोमस्य प्रयोग उच्यते । वसन्ते पर्वणि प्रातरग्निहोत्रं हुत्वा प्राणानायम्य सोमेन यक्ष्ये । ज्योतिष्टोमेनात्यग्निष्टोमेन बृहत्साम्ना द्वादशशतदक्षिणेन । तेन परमेश्वरं प्रीणयानि । ममास्मिन् ज्योतिष्टोमेऽत्यग्निष्टोमे सोमे सोमप्रवाकं त्वां वृणे । सोमप्रवाक सोममित्यादिप्रश्नप्रतिवचने । नाहीनो ज्योतिष्टोमोऽत्यग्निष्टोमः कश्चिन्न्यस्तमार्त्विज्यमित्यादि महारात्रिपर्यन्तं सर्वमग्निष्टोमवत् । महारात्रे बुध्येत्यादि ।

Leaf 2 उक्थ्यः ।
,, 4 षोडशी ।
,, 5 वाजपेयः ।
,, 15 बृहस्पतिसवः ।
,, 18 सौत्रामणी ।
,, 22 आमिक्षा ।
,, 23 अतिरात्रः ।
,, 25 अप्तोर्यामः ।
,, 26 सर्वपृष्ठाप्तोर्यामः ।

*End*:—

साग्निचित्यश्चेत् सौत्रामणी पयस्या च मैत्रावरुणी ।

*Colophon*:—

सन्तिष्ठते सर्वपृष्ठाप्तोर्यामः ।

*Post-Colophon:—*

अङ्गिरसाब्दे चाषाढे शुक्ले पञ्चदशी शनौ ।
श्रीपादवंशसञ्जातशिवरामेण धीमता ॥
सर्वपृष्ठाप्तोर्यामस्य प्रयोगश्च सतां मुदे ।
लिखितो......दक्षिणास्यमहीशितुः ॥

---

**270**

565. **सौत्रामणिप्रयोगः ।**

SAUTRĀMAṆIPRAYOGA.

This is a manual of the Sautrāmaṇi sacrifice according to the Apastambaśrautasūtra.

*Beginning.—*

सौत्रामण्याः प्रयोग उच्यते । पञ्चदश्यामेव सौत्रामण्या यक्ष्ये । विद्युत् । षड्ढोता पश्विष्टिः । शाखाहरणादि व्रतप्रवेशान्तं निरूढपशुवत् । उरु विष्णो विक्रमस्वेत्यादि चषाल-करणान्तं पशुवत् । स्वरवस्त्रयः । एको यूपः । नोपशयपात्नीवतौ । सौत्यावेदितृतीये यजेत । प्रक्रमस्य तृतीयकरणे प्रक्रमस्थानीया भवति । त्रिकरण्या वार्ष्टिकदर्शिके तिर्यङ्मान्यौ द्वादशिका ।

*End:—*

अवभृथं यजमानोऽभिमन्त्र्यापः प्रगाह्य तूष्णीं सुमित्रान इति स्नातः पत्नी यजमानश्चा-न्योन्यस्य पृष्ठे धावतः । नाञ्जलिविषेकं दीक्षाविमोकार्थत्वात् । नोन्नेतृप्रैषः । नोन्नयनम् । अहते वसानौ जायापती । उद्वयन्तमसस्परीत्यादित्योपस्थानम् । तमुदुकान्तं प्रत्यसित्वा समित्पाणयस्तु भवन्ति । तूष्णीं प्रत्यायनं देवयजनं प्राप्य एधोस्येधिषीमहीत्यादि अपोऽन्व-चारिषमित्यन्तं सर्वेषाम् । ब्रह्मा याम्यग्निरित्यादि यथेतं प्रतिनिष्क्रामति । यजमानोऽग्निना देवेनेत्यादि । ब्राह्मणतर्पणान्तं निरूढपशुबन्धवत् ।

*Colophon:—*

समाप्ता सौत्रामणी ।

---

**271**

569. **हविःश्रपणविचारः ।**

HAVIŚŚRAPAṆAVICĀRA.

Here is a discussion in order to decide the exact place where offerings for the Darśapūrṇamāsa sacrifice are to be prepared. This discussion is based on the conflicting statements made on the subject by Bodhāyana and Apastamba.

*Beginning.*—

श्रीगणेशाय नमः । अथ हविःश्रपणविचारः । अथ बौधायनानां दर्शपूर्णमासयोर्हविःश्रपणं गार्हपत्यायतनमध्ये आयतनाद्बहिर्गार्हपत्यस्य पश्चाद्भागे वेति विचार्यते । आहवनीये गार्हपत्ये वा हवींषि श्रपयति इत्यापस्तम्बेनोक्तत्वात् तद्वैलक्षण्येनाथैतानि कपालानि प्रक्षालितानि जघनेन गार्हपत्यमुपसादयतीति बौधायनेनोक्तत्वाद्भवति सन्देहः ।

*End:*—

कारिकायां तु 'आखराः प्रभवः कार्या यथा जघनसम्भवाः' इति शिष्टाः पूर्ववदन्तस्थिताः । श्रपणसम्भवा इति पाठेऽपि यथा जघनभागे श्रपणं भवति तथा कार्या इत्यर्थत्वेनापि निर्वहतीति न किञ्चिदेतदिति सकलशिष्टसम्मतानुष्ठाने स्वार्वाचीनस्य कस्यचिदुक्तिविध्यावनं (?) युक्तमिति ।

*Colophon* —

इति हविःश्रपणविचारः ।

*Post-Colophon:*—

इदं पुस्तकं पिङ्गल्युपनाम लक्ष्मीनारायणेन सम्पादनं कृतं सागरग्रामे तडागसन्निधौ चतुर्भुजदेवमन्दिरगृहे पश्चिमभागस्थे ।

---

## 272

### 570. होतृशास्त्रम् ।

### HOTṚŚASTRA.

Here is a collection of Śastra hymns to be recited by the Hotṛ priest during the Aptoryāma sacrifice.

*Beginning:*—

अप्तोर्यामस्य होतुःशास्त्रम् । हिं भूर्भुवः स्वरों शो सा वोञ्जरा बोधतद्विविद्वि विशे विशे यज्ञियाय स्तोमं रुद्राय दृशिकोसनो महां अग्निमानो धूमकेतपुरुश्चन्द्रः ।

*End.*—

उशतो यक्षि देवान्वौ सोमस्याग्ने वीहि वो गृह आश्विनश्चेत् यूयं देवाः क्रतुना यदिना प्रिया पुराणमोकः सख्यं शिव वां इति । हरिः ॐ ।

---

## 273

### 573. हौत्रम् ।

### HAUTRA.

*By Āṇḍapillai.*

This is a guide to the Hotṛ priest for his duties in the Adhāna ceremony according to the Āpastambaśrautasūtra.

*Beginning*·—

अथ अग्न्याधेयस्य प्रयोगा वक्ष्यते । तस्य प्रथमायामिष्टौ अग्निरग्निपवमानश्च देवते । पौर्णमासं तन्त्रम् । विशेषो वक्ष्यते । अग्निमग्न आ३वह । सोममा३वह । अग्निमा३वह । अग्निं पवमानमा३वह । देवाँ आज्यपाँ आ३ वहेत्यादि । वार्त्रघ्नावाज्यभागौ । प्रधानस्य अग्निर्मूर्धा भुवो यज्ञस्य । अयमग्निरेव केचिदाधाने सर्वदा अग्न आयूंषि पवसे । अग्ने पवस्व । स्वपा इत्यग्नेः पवमानस्य ।

*End*:—

पवमानादीनामाज्यहविष्ट्वं तेषामुपांशु याज्याधर्म इत्यर्थः । तेषां याज्यानुवाक्या उक्ताः ।
व
आधानात् द्वादशरात्रमजस्राः । सर्वेषामग्नीनां धारणं द्वादशाहम् । अत्यन्तं तु गतश्रियः । गतश्रीणां यावज्जीवसमाप्त्यग्न्याधेयम् ।

तत्र श्लोकाः—

इष्टेर्द्वित्वं तथा त्रित्वमेकत्वं स्वयमुक्तवान् ।
बह्वृचानां तथैव स्याद्विकल्पस्त्वन्यस्तगः (१) ॥
वृ

*Colophon*·—

आधान । अण्डुळा आधानस्य ।
व

---

**274**

575. हौत्रम् ।

HAUTRA.

Duties of the Hotṛ priest in the Anvārambhaṇīyā and Ādhāna-pavamāneṣṭi.

*Beginning*:—

श्रीगणेशाय नमः । अथान्वारम्भणीहौत्रम् । नमः प्रवक्त्र इत्यादि । पञ्चदश सामिधेन्यः । आवाहने । अग्निमग्न आवह । सोममावह । अग्नाविष्णू आवह । सरस्वतीमावह । सरस्वन्तमावह । अग्निमग्निमावह । देवानाज्यपानित्यादि ।

× × × ×

इत्यन्वारम्भणीयहौत्रं समाप्तम् ।

अथाग्न्याधानहौत्रम् । शोचिष्केशस्तमीमहो३ । पृथूपाजा अमर्त्यो घृतनिर्णिक् स्वाहुतः । अग्निर्यज्ञस्य हव्यवो३ तं सबाधोयतस्रुच इत्याधिया यज्ञवन्तः ।

*End*:—

अग्निरिदं० कृत । अग्निः पवमानः इदं० कृत । अग्निः पावकः इदं० कृत । अग्निः शुचि० इदं कृत । इन्द्राग्नी इदं० जुषेता० वृधेतां० क्रातां । अदितिः इदं० कृत । देवा आज्यपामित्यादि । संस्थाजपान्तं कृत्वा ।

*Colophon*:—

इत्याधानपावमानेष्टिहौत्रं समाप्तम् ।

**275**

## 578. हौत्रम् ।

HAUTRA.

For the Ādhāneṣṭi.

*Beginning*—

अस्या इष्टेः सप्तदश सामिधेन्यः । वार्त्रघ्नावाज्यभागौ । अग्निरग्निः पवमानोऽग्निः पावकोऽग्निः शुचिरिन्द्राग्नी अदितिश्च प्रधानदेवताः । स्विष्टकृत् प्रयाजादयोऽङ्गदेवताः देवा आज्यपाश्च । नमः प्रवक्त्र इत्यादि । शोचिष्केशस्तमीमहोम् । पृथुपाजा+हव्यवोन्तं × × × × । अग्निमग्न आवह । सोममावह । अग्निमावह । अग्निं पवमानमावह । अग्निं पावकमावह । अग्निं शुचिमावह । इन्द्राग्नी आवह । देवाँ आज्यपाँ इत्यादि ।

*End.*—

प्रधानानां त्वन्नोऽग्ने वरुण+सीष्ठाः । यजिष्ठोव + । मुग्ध्यसौ ये हे आग्नीवरुणौ स त्वन्नोऽग्नेव + न्युष्टौ । अवयक्ष्म + वो न एधि वौ । पिप्रीहीत्यादि । अयाडग्निरग्नेः प्रिया+याम् । सोमस + याम् । अग्नीवरुणयोः प्रिया + याम् । देवानामित्यादि । सूक्तवाकेऽग्निरिदं हविः । सोम इदं हविः । अग्नीवरुणौ इदं हवि + षेताम् । देवाँ आज्यपाँ इत्यादि समानम् । हरिः ॐ ।

---

**276**

## 579. हौत्रम् ।

HAUTRA.

A guidance to the Hotṛ priest in the Punarādheyeṣṭi and Utsargeṣṭi. This seems to be a part of a voluminous work of Āṇḍavilā.

*Beginning.*—

अथ पुनराधेयेष्टिः । तस्याः पूर्वमुत्सर्गेष्टिरित्यापस्तम्बेन भगवता उक्तम् । आश्वलायनेनोक्तम् । तस्या देवताः अग्निरग्निर्वैश्वानरो वरुणः अग्निरप्सुमान्मित्रेति । अग्निमग्न आवह । सोममावह । अग्निमावह अग्निं वैश्वानरमावह । वरुणमावह अग्निमप्सुमन्तमावह । मित्रमावह । देवानित्यादि ।

*End:*—

तत्र द्वितीयेष्टिरापस्तम्बेनोक्ता नाश्वलायनेन । तत्राग्नीवरुणौ देवता । अग्निमग्न आवह । सोममावह । अग्नीवरुणावावह । देवां इत्यादि । स्वाहाऽग्निम् । स्वाहा सोमम् । स्वाहाऽग्नीवरुणौ । स्वाहा देवानित्यादि । वार्त्रघ्नावाज्यभागौ । प्रधानस्य त्वन्नोऽग्ने वरुणस्य । स त्वन्नोऽग्ने अग्नीवरुणयोः । देवानामित्यादि संस्थाजपान्तम् ।

*Colophon:*—

इत्यन्विलायां पुनराधेयेष्टिहौत्रम् ।

*Post-Colophon:*—

शके १७५४ नन्दननामसंवत्सरे माघशुद्ध ७ ते दिवसि माचेगणोपनामक बाळम्भट्टात्मजमाधवभट्टेन लिखितं समाप्तम् । स्वार्थं परोपकारार्थं च ।

---

## 277

### 581. हौत्रम् ।

### HAUTRA.

It is a guidance to the Hotṛ priest for his duties in he Darśapūrṇamāsa sacrifice. This is meant for the Āśvalāyana Yajamāna who employs priests of the Baudhāyanīya school.

*Beginning.—*

श्रीशं वन्दे ।

अथ बौधायनीयाध्वर्यवादि परिगृह्णानस्य बह्वृचस्याश्वलायनसूत्रोक्तहौत्रप्रयोगः । हौत्रं करिष्यन्पवनादिभिः संस्कृतो वृतश्च सन् हौत्रं करिष्यामीत्युक्त्वा होतरेहीत्युक्ते प्रागुदगाहवनीयादवस्थाय० चश्चेष्टाः एकाङ्गवचने० नादेशे । जपानुमन्त्राश्च कर्मकरणाः । प्रपद्याभिह० प्रेषितो जपति ।

*End:—*

भूर्भुवः स्वः स्वाहा प्रजापतय इदम् । एवं सप्ताहुतीर्हुत्वा । ॐ च मे० ते नमः । इति संस्थाजपेनोपस्थाय० स्या नियमो भवेत् । ततोऽनाज्ञातमिति तिस्र इदं विष्णुरित्येकां समस्तव्याहृतीभिराभिर्गीर्भिरिति च जपेत् ।

*Colophon —*

इति दर्शपूर्णमासयोर्हौत्रम् ।

---

## 278

### 583. हौत्रम् ।

### HAUTRA.

Duties of the Hotṛ priest in the Darśapūrṇamāsa according to the Aśvalāyanaśrautasūtra. The Pūrṇamāsa is fully described here and only the necessary changes for the Darśeṣṭi are stated at the end. The MS. is injured.

*Beginning:—*

श्रीगणेशाय नमः ।

आश्वलायनहौत्रमुच्यते । ॐ अध्वर्यो देवता आचक्ष्व । तासामानुपूर्व्यमुच्चैरुपांशुताश्च यजमानवकल्पिकपदार्थांश्च । होता आचम्य प्रणीतोत्करावन्तरेण दक्षिणावृद्विहारं प्रपद्य पश्चात्सामिधेनीनां पदमात्रेऽवस्थाय वेदिश्रोण्योरुत्तरया पार्ष्णिसमां निधाय प्रपदेन वर्हिराक्रम्य प्रेषिताज्जपति । नमः प्रवक्त्रे । नम उपद्रष्ट्रे । नमोऽनुख्यात्रे । क इदमनुवक्ष्यति । स इदमनुवक्ष्यति ।

*End —*

ॐ भूः स्वाहा । ॐ भुवः स्वाहा । ॐ स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहा । ॐ च मे । स्वरश्चमे । यज्ञपते नमश्च । यत्ते न्यूनं तस्मै त उपयत्तेऽतिरिक्तं तस्मै ते नमः । सर्वं सुहुतमस्तु । तीर्थेन निष्क्रमणम् ।

इत्याश्वलायनहौत्रं समाप्तम् ।

नित्यानां सकृदारम्भे काम्यानां तु पुनः पुनः ।
सोमसौत्रामणीवर्जमनारम्भः प्रवर्तते ॥

अथ दर्शे विशेषः । अग्निमग्न आ३वह । सोममावह । अग्निमावह । ॐ विष्णुमावह । इन्द्राग्नी आवह । देवानाज्यपेति समानम् ।

× × × ×

शेषं पूर्णमासवत् ।

सहैष यज्ञ उवाच । यत्कर्मणाऽत्यरीरिचम् । शन्नोऽस्तु द्विपदे शं चतुष्पदे । स यत्र शंयोराह ।

*Colophon.*—

इत्याश्वलायनहौत्रं समाप्तम् ।

*Post-Colophon:*—

संवत् १७३३ वर्षे माघ वदि १२ शुक्रे लिखितम् । दवे गोपीनाथसुत जोगेश्वरेण अमदावादमध्ये उदीच्यज्ञाति ।

---

## 279

## 584. हौत्रम् ।

## HAUTRA.

*By Dayāśaṅkara, son of Dharaṇīdhara.*

It seems to be a liturgical commentary on the Śāṅkhāyanaśrautasūtra. It is called Prayogaratnākara according to the colophon and this MS. contains only the Hautra Prayoga for the Darśapūrṇamāsa based on the first chapter of the Śrautasūtra.

*Beginning.*—

श्रीगणेशाय नमः । श्रीसिद्धेश्वर्यै नमः । अथ दर्शपूर्णमासयोर्हौत्रप्रयोगो लिख्यते । होता ऋत्विग्विशेषः । तस्य कर्म हौत्रम् । तस्य प्रयोगः । स च यद्यप्याधानेष्टीनां प्रथमं वक्तुमुचितस्तथापि तासां विध्यन्तसापेक्षत्वात्तस्य च दर्शपूर्णमासयोरेव श्रुतौ समाम्नातत्वादाचार्येण तयोरेवादौ प्रयोगो दर्शित इति बोध्यम् । तत्रादौ पूर्णमासेष्टिः । उपवसथदिनेऽग्न्युद्धरणम् । अग्न्यन्वाधानं वैश्वदेवः । सायंप्रातरुद्धृताग्न्योर्होमः । ततो ब्रह्मवरणादिहविरासादनान्तेषु पदार्थेषु निवृत्तेषु अध्वर्युणा एहि होतरित्याहूतो होता स्नानाचमनादिना शुद्धः सन् यज्ञोपवीती प्रागुदगाहवनीयाद्यो देशस्तस्मिन् प्राङ्मुखोऽवस्थाय निष्क्रम्य प्राङ्मुख एवोपविश्य स्मृत्युक्तविधिनाऽऽचमनं विधाय दक्षिणाङ्गपरिवर्तनेन प्रत्यङ्मुखो भूत्वा बर्हिराक्रमणपर्यन्तं सर्वेषु पादविक्षेपेषु दक्षिणं पादमग्रतो हरन् प्रणीतानामुत्करस्य च मध्ये कृत्वा आवर्त्य प्राङ्मुखो भूत्वा वृद्धसम्प्रदायाद्गार्हपत्याहवनीययोरन्तरालदेशादुत्तरतो दक्षिणपादस्याग्रिमभागेन प्रपदसंज्ञिकेन स्तीर्णाया वेदेर्बर्हिराक्रमणं कृत्वा पश्चाद्भागं वेदेर्बहिः पश्चिमदेशेऽवस्थाप्य सव्यपादं वेदेर्बहिः पश्चात्कृत्वा सव्यदक्षिणहस्तौ पृथक्पृथग्विरलाङ्गुलीकौ कृत्वा पुनस्तथाभूतावेव तौ पाणी परस्परसंहितौ च कृत्वा हृदयसंमितौ च धारयन् द्यावापृथिव्योः सन्धिमीक्षमाणो नोर्ध्वमधस्तिर्यगवेक्षमाणस्तिष्ठेत् ।

*End*:--

अग्निहोत्रेणेत्यादि पूर्वेण समानम् । इत्यसान्नाय्ययाजिनः । सान्नाय्ययाजिनस्तु विष्णुस्थानेऽग्नीषोमौ । उपांशु हविरजुषाताम० ऋतामिन्द्रो० कृत । अथवा महेन्द्रो हविर० कृत । देवा इत्यादि आहवनीयोपस्थानान्तं पूर्वेण समानम् । इति दर्शेष्टिप्रयोगः ।

*Colophon*:—

इति श्रीमद्व्यावहारिकोपनामधरणीधरसूनुना दयाशङ्करेण कृते शाङ्खायनसूत्रप्रयोगे प्रयोगरत्नाकराख्ये दर्शपूर्णमासयोः प्रयोगः ।

*Post-Colophon*:—

मासोत्तमे मासे मार्गशीर्षमासे शुक्लपक्षे तिथौ चतुर्थ्यां मन्दवासरे प्रथमप्रहरे शहर बडोद्यामयं ग्रन्थः समाप्तः स्वार्थं परार्थम् । संवत् १९०४ रामकृष्णचिन्तामणेन लिखितम् ।

---

## 280

### 586. हौत्रम् ।

### HAUTRA.

Duties of the Hotṛ priest in the Pavamāneṣṭi which is an auxiliary to the Ādhāna ceremony.

*Beginning*:—

अथ पावमानेष्टिहौत्रम् । नमः प्रवक्त्र इति । सप्तदश सामिधेन्यः । शोचिष्केशस्तमीमहे पृथुपाजा अमर्त्यो घृतनिर्णिक् स्वाहुतः । अग्निर्यज्ञस्य हव्यवाडन्तं साबाधो यतः स्रुचय च इत्थाधिया यज्ञवन्तः । आचक्रुरग्निमूतयो समिद्धो अग्न आहुतेत्यादि । आवाहने । अग्निमग्न आवह । सोममावह । अग्निं पवमानमावह । अग्निं पावकमावह । अग्निं शुचिमावह ।

*End*:—

सूक्तवाके । अग्निरिदं० कृत । सोम इदं० कृत । अग्निरिदं० कृत । अग्निः पवमान इदं० । अग्निः पावक इदं० । अग्निः शुचिरिदं० । इन्द्राग्नी इदं० । जुषेता० ऋताम् । अदितिरिदं० ऋत । देवा आज्यपा इत्यादि संस्थाजपान्तं प्रकृतिवत् ।

*Colophon*:—

इति पावमानेष्टिः ।

---

## 281

### 595. हौत्रम् ।

### HAUTRA.

Duties of the Hotṛ priest in the Atipavitreṣṭi according to the Āśvalāyana school.

*Beginning:—*

श्रीगणेशाय नमः । अथ पवित्रेष्टिहौत्रप्रयोगः । सप्तदश सामिधेन्यः । शोचिष्केशस्तमीमहोमपामिदं न्ययनं समुद्रस्य नि० शिवो भवों३ नमस्ते हरसे० शिवो भवों३ समिद्धो अग्न आहुतेत्यादि । आवाहनकाले । आज्यभागावावाह्य । अग्निं पवमानमावह० । उपांशु सरस्वतीं प्रियामावहेत्युच्चैः । अग्निं पावकमावह । ३ । उ० सवितारं सत्यप्रसवमावह । ४ । अग्निं शुचिमावह उच्चैः । ५ । उ० वायुं नियुत्वन्तमावह । ६ ॥

*End :—*

अग्निरनीकवानिदं० उ० प्रजापतिरिदं० अग्निर्व्रतभृदिदं० उ० सवित इदं० देवा आज्यपामित्यादि शेषं समानम् । इयमिष्टिराश्वलायनबौधायनापस्तम्बसूत्रानुसारिणाम् । अस्या अतिपवित्रेष्टेर्हौत्रमाश्वलायनीयम् । बौधायनशाखिनां तु तत्सूत्रोक्तम् ।

*Colophon —*

इत्यतिपवित्रेष्टिहौत्रप्रयोगः ।

*Post–Colophon.—*

बावाचार्याणामिदं ध्रुवम् ।

---

## 282

### 599. हौत्रम् ।

### HAUTRA.

Duties of the Hotṛ priest in the Āśesti according to the Āpastamba-śrautasūtra. The MS. is incomplete.

*Beginning:—*

श्रीगणेशाय नमः ।

ॐ अथ सूत्रे एकोनविंशतितमेऽध्याये काठके तृतीयप्रश्नोक्ता इष्टयस्ताः स्वर्गकाम उक्ताः । तासां हौत्रप्रयोगो लिख्यते । तत्रादौ आशेष्टिः । होता तीर्थेन प्रविश्य नमः प्रवक्त्र इत्यादि सप्तदश सामिधेन्यः शोचिष्केशस्तमीमहों३ पृथुपाजा अमर्त्यो घृतनिर्णिक्स्वाहुतः ।

*End:—*

ये३ यजामहे कामं कामस्तदग्रे समवर्तताधिमनसोरेतः प्रथमं यथाऽऽसीत् । सतो बन्धुमसति निरविन्दन्हृदि प्रतीथा कवयो मनीषा३ वौ३ षट् । अनुमतिस्विष्टकृतोर्याज्यानुवाक्याः पूर्ववत् । ये३ यजामहेऽग्निं स्विष्टकृत० प्रिया धामान्ययाट् कामस्य ।

---

## 283

### 600. हौत्रम् ।

### HAUTRA.

Duties of the Hotṛ priest in the Anīkavateṣṭi, one of the auxiliaries of the Sākamedhaparvan in the Cāturmāsya.

*Beginning:—*

श्रीः । अथ साकमेधाः । पूर्वोक्तास्तिस्र इष्टयोऽनुसवनम् । अथानीकवतेष्टिः । पौर्णमासं तन्त्रम् । अग्नि० सोम० अग्निमनीकवन्तमा३ वह । देवां० । उत्तमे प्रयाजे । ये३ यजामहे स्वाहाऽग्निं स्वाहा सोमं स्वाहाग्निमनीकवन्तं स्वाहा । देवा० । वार्त्रघ्नावाज्यभागौ । प्रधानम् । अनीकवन्तमूतयेऽग्निं गीर्भिर्हवामहे ।

*End:—*

ये३ यजामहेऽग्निं स्विष्टकृतमयाडग्निरग्ने. प्रि० सोमस्य० ळग्नेरनीकवन्तः प्रिया धा० देवा० हविरग्ने यद्द्य० अया३ वौ३ षट् । तिस्रोऽनुयाजाः । सूक्तवाके । अग्नि० सोम० अग्निरनीकवानिदं हविरजु० देवा० । अन्यत्सर्वं प्रकृतिवत् । सिद्धमिष्टिः सन्तिष्ठते ।

*Post-Colophon:—*

शके १६६८ क्षयाब्दे फाल्गुनशुक्ल ११ वारे भौमस्तथैव च । हस्ताक्षरलक्ष्मणस्य ।

---

## 284

### 601. हौत्रम् ।

### HAUTRA.

Duties of the Hotṛ priest in the Ādityeṣṭi of the Sākamedhaparvan.

*Beginning.—*

श्रीः । अथादितेष्टिः । नमः प्रवक्त्र इत्यादि । सप्तदश सामिधेन्यः । आवाहने । अग्नि० सोम० । अदितिमा३ वह । देवां० । पञ्च प्रयाजाः । उत्तमे प्रयाजे । ये यजामहे स्वाहाऽग्निं स्वाहा सो० हादितिं स्वाहा देवा० । पुष्टिमन्तावाज्यभागौ ।

*End:—*

तिस्रोऽनुयाजादि पूर्ववत् । सूक्तवाके । अग्नि० सोम० अदितिरिदं० । देवा० । अन्यत्सर्वं प्राकृतवत् । सिद्धमिष्टिः सन्तिष्ठते ।

*Colophon:—*

इति साकमेधपर्व समाप्तम् ।

*Post-Colophon:—*

शके १६६८ क्षयनामसंवत्सरे फाल्गुनशुद्ध १२ वारो बुधस्तथैव च । हस्ताक्षरलक्ष्मणस्य ।

---

## 285

### 602. हौत्रम् ।

### HAUTRA.

This is a guidance to the Hotṛ priest for his duties in the Jāteṣṭi.

*Beginning*:—

श्रीगणेशाय नमः । अथ जातेष्टिहौत्रम् । नमः प्रवक्त्र इत्यादि । सप्तदश सामिधेन्यः । आवाहने । अग्निमग्न आ३वह । सोममा३वह । अग्निमा३वह । अग्निं वैश्वानरमा३वह । देवां आज्यपामित्यादि । उत्तमे प्रयाजे । ये३यजामहे स्वाहाऽग्निं स्वाहा सोमं स्वाहाऽग्निं स्वाहाऽग्निं वैश्वानरं स्वाहा देवां आज्यपामित्यादि ।

*End*:—

सोम इदं० । अग्निरिदं० अग्निर्वैश्वानर इदं० । देवां आज्यपामित्यादि । शेषं प्रकृतिवत्समानम् ।

*Colophon*:—

इति जातेष्टिहौत्रं समाप्तम् ।

*Post-Colophon* —

शके १६६८ क्षये तु संवत्सरे फाल्गुन्यां सप्तम्यां गुरुवासरे उम्रजकरित्युपनामलक्ष्मणेन लिखितम् ।

---

## 286

### 603. हौत्रम् ।

### HAUTRA

For the Kāririṣṭi.

*Beginning*:—

श्रीगणेशाय नमः । अथ कारीरीष्टिहौत्रप्रयोगः । शोचिष्केशस्तमीमहों३ प्रतित्यं चारुमध्वरं गोपीथाय प्रहूयसे । मरुद्भिरग्न आगहीं३ मीळेऽग्निं स्ववसं नमोभिरिह प्रसत्तो विचयत्कृतन्न. । रथैरिव प्रभरेवाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्यों३ समिद्धा अग्न० इत्यादि० । आवाहने । अग्निमग्न आवह ।

*End.*—

ये३ यजामहेऽग्निमातेसुपर्णा अमिनन्तमेवैः कृष्णो नो नाववृषभो यदीदम् । शिवाभिर्न स्मयमानाभिरागात्पतन्ति मिहस्तनयंत्यभ्रा३वौ३षट् ।

*Colophon*:—

इति कारीरेष्टिहौत्रप्रयोगः समाप्तः । सृजन्ति रश्मिमोजसा० । ते भानुभि० । वह्निष्टेभिर्विहरं० । दावध्वतोरश्मय० ।

*Post Colophon* —

संवत् १८०४ शके १६६९ प्रमवनामसंवत्सरे कार्तिक्यां कृष्णपक्षे प्रतिपद्यां वारो मन्दस्तथैव च ।

---

**287**

604. हौत्रम् ।

HAUTRA.

Duties of the Hotṛ priest in the Savaneṣṭi.

*Beginning.—*

श्रीमहागणपतये नमः । सवनेष्टिहौत्रम् । नमः प्रवक्त्र इति । पञ्चदश सामिधेन्यः । आवाहने । अग्निमग्न आवह३ सोममावह३ अग्निमावह३ इन्द्रमावह विश्वान्देवानावह देवान् आज्यपानावह इत्यादि । ये३ यजामहे स्वाहाऽग्निं स्वाहा सोमं स्वाहाऽग्निं स्वाहेन्द्रं स्वाहा विश्वान् देवान् स्वाहा देवां आज्यपामित्यादि । वार्त्रघ्नावाज्यभागौ । अग्निर्मूर्धा० । भुवो यज्ञस्य० ।

*End.—*

विश्वे देवा इ० जुषन्ता० धं-कृत आज्यपा इत्यादि संस्थाजपान्तम् । सिद्धमिष्टिः सन्तिष्ठते ।

---

**288**

605. हौत्रम् ।

HAUTRA.

A guidance to the Hotṛ priest in the Putreṣṭi.

*Beginning:—*

अथ पुत्रेष्टिः । नमः प्रवक्त्र इति । पञ्चदश सामिधेन्यः । आज्यभागावावाह्य । अग्निं पुत्रवन्तमावह३ । देवां आज्यपामित्यादि । उत्तमे प्रयाजे । ये३० महे । स्वाहाग्निम् । स्वाहा सोमम् स्वाहाग्निं पुत्रवन्तम् । स्वाहा देवां आज्यपामित्यादि । वार्त्रघ्नावाज्यभागौ । प्रधानस्य ।

*End:—*

अग्निरिदं० सोम इदं० । अग्निः पुत्रवानिदं० । कृत । देवां आज्यपामित्यादि । संस्थाजपान्तम् । सिद्धमिष्टिः सन्तिष्ठते ।

*Colophon:—*

इति पुत्रेष्टिः समाप्ता ।

---

**289**

608. हौत्रम् ।

HAUTRA.

For Sāntapaneṣṭi.

*Beginning*:—

अथ सान्तपनेष्टिः ।

आमावास्यं तन्त्रम् । अग्नि० सोम० मरुतः सान्तपनानावह । देवाँ० । उत्तमे प्रयाजे ये३ यजामहे । स्वाहाऽग्निम् । स्वाहा सोमम् । स्वाहा मरुतः सान्तपनान् । स्वाहा देवान् ।

*End*:—

सूक्तवाके । अग्नि० । सोम० मरुतः सान्तपना इदं० । षं० षं० कत० देवा० । अन्यत्सर्वं प्राकृतवत् । सिद्धमिष्टिः सन्तिष्ठते ।

*Colophon*:—

सान्तपनेष्टिहौत्रं समाप्तम् ।

*Post-Colophon*::—

शके १६६८ क्षयनामसंवत्सरे फाल्गुन शुक्ल ११ वारे भौमस्तथैव च । हस्ताक्षर लक्ष्मणस्य ।

---

**290**

609. हौत्रम्

HAUTRA.

A guidance to the Hotṛ priest in the Traidhātavīyā.

*Beginning*:—

त्रैधातवीयाहौत्रमुच्यते । मयि गृह्णाम्यग्रेऽग्निमित्यादि । सप्तदश सामिधेन्यः । शोचिष्के शस्तमीमहोम् । प्रवो० अग्ने तनोति ।

*End*:—

सूक्तवाके इन्द्राविष्णू० इदं हविरजुषेतामवीवृधेताम् महोज्यायोऽक्राताम् । देवा आज्यपा इत्यादि प्रकृतिवत् ।

*Colophon*.—

सन्तिष्ठते त्रैधातवीया ।

---

**291**

611. हौत्रम् ।

HAUTRA.

Duties of the Hotṛ priest in the Cāturmāsya sacrifice according to the Hiraṇyakeśīyaśrautasūtra.

*Beginning*:—

श्रीगणेशाय नमः ।

ॐ अथ याजुषहिरण्यकेशिसूत्रोक्तचातुर्मास्यहौत्रप्रयोगः । अध्वर्युणा होतरेहीत्युक्ते होता आचमनादि कृत्वा । अन्वारम्भणीयायां पञ्चदश सामिधेन्यः । प्रवोवाजा अभिद्यव इत्यादि ।०

आवाहने अग्निमग्न आवह । सोममावह । अग्निं वैश्वानरमावह । पर्जन्यमावह । देवान् आज्यपा इत्यादि । उत्तमे प्रयाजे ये यजामहे । भूर्भुवः सुवः स्वाहा । अग्निं स्वाहा । सोमं स्वाहा । अग्निं वैश्वानरं स्वाहा । पर्जन्यं स्वाहा । देवा आज्यपा इत्यादि ।

*End*:—

सूक्तवाके अग्निरिदमित्यादि पूषान्तम् । इन्द्राग्नी इदं ह० षेतामवीवृधेतां महो ज्यायोऽक्रातां विश्वेदेवा इद० षंता० धंत० क्रत । इन्द्रः शुनासीर इदं ह० क्रत । वायुरिदं ह० क्रत । उपांशु सूर्य इदं हवि० क्रत महो ज्याय इत्युच्चैः । देवा आज्यपा इत्यादि । अनुवत्सरीणां स्वस्तिमाशास्ते । दिव्यं धामाशास्ते । वाजिनवर्जं सर्वं वैश्वदेववत् । सन्तिष्ठते शुनासीरीया ।

*Colophon*:—

इति वैजयन्त्यनुसारेण हिरण्यकेशिचातुर्मास्यहोत्रः समाप्तः ।

*Post-Colophon*:—

शके १७०३ प्लवनाम संवत्सरे आश्विनकृष्णदशमीभृगुवासरे तद्दिनी गोडशालोपनामक-रामसुतजनार्दनेन लिखितं श्रीकृष्णावेणीसन्निधौ ।

---

## 292

### 613. हौत्रम् ।

### HAUTRA.

Another Hautraprayoga for the Cāturmāsya sacrifice according to the Āśvalāyanaśrautasūtra.

*Beginning*.—

श्रीशं वन्दे । अथ बौधायनीयाध्वर्यवादि परिगृह्णानस्य बह्वृचस्याश्वलायनसूत्रोक्तः चातुर्मास्यप्रयोगः । चातुर्मास्यानि प्रयोक्ष्यमाणः ० ज्येष्ठ्यां० । आवाहने अग्निमग्न० सोम० उपांशु अग्निं वैश्वानरमावह । उपां० पर्जन्यमावह । देवां आज्यपानित्यादि । उत्तमे प्रयाजे । स्वाहा सोमं स्वाहा उपां अग्निं वैश्वानरं स्वाहा उपां० पर्जन्यं स्वाहा देवा० । वार्त्रघ्नावाज्यभागौ ।

*End*:—

स्विष्टकृतः । प्रेद्धो अग्ने० पूष्ण. प्रि० ळिंद्राग्न्योः प्रि०ड्विश्वेषां देवानां प्रि० ळिन्द्रस्य शुनासीरस्य प्रि० द्रच्छुनासीरयोः प्रि० ळिन्द्रस्य शुनस्य प्रि० व्वायोः प्रि० व्वायोर्नियुत्वतः प्रिया० उ० सूर्यस्य प्रि० द् देवानामा० । हविरिमो० अग्ने० नवानुयाजाः । सूक्तवाके पूर्वेदं० ५ इन्द्राग्नी इदं ६ विश्वे देवा इदं ७ इन्द्रः शुनासीर इदं ८ पत । शुनासीराविदं० पेता० क्रातां । इन्द्रः शुन इदं० षतां० ८ वायुरिदं० षत । वायुर्नियुत्वानिदं० पत ९ उ० सूर्य इदं० षतावी० १० । देवा आज्य० संस्थाजपान्तम् । आभिर्गीर्भिरित्यादि । इति शुनासीरीया ।

*Colophon*:—

इति चातुर्मास्यानां होत्रम् । श्रीशं वन्दे । अनन्तदेवीयचातुर्मास्यप्रयोगे केचिद्विशेषाः सन्ति ।

---

## 293

### 614. हौत्रम् ।

### HAUTRA.

For the Cāturmāsya sacrifice according to the Āśvalāyanaśrautasūtra.

*Beginning.—*

श्रीगणेशाय नमः । अथ चातुर्मास्यहौत्रम् । वैश्वानरपार्जन्येष्ट्यां वैश्वानरोऽग्नि-वैश्वानरो वा पर्जन्यश्च । आवाहने अग्निमग्न आ३वह । सोममा३वह । अग्निं वैश्वानरं उपांशु । आ३वहेत्युच्चैः । पर्जन्यं उपांशु आ३ वहेत्युच्चैः । देवा आज्यपा इत्यादि । प्रधानदेवतयोरुपांशुत्वम् । उत्तमे प्रयाजे । ये३यजामहे स्वाहाऽग्निं स्वाहा सोमं स्वाहाऽग्निं वैश्वानरं उ० स्वाहा पर्जन्यम् । स्वाहा देवा आज्यपा इत्यादि । वार्त्रघ्नावाज्यभागौ ।

*End:—*

स्विष्टकृतः । प्रेद्धो अग्ने० ये३ यजामहेऽग्निं स्विष्टकृत० पूषांत० अयाळिन्द्राग्न्योः प्रिया धामान्ययाट् विश्वेषां देवानां प्रिया० ळिन्द्रस्य शुनासीरस्य प्रि० उ० सूर्यस्य प्रि० देवानामित्यादि० हविरिमो अग्ने० । नवानुयाजाः । सूक्तवाके । अग्निरिदमित्यादि पूषान्तम् । इन्द्राग्नी० जुषेतामवीवृधेताम्० क्रातां ज्यायोः प्रि० विश्वेदेवा० जुषन्तावीवृधन्त० क्रत । इन्द्र शुनासीर इदं० क्रत । वायुरिदं० सूर्यः० देवा आज्यपा इत्यादि० संस्थाजपान्तं समानम् ।

*Colophon:—*

सन्तिष्ठते चातुर्मास्यहौत्रम् ।

*Post-Colophon.—*

शके १७११ सौम्यनामसंवत्सरे आषाढ शुद्ध दशमी ते दिवशी गोविन्दात्मज रघुनाथभट्टनान्दुरकरेण लिखितम् ।

---

## 294

### 629. हौत्रम् ।

### HAUTRA.

For the Kevalātirātra. The MS. is incomplete and injured.

*Beginning—*

केवलातिरात्रस्य प्रयोग उच्यते । मधुपर्कादि । आग्निमारुतान्तमग्निष्टोमवत् । पशुकाले सारस्वतीमिष्टिम् । ततो विख्यातषोडशीशास्त्रशंसनम् । ॐ स्वरो मध्वर्चा शो रों सोममिन्द्र जुषस्व प्रव आयाहि ।

*End:—*

अथाहृतं षोडशीपात्रं समुपहवं भक्षयन्ति । इन्द्र षोडशी सूजिन्विस्तं देवेष्वन्वे......... वर्चस्वन्तं मनुष्येषु कुरुत स्वत इन्द्रपीतस्यानुष्टुप्छन्दस उपहूतस्योपहूतो भक्षयामि । अपाम सोममित्यादि । नाप्यायनम् ।

अथ रात्रिपर्यायः ।

---

**295**

630. **हौत्रम् ।**

HAUTRA.

For the Sāgnicidatirātra. The MS. is incomplete and injured.

*Beginning.—*

साग्निचिदतिरात्रप्रयोग उच्यते । वरणमधुपर्कानन्तरं वायव्यपशुस्तस्य कर्म । पश्विष्ट्यादि पश्वावाहनान्तं निरूढवत् । आवाहनकाले आज्यभागावावाह्य वायुं नियुत्वन्तमावह वनस्पतिमावह देवां आज्यपामित्यादि प्रयाजानां विशेषः ।

*End:—*

आग्नेयः पशुः ।

---

**296**

631. **हौत्रम् ।**

HAUTRA.

For the Bṛhaspatisava. The MS. is injured.

*Beginning.—*

हरिः ॐ । आधिपत्यकामो ब्रह्मवर्चसकामो वा बृहस्पतिसवेन यजेत । वरणमधुपर्कादि । दीक्षणीयादि सर्वमग्निष्टोमवत् । तस्य तृचा सूक्तस्थानेष्विति वचनात् सूक्तस्थानेषु तृचा एव भवन्ति । सवनीयस्य पशोः कृत्वा आवाहनकाले आज्यभागावावाह्य अग्निमावह बृहस्पतिमावह वनस्पतिमावह इन्द्रं वसुमन्तमावहेत्यादि ।

*End:—*

अनूयाजाद्युदवसानीयान्तमग्निष्टोमवत् ।

*Colophon:—*

बृहस्पतिसवहौत्रं सम्पूर्णम् ।

---

**297**

632. **हौत्रम् ।**

HAUTRA.

For the Sautrāmaṇi.

*Beginning.—*

अथ सौत्रामणिहौत्रप्रयोगः । अथाग्निप्रणयनं पूर्ववत् । यूपाया० हीत्युक्ते निरस० कृत्वा ही० मज्जन्ति । अथाग्निमथनम् । सप्तदश सामिधेन्यः । तस्य ऐन्द्राग्नवत्कल्पः । विशेषस्तूच्यते । आश्विनसारस्वतैन्द्राः पशवः । बार्हस्पत्यस्तु विकल्पेन चतुर्थः । आश्विनश्छागः । सारस्वतैन्द्रौ मेषौ । सारस्वती मेषी ऐन्द्रो मेषः । ऐन्द्रसावित्रवारुणाः पशुपुरोडाशाः । आवाहनकाले । अग्निमग्न आवह । सोममावह । अश्विनावावह । सरस्वतीमावह । इन्द्रमावह । वनस्पतिमावह । ततो ग्रहदेवताः सर्वाः पृथगादिश्य सकृदावाहयेत् ।

*End:—*

अथ पुरोडाशस्य । हेसंयस्तुभो वनयो न सन्ति समुद्रं न स्रवतो रोधचक्राः । सं विद्वानुभयं चष्टे अन्तर्बृहस्पतिस्तर आपश्च गृध्रो वौषट् । ये३ हव्यापित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः । बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम् । वो३ । सौत्रामण्यामैवैन्द्रमृषभं केचिदिच्छन्ति । तैः सह प्रयोगे मेषशब्दस्थाने गोशब्दोस्रशब्दयोरन्यतरः प्रयोक्तव्यः ।

*Colophon:—*

इति सौत्रामणिहौत्रप्रयोगः ।

*Post-Colophon.—*

शके १७३५ श्रीमुखनामसंवत्सरे ज्येष्ठवद्य ५ भृगुवासर ते दिवसि माचेगणोपनामक बाळम्भट्टात्मजमाधवेन लिखितम् ।

---

## 298

### 634. हौत्रम् ।

### HAUTRA.

For the Aıkāhıkacāturmāsya.

*Beginning.—*

श्रीगणेशाय नमः । ऐकाहिकचातुर्मास्यहौत्रप्रारम्भः । नमः प्रवक्त्र इत्यादि । सप्तदश सामिधेन्यः । आवाहने । अग्निमग्न आवह । सोममावह । अग्निमावह । सोममावह । उपांशु सवितारम् । उच्चैः सरस्वतीमावह । पूषणमावह । मरुतः स्वतवस आवह । विश्वान्देवानावह ।

*End:—*

अग्नेरनीकवत इदं० कृत । मरुतः सांतपना इदं० षत० क्रत० मरुतः क्रीडिन इदं० षं० क्रत । इन्द्र इदं कृत विश्वकर्मा इदं० कृत । अदितिरिदं० कृत । इन्द्राग्नी इदं० षेतां० क्राताम् । विश्वेदेवा इदं० षं० क्रत । इन्द्रः शुनासीर इदं० कृत । वायुरिदं० कृत । सूर्य इदं० कृत । देवा आज्यपा इत्यादि । शंयुवाकान्ते वाजिनयागः । अथावभृथं वरुणप्रघासवत् । ततः संस्थाजपः ।

*Colophon:—*

इति ऐकाहिकचातुर्मास्यहौत्रं समाप्तम् ।

*Post-Colophon:—*

